2aEK सौभरिकृता एकार्थनाममाला

१

प्रणम्य सुधियां नाथं देवदेवं रमापतिम् ।

एकार्थनाममालां तु कुर्वे चेतः प्रसादनीम् ।।

२

अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनिलोऽनलः ।

सूर्यः प्राणो यमः कालो वसन्तः प्रणवः सुखी ।।

३

आः स्वयंभूरिभो वाजी खेदः शंकरवासवौ ।

पारिजातः समः प्राज्ञो निवासश्चणकः सुतः ।।

४

इः कामः स्थाणुरिन्द्रोऽर्को वरुणः पादपो द्विपः ।

शुचिः श्रीमानजो बालो विरञ्चिः कृत्तिकासुतः ।।

५

ईरीश्वरो भवेच्छत्रुः पुरुषः करुणोऽरुणः ।

अप्रजाः सुप्रजाः शङ्कुर्मुकुरो नकुलोऽकुलः ।।

६

उर्गौरीपतिरुः कालः सेतुर्नाथः परायणः ।

नारदोऽर्कोऽनिलः पाशी मार्कण्डेयोऽथ रावणः ।।

७

ऊः परेतोऽण्डजस्त्वष्टा विवस्वानग्निसारथिः ।

वह्निर्निशाकरः पूर्णो दरिद्री सरमाधिपः ।।

८

ऋःृर्निऋतिर्नलो नाकः खगराडथ वासुकिः ।

शालः पितृस्वसुः पुत्रोऽदितिर्दितिरुमा रमा ।।

९

ॠर्निषेधो भवः पूषा वरुणोऽमरराडजः ।

करी तरुर्नरः पाप्मा विद्वानथ रमापतिः ।।

१०

लृर्म्लेच्छोऽरुणवर्णः स्यात्क्लीबः पापी पराजितः ।

वीतरागोऽथ पाखण्डी कमलं मरणं च लृ ।।

११

लृर्महात्मा सुरो बालो भूपः स्तोमः कथानकः ।

मूर्खः शिश्नो गुदः कक्षा केशः पापरतो नरः ।।

१२

एः कुमारोऽसुरोऽरातिर्ज्ञातीयोऽहित उद्धतः ।

आत्मा शेषो विवस्वांश्च कृतार्थो मध्वरिः शरः ।।

१३

ऐः क्रूरो धरणीनाथः पूरो मारोऽमरोऽसुरः ।

कुलालो राधरः प्राज्ञो मन्दः पुत्रोऽथवा नरः ।।

१४

ओर्वेधा ज्ञो ध्रुवोऽगस्त्यो गरुडोऽगोऽक्षयोऽसुरः ।

आखुः काणोऽथ मार्जारः साधुः सङ्गः पराशरः ।।

१५

औः श्वा युवा नरो नारी भावः सूक्ष्मः प्रजापतिः ।

स्थूलो जारः कलावांश्च सुखी दुर्गा रतिः कविः ।।

१६-

अं सुखं कश्मलं दुःखं पूर्णं दूरं गतं वरम् ।

अः प्रागुक्तो जिनाघेषु विष्णुभृत्येन यः स्तृतः ।।

१७

को ब्रह्मा का मही दुर्गा किः सुग्रीवो रमापतिः ।

आखण्डलोऽथ सूर्योऽग्निर्व्याधः कर्षक इत्यपि ।।

१८

कीर्गजस्तुरगो व्यालो जारो जीवः पिपीलिका ।

धरा रमा च द्विट् रुट् च पुरुषः पाटलश्च गौः ।।

१९

कुः पृथ्वी कुः कुचः कूलं कूः कृत्या भूरपि स्मृता ।

केः प्राणोऽर्को मदः सारः क्लीबः कैः प्रणतः शुचिः ।।

२०

कोः कुर्कुरो जनः श्यावः श्यानः शोकश्च कौर्वृषः ।

कं शिरः कं सुखं तोयं पयो दुःखं विषं भयम् ।।

२१

कः प्रागुक्तोऽथ खः सूर्यः खो मा क्ष्मा कमला च गीः ।

खिः कामः खीर्गुदो धाता खुर्वह्निः खूर्बृहस्पतिः ।।

२२

खेः प्राणः खैर्भवो भ्राता पुत्रः खोः खञ्ज उच्यते ।

खौः सुरेशोऽग्निरीशोऽर्कः खं व्योम च खमिन्द्रियम् ।।

२३

खः प्रागुक्तोऽथ गः प्रीतो भवः श्रीपतिरुत्तमः ।

गा क्ष्मोमा च रमा गिर्धीर्गीः श्रीमानथ बुद्धिमान् ।।

२४

गीर्वाणी गीः सुरा पत्नी सुधा गुः प्राण आसवः ।

गुः कान्तिर्मदनो भीरुर्गूश्च सेतुः सखा रविः ।।

२५

गुरुः पुरीषं गूः श्वादो गेः पापी जनवञ्चकः ।

गैः पलाशोऽप्यशोकोऽग्निः सूर्यो गोर्द्विपदः करी ।।

२६

गोर्वज्रं गौः प्रभा भूमिर्वाणी तोयं त्रिविष्टपम् ।

धेनुर्बस्तो वृषो दिग्गौर्नेत्रं लज्जा गुरू रमा ।।

२७

इन्द्रियं श्रीरुमा गं च वादित्रं शरणं वरम् ।

गः प्रागुक्तोऽथ घः सूनुर्वह्निः पूषा नृपो गजः ।।

२८

घा रमा च शची दुर्गा भूमिर्घिर्धृतधर्मकः ।

घीः कुमारोऽमराचार्यो घुर्मूढोऽकरुणः फणी ।।

२९

घूर्भूमिर्घूः सुराधीशो गुदः संकर्षणोऽमलः ।

घेः शङ्खः कुर्कुरः कीलो घैः सूर्यः सरमासुतः ।।

३०

घोर्घोषो घौः सुरावासः पाप्मा घं पापमुच्यते ।

घः प्रागुक्तोऽथ ङः प्राणस्तुरगो ङा धरा रमा ।।

३१

ङिर्बीभत्सुर्नृगः सूक्ष्मो ङीर्भूपः कृकलासपः ।

ङुः सूकरोऽथ ङूर्व्याघ्रो ङेः सूतो ङैः पराशरः ।।

३२

ङोश्च सिंहोऽथ ङौः सूर्योऽरुणो वह्निः कलानिधिः ।

ङं वितानं सुखं ब्रह्म सर्पिस्तोयं विषं पयः ।।

३३

ङः प्रागुक्तोऽथ चश्च चुश्चरणोऽर्चिर्मुखो रविः ।

चा कद्रूरदितिः कन्या चिः पूषा माष एव च ।।

३४

ची मषिर्दन्तिपत्नी स्याच्चुः कालोऽथ पविः शरः ।

भीरुश्चूर्मार्गणोऽपि स्यात्पक्षी भूमिजराड्रविः ।।

३५

चेः कृष्णोऽर्कस्तुराषाट् च चैः सोमो विनतासुतः ।

चोः पाखण्डी च चौर्धेनुरनड्वानग्निरुद्धतः ।।

३६

चं चरित्रं सुखं दुःखं कश्मलं भ्रमणं पयः ।

चः प्रागुक्तोऽथ छः सोमः छा च रुट् छिः कुलालकः ।।

३७

छी छविश्छुः शुकश्छूर्भूश्छेः पाशी छैः सुरालयः ।

छोः पूर्णोऽलंकृतो वायुश्छौः समीरस्तरुर्नगः ।।

३८

छमर्चिर्भूतलं स्व स्यात्कूटं कूलं मुखं कुलम् ।

छः प्रागुक्तोऽथ जो जारो जा योनिर्जिः सदाशिवः ।।

३९

जीर्जिष्णुः करुणो यूका जुर्विष्णुर्जूः कुलालजः ।

जेः शुनीजोऽथ जैः पूषा वह्निर्जोः कमलासनः ।।

४०

जौर्जारोऽजो युवा जं च जातं रजतमेव च ।

जः प्रागुक्तोऽथ झो हस्तो झा योनिर्झिः कला कपिः ।।

४१

झीः करी झुर्भृगुर्झूश्च ध्रुवः संघोऽमरोऽरुणः ।

झेश्चर्मकृद्भवः सोमो रोमा रामोऽथ झैर्गुरुः ।।

४२

झोः कर्णो झौः स्मृतो नाको झं मैथुनमिति स्मृतम् ।

झः प्रागुक्तोऽथ ञश्चाग्निर्ञा जरा राशिरेव च ।।

४३

ञिः सम्राड् ज्ञानवृद्धोऽग्निर्ञीः पाखण्डी सुराप्रियः ।

ञुः सुनेत्रा ञूः सुवासा ञेः कार्तस्वरसंनिभः ।।

४४

ञैः कृष्णा ञोः पलाशः स्याद् ञौर्गौः पाखण्डवाक्करी ।

पूर्वा ध्रुवा च ञं सर्पिः परं ब्रह्म निगद्यते ।।

४५

ञः प्रागुक्तोऽथ टः प्लीहो मूत्रकृच्छ्रोऽथ पिप्पलः ।

टासूया टिः करेणुर्भूः सरमा टीर्धराधरः ।।

४६

टुः कङ्कणोऽथ चूडः स्याट्टूर्ननन्दा स्वसा च भीः ।

टेः काणष्टैर्द्विडन्धः स्याट्टैः प्रोतो नभसी हयः ।।

४७

टोः परेतो गुरुः शिष्यः टौर्विनीतो देवो वृषः ।

टं नेत्रं श्रवणं पात्रं भ्रमणं मरणं तथा ।।

४८

टः प्रागुक्तोऽथ ठः सूनुर्ज्ञानी मध्वरिरेव च ।

वाचालः शून्य आसारः ठा शून्या नासिकेत्यपि ।।

2aEK-4 ४९

ठिः कुमारोऽमरारातिष्टीः कुटुम्ब्यथ पुत्रवान् ।

ठुः कदम्बो यमस्त्वष्टा ठूः प्रज्ञा धृतिरेव च ।।

५०

ठेः समासोऽपि ठैर्व्यासः ठोः समष्टौश्च गौतमः ।

ठं ज्ञानं विवरं शून्यममृतं शारदं पयः ।।

५१

ठः प्रागुक्तोऽथ डः साथो डा क्ष्मा च सरमा रमा

डिर्गौरी डी शिवा धात्री डुश्र्चन्द्रो डूः कलापवान् ।।

५२

डेर्धर्मो डैर्वृषः कर्णो डोः पापी पुरूषाधमः ।

डौर्धेनुश्च करो जारो डं नेत्रं च पयस्तथा ।।

५३

डः प्रागुक्तोऽथ ढः श्वादः श्वा मार्जारस्तथा खरः ।

ढा नाभिर्ढिर्गुदो मेढ्रो वह्निरुत्कटः ।।

५४

ढुः कूर्मः सूकरो व्यालो ढूः कुचो ढेःकुरङ्गजः।

ढैर्मारो ढोः सुखी वर्यो ढौर्भूमिर्ढ पयो वरम् ।।

५५

ढः प्रागुक्तोऽथ णो नक्रो णा नाभिर्णिर्वृकोऽजरः ।

णीः स्वर्गो णुः करेणुर्भूर्णूः कालिन्दी सटा जरा ।।

५६

णेर्मार्जारो विडङ्गश्च णैः शृगाली हरीतकी ।

णोः सर्षपोऽथ णौर्माया णं दर्शनमिति स्मृतम् ।।

५७

तः सुवेषोऽथ ता नारी तिर्मूषक उमेश्वरः ।

तीर्नदी जलधिः प्रोत्तस्तुः सारङ्गो रमेश्वरः ।।

५८

तूर्म्लेच्छस्तेः करी नक्रस्तैः कलापी दितिः प्रसूः ।

तोः सूर्ये विघ्नकृत्स्वामी तौः स्वर्गो भूस्तथा गरः ।।

५९-

आचार्यो यजमानश्च तं तृणं जलमेव च ।

तः प्रागुक्तोऽथ थः सूर्यो गणेशो विनतासुतः ।।

६०

था धरित्री प्रभा गङ्गा थिर्गोदा यमुना तथा ।

थीः समुद्रो व्रणो रेवा थुः साक्षी थूः पराशरः ।।

६१

थेर्व्यासस्थैः शुकः प्रोक्तः थोर्धर्मो गाधिपुत्रकः ।

थौः शङ्खस्थं विषं कर्म बहुलं सूक्ष्ममेव वा।।

६२

थः प्रागुक्तोऽथ दो दाता दा दात्री धरणी शुभा ।

दिर्दानी दिः सुधानाथो दुर्दरिद्री करोऽवरः ।।

६३

दूर्दुःखी देः स्मृता जाया दैर्मत्स्यो वामनर्षभः ।

दोर्हस्तश्चरणः शिश्नो दौः स्वर्गः प्राण आत्मजः ।।

६४

दं दानं शरणं कर्म भव्यं न्यूनमकिल्बिषम् ।

दः प्रागुक्तोऽथ धो धाता विष्णुर्वा गिरिजात्मजः ।।

६५

धा धरित्री रमा गौरी धिर्धर्मो धीर्वृकासुरः ।

धुस्तनुर्धूः करो भारो धेर्वृषो धैश्च रावणः ।।

६६

धोः पापी वृषणः पूषा धौर्धर्मः पृथिवी गिरा ।

धं धनं धूननं दानं धारणं करणं सुखम् ।।

६७

धः प्रागुक्तोऽथ नोऽभावो नास्तीति पुमान्गरिमा तथा ।

निर्दुर्गतिश्च नी रागो नुर्देहो नूः कलत्रवान्।।

६८

नेः समो नैः कुरङ्गोऽग्निर्नौस्तरिः पुरुषोऽमरः ।

नं नेत्रमञ्जनं श्रोत्रं करणं कारणं सुखम् ।

६९

नः प्रागुक्तोऽथ पः पापी पूषा आत्मजः ।

पापर्णा पिः पवित्रोऽग्निः पी स्मृताऽथ पिपीलिका ।।

७०

पुः पुत्रः पूः पुरं देहः पेः पेशी पैश्च गालवः ।

पोः पौत्रः पौः पुमान्भूमिः पं प्रीणनमृणं पयः ।।

७१

पः प्रागुक्तोऽथ फो माघः फा फूत्कारवती विषा ।

फुः कार्तिकोऽथ फूः सर्पो वासवः शरणागतः ।।

७२

फेः फाल्गुनोऽथ फैः शङ्खः फोः कालः फौः फणीश्वरः ।

गर्गो द्रोणो रणो बाणः फं फल्गु चारु च स्मृतम् ।।

७३

फः प्रागुक्तोऽथ बो बिम्बो बा स्मृता नर्मदासरित् ।

बिः पूपो बीर्बटुः पादो बेः साक्षी बैः कणो रणः।।

७४

बोः प्राणो बौः सरिद्गङ्गा बं बलं बहुलं स्मृतम् ।

बः प्रागुक्तोऽथ भः सोमो भा कान्तिर्मदिरेन्दिरा ।।

- ७५

भिः पत्नी भीश्च भीतिः स्याद्भुर्भुजंगोऽथ भूर्मही ।

जाता जातश्च भेः कान्तिर्भौर्ब्रह्मा वरुणो यमः ।।

७६

भैः प्रहारोऽथ भीरुः स्याद्बोः कंसो भौ रमपतिः ।

भं नक्षत्रं भयं ब्रह्म भरणं धरणं पयः ।।

(एकार्थनाममाल-७७

भः प्रागुक्तोऽथ मः स्तोमः सोमो रामो रणो गजः ।

मा जालन्ध्री व्यथा लक्ष्मीर्माता माः मास ईरितः ।।

७८

मिः कर्णो मीर्महाबाहुर्मुर्माता मूर्महाबलः ।

मेः सारङ्गोऽथ मैः पूषा सारथिः प्रणतो वरः ।।

७९

मोः पत्नी मौः सुरावासो मं गलं मलिनं पलम् ।

मः प्रागुक्तोऽथ यः पुञ्जः सुदेवीसूनुरीश्वरः ।।

८०

या योनिर्यिश्च संग्रामो यीर्गजः सारथिर्द्रुमः ।

युः सर्पे यूः स्मृता यूका येः सार्थो यैश्च वासवः ।।

८१

योः पादो यौः कणः स्वर्गो यं यत्नं करुणं मधु।

यः प्रागुक्तोऽथ रः कामो वह्निः सूर्योऽथ तोयधिः ।।

८२

रा लक्ष्मी राः समृद्धिः स्याद्रिः कर्पूरो महेश्वरः ।

रीः कामो नृगपत्न्यग्नी रुर्मृगो रूः प्रजापतिः ।।

८३

रेः खेदो वापि संबुद्धी रैः कुष्णो वर्ण उच्यते ।

रो रोषो रौर्भवः स्वर्गो रं रत्नं रोदनं धनम् ।।

८४

रः प्रागुक्तोऽथ लश्चरो लक्ष्मणो ललना च ला।

लिः सर्पो ली धरा लुर्भूर्लू रुद्रो गरुडोऽरुणः ।।

८५

लेर्लवो लैः कुशो रामी लोर्मत्स्यो लौः प्रजापतिः ।

लं लक्ष्मणं सुखं नाम रक्षः श्रोत्रं वचो विषम् ।।

८६

लः प्रागुक्तोऽथ वः पङ्गुः सुखी वा त्रिदशप्रसूः ।

विः पक्षी गरुडः सूर्यो जलधिः सोम उच्यते ।।

८७

वीर्विष्णुर्वुः पदातिः स्याद्वूः संघो गज उच्यते ।

वेः पारिजातो वैः सारो वोः कालो वौः सुखावहः ।।

-८८

वं सुखं वसनं रक्तं वपुर्वचनमासुरम् ।

वः प्रागुक्तोऽथ शः शंभुः शा गौरी कमलालया ।।

८९

शिः पक्षी श्यथ सौभाग्यः शिशुः शुः शार्क्करोऽचलः ।

शूः शूद्रः शेः शिरीषोऽगः शौः स्मृतो धन्धुहा नृपः ।।

९०

शोर्दोषः शौः शिशुः शाङ्खः शं सुखं शरणं वपुः ।

शः प्रागुक्तोऽथ ष षञ्जो वाह्निः सूर्यो रणः कणः ।।

९१

पारिखा षा खरी शावा षिः शङ्खो वर्तुलः स्मृतः ।

षीः पुत्रः षुः खुरः पूरः षूः सोमो म्लेच्छ एव च।।

९२

षेः सार्थः षैः खरः पारः षोर्देहो मलिनो जनः ।

षौः खट्वा धरणी बुद्धिः षं सस्यं मधु धारणम् ।।

९३

षः प्रागुक्तोऽथ सः सूर्यः सा सीता सिः सखामरः ।

सीः सुखी सुः कुठारोऽर्कः रूर्धरा गर्भिणी नरी।।

९४

सेः सारः सैः शुकः श्वादः सोः सोमः सौः सहोदरः ।

सं सुखं शरणं कार्यं प्रधानं सरणं वरम् ।।

९५

सः प्रागुक्तोऽथ हो हर्षो हिरण्याक्षोऽथ तस्करः ।

हा गन्धर्वोऽथ हिः सर्पो हिर्नरो हर्षवान्मृगः ।।

९६

हुः स्मृतो नहुषो राजा हूर्विप्रो हेः प्रसादकृत् ।

हैर्हासो होश्च संबुद्धिर्हौर्विरञ्चिः षडाननः ।।

९७

हं चौर्यं हरणं पूर्णं भासुरं भरणं भरम् ।

हः प्रागुक्तः स्मृतं लक्षणमुक्तम् तु परं ब्रह्म सनातनम् ।।

९८

क्षः क्षान्तः क्षा मही सीता क्षिर्ज्योतिः क्षीर्हुताशनः ।

क्षुः क्षुद्रो वासवो वार्कः क्षूः पापिष्ठः प्रणाशनः ।।

९९

क्षेः कर्षकोऽथ क्षैर्मूर्खो जारः क्षोः क्षुरको व्रणः ।

क्षौः खञ्जो धरणीधर्ता क्षं क्षेत्रं क्षं पयो मधु ।।

१००

क्षः प्रागुक्त इयं माला शाब्दी सौभरिणा कृता ।

सा श्रुताङ्िगरसा चास्तु विद्धच्चेतः प्रसादनी।।

।। इति श्रीसौभरिकृता मातृकानाममाला संपूर्णा ।।

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

AK (एकाक्षरी-कोषः -अमरकविविरचितः-धनञ्जयनाममालायामुपनिबद्धः)

१

विश्वाभिधानकोशानि प्रविलोक्य प्रभाष्यते ।

अमरेण कवीन्द्रेणैकाक्षरनाममालिका ।।

२

अः कृष्णः आः स्वयंभूरिः काम ई श्रीरुरीश्वरः ।

ऊ रक्षणः ॠ ॠ ज्ञेयौ देवदानवमातरौ ।।

३

लर्देवसूर्लॄर्वाराही भवेदेर्विष्णुरैः शिवः ।

ओर्वेधा औरनंतः स्यादं ब्रह्म परम्अः शिवः ।।

४

को ब्रह्मात्मप्रकाशार्के कः स्याद्वायुयमाग्निषु।

कं शीर्षे सुसुखे कुस्तु भूमौ शब्दे च किं पुनः ।।

५

स्यात्क्षेपनिन्दयोः प्रश्ने वितर्के च खमिन्द्रिये ।

स्वर्ग्गे व्योम्नि मुखे शून्ये सुखे संविदि खो रवौ ।।

६

गस्तु गातरि गंधर्व्वे ज्ञायते गीतौ गो विनायके ।

स्वर्गे दिशि पशौ वज्रे भूमाविन्दौ जले गिरि ।।

७

घस्तु सुघटीशे घा किंकिष्या च घुर्ध्वनौ ।

ङं मञ्जने ङो वृषभेजिने चः चन्द्रचोरयोः ।।

८

चःसूर्ये कच्छपे छं तु निर्मले जस्तु जेतरि ।

विजये तेजसि वाचि पिशाच्यां जिः जवेऽपि च।।

९

झो नष्टे रवे वायौ ञो गायने घर्घरध्वनौ।

टं पृथिव्यां करटे च ठो ध्वनौ ठो महेश्वरे ।

१०

शून्ये बृहध्वनौ चंद्रमंङले डं शिवे ध्वनौ ।

ढो भये निर्गुणे शब्दे ढक्कायां णस्तु निश्चये ।।

११

ज्ञाने तस्तस्करे क्रोडपुंच्छयोस्ता पुनर्दया।

थो भीत्राणे महीध्रे दं पत्न्यां दा दातुदानयोः ।।

१२

बन्धे च धा गुह्ये केशे धातरि धीर्मतौ ।

धूर्भारकंपचिंतासु नौ नरे बन्धुबुद्धयोः ।।

१३

निस्तु नेतरि नुः स्तुत्यां नौः सूर्ये पस्तु पातरि ।

पावने जलयाने च फो झंझाजलफेनयोः ।।

१४

भाः कांतौ भूर्भुवः स्थाने भीर्भये मः शिवे विधौ ।

चंद्रे शिरसि मा माने श्रीमात्रौवारणेऽव्ययम् ।।

१५

मुः पुंसि बंधने यस्तु मातरिश्वनि यं यशः ।

यास्तु यातरि खट्वांगे याने लक्ष्म्यां च रो धृतौ ।।

१६

तीव्रे वैश्वानरे कामे राः स्वर्णे जलदे ध्वनौ ।

री भ्रमे रूर्भये सूर्ये लक्षण इंद्रे चलनेपि च ।।

१७

लं तैले लीः पुनः श्लेषे ली भये वो महेश्वरे ।

वः पश्चिमदिशास्वामी व इवार्थे स्मरेऽप्ययम् ।।

१८

शं शुभे शा तु शोभायाँ शी शयने शु निशाकरे ।

शः श्लिष्टे पुनर्गर्भे विमोक्षे शः परोक्षके ।

१९

सा लक्ष्म्यां हो निपाते च हुस्ते दारुणि शूलिनि ।

शं क्षेत्ररक्षसीत्युक्ता माला प्राक्सूरिसम्मता ।।

इति एकाक्षरीनाममाला समाप्ता

(एकाक्षरी-कोषः -अमरकविविरचितः-धनञ्जयनाममालायामुपनिबद्धः

अः २ - कृष्णः २

आः २ - स्वयंभूः २

इः २ - कामः २

ईः २ - श्रीः २

उः २ - ईश्वरः २

ऊः २ - रक्षणः २

ऋः २ - देवमाता २

ॠः २ - दानवमाता २

लः ३ - देवसूः ३

लॣः ३ - वाराही ३

एः ३ - विष्णुः ३

ऐः ३ - शिवः ३

ओः ३ -वेधा ३

औः ३ - अनंतः ३

अं ३ - ब्रह्म परम् ३

अः ३ - शिवः ३

कः ४ -ब्रह्मा ४ , आत्मप्रकाशः ४ , अर्कः ४

कः ४ - वायुः ४ , यमः ४ , अग्निः ४

कं ४ -शीर्षे ४ , सुसुखे ४

कुः ४ -भूमौ ४ , शब्दे ४

किं ४ - पुनः ४ ,क्षेपः ५ ,निन्दा ५ , प्रश्नः ५ , वितर्कः ५

खम् ५ -इन्द्रियं ५ , स्वर्ग्गः ५ , व्योम ५ , मुखं ५ , शून्यं ५ , सुखं ५ ,संवित् ५

खः ५ - रविः ५

गः ६ - गाता ६ , गंधर्व्वः ६

गाः ६ - गीतं ६

गोः ६ - विनायकः ६ , स्वर्गः ६ ,दिक् ६ , पशुः ६ ,

वज्रं ६ , भूमिः ६ , इन्दुः ६ , जलं ६ , गिरि ६

घः ७ - सुघटीशे

घा ७ - किंकिणी ७

घुः ७ - ध्वनिः ७

ङः ७ -मञ्जनं ७

ङोः ७ -वृषभः ७ , जिनः ७

चः ७ - चन्द्रः ७ , चोरः ७

चः ८ -सूर्यः ८ , कच्छपः ८

छं ८ - निर्मलं ८

जः ८ - जेता ८, विजयः ८ , तेजः ८ , वाक् ८ , पिशाची ८

जिः ८ - जवः ८

झः ९ - नष्टं ९ , रविः ९ ,वायुः ९

ञः ९ - गायनं ९ , घर्घरध्वनिः ९

टं ९ - पृथिवी ९ , करटः ९

ठः ९ - ध्वनिः ९

ठोः ९ -महेश्वरः९ ,शून्यं१० ,बृहद्ध्वनिः १० ,चंद्रमंडलं १०

डं १० - शिवः १० , ध्वनिः १०

ढः १० - भयं १० , निर्गुणं १० ,शब्दः १० , ढक्का १०

णः १० - निश्चयः १०

तः ११ -ज्ञानं ११ , तस्करः ११ ,क्रोडः ११ , पुच्छः ११

ताः ११ - दया ११

थः ११ - भीत्राणं ११ , महीध्रः ११

दं ११ - पत्नी ११

दा ११ -दाता ११ , दानं ११

धा १२ -बन्धः १२ , गुह्यं १२ , केशः १२ , धाता १२

धीः १२ - मतिः १२

धूः १२ -भारः १२ , कंपः १२ , चिंता १२

नः १२ - नरः १२ , बन्धुः १२ , बुद्धः १२

निः १३ -नेता १३

नुः १३ - स्तुतिः १३

नौः १३ - सूर्यः १३

पः १३ -पाता१३ ,पावनं १३ , जलयानं १३

फः १३ - झंझा १३ , जलं १३ ,फेनः १३

भाः १४ - कांतिः १४

भूः १४ - भुवः १४ , स्थानं १४

भीः १४ - भयं १४

मः १४ -शिवः १४ ,विधिः १४ , चंद्रः १४ , शिरः १४

मा १४ -मानं १४ , श्रीमाता १४ ,वारणं १४

मुः १५ - बंधनं १५

यः १५ - मातरिश्वा १५

यं १५ - यशः १५

याः १५ - याता १५,खट्वांगः १५ ,यानं १५ , लक्ष्मी १५

रः १५ -धृतिः १५ ,तीव्रः १६ , वैश्वानरः १६ , कामः १६

राः १ - स्वर्णं १६ ,जलदः १६ ,ध्वनिः १६

रीः १६ - भ्रमः १६

रूः १६ - भयं १६ , सूर्यः १६

लः १६ - इंद्रः १६ , चलनं १६

लं १७ -तैलं १७

लीः १७ - श्लेषः १७

लीः १७ - भयं १७

वः १७ - महेश्वरः १७ , पश्चिमदिशास्वामी १७

व १७ - इवार्थः १७ , स्मरः १७

शं १८ -शुभं १८

शा १८ - शोभा १८

शी १८ -शयनं १८

शु १८ - निशाकरः १८

शः १८ - श्लिष्टः १८ ,गर्भः १८ , विमोक्षं १८ ,परोक्षकं १८

सा १९ - लक्ष्मी १९

ह १९ -(निपातः) १९

हुः १९ - दारु १९ , शूली १९

क्षं १९ - क्षेत्रं १९ , रक्षसी १९

This is prepared an d compiled by Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

ani1 अनेकार्थनिघण्टुः

१

गम्भीरान् रुचिराँश्चित्रान् विस्तीर्णार्थप्रसाधनान् ।

कष्टशब्दान् प्रवक्ष्यामि कवीनां हितकाम्यया ।।१।।

२

वाग्दिग्भूरश्मिवज्रेषु पश्वक्षिस्वर्गवारिषु ।

नवस्वर्थेषु मेधावी गोशब्दमुपलक्षयेत् ।।२।।

३

कः प्रजापतिरुद्दिष्टो को वायुरभिधीयते ।

कः शब्दः स्वर्गमाख्याति क इत्यात्मा मतः क्वचित् ।।३।।

४

सलिलं कमिति ज्ञेयं शिरः कमिति चोच्यते ।

देवाननिमिषानाहुर्मत्स्याननिमिषांस्तथा ।।४।।

५

अग्निश्च बर्हिणः चैव वृक्षः कुक्कुट एव च ।

शिखिनोऽभिहिताः शास्त्रः पृथुकश्च मतः शिखी ।।५।।

६

हंसो नारायणः प्रोक्तः क्वचिद्धंसो दिवाकरः ।

अश्वश्चापि स्मृतो हंसो हंसश्चापि विहंगमः ।।६।।

७

सारसस्सरसिजेन्द्वोः पतत्र्यपि च सारसः ।

राजाऽपि नृपतिर्ज्ञेयो राजा चोक्तो निशाकरः ।।७।।

८

विभावसुर्हुताशः स्याच्छ्वेतच्छत्रं क्वचिद्भवेत् ।

हिमारातिः स्मृतो वह्निः हिमारातिश्च भास्करः।।८।।

९

धनञ्जयोऽग्निर्व्याख्यातो पार्थश्चापि धनञ्जयः ।

बीभत्सश्च मतः पार्थो बीभत्सो विकृतः स्मृतः ।।९।।

१०

अग्निर्विरोचनः प्रोक्तो भास्करस्तु विरोचनः ।

विरोचनश्च चन्द्रः स्यात्क्वचिद्दैत्यो विरोचनः ।।१०।।

११

पाञ्चजन्यं क्वचिद्वह्निः क्वचिच्छङ्खो निगद्यते ।

कम्बुश्च गदितः शङ्खः कम्बुरिष्टश्च कुञ्जरः ।।११।।

१२

भास्करोऽग्निः समुद्दिष्टः सहस्रांशुरपि क्वचित्।

पतङ्गो दिनकृद् श्रेयः पतङ्गः शलभः स्मृतः ।।१२।।

१३

कौशिको देवराजः स्यादुलूकश्चापि कौशिकः ।

शम्भुर्ब्रह्मा च विष्णुश्च शम्भुश्चैव महेश्वरः ।।१३।।

१४

वृषकेतुर्मतः शङ्कुः शङ्कुः कील इहोच्यते ।

जम्बुको वरुणो श्रेयः शुगालश्चापि जम्बुकः ।।१४।।

१५

अर्क इष्टस्तु मघवान् घर्मांशुरर्क उच्यते ।

मन्थी राहुश्च चन्द्रश्च ग्रहो मन्थी निरुच्यते ।।१५।।

१६

केतवो रश्मयो श्रेयाः केतवश्च महाध्वजाः ।

तमोनुदः सहस्रांशुरग्निश्चापि प्रकीर्त्यते ।।१६।।

१७

मयूखाः कीरणा श्रेया मयूखाश्चापि कीलकाः ।

सप्तर्षिरुत्सवः प्रोक्तः सप्तान्ये ऋषयः क्वचित् ।।१७।।

१८

वसवः शंवरा उक्ता देवाश्च वसवो मताः ।

नक्षत्रं धिष्ण्यमित्युक्तं गेहं धिष्ण्यं मतं क्वचित् ।।१८।।

१९

वासोऽम्बरमिति ख्यातमम्बरं च नभःस्थलम् ।

पयः सलिलमुद्दिष्टं पयः क्षीरं मतं क्वचित् ।.१९।।

२०

शिवं पानीयमुद्दिष्टं शिवं श्रेयः शिवं सुखम् ।

शिवं व्योमपतिं प्राहुः शिवं श्रेष्ठं प्रचक्षते ।।२०।।

२१

क्षरं जलं विजानीयात्क्वचिन्मेधं विदः क्षरम्।

स्यन्दनं चाम्बु निर्दिष्टं स्यन्दनश्च महारथः ।।२१।।

२२

कृष्णं तमः समाख्यातं कृष्णश्चाधोक्षजस्तथा ।

अमृतं क्षीरमित्युक्तं क्वचिच्चेष्टं समिद्रजम् ।।२२।।

२३

शवं च सलिलं प्रोक्तं मृतमाहुः शवं तथा ।

तोयं घृतमिति प्रोक्तं घृतं सर्पिः क्वचिद्भवेत् ।।२३।।

२४

पानीयं च विषं प्रोक्तं क्वचिद्धालाहलं विषम् ।

हस्तिहस्तः करः प्रोक्तः करो हस्तः प्रचक्ष्यते ।।२४।।

२५

कीलालं रुधिरं प्रोक्तं नीरं चैव प्रशस्यते ।

भुवनं सलिलं प्रोक्तं आकाशं भुवनं स्मृतम् ।।२५।।

२६

प्रवालं कोमलं ज्ञेयं कोमलं स्पष्टवाचकम् ।

सदनं च स्मृतं तोयं सदनं वेश्म उच्यते ।।२६।।

२७

तोयं सद्मेति गदितं निलयं सद्म निगद्यते ।

संवरं च जलं प्रोक्तं संवरः पर्वतो भवेत् ।।२७।।

२८

संवरश्चाऽसुरः ख्यातो यो बिभर्ति रसां प्रियाम् ।

स्वरवाक्क्ष्मास्विडां प्राहुरिडा चाम्बरदेवताम् २८।।

२९

पत्नीं चन्द्रेरिडां प्राहुरिला तत्समतां गता ।

अदितिः पृथिवी ज्ञेया देवमाताऽदितिः क्वचित्।।२९।।

३०

अध्यूढा भार्या परित्यक्ता त्वद्भिदिश्च निगद्यते ।

वृषो धर्म्मः क्वचिज्ज्ञेयो गवामपि पतिर्वृषः ।।३०।।

३१

वृषा कर्णश्च गदितो वृषा चोक्तः शतक्रतुः ।

रौहिणेयो बलः प्रोक्तो रौहिणेयो बुधः क्वचित् ।।३१।।

३२

बलदेवो मतः शेषो नागो वा शेष उच्यते ।

रामस्तु लांगली ज्ञेयो रामो दाशरथिः क्वचित् ।।३२।।

३३

रामश्च शुक्लो वर्णो रामश्च क्षत्रनाशनः ।

वराहः केशवः ख्यातो वराहो जलदः क्वचित् ।।३३।।

३४

वराहः शूकरो ज्ञेयो विष्णुर्मेघो हरिस्तथा ।

अजाराट्स्मरेन्दवो ज्ञेयास्त्रिनेत्रश्चाप्यजो मतः ।।३४।।

३५

अजः पशुश्च विख्यातो तथाजौ ब्रह्मकेशवौ ।

शरीरजः स्मृतो रोगः पुत्रश्चापि शरीरजः ।।३५।।

३६

ज्ञेयं पुष्करमब्जं च नागनासाग्रमेव च ।

कूलं नभः समाख्यातं कूलं रोधः प्रचक्षते ।। ३६ ।।

३७

खं चानन्तमिति प्रोक्तमनन्तं च बलं क्वचित् ।

विष्णुः क्वचिदनन्तः स्यान्नागश्चानन्त उच्यते ।। ३७ ।।

३८

प्रजापतिः स्मृतो राजा ब्रह्मा चापि प्रजापतिः ।

प्रजापतिः स्मृतः क्षत्ता क्षत्ता च चर उच्यते ।। ३८ ।।

३९

वामः पयोधरः प्रोक्तो वामः स्याद्द्रविणं हरः ।

वामश्च मदनः प्रोक्तो वामश्च प्रतिकूलके ।। ३९ ।।

४०

आगोपो गोपकः ज्ञेयः क्वचिदागोपको ध्वजः ।

उरश्चाङ्कः समाख्यातः स्थानमङ्कः स्मृतस्तथा ।। ४० ।।

४१

वासरस्तु स्मृतो नागो वासरो दिवसो मतः ।

विभावसुर्निशा ज्ञेया गन्धर्वश्च क्वचिन्मतः ।। ४१ ।।

४२

शर्वर्यो रात्रयः प्रोक्ताः शर्वर्यश्च स्त्रियो मता ।

सान्द्रं धनमिति प्रोक्तं स्निग्धं सान्द्रं निगद्यते ।।४२।।

४३

स्वः स्वर्गस्य मतं नाम स्वः सुखं क्वचिदुच्यते ।

स्व आत्मा चैव निर्दिष्टः स्वः प्रोक्तो गृहमूषिकः ।।४३।।

४४

ककुश्छन्दोविशेषज्ञो मतः शास्त्रेपि ना ककुप् ।

ककुम्महीरुहः प्रोक्तो ज्ञेयास्तु ककुभो दिशः ।।४४।।

४५

क्षयं वेश्म समुद्दिष्टं क्षयं रोगं प्रचक्षते ।

जलदस्तु प्लवो ज्ञेयः प्लवो ज्ञेयस्तथोडुपः ।। ४५।।

४६

प्रासादो मण्डपः प्रोक्तो विहारश्चापि कथ्यते ।

घनं घनं विजानीयाद् घनं विपुलमुच्यते ।।४६।।

४७

प्रयुज्यते च कस्मिंश्चिद् घनं सङ्घातवाद्ययोः ।

वरूथं स्यन्दनाग्रं स्याद्वरूथं वेश्म उच्यते ।।४७।।

४८

चमूश्च वर्म सहसा प्रवदन्ति मनीषिणः ।

असुराश्च सुरा ज्ञेयाः क्वचिद्देवारयोऽसुराः ।।४८।।

४९

नागाश्च द्विरदा ज्ञेयाः पन्नगाश्च क्वचिन्मताः ।

गन्धर्वश्च तथा वायुः क्वचित्स्याद् देवगायनः ।।४९।।

५०

ताक्ष्र्यो हयः समुद्दिष्टस्ताक्ष्र्यश्चापि पतत्रि राट्।

बालेयानसुरानाहुर्वालेयांश्च क्वचित् खरान् ।।५०।।

५१

तृणी वनस्पतिः प्रोक्ता क्वचिदार्द्राश्च कथ्यते।

शिखरी वृक्ष उद्दिष्टः शिखरी पर्व्वतः स्मृतः ।।५१।।

५२

द्विजो विप्रश्च दन्तश्च द्विजः पक्षी निगद्यते ।

चौरो मलिम्लुचो ज्ञेयो वातश्चापि मलिम्लुचः ।।५२।।

५३

आत्मजं रक्तमुद्दिष्टं सुतः कामस्तथैव च ।

कीनाशो मृतको ज्ञेयः कीनाशश्चापि राक्षसः ।।५३।।

५४

कीनाशोऽग्निः कृतघ्नश्च कृपणो यम एव च ।

कीनाशः कर्षको ज्ञेयः कीनाशश्च वृकोदरः ।।५४।।

५५

अवदातं प्रधानं स्यादवदातं च पाण्डुरम् ।

ज्योतिर्ल्लोचनमुद्दिष्टं ज्योतिर्नक्षत्रमुच्यते ।।५५।।

५६

ज्योतिश्च गदितो वह्निः काव्येषु मुनिपुङ्गवैः।

प्रधानं सज्जनं ज्ञेयं प्रधानं श्वेतमुच्यते ।।५६।।

५७

अब्दः संवत्सरो ज्ञेयो मेघश्चापि क्वचिन्मतः ।

बलाहका महामेघाः शिखरी च बलाहकः ।।५७।।

५८

तोयदं जलदं प्राहुस्तोयदं कथ्यते घृतम् ।

जीमूतश्च मतो नागो जीमूतः क्वचिदम्बुदः ।।५८।।

५९

पौलस्त्यं तु मतं युद्धं पौलस्त्यं पौरुषं विदुः ।

शुचिकृद्रजकश्चैव प्रोक्तो नित्यं बुधै रसः ।।५९।।

६०

पर्जन्यं जलदं प्राहुः पर्जन्यं तु शतक्रतुः ।

शिलीमुखाः स्मृता बाणा भ्रमराश्च शिलीमुखाः ।।६०।।

६१

लेखा सीमेति विज्ञेया लेखा चित्रकृतौ मता ।

अम्बरीषं क्वचिद्भ्राष्ट्रं क्वचिद्युद्धं निगद्यते ।।६१।।

६२

पुंस्त्वं चापि मतं युध्दं पुंस्त्वं पौरुषमुच्यते ।

विद्वांसोऽरिपवो ज्ञेया विद्वांसस्त्वसवो मताः ।।६२

६३

मायाऽविद्येति विज्ञेया क्वचिन्माया तु सांवरी ।

मधु द्राक्षीति विज्ञेया क्वचित्स्यान्मधु माक्षिकम् ।।६३।।

६४

मधु चाम्बु समाख्यातं सुरा च मधुसंज्ञका ।

खं रंध्रमिति विज्ञेयं खं गुहं नभ एव च ।।६४।।

६५

खमिन्द्रियमिति ख्यातं खं च नक्षत्रमुच्यते ।

धार्तराष्ट्रा महाहंसा धृतराष्ट्रसुताः क्वचित् ।।६५।।

६६

प्रभाकरो मतः सूर्यो वह्निश्चापि प्रभाकरः ।

सितं शुक्लमिति ज्ञेयं सितं बद्धं प्रचक्षते ।।६६।।

६७

असितं कृष्णमित्युक्तं अशितं भक्षितं स्मृतम् ।

वभ्रुस्तु नकुलो ज्ञेयः पाण्डवो नकुलस्तथा ।।६७।।

६८

त्रिशङ्कुमाहुर्मार्जारमृषिश्चापि तथेष्यते ।

यमस्तु वायसो ज्ञेयो यमः प्रेताधिपस्तथा ।।६८।।

६९

लक्ष्मणं सारसं विद्यात्तथा दशरथात्मजम् ।

लक्ष्म चन्द्रस्य कार्ष्ण्यं स्याल्लक्ष्म्यःकेतुः प्रकिर्तितः ।।६९।।

७०

केतुश्चापि मतः काव्ये लक्ष्मेति मुनिपुङ्गवैः ।

आरुणेयः स्मृतो दक्षो दक्षश्चाचेतसः क्वचित् ।।७०।।

७१

आशुकारी भवेद्दक्षः स्यादली तोमरः स्मृतः ।

आदित्यं च रविं विद्याद् दैत्यश्चाप्यदितेः सुतः ।।७१।।

७२

रोमो रजस्तथा रेणू रजो लोहितमुच्यते ।

स्कन्धो नितम्बसंज्ञः स्यान्नितम्बं जघनं तटम् ।।७२।।

७३

हेम वस्विति विज्ञेयं वसु तेजो निगद्यते ।

सारङ्गं चातकं प्राहुः सवर्णे चापि सितासिती ।।७३।।

७४

रम्भाश्च कदलीः प्राहु रम्भा स्वर्गाङ्गना मता ।

ग्रावाणो गिरिजाः प्रोक्ता मेघाश्चापि मनीषिभिः ।।७४।।

७५

औषणं रसमुद्दिष्टमृतं सत्यमपि क्वचित् ।।७५।।

७६

अक्ष आत्मेति विज्ञेयः केचिदाहुर्बिभीतकम् ।

ज्ञेयमिन्द्रियमक्षं च शाकटं कर्ष एव च ।। ७६ ।।

७७

अक्षं च पाशकं विद्याद्व्यावहारिकमेव च ।

पद्ममिन्द्रयमित्युक्तं पद्मं तामरसं विदुः ।।७७।।

७८

चैत्यमायतनं प्रोक्तं नीडमायतनं तथा ।

पुष्पं लोहितमुद्दिष्टं पुष्पं च कुसुमं तथा ।।७८।।

७९

वाजी तुरङ्गमो ज्ञेयो वाजी श्येनो विहङ्गमः ।

विष्णिवन्द्रसिंहमण्डूकचन्द्रादित्यांस्तु वानरान् ।।७९।।

८०

बभ्रृशिवानिलहयान् हरीनिच्छन्ति कोविदाः ।

पुरुषध्वजलिङ्गेषु हयभूषणलक्ष्मषु ।।८०।।

८१

रामशेषावनीन्द्रेषु ललामं नवसु स्मृतम् ।

शुक्रा स्मृताऽक्षिदोषो ना लवली मञ्जरी तथा ।।८१।।

८२

वक्रवक्त्रः शुको ज्ञेयः कोकिला वचनप्रिया ।

पुलिनं जलविच्छेदः पङ्कजं स्यात्कुशेशयम् ।।८२।।

८३

रतं पापमिति ज्ञेयं सत्वरं शीघ्रमुच्यते ।

पिशङ्गं रोचनाभं स्यान्मेचकस्तिलको मतः ।।८३।।

८४

ललाटेऽवस्थितं चिह्नं विद्वद्भिस्तिलकं मतम्।

परिचर्यं च कटकं निकषस्तु कषो मतः ।।८४।।

८५

नानारत्नैरुचचिता मञ्जूष रागिणी स्मृता ।

दिनकृद्वाचिसिंहेषु केसरित्वं विधीयते ।।८५।।

८६

अव्यक्तो मधुरः शब्दः कल इत्यभिधीयते ।

अलातमुल्मुकं ज्ञेयं छेदो नाम भयङ्करः।।८६।।

८७

भावः श्रृङ्गारमाधुर्यं भावोऽवस्थाप्ररूपणम् ।

विलासः कामजो दोषस्तदेव ललितं मतम् ।।८७।।

८८

उत्तमाङ्गं विना देहं कबन्धं चेति शस्यते ।

शिरसो वेष्टनं यद्वै तदुष्णीषं निगद्यते ।।८८।।

८९

आहतं समदीर्घं स्यान्निविडं पीडितोन्नतम् ।

मण्डूको भेकसंज्ञः स्याद्वर्षाभूश्चातको मतः ।।८९।। che

९०

शिवा पिङ्गवती ज्ञेया विशालं सबलं मतम् ।

दुश्चर्मा शिपिविष्टः स्यात्कर्षकस्तु कृषीबलः ।।९०।।

९१

कन्याजातश्च कानीनो षण्डः क्लीब इति स्मृतः ।

उत्कृष्टः श्वसुरः स्यातां म्लिष्टमव्यक्तवाचकम् ।।९१।।

९२

रदनो हस्तिदन्तः स्याद्दानं कटकसंज्ञितम् ।

तोदनं चाङ्कुशं विद्यादालानं हस्तिबन्धनम् ।।९२।।

९३

घनाघन इति ख्यातः शास्त्रेष्वधिकपौरुषः ।

अपाचीनं मनोज्ञं च बुद्धिर्ज्ञेया तु शेमुषी ।।९३।।

९४

अर्कस्तु पादपे ज्ञेयो नदी स्यात्फेनवाहिनी ।

अश्वारोहो मरुद्यानोऽश्वानां हृदये ध्वनिः ।।९४।।

९५

आक्रन्द इति विज्ञेयः खुराश्च शफसंज्ञिताः ।

आममासं भवेत्क्रव्यं पक्वं पिशितमुच्यते ।।९५।।

९६

शुष्कं तु विरसं ज्ञेयं मृष्टं सरसमुच्यते ।

शङ्खजं शुक्तिजं चैव वाराहं तिमिमौक्तिकम् ।।९६।।

९७

वंशादाशीविषान्नागाज्जीमूताच्च तथाष्टमम् ।

लोकज्ञो दक्षिणो ज्ञेयो दक्षिणश्च तुरः स्मृतः ।।९७।।

९८

आकूतं तु मतं तिद्यात्कण्टकं गहनं मतम् ।

आननं चाकुले नेत्रे चिकुरं चापि शस्यते ।।९८।।

९९

पापः श्याम इति प्रोक्तो वभ्रुस्तु कपिलो मतः ।

स्थविष्टं स्थावरे चैव दविष्टं दूरमुच्यते ।।९९।।

१००

परमेष्टी मतः श्रेष्ठः प्रेम प्रियमुदाहृतम् ।

प्रकाशः स्त्रीगृहेरक्तः शैलूष इति संज्ञितः ।।१००।।

१०१

पदकृच्चर्मकारः स्यान्नापितस्त्वजयः स्मृतः ।

लावण्यमाहुर्माधुर्यं चित्रं च शुभकार्मजम् ।। १०१ ।।

१०२

व्याधयश्चामयाः प्रोक्ताः पानीयं तु समुच्चयः ।

आधयस्तु स्मृताः प्राज्ञैश्चित्तोत्पन्ना उपद्रवाः ।। १०२ ।।

१०३

रंहो वेगः समाख्यातः सत्रं सच्चरितं स्मृतम् ।

आलवालं स्मृतं सद्भिरपां वेगनिवारणम् ।। १०३ ।।

१०४

चटकः कलविङ्कः स्यात्तुल्यं सदृशमुच्यते ।

किलासं पाण्डुरं ज्ञेयं दोला प्रेङ्खेति शस्यते ।। १०४ ।।

१०५

मन्दिरं नगरं ज्ञेयं निलयं चापि मन्दिरम् ।

सहस्त्रनयनोऽगारिः प्रधानं युद्धमुच्यते ।। १०५ ।।

१०६

पलाशो हरितो वर्णो मेचको नीलपिञ्जरः ।

उक्षाणं वृषभं विद्याल्लुलायो महिषो मतः ।। १०६ ।।

१०७

उस्त्रा वन्ध्या वसा वेहत् पृष्ठोही गर्भिणी हि या ।

व्याख्यातो मस्करो वेणुस्त्वसिचारः परिकीर्तितः ।। १०७ ।।

१०८

हिलं कामं शपं चैव रोषमाहुर्मनीषिणः ।

कलभोऽल्पवयो नागः कलुषं चाविलं मतम् ।। १०८ ।।

१०९

वृजिनं कुटिलं विद्यात् सम्राट् राजा च भूभुजौ ।

रत्नं वज्रं विजानीयात्त्रियामा क्षणदा मता ।। १०९ ।।

११०

दीर्घं प्रांशुं विजानीयात् ह्रस्वं नीचकमुच्यते ।

भूरि प्रभूतमुद्दिष्टमभितः सर्ववाचकम् ।। ११० ।।

१११

पवनश्चानिलो ज्ञेयः पवनश्चाधमो जनः ।

प्रियवाक्यो भवेदार्यः स्नातश्च परिकीर्तितः ।। १११ ।।

११२

आडम्बरश्च पटहो व्यञ्जनं बोधनं मतम् ।

विपञ्ची वल्लकी ख्याता वीणा चैव निगद्यते ।। ११२ ।।

११३

मालती सुमना ज्ञेया सुमना मुदितो जनः ।

वल्लरी मञ्जरी ख्याता प्रपाप्शाला प्रकीर्तितः ।। ११३ ।।

११४

आयुर्निरुच्यते तोयं तेन जीवति पद्मकम् ।

तस्य पत्राक्षिमानेन रामो राजीवलोचनः ।। ११४ ।।

११५

उत्कृत्य कवचं देहादसृग्दग्धं च यत्पुरा ।

इन्द्राय दत्तवान्कर्णस्तेन वैकर्तनः स्मृतः ।। ११५ ।।

११६

तीक्ष्णश्चैव प्रचण्डश्च वृको नामानलो मतः ।

स पाण्डवस्य उदरे तेन भीमो वृकोदरः ।। ११६ ।।

११७

यस्य स्मृतिमुखा वाणी पुण्यश्लोकः स उच्यते ।

यः खेदी चानिवर्ती च युद्धशौण्डः स उच्यते ।। ११७ ।।

११८

महासंसर्गसङ्घातं महेष्वासं प्रचक्षते ।

स्वविक्रमैस्तापयेच्च परं ... यूथं तापयेत् ।। ११८ ।।

११९

यूथं तापयेद्यस्तं विज्ञेयश्च स यूथपः ।

तस्मादपि च यो वर्यः स तु यूथपयूथपः ।। ११९ ।।

१२०

सिंहान्नितान्तसौवीरः स नृसिंह इति स्मृतः ।

ये हि स्पष्टप्रवक्तारो मतास्ते व्यक्तवादिनः ।। १२० ।।

१२१

यो यमित्थं च नाम्नाति स कीनाश इति स्मृतः ।

योऽप्रबुद्धोऽल्पबुद्धिश्च स तु मन्द इति स्मृतः ।। १२१ ।।

१२२

उपकारं तु यो हन्ति स कृतघ्न इति स्मृतः ।

हर्षे गर्वे सुखे खेदे वृद्धौ च प्रतिभासते ।। १२२ ।।

१२३

स्नेहभाग्यक्षये चैव मन्द शब्दो निगद्यते ।

नातीत्य वर्तते यत्र तदध्यात्मं प्रचक्षते ।। १२३ ।।

१२४

चेतसश्च समाधानं समाधिरिति गद्यते ।

सर्वक्लेशविनिर्मुक्तो स हि दान्त इति स्मृतः ।। १२४ ।।

१२५

निर्ममो निरहङ्कारो विज्ञेयः छिन्नसंशयः ।

प्रदाता देशकालज्ञः समाधिस्थः स उच्यते ।। १२५ ।।

१२६

मुखरोऽल्पमतिर्यस्तु सक्रोधश्चैव कीटकः ।

वृत्तिर्यत्र तु गृह्यानां परोक्षे बहिः यत्क्रिया ।। १२६ ।।

१२७

आहारव्यवहारेषु सा प्रीतिर्निरुपस्करा ।

परस्परं स्वदारेषु सता येषां प्रवर्तते ।। १२७ ।।

१२८

विश्रम्भाद्प्रणयाद्वापि सा प्रीतिर्निरुपद्रवा ।

यशः ख्यातिरिति प्रोक्तं तद्योगात्प्राहुरुच्यते ।। १२८ ।।

१२९

कीर्तिख्यातियशोयोगाद् भगवन्निति चोच्यते ।

प्रियदानेषु यः शद्धः स उदार इति स्मृतः ।। १२९ ।।

१३०

रजस्वला तु या नारी सा चोदक्या प्रकीर्तिता ।

प्रीतिर्भावक्रिये स्वच्छरक्षालिंङ्िगतनुं विपुम् ।। १३० ।।

१३१

तेजो रेतसि दीप्तौ तपो हि स्याद् वृषार्थकः ।

योऽन्यजातो हनो जीवः शरारू इति स्मृतः ।। १३१ ।।

१३२

मिथ्यादृष्टिरहंमानी नास्तिकः स प्रकीर्तितः ।

कामः क्रोधश्च वै पूर्वे लोभोऽसत्यं च मध्यमे ।। १३२ ।।

१३३

अन्ते मोहो विषादश्च यस्य ज्ञेयः स षड्वदः ।

अमृते जारजः कुण्डो मृते भर्तरि गोलकः ।। १३३ ।।

१३४

अनयोर्योऽन्नमश्नाति स कुण्डाशी निगद्यते ।

भ्रूणस्त्री गर्भिणी बाला ब्राह्मणी ब्रह्मजीविनी ।। १३४ ।।

१३५

परिचित्ते यवीयान् यो ज्येष्ठपत्नीं परामृशन् ।

यः पश्चिमश्च ज्येष्ठोऽपि परिचित्तः स उच्यते ।। १३५ ।।

१३६

पुष्पजं क्षोमजं चर्मकोशजं भर्मजं तथा ।

गुणजं च समुद्दिष्टं तद्भेदा वस्त्रजातिषु ।। १३६ ।।

१३७

बिम्बारक्तधरा या स्त्री बिम्बोष्ठीं तां विनिर्दिशेत् ।

या स्यात् संक्रीडनपरा ललनां तां विनिर्दिशेत् ।। १३७ ।।

१३८

दूर्वाकाण्डप्रतीकाशा कुम्भौ यस्यास्तनू कुचौ ।

सर्वरूपविविक्ताङ्गी सा भवेद्वरवर्णिनी ।। १३८ ।।

१३९

लावण्ययुक्ता या नारी ललितां तां विनिर्द्दिशेत् ।

या मत्ता मत्तवज्ज्योतिः सा ज्ञेया मत्तकाशिनी ।। १३९ ।।

१४०

भूरिश्च भूरिमुद्दिष्टं अन्नं श्रव इति स्मृतम् ।

भूरि श्रवो ददातीह तस्माद् भूरिश्रवो हि सः ।। १४० ।।

१४१

चतुष्पाद्विंशतिभुजो लोहितग्रीव एव च ।

निसर्गाद्दारुणात्क्रूराद्रवणाद् रावणः स्मृतः ।। १४१ ।।

१४२

रोषणा या भवेन्नारी भामितीं तां विनिर्द्दिशेत् ।

न्यग्रोधलक्षणं विद्याद्दधाना परिमण्डलम् ।। १४२ ।।

१४३

ताभ्यामुपेता वनिता न्यग्रोधपरिमण्डला ।

तत्तुल्ये चाक्षिणी यस्याः सा स्त्री राजीवलोचना ।। १४३ ।।

१४४

वर्णप्रमाणनिर्घोषो ऽछिन्नसंपद्भिरन्वितः ।

राजीवमन्ये शंसन्ति स्मिग्धवर्णं सितासितम् ।। १४४ ।।

१४५

किंचिदुत्तरतद्योगत्सीता राजीवलोचना ।

बलिभिर्यास्त्रिभिर्युक्ता शङ्खकण्ठी उदाहृता ।।१४५ ।।

१४६

—जराकराकारं स्यन्दनाग्रमिवाग्रतः ।

वस्त्वे ति तज्ज्ञेयं तस्यैवाग्रं ....।।१४६ ।।

१४७

——त्तं मर्मसंयुक्तं तत्तथालिनमुच्यते ।

ग्रहणे धारणे सामे वाहने धर्मसंयुता ।। १४७ ।।

२४८

रमणे क्रीडने सङ्गे भार्या नाम प्रवर्तते ।

मूढतायां सविद्ययां सप्ताश्वस्वंशुमालिनी ।। १४८ ।।

१४९

विषमाक्षदरा एते ज्ञेयाग्रं तैः विसंस्थिताः ।

कोटरस्था इति ज्ञेयाः सर्पकीटखगादयः ।।१४९ ।।

१५०

आताम्रपल्लवो यस्तु वृक्षाणामचिरोद्गमः ।

———————————।। १५० ।।

१५१

सौकुमार्यं किसलयं कोमलत्वं च तत्स्मृतम् ।

शतानां च चतुर्हस्तं नल्वं तदिहसंज्ञितम् ।। १५१ ।।

१५२

कुम्भो वाहः प्रस्थः समं नल्व इति विधीयते ।

विपिनं शून्यमित्युक्तं विपिनं गृहमेव च ।।१५२ ।।

१५३

रुक्म वर्ण्णं च वामं च दर्शनीयार्थवाचकः ।

सर्वार्थश्चाप्युवर्णश्च पानीयं शीतमुच्यते ।।१५३ ।।

नीहारं शीतमित्युक्तं प्रदोषान्तो निशीथकः ।

इति महाकविश्रीधनञ्जयकृते निघण्टुसमये शब्दसंकीर्णे अनेकार्थप्ररूपणो द्वितीयपरिच्छेदः ।।

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

anm(d)अनेकार्थनाममाला (ज्ञानसागरकृता)

१

जिनेन्द्रं पूज्यपादं च चैलाचार्यं शिवायनम् ।

अर्हितं शिरसा नत्वऽनेकार्थं विवृणोम्यहम् ।। १ ।।

२

गम्भीरं रुचिरं चित्रं विस्तीर्णार्थप्रसाधकम् ।

शब्दं मनाक् प्रवक्ष्यामि कवीनां हितकाम्यया ।। २ ।।

३

अर्हत्पिनाकिनौ शम्भू जिनावर्हत्तथागतौ

वेदसूर्यौ विवस्वन्तौ विष्णुरुद्रौ वृषाकपी ।। ३ ।।

४

विकृष्ठाविन्द्रौ अनन्तौ शेषशार्ङ्गिणौ ।

जीमूतौ तु करिक्रीडौ पर्जन्यौ शक्रवारिदौ ।। ४ ।।

५

वनमम्भसि कान्तारे भुवनं विष्टपेऽर्णसि ।

घृतं सर्पिषि पानीये विषं हालाहले जले ।। ५ ।।

६

तल्पं दारेषु शय्यायां ज्योतिश्चक्षुषि तारके ।

धवले सुन्दरे रामो वामो वक्रे मनोहरे ।। ६ ।।

७

नक्षत्रे मन्दिरे धिष्ण्यम् वसने गगनेऽम्बरम् ।

परिधौ पादपे सालः सिन्धुः स्त्रोतसि योषिति ।। ७ ।।

८

सारसः शकुनौ धूर्ते केतनं दीधितौ ध्वजे ।

मयूखः कीलके दीप्तौ पतङ्गः शलभे रवौ ।। ८ ।।

९

अञ्जनः कज्जले नागौ सारङ्गः पृषते गजे ।

सरलः प्रगुणे वृक्षे पुन्नागः सन्नरे तरौ ।। ९ ।।

१०

पाञ्चजन्योऽनले शङ्खे कम्बुः शङ्खे मतङ्गजे ।

कस्वरो द्युभवे द्युम्ने स्यन्दनं शकटेऽम्बुनि ।। १० ।।

११

अद्रिर्गिरिवनस्पत्योः शिखरी तरुभूध्रयोः ।

राजा चन्द्रमहीपत्योः द्विजो दशनविप्रयोः ।। ११ ।।

१२

मोचामरस्त्रियो रम्भा कदलीध्वजमोचयोः ।

अशोकः सुमनस्तर्वोः सुमनाः सुरपुष्पयोः ।। १२ ।।

१३

मुक्तारजतयोस्तारः भूरि भूयः सुवर्णयोः ।

पानीय दुग्धयोः क्षीरः पयः सलिलदुग्धयोः ।। १३ ।।

१४

कालप्रकर्षयोः काष्ठा कोटिः सङ्ख्याप्रकर्षयोः ।

रन्ध्रसंश्लेषयोः सन्धिः सिन्धुर्नदसमुद्रयोः ।। १४ ।।

१५

निषेधदुःखयोर्बाधा व्यामोहो मूर्खमौढ्ययोः ।

कौपीनाकारयोर्गुह्यं कीलालं रुधिराम्भसोः ।। १५ ।।

१६

मूल्यसत्कारयोर्र्धः जात्यः श्रेष्ठकुलीनयोः ।

मेघवत्सरयोरब्दः तार्क्ष्यो हयगरुत्मतोः ।। १६ ।।

१७

स्तब्धतास्थूणयोः स्तम्भः चर्चा चिन्तावितर्कयोः ।

हरकीलकयोः स्थाणुः स्वैरः स्वच्छन्दमन्दयोः ।। १७ ।।

१८

शङ्कुः सङ्कीर्णविवरे पलालाग्नौ च कीलके ।

संख्यायां काननोद्भूते वह्नौ दावो दवोऽपि च ।। १८ ।।

१९

कीनाशः कृपणे भृत्ये कृतान्ते पिशिताशिनि ।

तथा पुण्यजनान् प्राहुः सज्जनान् राक्षसानपि ।। १९ ।।

२०

विरोचनो रवौ चन्द्रे दनुसूनौ हुताशने ।

हंसो नारायणे ब्रध्ने यतावश्वे सितच्छदे ।। २० ।।

२१

सोमश्चन्द्रोऽमृतं सोमः सोमो राजा युगादिभूः ।

सोमः प्रतानिनी भेदः सोमपोऽगस्त्यदिग्पतिः ।। २१ ।।

२२

अजो विधिरजो विष्णुरजः शम्भुरजस्तमः ।

अजस्त्रैवार्षिको व्रीहिरजो रामपितामहः ।। २२ ।।

२३

शुद्धेऽनुपहते वह्नौ ब्राह्मणे सचिवोत्तमे ।

आषाढेऽध्यात्मसंवित्तौ ब्रह्मचर्ये शुचिर्मतः ।। २३ ।।

२४

अर्थोऽभिधेयरैवस्तुप्रयोजनवृत्तिषु ।

भावः पदार्थचेष्टात्मसत्ताभिप्रायजन्मसु ।। २४ ।।

२५

प्रायोभूमोपमातर्क्यप्रभृत्यन्ननिवृत्तिषु ।

अन्तः पदार्थसामीप्यधर्मसत्त्वव्यतीतिषु ।। २५ ।।

२६

अक्षो द्यूते वरूथाङ्गे नयनादौ बिभीतके ।

सारः श्रेष्ठे बले वित्ते कोशे जलचरे स्थिरे ।। २६ ।।

२७

वाचि वारि पशौ भूपौ दिशि लोम्नि रवौ दिवि ।

विशिखे दीधितौ दृष्टावेकादशसु गौर्मतः ।।२७।।

२८

चन्द्रे सूर्ये यमे विष्णो वासवे दर्दुरे हये ।

मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः ।।२८।।

२९

पद्मे करिकरप्रान्ते व्योम्नि खड्गफले गदे ।

वाद्यभाण्डमुखे तीर्थे जले पुष्करमष्टसु ।।२९।।

३०

श्रृङ्गारादौ कषायादौ घृतादौ च विषे जले ।

निर्यासे पारदे रागे वीर्येऽपि रस इष्यते ।।३०।।

३१

तीर्थं प्रवचने पात्रे लघ्वाम्नाये विदांवरे ।

पुण्यारण्ये जलोत्तारे महासत्ये महामुनौ ।।३१।।

३२

धातुः पञ्चसु लोहेषु शरीरस्य रसादिषु ।

पृथिव्यादिचतुष्के च स्वभावे प्रकृतावपि ।३२।।

३३

प्रधानश्रृङ्गलाङ्गूलभूषापुण्ड्रप्रभावना ।

ध्वजलक्ष्मतुरङ्गेषु ललामो नवसु स्मृतः ।।३३।।

३४

आकृतावक्षरे रुपे ब्राह्मणादिषु जातिषु ।

माल्यानुलेपने चैव वर्णः षट्सु निगद्यते ।।३४।।

३५

अकारादावुदात्तादौ षड्जादौ निस्वने स्वरः

सङ्केताचारसिद्धान्तकालेषु समयः स्मृतः ।।३५।।

३६

तन्त्रं प्रधाने सिद्धान्ते सैन्ये तन्तौ परिच्छदे ।

सत्त्वमोजसि सत्तायामुत्साहे स्थेम्नि जन्तुषु ।।३५।।

३७

रुपादौ तन्तुषु ज्यायामप्रधाने नये गुणः ।

ज्ञानचारित्रमोक्षात्मश्रृतिषु ब्रह्मवाग्वरा ।।३६।।

३८

अवकाशे क्षणे वस्त्रे बहिर्योगे व्यतिक्रमे ।

मध्येऽन्तःकरणे रन्ध्रे विशेषे रहितेऽन्तरम् ।।३७।।

३९

हेतौ निदर्शने प्रश्ने श्रुतौ कण्ठसमीकृतौ ।

आनन्तर्येऽधिकारार्थे माङ्गल्ये चाथ इष्यते ।।३९।।

४०

हेतावेवंप्रकारादौ व्यवच्छेदे विपर्यये ।

प्रादुर्भावे समाप्तौ च इतिशब्दः प्रकीर्तितः ।।४०।।

४१

धर्मो धनुष्यहिंसादावुत्पादादावये नये ।

द्रव्यक्रियाश्रये वित्ति जीवादौ दावादौ दारुवैकृते ।।४१।।

४२

मूर्तिमत्सु पदार्थेषु संसारिण्यपि पुद्गलः।

अकर्मकर्मनोकर्मजाति भेदेषु वर्गणा ।।४२।।

४३

ऐश्वर्यस्यासमग्रस्य वीर्यस्य यशसः श्रियः ।

वैराग्यस्यावबोधस्य षण्णां भग इति स्मृतः ।।४३।।

४४

प्राहुः कैवल्यमार्हन्त्ये विविक्ते निर्वृतावपि ।

लब्धिः केवलबोधादाविष्टाप्तौ नियतौ श्रियाम् ।

अनेकान्ते च विद्यादौ स्यान्निपातः श्रुते क्वचित् ।।४४।।

४५

भट्टारको धर्मचन्द्रस्तत्पट्टे धर्मभूषणः ।

तत्र देवेन्द्रकीर्तीः श्रीकुमुच्चन्द्रस्ततः परम् ।। ४६ ।।

४६

धर्मचन्द्रस्ततो ज्ञानसागरस्तत्पदेऽभवत् ।

तेन पुस्तकमेतद्धि दत्तं लोकहितेच्छया ।। ४७ ।।

ज्ञानसागरकृतनाममाला समाप्ता

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

danm1 धनञ्जयनाममाला

१

तन्नमामि परं ज्योतिरवाङ्मनसगोचरम् ।

उन्मूलयत्यविद्यां यद् विद्यामुन्मीलयत्यपि ।।१।।

२

द्वयं द्वितयमुभयं यमलं युगलं युगम् ।

युग्मं द्वन्द्वं यमं द्वैतं पादयोः पातु जैनयोः ।।२।।

३

ऋषिर्मुनिर्यतिर्भिक्षुस्तापसः संशितो व्रती ।

तपस्वी संयमी योगी वर्णी साधुश्च पातु वः ।।३।।

४

दीक्षितं मौण्ड्यं शिष्यं तमन्तेवासिनं विदुः ।

कृतान्तागमसिद्धान्ताः ग्रन्थः शास्त्रमतः परम् ।।४।।

५

भूमिर्भूः पृथिवी पृथ्वी गह्वरी मेदिनी मही ।

धरा वसुमती धात्री क्षमा विश्वम्भराऽवनिः ।।५।।

६

वसुधा धरणी क्षोणी क्ष्मा धरित्री क्षितिश्च कुः ।

कुम्भिनीलोर्वरा चोर्वी जगती गौर्वसुन्धरा ।।६।।

७

तत्पर्य्यायधरः शौलस्तत्पर्य्यायपतिनृपः ।

तत्पर्य्यायरुहो वृक्षः शब्दमन्यं च योजयेत् ।।७।।

८

दरीभृदचलः श्रुङ्गी पर्वतः सानुमान् गिरिः ।

नगः शिलोच्चयोऽद्रिश्च शिखरी त्रिककुन्मरुत् ।।८।।

९

प्रस्थं पार्श्वं तटं सानुर्मेखलोपत्यका तटी ।

नितम्बमन्तो दन्तश्च तद्वानपि गिरिः स्मृतः ।।९।।

१०

राजाधिपः पतिः स्वामी नाथः परिवृढः प्रभुः ।

ईश्वरो विभुरीशानो भर्तेन्द्र इन ईशिता ।।१०।।

११

अनोकहस्तरुः शाखी विटपी फलिनो नगः ।

द्रुमोऽङ्घ्रिपः फलेग्राही पादपोऽगो वनस्पतिः ।।११।।

१२

तत्पर्य्यायचरो ज्ञेयो हरिर्वलिमुखः कपिः ।

वानरः प्लवगश्चैव गोलाङ्गूलोऽथ मर्कटः ।।१२।।

१३

विपिनं गहनं कक्षमरण्यं काननं वनम् ।

कान्तारमटवी दुर्गम् तच्चरः स्याद्वनेचरः ।। १३ ।।

१४

पुलिन्दः शवरो दस्युर्निषादो व्याधलुब्धकौ ।

धानुष्कोऽथ किरातश्च सोऽरण्यानीचरः स्मृतः ।।१४।।

१५

वार्वारि कं पयोऽम्भोऽम्बु पाथोऽर्णः सलिलं जलम् ।

सरं वनं कुशं नीरं तोयं जीवनमब्विषम् ।।१५।।

१६

तत्पर्य्यायचरो मत्स्यस्तत्पर्य्यायप्रदो घनः ।

तत्पर्य्यायोद्भवं पद्मं तत्पर्य्यायधिरम्बुधिः ।।१६।।

१७

पृथुरोमा षडक्षीणो यादो वैसारिणो झषः ।

विसारी शफरी मीनः पाठीनोऽनिमिषस्तिमिः ।।१७।।

१८

घनाघनो घनो मेघो जीमूतोऽभ्रं वलाहकः ।

पर्जन्यो मिहिरो नभ्राट् शम्पा सौदामिनी तडित् ।।१८।।

१९

आकालिकी क्षणरुचिर्विद्युत् तत्पतिरम्बुदः ।

निर्घातमशनिर्वज्रमुल्काशब्दं च योजयेत् ।।१९।।

२०

परिषत्कर्दमः पङ्कः तज्जम् तामरसं विदुः ।

कमलं नलिनं पदम् सरोजं सरसीरुहम् ।।२०।।

२१

खरदण्डं कोकनदं पण्डरीकं महोत्पलम् ।

इन्दीवरं चारविंन्दं शतपत्रं च पुष्करम् ।।२१.।।

२२

स्यादुत्पलं कुवलयम् अथ नीलाम्बुजन्म च ।

इन्दीवरं च नीलेस्मिन् सिते कुमुदकैरवे ।।२२।।

२३

तद्वति विसिनी ज्ञेया व्रततीर्वल्लरी लता ।

वल्लीनामानि योज्यानि वारिधिर्वर्ण्यतेऽधुना ।।२३।। che

२४

स्त्रोतस्विनी धुनी सिन्धुः स्त्रवन्ती निम्नगाऽपगा ।

नदी नदो द्विरेफश्च सरिन्नामा तरङ्गिणी ।।२४।।

२५

तत्पतिश्च भवत्यब्धिः पारावारोऽमृतोद्भवः ।

अपारवारकूपारौ रत्नमीनाऽभिधाऽकरः ।।२५।।

२६

समुद्रो वारिराशिश्च सरस्वान् सागरोऽर्णवः ।

सीमोपकण्ठं तीरञ्च पारं रोधोऽवधिस्तटम् ।।२६।।

२७

भङ्गस्तरङ्गः कल्लोलो वीचिरुत्कलिकाऽवलिः ।

पाली वेला तटोच्छ्वासौ विभ्रमोऽयमुदन्वतः ।।२७।।

२८

मनुष्यो मानुषो मर्त्यो मनुजो मानवो नरः ।

ना पुमान् पुरुषो गोधा धवः स्यात्तत्पतिनृर्पः ।। २८।।

२९

भृत्योऽथ भृतकः पत्तिः पदातिः पदगोऽनुगः ।

भटोऽनुजोव्यनुचरः शस्त्रजीवी च किङ्करः ।। २९ ।।

३०

स्त्री नारी वनिता मुग्धा भामिनी भीरुरङ्गना ।

ललना कामिनी योषिद् योषा सीमन्तिनीति च ।। ३० ।।

३१

नितम्बिन्यबला बाला कामुकी वामलोचना ।

भामा तनूदरी रामा सुन्दरी युवती चला ।। ३१ ।।

३२

भार्या जाया जनिः कुल्या कलत्रं गेहिनी गृहम् ।

महिला मानिनी पत्नी तथा दाराः पुरन्ध्रयः ।।३२।।

३३

वल्लभा प्रेयसी प्रेष्टा रमणी दयिता प्रिया ।

इष्टा च प्रमदा कान्ता चण्डी प्रणयिनी तथा ।।३३।।

३४

सती पतिव्रता साध्वी पतिवत्येकपत्यपि ।

मनस्विनी भवत्यार्या विपरीता निरूप्यते ।।३४।।

३५

बन्धकी कुलटा मुक्ता पुनर्भूः पुंश्चली खला ।

स्पर्शाऽभिसारिका दूती स्वैरिणी शम्फली तथा ।।३५।।

३६

गणिका लञ्जिका वेश्या रुपाजीवा विलासिनी ।

पण्यस्त्री दारिका दासी कामुकी सर्ववल्लभा ।।३६।।

३७

कान्तेष्टौ दयितः प्रीतः प्रियः कामी च कामुकः ।

वल्लभोऽसुपतिः प्रेयान् विटश्च रमणो वरः ।।३७।।

३८

सवित्री जननी माता जनकः सविता पिता ।

देहापघनकायाङ्गं वपुः संहननं तनुः ।।३८।।

३९

कलेवरं शरीरं च मूर्तिः अस्मिन् भवः सुतः ।

पुत्रः सूनुरपत्यं च तुक् तोकं चात्मजः प्रजा ।।३९।।

४०

उद्वहस्तनयः पोतो दारको नन्दनोऽर्भकः ।

स्तनन्धयोत्तानशयौ स्त्री चेद् दुहितरं विदुः ।।४०।।

४१

वयस्याऽली सहतरी सध्रीची सवयाः सखी ।

आलीविवर्जितं मित्रं सम्बन्धो मित्रयुक् सुहृत् ।।४१।।

४२

सहकृत्वा सहकारी सहायः सामवायिकः ।

सनाभिः सगोत्रो बन्धुश्च सोदर्यः अवरजोऽनुजः ।।४२।।

४३

कनीयान् अग्रजो ज्येष्टः भ्रातृजानी स्वसाऽनुजा ।

भर्त्तुः स्वसा ननान्दा स्यात् मातुलानी प्रियाम्बिका ।।४३।।

४४

वैर्यारातिरमित्रोऽरिर्द्विट् सपत्नो द्विषद्रिपुः ।

भ्रातृव्यो दुर्जनः शत्रुर्दुष्टो द्वेषी खलोऽहितः ।।४४।।

४५

दीधितिर्भानुरुस्त्रोंऽशुर्गभस्तिः किरणः करः ।

पादो रुचिर्मरीचिर्भास्तेजोऽर्चिगौर्द्युतिः प्रभा ।।४५।।

४६

दीप्तिर्ज्योतिर्महो धाम रश्मिरूर्जो विभावसुः ।

शीतोष्णप्राय.पूर्वाञ्चौ तदन्ताविन्दुभास्करौ।। ४६ ।।

४७

शशी विधुः सुधासूतिः कौमुदीकुमुदप्रियः ।

कलाभृच्चन्द्रमाश्चन्द्रः कान्तिमानोषधीश्वरः ।।४७।।

४८

उडूनि भानि तारर्क्षं नक्षत्रम् तत्पतिः निशा

क्षणदा रजनी नक्तं दोषा श्यामा क्षिपा करः ।। ४८ ।।

४९

तरणिस्तपनो भानुर्ब्रध्नः पूषाऽर्यमा रविः ।

तिग्मः पतङ्गो द्युमणिर्मार्तण्डोऽर्को ग्रहाधिपः ।। ४९ ।।

५०

इनः सूर्यस्तमोध्वान्ततिमिरारिर्विरोचनः ।

दिनं दिवाऽहर्दिवसो वासरः तत्करश्च सः ।। ५० ।।

५१

चक्रवाकाब्जपर्यायबन्धुः कुमुदविप्रियः ।

यमुनायमकानीनजनकः सविता मतः ।। ५१ ।।

५२

वाहोऽश्वस्तुरगो वाजी हयो धुर्यस्तुरङ्गमः

सप्तिरर्वा हरी रथ्यः सप्ताद्यश्वो मयूखवान् ।। ५२ ।।

५३

खं विहायो वियद् व्योम गगनाकाशमम्बरम् ।

द्यौर्नभोऽभ्रोऽन्तरीक्षं च मेघवायुपथोऽप्यथ ।। ५३ ।।

५४

तच्चरः खेचरः तद्गः पक्षी पत्री पतत्र्यपि ।

शकुन्तिः शकुनिर्विश्च पतङ्गो विष्किरोऽन्यथा ।। ५४ ।।

५५

जाङ्गलं पिशितं मांसं पलं पेशी च तत्प्रियः ।

यातुधानस्तथा रक्षो रात्र्यादिचर इष्यते ।। ५५ ।।

५६

सुतोऽदितोस्तडिद्धन्वा सेन्द्रो देवः सुरोऽमरः ।

स्वर्द्यौः स्वर्गोऽथ नाकश्च तद्वासस्त्रिदशो मतः ।। ५६ ।।

५७

तत्पतिः शक्र इन्द्रश्च शुनासीरः शतक्रतुः ।

प्राचीनबर्हिः सुत्रामा वज्री चाखण्डलो हरिः ।। ५७ ।।

५८

शतृर्बलस्य गोत्रस्य पाकस्य नमुचेरपि ।

वृत्रहा च सहस्राक्षो गीर्वाणेशः पुरन्दरः ।। ५८ ।।

५९

विडौजाश्चाप्सरोनाथो वासवो हरिवाहनः ।

मरुतश्च मरुत्वाँश्च वृषा चैरावणाधिपः ।। ५९ ।।

६०

शतमन्युस्तुराषाट् च पुरुहूतश्च कौशिकः ।

संक्रन्दनोऽथ मघवान् पुलोमारिर्मरुत्सखः ।। ६० ।।

६१

काष्ठा ककुब्दिगाशा च दक्षकन्या तथा हरित् ।

तत्पर्यायपरं योज्यं प्राज्ञैः पालगजाम्बरम् ।। ६१ ।।

६२

पवनः पवमानश्च वायुर्वातोऽनिलो मरुत्।

समीरणो गन्धवाहः श्वसनश्च सदागतिः ।। ६२ ।।

६३

नभस्वान् मातरिश्वा च चरण्युर्जवनस्तथा ।

प्रभञ्जनः अस्य पर्यायपुत्रौ भीमाञ्जनात्मजौ ।। ६३ ।।

६४

तत्सखाऽग्निः शिखी वह्निः पावकश्चाशुशुक्षणिः ।

हिरण्यरेता सप्तार्चिर्जितवेदास्तनूनपात् ।। ६४ ।।

६५

स्वाहापतिर्हुताशश्च ज्वलनो दहनोऽनलः ।

वैश्वानरः कृशानुश्च रोहिताश्वो विभावसुः ।। ६५ ।।

६६

वृषाकपिः समीगर्भो हव्यवाहो हुताशनः ।

तदादिसूनुः सेनानीः स्कन्दश्च शिखिवाहनः ।। ६६ ।।

६७

कार्तिकेयो विशाखश्च कुमारः षण्मुखो गुहः ।

शक्तिमान् क्रौञ्चभेदी च स्वामी शरवणोद्भवः ।। ६७ ।।

६८

तत्पिता शङ्करः शम्भुः शिवः स्थाणुर्महेश्वरः ।

त्र्यम्बको धूर्जटिः शर्वः पिनाकी प्रमदाधिपः ।। ६८ ।।

६९

त्रिपुरारिर्विशालाक्षो गिरिशो नीललोहितः ।

रुद्रेन्दुमौलिर्यज्ञारिस्त्रिनेत्रो वृषभध्वजः ।। ६९ ।।

७०

उग्रः शूली कपाली च शिपिविष्टो भवो हरः ।

उमापतिर्विरूपाक्षो विश्वरूपः कपर्द्यपि ।।७० ।।

७१

भागिरथी त्रिपथगा जाह्नवी हिमवत्सुता ।

मन्दाकिनि द्युपर्यायधुनी गङ्गानदीश्वरः ।। ७१ ।।

७२

विधिर्विधा विधाता च द्रुहिणोऽजश्र्चतुर्मुखः ।

पद्मपर्य्ययोनिश्च पितामहविरञ्चिनौ ।। ७२ ।.

७३

हिरण्यगर्भः स्त्रष्टा च प्रजापतिस्सहस्त्रपात् ।

ब्रह्मात्मभूरनन्तात्मा कः तत्पुत्रोऽथ नारदः ।।७३ ।।

७४

कृष्णो दामोदरो विष्णुरुपेन्द्रः पुरुषोत्तमः ।

केशवश्च हषीकेशः शाङ्र्गी नारायणो हरिः ।। ७४ ।।

७५

केशी मधुर्बलिर्बाणो हिरण्यकशिपुर्सुरः ।

तदादिसूदनः शौरिः पद्मनाभोऽप्यधोक्षजः ।। ७५ ।।

७६

गोविन्दो वासुदेवश्च लक्ष्मीः श्रीर्गोमिनीन्दिरा ।

तत्पतिः शैलभूम्यादिधरश्चक्रधरस्तथा ।।७६।।

७७

तत्पुत्रो मन्मथः कामः सूर्पकारातिरनन्यजः ।

कायपर्यायरहितो मदनो मकरध्वजः ।।७७।।

७८

शिलीमुखः शरो बाणो मार्गणो रोपणः कणः ।

इषुः काण्डं क्षुरप्रं च नाराचं तोमरं खगः ।।७८।।

७९

कार्मुकं धन्व चापं च धर्म कोदण्डकं धनुः ।

शिलीमुखादेरसनम तत्कोटिमटनीं विदुः ।।७९।।

८०

पुष्पं सुमनसः फुल्लं लतान्तं प्रसवोद्गमौ ।

प्रसूनं कुसुमं ज्ञेयम् तदाद्यस्त्रशरः स्मरः ।।८०।।

८१

स्वान्तमास्वनितं चितं चेतोऽन्तःकरणं मनः ।

हृदयं विशिखाऽकूतम् मारस्तत्रोद्भवो मतः ।।८१।।

८२

मौर्वी जीवा गुणो गव्या ज्या अलिर्भृङ्गः शिलीमुखः ।

भ्रमरः षट्पदो ज्ञेयो द्विरेफश्च मधुव्रतः ।।८२।।

८३

मौर्व्यादिप्रान्तमल्यादिकन्दर्पस्यैक्षवं धनुः ।

हेतिरस्त्राऽयुधं शस्त्रम् पुष्पाद्यस्त्रः स्मरो मतः ।।८३।।

८४

ध्वजं पताका केतुश्च चिह्नं तद्वैजयन्त्यपि ।

तत्तदन्तो झषाद्यादिः शम्भोर्विघ्नकरः स्मरः ।।८४।।

८५

कौक्षेयकासिनिस्त्रिशकृपाणाः करवालकः ।

तरवारिर्मण्डलाग्रं खड्ग्नामावलिं विदुः ।।८५।।

८६

अक्षौहिणी बलानीकं वाहिनी साधनं चमूः ।

ध्वजिनी पृतना सेना सैन्यं दण्डो वरूथिनी ।।८६।।

८७

कदनं समरं युद्धं संयुगं कलहं रणम् ।

संग्रामं सम्परायाजी संयदाहुर्महाहवम् ।।८७।।

८८

गजो मतङ्गजो हस्ती वारणोऽनेकपः करी ।

दन्ती स्तम्बेरमः कुम्भी द्विरदेभमितङ्गमाः ।।८८।।

८९

शुण्डालः सामजो नागो मातङ्गः पुष्करी द्विपः ।

करेणुः सिन्धुरः तेषु यन्ता याता निषाद्यपि ।।८९।।

९०

नागाद्यरिः कण्ठीरवो मृगेन्द्रः केसरी हरिः ।

व्याघ्रश्चमूरः शार्दूलः शरभोऽष्टपात् ।।९०।।

९१

क्रोडो वराहो दंष्ट्री च घृष्टिः पोत्री च शूकरः ।

उष्ट्रो मयः श्रुंखलिकः कलभः शीघ्रगामुकः ।।९१।।

९२

कौलेयकः सारमेयो मण्डलः श्वा पुरोगतिः ।

जिह्वापो ग्रामशार्दूलः कुक्कुरो रात्रिजागरः ।।९२।।

९३

हेम चाष्टापदं स्वर्णं कनकार्जुनकाञ्चनम् ।

सुवर्णं हिरण्यं भर्मं जातरूपं च हाटकम् ।।९३।।

९४

तपनीयं कलाधौतं कार्तस्वरशिलोद्भवम् ।

रूप्यं रजतं गुलिका शुक्तिज मौक्तिकं तथा ।।९४।।

९५

वित्तं वस्तु वसु द्रव्यं स्वार्थं रा द्रविग्रां धनम् ।

कस्वरं तत्पतिं प्राहुः कुवेरं चैकपिङ्गलम् ।।९५।।

९६

वैश्रवणं राजराजमुत्तराशापतिं तथा ।

अलकानिलयं श्रीदं धनपर्यायदायकम् ।।९६।।

९७

राष्ट्रं जनपदो निर्गो जनान्तो विषयः स्मृतः ।।

पूः पुरी नगरं चैव पट्टनं पुटभेदनम् ।।९७।।

९८

वक्त्रं लपनमास्यं च वदनं मुखमाननम् ।

श्रवणं श्रोत्रं श्रवश्चापि कर्णं चैव श्रुतिं विदुः ।।९८।।

९९

दृगक्षि चक्षुर्नयनं दृष्टिर्नेत्रं विलोचनम् ।

कटाक्षं केकरापाङ्गं विभ्रमस्तस्य वैकृतम् ।।९९।।

१००

दन्तवासोऽधरोऽप्योष्ठे वर्णितो दशनच्छदः ।

शिरोधरो गलो ग्रीवा कण्ठश्च धमनी धमः ।।१००।।

१०१

दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथा ।

प्राहुर्बाहुशिरोंऽसश्च हस्तशाखा कराङ्गुळिः ।।१०१।।

१०२

नासा घ्राणम् उरो वक्षः कुक्षिः स्याज्जठरोदरम् ।

स्तनः पयोधरकुचौ वक्षोज इति वर्णितः ।।१०२।।

१०३

कटिर्नितम्बं श्रोणी च जघनं जानु जह्नु च ।

चलनं चरणं पादं क्रमोऽह्रिश्च पदं निदुः ।।१०३।।

१०४

शिरो मूर्धोत्तमाङ्गं कम्प्रारभ्यं प्रेरितेरितम् ।

चो वचनं वामी भारती गीः सरस्वती ।।१०४।।

१०५

सिंहद्विपघने गर्जः हेषाऽश्वे बृंहितं गजे ।

स्फीत्कृतं धेनुकलभे स्तमितं जलदे तथा ।। १०५ ।।

१०६

स्यन्दने चीत्कृतं मन्त्रे भटे च हुङ्कृतं तथा ।

सीत्कृतं मणितं कामे खन्कृतं श्रृङ्खलायुधे ।। १०६ ।।

१०७

मञ्जीरकं तुलाकोटिर्नूपुरं तत्र संसृतम् ।

झाङ्कृतं चाथ मरुति क्रेङ्कृतम् क्रौञ्चहंसयोः ।। १०७ ।।

१०८

प्रतीतं संस्तुतं लब्धं दृष्टं परिचितं स्मृतम् ।

संस्थितं दशमीस्थं च परासुं च मृतं विदुः ।। १०८ ।।

१०९

खेदो द्वेषोऽप्यमर्षश्च रुट्कोपक्रोधमन्यवः ।

हर्षः प्रमोदः प्रमदो मुत्तोषानन्दमुत्सवः ।। १०९ ।।

११०

कृपाऽनुकम्पानुक्रोशोऽहन्तोक्तिः करुणा दया ।

शेमुषी धिषणा प्रज्ञा मनीषा धीस्तथाऽशयः ।। ११० ।।

१११

प्रज्ञामेधाविनौ विद्वानभिरूपो विचक्षणः ।

पण्डितः सूरिराचार्यो वाग्मी नैयायिकः स्मृतः ।। १११ ।।

११२

पारिषद्यो बुधः सभ्यः सदः संसद्सभोचितः ।

परिषत्सभाऽस्थानपती राजसूयो नृपक्रतुः ।। ११२ ।।

११३

विष्टरं मल्लिकापीठमासंदीमासनं विदुः ।

विष्टपं भुवनं लोको जगत् तस्य पतिर्जिनः ।। ११३ ।।

११४

वर्षियान् वृषभो ज्यायान् पुरुराद्यः प्रजापतिः ।

ऐक्ष्वाकुः काश्यपो ब्रह्मा गौतमो नाभिजोऽग्रजः ।। ११४ ।।

११५

सन्मतिर्महतिर्वीरो महावीरोऽन्त्यकाश्यपः ।

नाथान्वयो वर्धमानो यत्तीर्थमिह साम्प्रतम् ।। ११५ ।।

११६

सर्वज्ञो वीतरागोऽर्हन् केवली धर्मचक्रभृत् ।

तीर्थङ्करस्तीर्थकरस्तीर्थकृद्दिव्यवाक्पतिः ।। ११६ ।।

११७

चेलं निवसनं वासक्षीरमम्बरमंशुकम्

वस्त्राद्यन्तः दिगाद्यादिसंज्ञितो वृषभेश्वरः ।

कुङ्कुमं रुधिरं रक्तम् कस्तूरी मृगनाभिजम् ।।११७ ।।

११८

कर्पूरं घनसारं च हिमं सेवेत पुण्यवान् ।

समालम्भोऽङ्गरागश्च प्रसाधनविलेपनम् ।। ११८ ।।

११९

भूषणाभरणं रुच्यम् माल्यं मालागुणस्त्रजः ।

मेखला रसना काञ्ची हेमपर्यायसूत्रकम् ।। ११९ ।।

१२०

श्रोणीबिम्बं कटीसूत्रं मानसूत्रमिवाहितम् ।

मदिरां मद्यमैरेयं शीधु कादम्बरीमिराम् ।। १२० ।।

१२१

प्रसन्नां वारुणीं हालां मधुवारां सुरां विदुः ।

शुण्डासवः तद्विधायी शौण्डो गद्येत मद्यपः ।। १२१ ।।

१२२

सक्तोऽक्षद्यूतपानेषु विचित्रा शब्दपद्धतिः ।

सर्पिर्हैयङ्गवीनाज्यं दुग्धं क्षीराऽमृतम् पयः ।। १२२ ।।

१२३

उदश्चिन्मथितं तक्रं कालशेयं पिबेद्गुरुः ।

प्रायो वयो दशानेहा पूर्णं यौवनकं विदुः ।। १२३ ।।

१२४

तारुण्यं यौवनं च अन्त्यो वार्द्धीनः स्थविरो मतः ।

वंशोऽन्वयोऽन्ववायः स्यादाम्नायः संततिः कुलम् ।।१२४ ।।

१२५

ओघो वर्गश्च सन्तानः काव्यमेव कविस्थितिः ।

हंसो मरालश्चक्राङ्गः हंसवाहः सनातनः ।। १२५ ।।

१२६

मयूरो बर्हिणः केकी शिखी प्रावृषिकस्तथा ।

नीलकण्ठः कलापी च शिखण्डी तत्पतिर्गुहः ।। १२६ ।।

१२७

वरटा वारली हंसी कोक ईहामृगो वृकः ।

हरिणो मृगश्च पृषतः तदङ्कः शर्वरीकरः ।। १२७ ।।

१२८

पन्नगोऽहिर्विषधरो लेलिहानो भुजङ्गम् .

नागोरगौ फणी सरपः तद्वैरी विनतात्मजः ।। १२८ ।।

१२९

सुपर्णो गरुडस्ताक्ष्यो गरुत्मान् शकुनीश्वरः ।

इन्द्रजिन्मन्त्रपूतात्मा वैनतेयो विषाशयः ।। १२९ ।।

१३०

खमिन्द्रियं हृषीकं च श्रोतोऽक्षं करणां विदुः ।

पुण्यं भाग्यं च सुकृतं भागधेयं च सत्कृतम् ।। १३० ।।

१३१

अघमंहश्च दुरितं पाप्मा पापं च किल्बिषम् ।

वृजिनं कलिलं ह्येनो दुष्कृतम् तज्जयी जिनः ।। १३१ ।।

१३२

सदनं सद्म भवनं धिष्ण्यं वेश्माथ मन्दिरम् ।

गेहं निकेतनागारं निशान्तं निवृतं गृहम् ।। १३२ ।।

१३३

वसत्यावासथावास स्थानं धामास्पदं पदम् ।

निकायं निलयं पस्त्यं शरणां विदुरालयम् ।। १३३ ।।

१३४

खेयं खातं च परिखा वप्रं स्याद्धूलिकुट्टिमम् ।

प्राकारः परिधिः सालः प्रतोली गोपुराकृतिः ।। १३४ ।।

१३५

प्रासादसौधहर्म्याणि निर्व्यूहो मत्तवारणः ।

वातायनं मतालम्बम् आलम्ब्यसुखमासनम् ।। १३५ ।।

१३६

समः सवर्णः सज्ञातिः सदृक्षः सदृशः सदृक् ।

तुल्यःसधर्मरूपश्च तुला कक्षेपमा विधा ।।१३६।।

१३७

विन्मान्यो विद्यमानश्च गुरुस्थानाम्बुजाननाः ।

सिंहादीनि च पर्यायमुपमानेषु योजयेत् ।।१३७।।

१३८

व्यपदेशो निभं व्याजः पदं व्यतिकरश्छलम् ।

छद्मवृत्तामुत्प्रेक्षा शब्दमन्यं च निर्णयेत् ।। १३८।।

१३९

व्रातः पूगः समाजश्च समूहः सन्ततिर्व्रजः ।

व्यूहो निकायो निकुरो निकुरम्बं कदम्बकम् ।।१३९।।

१४०

ओघः समुदयः सङ्घः सङ्घातः समितिस्ततिः ।

निचयः प्रकरः पङ्क्तिः पशूनां समजो व्रजः ।।१४०।।

१४१

समीपाभ्यासमासन्नमभ्यर्णं सन्निधिं विदुः ।

अविदूरं च निकटमवलग्नमनन्तरम् ।।१४१।।

१४२

जित्या हलिर्हलं सीरं लाङ्गलम् तत्करो बलः ।

रेवतीदयितो नीलवसनः केशवाग्रजः ।।१४२।।

१४३

अर्जुनः फाल्गुनो जिष्णुः श्वेतवाजी कपिध्वजः ।

गाण्डीवी कार्मुकी सव्यसाची मध्यमपाण्डवः ।।१४३।।

१४४

वृषसेनः सुनिर्मोको दैत्यारिः शक्रनन्दनः ।

कर्णशूली किरीटी च शब्दभेदी धनञ्जयः ।।१४४।।

१४५

कुरुकीचकयोर्वैरी वायुपुत्रो वृकोदरः ।

समवर्ती यमः कालः कृतान्तो मृत्युरन्तकः ।।१४५।।

१४६

तदात्मजो जातरिपुः कौन्तेयो भरतान्वयः ।

कौरव्यो राजयक्ष्माऽसौ सोमवंशो युधिष्ठिरः ।।१४६।।

१४७

श्वेतार्जुनो शुचिः श्वेतो वलक्षं सितपाण्डुरम् ।

शुक्लावदातं धवलं पाण्डुः शुभ्रं शशिप्रभम् ।।१४७।।

१४८

कृष्णं नीलासितं कालम् घूमं धूम्रमलिप्रभः ।

तमोऽन्धकारं तिमिरं ध्वान्तं संतमसं तमम् ।।१४८।।

१४९

लोहितं रक्तमाताम्रं पाटलं विशदारुणम् ।

पीतं गौरं हरिद्राभम् पालाशं हरितं हरित् ।।१४९।।

१५०

हरिणी लोहिनी शोणी गौरी श्येनी पिशङ्गयपि ।

सारङ्गी शवरी काली कल्माषी नीलपिञ्जरी ।।१५०।।

१५१

परागं मधु किञ्जल्कं मकरन्दं च कौसुमम् ।

उपचाराद्रजः पांशुरेणुधूलीश्च योजयोत् ।।१५१।।

१५२

कलङ्कावद्यमलिनं किञ्जल्कं लक्ष्म लाञ्छनम् ।

निबोधमधमं पङ्कं मलीमसमपि त्यजेत् ।।१५२।।

१५३

जनोदाहरणं कीर्ति साधुवादं यशो विदुः ।

वर्णं गुणावलिं ख्यातिं अवधानं तु साहसम् ।।१५३।।

१५४

प्रेष्यादेशनिदेशाज्ञानियोगाः शासनं तथा ।

सन्देशः प्रिययोः वार्ता प्रवृत्तिः किंवदन्त्यपि ।।१५४।।

१५५

कठोरं कठिनं स्तब्धं कर्कशं परुषं दृढम् ।

अश्लीलं काहलं फल्गु कोमलं मृदु पेशलम् ।।१५५।।

१५६

प्रत्यग्रं साम्प्रतं नव्यं नवं नूतनमग्रिमम् ।

पुराणं जठरं जीर्णं प्राक्तनं सुचिरन्तनम् ।।१५६।।

१५७

भो रे हं हो हयामन्त्रे कश्चित् किञ्चन संशये ।

द्राक्क्षणेऽह्नाय सपदि निषेधे मा न खल्वलम् ।।१५७।।

१५८

उच्चैरुच्चावचं तुङ्गमुच्चमुन्नतमुच्छ्रितम् ।

नीचं न्यगातनं कुब्जं नीचैर्ह्रस्वं नयेत्परम् ।।१५८।।

१५९

अमा सह समं साकं सार्द्धं सत्रा सजूः समाः ।

सर्वदा सततं नित्यं शश्वदात्यन्तिकं सदा ।।१५९।।

१६०

वियोगं मदनावस्थां पल्लकं विदुः ।

प्रेमाभिलाषमालभ्यं रागं स्नेहमतः परम् ।।१६०।।

१६१

संहितं सहितं युक्तं संपृक्तं संभृतं युतम् ।

संस्कृतं समवेतं च प्राहुरन्वीतमन्वितम् ।।१६१।।

१६२

वर्त्माऽध्वा सरणिः पन्था मार्गः प्रचरसञ्चरौ ।

त्रिमार्गनामगा गङ्गा घोषो गोमण्डलं व्रजः ।।१६२।।

१६३

श्रृङ्गो दृतिहरिर्नाथहरिस्तिर्यक्च श्रृङ्गिणः ।

गौश्चतुष्पात्पशुः तत्र महिषी नाम देहिका ।।१६३।।

१६४

कृती नदीष्णो निष्णातः कुशली निपुणः पटुः

क्षुण्णः प्रवीणः प्रगल्भः कोविदश्च विशारदः ।।१६४।।

१६५

विदग्धश्चतुरः धूर्तश्चाटुकृत् कितवः शठः ।

क्वापि नागरिको ज्ञेयः गोत्रसंज्ञाङ्कनाम तत् ।।१६५।।

१६६

मुग्धो मीढो जडो नेडो मूको मूर्खश्च कद्वदः।

स देवानां प्रियोऽप्राज्ञो मन्दः धीनामवर्जितः ।।१६६।।

१६७

षाष्टिकः कलमः शालिर्व्रीहिः स्तम्बकरिस्तथा ।

वत्सः शकृत्करिर्जातः षोडन् षड्दशनः स्मृतः ।।१६७।।

१६८

शौण्डीरो गर्वितः स्तब्धो मानी चाहंयुरुद्धतः ।

उद्ग्रीव उद्धरो दृप्तः नीचश्च पिशुनोऽधमः ।।१६८।।

१६९

चौरैकागारिस्तेनास्तस्करः प्रतिरोधकः ।

निशाचरो गूढनरो हेरिकः प्रणिधिश्च सः ।।१६९।।

१७०

प्रस्तरोपलपाषाणदृषद्धातुः शिला घनः ।

तत्र जातमयो लोहम् शातकुम्भं नयेत्परम् ।।१७०

१७१

क्षामं शान्तं कृशं क्षीणं हीनं जीर्णं च वैरिणाम् ।

शीर्णावसानं दूनं च धैर्यं शौर्यं च पौरुषे ।।१७१।।

१७२

क्षिप्राशुमङ्क्ष्वरं शीघ्रं सहसा झटिति ।

तूर्णं जवः स्यदो रंहो रयो वेगस्तरो लघुः ।।१७२

१७३

साधीयोऽत्यर्थमत्यन्तं नितान्तं सुष्टु वै भृशम् ।

स्फुटं साधु खलु स्पष्टं विशदं पुष्कलामलौ ।।१७३।।

१७४

चित्राश्चर्याभ्दुतं चोद्यं विस्मयः कौतुकोऽप्यहो ।

अभियोगोद्यमोद्योगा उत्साहो विक्रमो मतः ।।१७४

१७५

रहोऽनुरहसोपांशु रहस्यं च भिनत्ति कः ।

कीनाशः कृपणो लुब्धो गृध्नुर्दीनोऽभिलाषुकः ।।१७५।.

१७६

पाशनीतः सितो बध्दः सन्धानीतो नियन्त्रितः ।

नियामितः शृङ्खलितः पिनद्धः पाशितो रिपुः ।। १७६।।

१७७

कान्तं च कमनं कम्रं कमनीयं मनोहरम् ।

अभिरामं रमणीयं रम्यं सौम्यं च सुन्दरम् ।।१७७।।

१७८

चारुश्लक्ष्णं च रुचिरं प्रशस्तं हृद्यबन्धुरम् ।

दर्शनीयं मनोज्ञं च चित्तपर्यायहारि च ।। १७८ ।।

१७९

अवश्यायं तुषारं च प्रालेयं तुहिनं हिमम् ।

नीहारम् तत्करं विद्धि मृगाङ्कं रोहणीपतिः ।। १७९ ।।

१८०

पन्नगं सन्नरं प्राहुः तिलकं च विशेषकम् ।

ललाटिका ललामापि पूर्णवाहं तथा द्रुमम् ।१८० ।।

१८१

अञ्जनं कज्जलं नागं गजपाटलमारुणं ।

सालं परिधि वृक्षं च कुल्यां स्त्रीं सारणीं विदुः ।। १८१ ।।

१८२

चारोऽवसर्पः प्रणिधिर्निगूढपुरुषश्चरः ।

तद्वानुक्तः सहस्राक्षः सत्यार्थे सूनृतं ऋतम् ।। १८२ ।।

१८३

निस्तलं वर्तुलं वृत्तम् स्थपुटं विषमोन्नतम् ।

दीर्घं प्रांशु विशालं च बहुलं पृथुलं पृथु ।। १८३ ।।

१८४

उल्बणं दारुणं तिग्मं घोरं तीव्रोग्रमुत्कटम् ।

शीतलं तिमिरं याथं मन्दं विद्धि विलम्बितम् ।। १८४ ।।

१८५

स्वभावः प्रकृतिः शीलं निसर्गो विश्वसो निजः ।

योग्या गुणनिकाभ्यासः स्यादभीक्ष्णं मुहुर्मुहुः ।। १८५ ।।

१८६

मृषालीकं सुधा मोघम् विफलं वितथं वृथा ।

विधुरं व्यसनं कष्टं कृच्छ्रं गहनमुद्वरेत् ।। १८६ ।।

१८७

समस्तं सफलं सर्वं कृत्स्नं विश्वं तथाऽखिलम् ।

शकलं विकलं खण्डं शल्कं लेशं लवं विदुः ।। १८७ ।।

१८८

मर्म कोषं च कलहं परिवादं छलं नयेत् ।

शोणितं लोहितं रक्तं रुधिरं क्षतजासृजम् ।। १८८ ।।

१८९

सन्ततानारताजस्रान्वहं कन्यापतिर्वरः ।

उद्वाहः परिणयनं विवाहश्च निवेशनम् ।। १८९ ।।

१९०

शुषिरं विवरं रन्ध्रं छिद्रं गर्ता च गह्वरम् ।

श्वभ्रं रस्यं च पातालं यान्त्यमेधसः ।। १९० ।।

१९१

अदभ्रं भूरि भूयिष्ठं बंहिष्ठं बहुलं बहु ।

प्रचुरं नैकमानन्त्यं प्राज्यं प्राभूतपुष्कलम् ।। १९१ ।।

१९२

भवो भावश्च संसारः संसरणं च संसृतिः ।

तत्वज्ञश्चतुरो धीरस्त्यजेज्जन्माजवं जवम् ।। १९२ ।।

१९३

ऊर्जस्फूर्जस्वी तरस्वी तेजस्वी च मनस्व्यपि ।

भास्वरो भासुरः शूरः प्रवीरः सुभटो मतः ।। १९३ ।।

१९४

तनुत्रं वर्म कवचमावृतिर्बाणवारणम् ।

कूर्पासं कञ्चुकं छत्रमातपत्रोष्णवारणम् ।। १९४ ।।

१९५

केशं शिरोरुहं वालं कचं चिकुरमीहयेत् ।

चूडापाशं च धम्मिल्लं कबरी केशबन्धनम् ।। १९५ ।।

१९६

उररीकृतमप्यूरीकृतमङ्गीकृतं तथा ।

अस्तुङ्कारोऽभ्युपगमे सत्यङ्कारः पणार्पणे ।। १९६ ।।

१९७

सौहार्दं सौहृदं हार्दं सौहृद्यं सख्यसौरभम् ।

मैत्री मैत्रेयिकाजर्यं सहाय्यं संगतं मतम् ।। १९७ ।।

१९८

क्षेमं कल्याणमुभयं श्रेयो भद्रं च मङ्गलम् ।

भावुकं भविकं भव्यं श्वोवसीयं शिवं तथा ।। १९८ ।।

१९९

वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ ।

शब्दपारायणस्यान्तं न गतौ तत्र के वयम् ।। १९९ ।।

२००

तथापि किञ्चित् कस्मैचित् प्रतिबोधाय सूचितम् ।

बोधयेत्कियदुक्तिज्ञो मार्गज्ञः सह याति किम् ।। २०० ।।

२०१

प्रमाणमकलङ्कस्य पूज्यपादस्य लक्षणम् ।

द्विःसन्धनकवेः काव्यं रत्नत्रयमपश्चिमम् ।। २०१ ।।

२०२

कवेर्धनञ्जयस्येयं सत्कवीनां शिरोमणेः ।

प्रमाणं नाममालेति श्लोकानां हि शतद्वयम् ।। २०२ ।।

२०३

ब्रह्माणं समुपेत्य वेदनिनदव्याजात् तुषाराचल

स्थानस्थावरमीश्वरं सुरनदीव्याजात् तथा केशवम् ।

अप्यम्भोनिधिशायिनं जलनिधिध्वानोपदेशादहो

फूत्कुर्वन्ति धनञ्जयस्य च भिया शब्दाः समुत्पीडिताः ।। २०३ ।।

इति धनञ्जयनाममाला समाप्ता

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

द्व्यक्षरीनाममाला

सौभरिः

१

क्वणितं परमं ब्रह्म धीमहि प्रणताः सदा ।

ध्यात्वा प्रकाश्यते माला सर्वज्ञानविधायिनी ।।

२

क्णः कणः क्णा धरा क्णिर्धीः क्णुः पुत्रः क्णूर्हुताशनः ।

क्णौः कलापि स्मृतिः क्णं तु वृक्णं साधुसमीरितमू ।।

३

त्तः सित्तो वरुणोऽपि त्तः त्ताः दुर्गा मातृका गिरा ।

त्तिः सूर्यः त्तीः स्मृतो वाह्निः त्तुः सुनुः सोम एव च ।।

४

त्तौर्लक्ष्मीः त्तं वरं ज्योतिः क्थः संघो हरिणो गजः ।

क्था मही सरमा दुर्गा क्थिः कृष्णो वरः ।।

५

क्थीः शिवः क्थुः शङ्खो गरुडो नरः ।

क्थूः सूतो वरुणो मारो रवः क्थौः सरमासुतः ।।

६

क्थं रिक्थं क्वथनं दुःखं दैन्यं क्रः कर्ण उत्सवः ।

क्रा रमोमा मही भित्तिः क्रिः सूकर उरुक्रमः ।।

७

क्रुः शिवोऽर्कोऽम्बुधिः शूद्रोऽमरः क्रूः पतिरात्महा ।

क्रं श्रोत्रं करणं भीमं क्मः कामः कमलाहितः ।।

८

क्मा रतिः कामपत्नी स्यात्क्मिः कामी क्मी रतीशवानू ।

क्मृर्बभ्रुः क्मूः स्वभूः शङ्खः शूकरः क्मौः कजालया ।।

९

क्मं कर्म क्यः पलाशोऽग्निरर्कः क्या रेणुरुच्यते ।

रव्यः खरोऽग्निः खरी रव्या स्यादू ग्यो गर्गः कमलासनः ।।

१०

ग्या योनिर्ध्यः स्वनो मूको ध्या पत्नी धरणी स्मृता ।

च्यश्चयश्चातुरी च्या स्याच्छचः छागः छचा च भारती ।।

११

ज्यो जयो यजमानश्च ज्या जया विजया रमा ।

झ्यो नदो झ्या नदी प्रोक्ता ठ्यः कूटः ट्या धरा सुरा ।।

१२

ठ्यो नादनोऽनलः ठ्या घौडर्यो दाडिमतरुः करः ।

डया रमा नर्मदा गङ्गा ढच आढचः शिशुरुत्करः ।।

१३

ढचा मही ण्यः स्मृतोऽग्रण्यः शरण्यो ण्या नदी गिरा ।

त्योऽन्त्यजः कमलानाथो गुरुस्त्या धरणी नदी ।।

१४

थ्यो नाथस्थ्या कथा घोऽब्धिर्घा दया घौरित्रिविष्णुपम् ।

ध्योऽन्धो ध्यान्धा क्षुधा सुद्वा न्यो नयोऽर्णव उज्ज्वलः ।।

१५

न्या नीतिर्नतिरुग्राणी प्यः पयः प्या कृपा रुचिः ।

फ्यः फेनः फ्या फणा व्योऽर्को व्याम्बा भ्य इभ्योऽभयः पुमान् ।।

१६

म्यो मयो यम ईशानो म्या रमा सरमा क्षमा ।

य्योऽजय्यो विबुधाधीशो य्या शय्या ल्योऽय उद्धतः ।।

१७

ल्याऽहिल्या नलिनी व्योऽब्धिर्वयः पक्षी च कूबरः ।

व्यो वायुवर्याल ईशानो व्या भव्या वडवा सुधा ।।

१८

श्य आस्य आशयो नारी श्या वेश्या कृषिरित्यपि ।

ष्यः प्रेष्यः ष्या सुरा शुद्ध स्यः प्रशस्योऽमराधिपः ।।

१९

स्या कृषिः कृषिदेवं च ह्यो हयो ह्या तुरंगमा ।

व्या सर्वजगदम्बा च सर्वेशानी सुरेश्वरी ।।

२०

क्यं कार्यं च रव्यमाकाशं सख्य ग्यं गगनं गतमू ।

ध्यं तोयं च्यं स्मृतं याच्यं शोच्यं पैशाच्यमेव च ।।

२१

छयं ष्ठेवं ज्यं स्मृतं याज्यं जातं झ्यं झषनाशनम् ।

ट्यं स्फेट्यं ठ्यं स्मृतं शाठ्यं ड्यं जाड्यं ढ्यं धनं वनम् ।।

२२

ण्यं न्याय्यं त्यं स्मृतं ह्यन्त्यं थ्यं पथ्यं घं मुखं चिरम् ।

निन्द्यं ध्यं ह्यान्ध्यामित्युत्तं न्यं न्याय्यं नयनं वरम् ।।

२३

प्यं कुप्यं पात्रमित्युत्तं फ्यं पयो मरणं रजः ।

ब्यं सुखं भ्यं भयं रौद्रं म्यममायं त्वमुत्करम् ।।

२४

य्यं कृत्यं न्याय्यमाधारं ल्यं प्रोत्तं निलयं बुधैः ।

व्यं वियद्वदनं वरत्रं शयं स्वापेऽवश्य इत्यपि ।।

२५

स्यं सस्यं कांस्यमित्युत्तं ह्यं हस्तिवदनं गृहम् ।

क्ष्यं क्षीरं क्षेत्रमुत्क्षारं क्ष्या पृथ्वी जगदीश्वरी ।।

२६

क्वः कविः काव्यतातः स्यात्क्का भूरिति निगघते ।

क्कं काव्यं कमलं च स्याद् ग्वो गौर्गरुड उच्यते ।।

२७

ग्वा धेनुर्ग स्मृतं गुह्यं ध्वो घोषो ध्वारणिः स्मृता ।

ध्वं घुष्टं घर्षणं घासं छवः छागः छावा छविः स्मृता ।।

२८

छवं स्वच्छमुच्छं गमूत्रं ज्वो जवो ज्वा च चञ्चला ।

ज्वं जुष्टं ञ्वः समुद्रः स्याद् ञ्वा वशिष्टवधूःसस्मृता ।।

२९

ञ्वं दुग्धं दधि च प्रोत्तं ट्वोऽत्री रामपिता मनुः ।

ट्वा खट्वा ट्वं स्मृतं पुष्टं ठ्वो वशिष्टोऽथ विठ्ठलः ।।

३०

पीठः ठ्वा मथुरा ठ्वं तु पुष्करं चाक्षमुच्यते ।

ड्वो भरद्वाजपुत्रः स्याद् ड्वा डाढा ड्वं महोदरम् ।।

३१

ढ्वो ढेढो ढ्वोशनः स्त्र्यग्व्या ढ्वं पयो दधि चोदनम्।

ण्वो नाथो जमदग्निः स्याद् ण्वा वाण्युज्जयिनी प्रभा।।

३२

ण्वं रूपमणु च प्रोत्तं त्वस्तुरंगो महेश्वरः।

त्वाश्रवपत्नी च गौरी च त्वं तुल्यं तरणं स्मृतम्।।

३३

थ्वोऽर्थोऽक्षरोऽरुणस्थ्वा स्त्री थ्वं तु मैथुनमुच्यते।

द्वो दावो द्वा पुरी गङ्गा द्वं दूरं वरदं च यत्।।

३४

ध्वो ध्वोऽग्निर्वधोऽध्वा ध्वा धरा धारा वधूत्तमा।

ध्वं धन्यं धूननं ध्वस्तं ध्नोऽहिर्बुध्नो धनी स्मृतः।।

३५

ध्ना धन्या मातुली साला ध्नं धनं साधनं वनम्।

न्वो नवो न्वा नवा तन्वी न्वं नवं वस्तु गघते।।

३६

प्वो वायुः प्वा स्मृता धूलिः प्वं पुण्यं पतनं गिरेः।

ब्वो ब्रह्मा गीष्पतिब्वर्म्बा ब्वं वाक्यं मधुविद्विषः।।

३७

भ्वो भवो भरतो ब्रह्मा भ्वा गौरी भ्वं निवेशनम्।

म्वो वृक्षो म्वा धरा म्वं रवं ब्रह्म पुस्तकमुत्तमम्।।

३८

य्वो यवो जवनो यज्ञो य्वा योषिज्जघनोत्तमा।

यतनं यभनं य्वं तु रुदनं मर्दनं जगत्।।

३९

ल्वो लवो रामपुत्रस्तु ल्वा लव्या ल्वं तु सूदनम्।

शल्यं श्वं शरणं यत्नं मैथुनं गगनं गतम्।।

४०

श्वं प्रोत्तं शयने याने श्वः प्रातरशनो हयः।

श्वाश्वा तु चन्द्रमःपत्नी स्वः स्वर्गः सुह्यदित्यपि।।

४१

स्वो निजो भगवान्विष्णुर्भत्तो भासुर इत्यपि।

स्वा स्वकीया च योषिच्च गौरी शत्तिः परेश्वरी।।

४२

स्वं गृहं धनमायुष्यं पुण्यं पाप्मा गतिः सुखम्।

ह्वः प्रह्वः शतजिह्वः स्याद् ह्वा जिह्वा तरुणी सरित्।।

४३

ह्वं वायुगमनं क्ष्वेडा क्ष्वः क्षोदः क्ष्वा सरिद्वरा।

क्ष्वं क्षीवं क्षरणं क्षीरं पालनं तारणं पितुः।।

४४

स्नः सारः स्ना प्रमच्छ्रेष्टा स्नं स्नानं मधु वारणम्।

घ्नो घनो नाशको घ्ना घौर्घ्न जलं निबिडं पतत्।।

४५

म्नो मानो म्नामरोत्तारा म्नं मनो मरणं मधु।

क्लः कलः क्ला कला क्लं तु कलं कलनमुत्तमम्।।

४६

स्कः शुष्कः स्कन्धशूरः स्यात्स्का स्कन्दजननी सुरा।

स्कं शुत्रृं शरणं वृत्तं वादित्रं गदनं सुखम्।।

४७

स्लं सूलमसुखं स्ला तु सरमा स्लस्तु षट्पदः।

बाणो नरोऽमरो दैत्यो राक्षसो गरुडोऽरुणः।।

४८

श्लः शिलः शलभः शुक्लः श्ला शलाका शिला तथा।

श्र्लं शुक्लं चूर्णमाधारं गगनं शूलभृच्छिरः।।

४९

क्ष्लः श्र्लोकः क्षुद्रवदनः क्ष्ला क्षोण्यक्षौहिणी तथा।

क्ष्लं क्षुद्रं वस्तु मरणं भवनं शरणं वनम्।।

५०

ल्लं लक्ष्म ल्ला स्मृता गौरी ल्लो लोकस्तर्क इत्यपि।

ख्लः ख्क्लः ख्ला सुरा क्षुद्रा योषित्कमललोचना।।

५१

ग्लौः शन्गिर्लो गुडो ग्लाम्बा ग्लं गलं मलनं सरत्।

घ्लोऽश्र्वो घ्ला जघना घ्लं तु वृक्णं सारथिपातनम्।।

५२

छ्लः छलः छलकृत् छ्लोधर्वापुरी छ्लं तु शिवालयम्।

प्लः प्लवंगः प्लवः शूरः प्ला पाटी परमेश्र्वरी।।

५३

प्लं मामसम प्लवनं मघं पूरणं धरणीतलम्।

फ्लं फलं बाणपूरं च वदनं सकलं वपुः।।

५४

ब्लं बलं ब्ला स्मृता रत्ता बरटी कङ्गुरित्यपि।

ब्लो बालोऽघासुरः कंसोऽज्ञोऽध्वा मारोऽनलोपमः।।

५५

ढ्लं माल्यं मधुरं ढ्ला क्ष्मा ढ्लिर्देवेशोऽमरावती।

ढ्लः कल्पः कमलानाथो गरुडो हंससारथिः।।

५६

ऋः करः शरभो व्याघ्रो नाश्वः त्रा सुरभिर्मही।

ॠं खामिन्द्रियामित्युक्तं ख्रो खौ रासभे खले।।

५७

ख्रा पूतना सूर्पणखी ताडका कैकयी क्षितिः।

ख्रं खड्गं दुष्टह्मदयं मैथुनं मरणं तथा।।

५८

ग्रो गदो गुद आसारो ग्रा राज्ञी ब्रध्नयोषिता।।

ग्रं गृहं ग्रहचक्रं खमगारं शुक्रमेव च।।

५९

घ्रो घोषो मदनश्व्रूतो भगोऽज्ञो यामिनीपतिः।

घ्रा घृणा समापुत्री घ्रं गृहं वदनं निजम्।।

६०

ङ्रो नरोऽशरणोऽशूरो ङ्रा मारणिरिति स्मृता।

ङ्रं गृहं रुदनंनासा प्रभा हानिश्र्च कथ्यते।।

६१

च्रश्चरश्चरमः श्लोकश्चतश्चरण इत्यपि।

च्रा चञ्चूश्च चमूश्चाटुः च्रं मैथुनकमप्रजम्।।

६२

छ्रो द्वेषी छुरकः खड्गः त्सरुरङ्गणमार्गगः।

छ्रा विष्टा शुनकी वेश्या छ्रं छलं गमनं गृहम्।।

६३

ज्रो वृद्धो गगनेऽटोऽग्निर्बह्मोमेशो रमाधिपः।

जटायुश्च जरायुश्च जमदग्निर्जुनीपतिः।।

६४

ज्रा जरा जरठा जारवत्सला षट्पदी घृणिः।

ज्रं यज्ञोतमजस्त्रं च रजस्वलमुखं रजः।।

६५

झ्रो नादो जरठो दारो झ्रा जरा हानिरीश्वरी।

झ्रं जुष्टं भ्रमरैर्घुष्टं पष्टं सुष्टु गृहं कथम्।।

६६

ञ्रश्चौरो ञ्रा स्मृता नीतिर्गतिर्ञ्र भगवन्मुखम्।

ट्रः पीठः ट्रा स्मृतापूपा ट्रं गोटमुखं सुरः।।

६७

ठ्रो मिष्टाम्रफलस्त्रावः ठ्रा टिट्टी भ्रमरी सुरा।

ड्रो दण्डो डमरुर्दक्षो दूरगोड्रं सुरोदकम्।।

६८

ड्रा टिट्टी मत्स्यगन्धा स्याद् झषपत्नी महोदरी।

ड्रं मघं मधुरं पुष्पं नर्मदाजलमम्बुजम्।।

६९

ढ्रो धृष्टद्युम्नतातो विदुरो नर्मदाझषः।

ढ्रा गान्धारी सती स्वाहा स्वधाज्ञा सरयूरपि।।

७०

ढ्रं फल्गु मरणं भ्रष्टं सुभ्रवास्यं स्पन्दनाक्षमम्।

ण्रो नष्टोऽम्बरगो भीरुः कर्णो बीभत्सुरुद्धवः।।

७१

ण्रा नर्मदा च गौर्गोदा गङ्गा द्रुपदजाम्बुजा।

ण्रं नाम ससुधं पात्रं वाक्यं नारगभाषितम्।।

७२

७२

त्र पाता गरुत्मान्मघवानपी ।

त्रा गैरी गरदा पात्री तारणी सरमा रति ।।

७३

त्रं स्मृतं त्रुटितं घुष्टं पुष्टं परं पदम् ।

गान्धारीवदनं कर्णवचनं द्रौपदीरितम् ।।

७४

थ्रस्तीर्थवासकृत्पूतो जारः पुष्टोऽम्बिकात्मजः ।

थ्रा स्थिताथ रमा राज्ञी रजनी रजकातत्मजा ।।

७५

थ्रं तीर्थं सुखमायुक्तं मरणं मध्वरेर्मुखम् ।

द्रो द्रोणो द्रोणसुनुः स्यात्काकः काकसमो नरः ।।

७६

भयकृद्भरतो राजा रन्तिदेवो रमापतिः ।

द्रा दरी सरमा क्षुद्रा द्रोणमूर्तिर्दुरात्मजा ।।

७७

द्रं भयं गमनं क्षुद्रं क्षोदनं सरमामुखम् ।

सुतटं सुखदं साम स्मरणं श्रयणं गुरु ।।

७८

ध्रो भूध्रो धारकः साक्षी धृष्टघुम्नो धारात्मजः ।

बृकोदरो गदपाणिर्गरुत्मद्भ्रातृवल्लभः ।।

७९

ध्रा धरा कुध्रजा कूलगा खगा पथिगाम्बुगा ।

ध्रं ध्रवं धरणं धाराधरस्थानं च कूबरम् ।।

८०

त्रा नारी नर्मदा दुष्टा नरवाङ्नरकोद्भवा ।

पृथा पुष्टा परेशानी परमानन्ददायिनी ।।

८१

त्रो नरो नरकोऽङ्गारो नामदो नार्मदो हृदः ।

त्रं गृहं नरकोऽङ्गारं गरुडाङ्गं गरोद्भवम् ।।

८२

प्रा प्रकृष्टा महादेवी महालक्ष्मी रजोद्भवा ।

मथुरा मर्ममाराम्बा क्षमा क्षमा क्षामनासिका ।।

८३

प्रः प्रकृष्टोऽन्धकारातिर्मुरारातिः कजोद्भवः ।

कामोऽरातिर्ध्रुवोऽगस्त्योऽरुणपितामरः ।।

८४

प्रं ब्रह्म गगनं सूरि भ्रमराङ्गं धरान्तरम् ।

गङ्गातीरं पयः पेयं पाथः परं परं सरः ।।

८५

फ्रः फूत्कारः स्वनः फेनः स्फुरन्स्पष्टोऽम्बरेचरः ।

फ्राभीरपत्नी कमला खरी क्षारनदी सुरा ।।

८६

फ्रं स्फुरद्वसनं जुष्टं यत्नं स्फेटितमुद्धृतम् ।

प्रात्तनं गगनं ध्वस्तं घृतं धरणमुच्यते ।।

८७

ब्रो बृहस्पतिराचार्यो बटुर्बद्धोऽम्बरावृतः ।

बाष्कलो बहुदोऽम्बाजो बहुव्रीहिश्च बुद्बुदः ।।

८८

बालो बाणोऽबलो बद्धोऽम्बष्टोऽब्दो बधिरः स्मृतः ।

ब्रा बाला बधिराम्बष्टी बट्वी बद्धाम्बरेश्वरी ।।

८९

ब्रं ब्रह्म बलमुच्छ्रेष्टं बधिराङ्गं तथाम्बरम् ।

बहुलं बाहुसारं च बधिरास्यं बटोर्मुखम् ।।

९०

भ्रो ब्रह्म प्रकरो भारो भ्रमरो धूसरोऽधरः ।

भासुरो भ्रामको भ्रष्टो भीमसेनोऽभयः स्मृतः ।।

९१

भ्रं भासुरं तथाभ्रं तु भ्रामकं भ्रमणं भयम् ।

भ्रा भ्रष्टा ब्राह्मणी भा च हिडम्बा धरणी तथा ।।

९२

म्रोऽमरो मृत्युरूमतर्यो मैथुनी माधवो बलः ।

म्रामरी मानवी मारमानिनी यामिनी शुनी ।।

९३

म्रं मैथुनं मृताङ्गं च मरणं मस्तकं मधु ।

य्रो यादवोऽर्जुनो जारो य्रा जरा जरठाजरा ।।

९४

य्रं जुष्टं भोजनं भ्राजज्जायमानं जरोद्भवम् ।

य्रिः कामिनी प्रिया पुष्टा परमा पारगाम्बुधेः ।।

९५

लो लण्डो लालितोऽल्पोऽङ्को ला लाजा लालिताम्बुला ।

ललिता प्लावितं लक्षणमुक्तम् खं लालितं ललनामुखम् ।।

९६

व्रो वरो ह्यवरो वारव्रो वाडवो वासरोऽम्बुधिः ।

व्रा श्रेष्टागिरिजा लक्ष्मी रत्नाकरगता तथा ।।

९७

व्रं लुलायमुखं भीमं भासुरं श्रेष्टमुच्यते ।

श्रः शरोऽसारदोऽसारः शरण्यः सारधिः शिवः ।।

९८

श्रा गौरी तु रमा रामा रत्नाकरकृतालया ।

श्रं शरण्यं सुतूणं च तारुण्यं ताहशं शिवम् ।।

९९

षॢः सुरेशोऽदितीशोऽर्कोऽरुणोऽर्णव उरुक्रमः ।

षॢा गौरी सारवत्पत्नी पारणा परमामरी ।।

१००

षॢं कष्टं करणं काष्ठं कोमलेतरमुज्ज्वलम् ।

रत्रः शरः सरमाभर्ता भत्तो भासुरभासुरः ।।

१०१

रत्रा शिवाभयपत्नी च भत्ता ब्रह्मसुता तथा ।

रत्रं श्रेष्ठं सारदं वस्तु वदनं बरुणासनम् ।।

१०२

ह्लो हरो हरिणो हारो हरिर्हाहाहुहुर्हयः ।

हर्षोहंसोऽहरुद्धर्षो हासो हस्ती च नाहुषः ।।

१०३

ह्ला गौरी हरिणी हंसी हर्षयुत्ता च हस्तिनी ।

देवयानी च शार्मिष्टा ह्लं तु चौर्यं चरोगरः ।।

१०४

क्षः क्षरः क्षरणः क्षारोऽक्षोडोऽक्षोऽक्षराक्षरः ।

क्षा लक्ष्मीः क्षं क्षयं क्षारं क्षोदनं क्षरणं खरम् ।।

१०५

स्तः सुतः स्तिः सुरः शङ्खः सुता सारसयोषिता ।

स्ता प्रशस्ता शदा पक्षिपत्नी पाटलगौः स्मृता ।।

१०६

स्तुः सारस्तूण आचार्यो लक्ष्यः स्तूस्तोरणः स्मृतः ।

स्तं शस्तं शरणं राजगृहं गगनमुद्धतम् ।।

१०७

ष्ट्रो भ्रष्टः शकटो व्रात्यो विप्रो वरुण आसवः ।

ष्टु सुष्टु शरणं भ्रष्टं भासुरं भत्तमेव च ।।

१०८

ष्टिर्यष्टिर्विष्टिरावृष्टिरावृत्तिर्वरुणाङ्गना ।

ष्टी यष्टी सरमा भ्रष्टा भ्रामका भ्रमिरासुरी ।।

१०९

ष्टा घुष्टा गृहिणी गाली सूर्यपत्नी जलालया ।

ष्टं श्रेष्टं शरणं साधु गदनं वदनं मधु ।।

११०

ष्टः पष्टोऽनुखरोऽङ्गारोऽघासुरोऽसुरसत्तमः ।

गोविन्दो गरुडो गण्डो घासोऽगारोऽगरोऽमरः ।।

१११

इत्येषा रचिता मालाक्षरी सौभरिणा शुभा ।

यः पठेच्छुणुयाच्चेमां स सब्दार्णवपारगः ।।

।। इति द्वाक्षरीनाममाला समाप्ता ।।

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

NM नाममालिका

स्वर्गादिनामधेयप्रकरणम्

१- १

वागीशं वरलक्ष्मीशं गौरीशं गणनायकम् ।

कुमारं च हृदि ध्यात्वा क्रियते नाममालिका ।।

१- २

स्वर्गं नाकत्रिलोकाग्र्यसुधावासबुधालयाः ।

मन्दाकिनीधरो दिव्यः खपुरं तं नपुंसकम् ।।

१-३

मेरुशृङ्गाग्रनगरं धाराधरपथस्थितम् ।

देवेष्वनिमिषामर्त्यनिलिम्पामृतभोजिनः ।।

१-४

वैमानिका यज्ञभुजो जरामरणवर्जिताः ।

अनिद्राः खचरा नित्याः कनकाचलवासिनः ।।

१-५

इन्द्रे स्युः प्राग्दिशानाथमहेन्द्रदनुजारयः ।

सर्वाङ्गनयनागारिचिन्तामणिवरासनाः ।।

१- ६

गोपः पुलोमजाकान्तो भोगी यागी महायशाः ।

तत्पुरी लेखिनी तस्य सौधे च सुपताकिका ।।

१- ७

चिन्तामणौ महारत्नं श्यामोपल इतीर्यते ।

कामधेनौ तु सुरभिः श्वेतगौरिति कथ्यते ।।

१-८

आयुधं च शतारं स्याद्वनं शृङ्गारनामकम् ।

पत्नी त्वस्य च पौलोमी देवेन्द्री दिविजेश्वरा ।।

१- ९

जयन्ते मोहनः स्वामी नलकूबरवल्लभः ।

उच्चैश्रवसि दिव्याश्वे नीलवालः स हंसकः ।।

१- १०

ऐरावते चतुर्दन्तो मन्दकः पीलुनामकः ।

मधुरो मञ्जुलतरुर्मन्दारतरुपञ्चके ।।

१- ११

तत्प्रदेशे सुपर्णःस्यात्तत्पुष्पे गन्धिलं स्मृतम् ।

महामदस्तदामोदे तन्मूले रुचिरं स्मृतम् ।।

१-१२

तत्पर्णं विदलं प्राहुस्तत्फलं पुष्कलं विदुः ।

सुगन्धिस्ततद्वितरणे तच्छाया चन्द्रिका स्मृता ।।

१-१३ मंदाकिन्यां हरिपदी कनकाम्बुजगन्धिला ।

दिव्यकेलिसरश्चन्द्री सुकलेति निगद्यते ।।

१- १४

तत्सैकते वसुरुचुस्तत्तीरे सुभगोदयम् ।

तदम्बुजानि हैमानि तन्मरन्दः करन्दकः ।।

१-१५

तदब्जगन्ध आनन्दस्तत्किञ्जल्कः करञ्जकः ।

सुमेकस्तु सुधीरः स्याच्छिखरे तस्य बन्धुरः ।।

१-१६

ध्रुवावासो मणिशिलस्तदीयास्तरवः सुखाः ।

तत्पादः स्यात्खनखलस्तन्नितम्बे विशालकः ।।

१-१७

अग्नौ पुरोहितः स्वैरी स्वाहानाथो मखी शिखी ।

हरिश्च शमने तु स्युरद्रिजक्षद्रमुद्रकाः ।।

१-१८

दण्डकः क्रूरदृष्टिश्च मुष्टिबन्धोऽसिताकृतिः ।

तस्य प्रिया तु धूमार्णो सुकर्णेति च कथ्यते ।।

१-१९

तत्पाणिदण्डे तुमुलस्तत्पाशे वलनं स्मृतम् ।

तद्दूताः सूतकाः क्ष्वेलाः स्थाणवः प्राणघातकः ।।

१-२०

जीमूतनामकास्तस्य नगरी खरमालिनी ।

वैतरण्यां त्वग्निधुनी पापभेदिन्यशीतला ।।

२१

दुस्तरा दुर्मुखी भीमा तत्तटी त्वसिपत्रका ।

तदीयास्तरवः कुण्टाः सूचिकामुखनामका ।।

२२

कोणपे तु कलङ्कः स्यादुषाचरवरः खरः ।

तस्य कान्ता दुरन्ता स्यान्निरन्ताद्याश्च वल्लभा ।।

१-२३

वरुणे तु महासारकशाधरकुशालयाः ।

तत्पुरं वरणं ज्ञेयं तस्य जाया जयेरिता ।।

१-२४

तत्पाशस्तु घनालीढस्तपुत्रो वरयूथपः ।

तत्सैन्यं जालयादः स्यात्तन्मन्त्री भुवनाधिपः ।।

१-२५

वायुः प्राणिधृतः प्राणो जगत्प्राणस्तु धूसरः ।

तद्वाहे तु महावेगः संवेगस्तु तमोग्रजः ।।

१-२६

राजराजः कुबेरः स्यात्तत्सुतो मणिकण्ठकः ।

तत्सेवधिः सुभाग्यः स्यात्पुरं भ्रमरकाह्वयम् ।।

१-२७

ईशाने कङ्कटीकः स्याज्जटाटीरकठोरकौ ।

रुम्बाकर्णः शम्बरारिभेदिनः श्रीधरः सितः ।।

१-२८

तदास्थानं शुभकरं तदगारं सतारकम् ।

तन्निष्कुटो धनकुटो भद्राख्यं तस्य वाहनम् ।।

१-२९

तद्गुणा भीषणा घोणाः काणाः खञ्जाः खरालकाः ।

तस्य प्रिया तु कौत्केळी कालिकालीकलाधराः ।।

१-३०

विनेता विघ्नराजे स्यान्मुदिरो मोदकाशनः ।

सुवर्णाब्जसरः स्वामी गुहो वेलायुधः स्मृतः ।।

१-३१

भैरवो भीरवो भीरो वटुनाथः पिशाचराट् ।

वेत्रिकर्णेजपहया नन्दिभृङ्गिऋडादयः ।।

१-३२

शम्भुस्स्वयम्भू कविता मेषनामाष्टलोचनः ।

प्रधानी मुखजानिः स्यान्मेधावी नाभिभूर्भुवः ।।

१-३३

तस्याङ्गना तु गीर्देवी शीर्षद्वारनिवासिनी ।

विशदा नीलचिकुरा वीणा तस्यास्तु कच्छपी ।।

१-३४

तद्वाहने तु मञ्जीरतदक्षसर ईक्षणम् ।

वर्णोदरं तदीयं स्यत्पुस्तकं तद्गतिर्नयः ।।

१-३५

विष्णुर्हरिर्वनचरो विवाहो विहगध्वजः ।

श्रीपर्णनयनः शृङ्गी भारतीमालिकाधरः ।।

१-३६

तत्कौस्तुभे सुधासारः सुरागःसुन्दरः स्मृतः ।

श्रीवत्से तस्य शृङ्गारः सेव्या तु वनमालिका ।।

१-३७

तच्चक्रं तु सहस्रारं वृत्तं शुभमितीर्यते ।

तत्पाञ्चजन्ये सुग्रीवः षोडशावर्त ईर्यते ।।

१-३८

तत्कौमोदक्यविकला तत्खड्गो मकराननः ।

तस्य शाङ्र्गं गुणनिधिस्तद्दूताः श्यामलाः स्मृताः ।।

१-३९

तदासनं मृगमुखं भुवनं तस्य शङ्करम् ।

तत्केलीवनमाशास्यं तद्वेश्म नवमौक्तिकम् ।।

१-४०

तदीयशयनं काशी वसनं तस्य काञ्चनम् ।

लक्ष्मीस्तु लोकजननी सती सरसिजा मता ।।

१-४१

तत्कुमारस्तु कन्तः स्याददृश्यतनुरात्मजः ।

केलिनी तस्य वनिता केतुस्तस्य चलाचलः ।।

१-४२

कार्मुकं तस्य कान्तारः शरास्तस्य तु पल्लवाः ।

रजको वाहनं तस्य रथो मलयजः स्मृतः ।।

इति नाममालिकायामहिराजेनैव संगृहीतायां

स्वर्गादि नामधेयप्रकरणमिदमखिलसुकविमतम्

गगनादिनामधेयप्रकरणम्

२-१

आकाशं शब्दगुणकं नक्षत्रपदमच्युतम् ।

विद्याधराप्सरोयक्षरक्षोगन्धर्वमन्दिरम् ।।

२-२

छायायां तस्य तिमिरं तमिस्त्रं भ्रमरं तमः ।

पुंस्यन्धकारो मलिनो लोकान्धकर ईर्यते ।।

२-३

आकाशकुसुमं तारं कोरकं कारकण्टकम् ।

निरकं निर्मलं संग्यं नक्षत्रेषु निगद्यते ।।

२-४

दिवसे दृश्यमानेषुतारकेषु च केतवः ।

नभसिस्थाणुरूपेण यद्धोरनीलभम् ।।

२-५

तद्धूमकेतु नाम स्यात्कालदूतः स एव हि ।

रक्तभे तूपरागः स्यात्कृष्णर्क्षे तु कुवेलयम् ।।

२-६

शुक्रे कविः शुचिः काव्यः पूर्वदेवपुरोहितः ।

गुरौ बृहस्पतिः सूर्यःसुरेज्यः सूरिवासवौ ।।

२-७

चन्द्रो निशाकरः शौरिः कलशाब्धिभवो भवः ।

भवावतंसः कमलीवार्धिसूनं नपुंसकम् ।।

२-८

बिम्बे तस्य सुधासारः कलापूर्णं च मण्डलम् ।

चन्द्रिका च सुधा छाया सुखा ज्योत्स्ना तु कौमुदी।।

२-९

वन्यलो विशदा शारदेन्दुकान्तिर्निगद्यते ।

हिमे च मधुपूरः स्यात्तुषारस्तुच्छशीकरः ।।

२-१०

तत्समूहे हिमानि स्याच्छीतलानि तु शीतलम् ।

रात्रिर्निशीधिनी काली निशाकरकुटुम्बिनी ।

निशा स्याच्छुक्लपक्षे तु प्रसन्ना चन्द्रिकावती ।।

२-११

पूर्णिमा पूर्णचन्द्रा स्यात्तत्क्षपा विमला भवेत् ।

कृष्णपक्षे निशाः कृष्णास्तामस्यस्तमसाप्लुताः।।

२-१२

अमायां स्यादमावास्या पैतृकः पितृवासरः ।

तद्यामिन्यां तमोरात्रिः कालरात्रिः करालिका ।।

२-१३

सूर्यः सूरिग्रहधनो हरिदक्षिणलोचनः ।

हेलिः किरीटी पद्माप्तौ हरिर्वासरवल्लभः ।।

२-१४

गता गतानुगतिका छायाजायांशुमालिनः ।

शताङ्गे कूबरी तस्य मरुच्चको महाजवः ।।

२-१५

अमायुः पृतनाधीशो यन्ताहुर्मुखसूचकः ।

परिधिः परिवेषः स्यात्स सूर्यावरणोऽपि च ।।

२-१६

तेजोमयं मण्डलं स्यान्मूर्तित्रयनिरन्तरम् ।

मयूखजन्मजीमूतधनाब्दहरिघोटकाः ।।

२-१७

इन्द्रचापे मणिधनुश्चित्रं वल्मिकसम्भवम् ।

करको वर्षपाषाणो दन्तभेदी विमुक्तकः ।।

२-१८

सौदामिनी तडिद्विद्युच्चञ्चच्चपलिका चला ।

मेघनादे महागर्जा घनाघननिनादकः ।।

इति नाममालिकायामहिराजेनैव संगृहीतायां

गगनादिनामधेयप्रकरणमिदमखिलसुकविमतम् ।

भूम्यादिनामधेयप्रकरणम्

३-१

वसुन्धरा रत्नगर्भा धारुणी धारणी धरा ।

धारिणी भूतधात्री च विश्वधात्री क्षमा सहा ।।

३-२

वर्तुलं वलयं वृत्तं मण्डलं चक्रवालम् ।

विन्ध्योत्तरपदे तु स्यादुत्तरापथसंज्ञिकः ।।

३-३

चोलस्तु दक्षिणे देशे काञ्चीदेशस्तु पल्लवः ।

समुद्रे तु नदीनाथः शैवलाकरनीरथी ।।

३-४

वेलावलयकाण्डेशकान्तानयनसंनिभाः ।

आद्याब्धौ लवणोदश्च लावणः शङ्खकारणम् ।।

३-५

धीरश्च मुक्ताजनको लोलकल्लोलमालिकः ।

द्वितीयाम्बुनिधाविक्षुरसर्णो रसालयः ।।

३-६

कान्ताधरसखा कल्यः कश्याब्धौ तु सुरालयः ।

उन्मादको दुराधर्षः सर्पिरब्धौ तु सार्पिषः ।।

३-७

तेजोनिधिर्मदकरो दधिवार्धिस्तु दौब्धिकः ।

कलपुः प्रातराहारः कमलावल्लभप्रियः ।।

३-८

क्षीरोदे कलशाब्धिः स्यान्मधुरो माधवालयः ।

लक्ष्मीगुरुर्वदान्यश्च हरिश्वशुर इष्यते ।।

३-९

सुधाजनायिता साधुः सुराहारप्रदोऽनघः ।

शुद्धोदे निर्मलः शुद्धो मेघोन्मादकरोऽनघः ।।

३-१०

जम्बूद्वीपे महाद्वीपः कुमारः पर्वतालयः ।

षट्पञ्चाशद्देशग्रहः समस्तद्वीपनायकः ।।

३-११

सुवर्णनिलयो रत्नी प्लक्षद्वीपे शिलामयः ।

सुवर्णवालुकाधारः सुस्थिरः सूर्यवल्लभः ।।

३-१२

कुशद्विपे कुलीनः स्यात्कुसारनिधिरिष्यते ।

कौशिकः कङ्कटीकः स्यात्कणादवसतिः स्मृतः ।।

३-१३

क्रौञ्चद्वीपे महाभोगः पञ्चास्यजननालयः ।

काञ्चनाद्रिः करीणः स्याच्चञ्चलानिलयः स्मृतः ।।

३-१४

शाल्मलः शाल्मलीद्वीपे शाक्यः कौस्तुभसम्भवः ।

अष्टादशेषु द्वीपेषु पर्यायेण जनाश्रयाः ।।

३-१५

वस्तुसम्भारनिलयाश्चीनसिंहलनामकाः ।

जाम्बूनदी तु कुलुकुगात्वजाल्वातिमोहनम् ।।

३-१६

हाटकं भद्रकं चन्द्रं कर्णीकुसुमजप्रभम् ।

कनकं रसबीजं स्याद्गन्धकोद्भवमभ्रकम् ।।

३-१७

दशवर्णे सुवर्णे श्रीः पञ्चवर्णे तु रैः स्मृतम् ।

तुङ्गं तु द्वादशे वर्णे कुदणं षोडशे स्मृतम् ।।

३-१८

शतवर्णे शातकुम्भं मेरु साहस्त्रवर्णके ।

रूप्ये तु रजतं शुभ्रं दुर्वर्णं कलधौतकम् ।।

३-१९

पादभूषार्हकं तारं वैढिकं विमलं स्मृतम् ।

आरकूटे तु रीतिः स्त्री सुवर्णवलिनं स्मृतम् ।।

३-२०

नीचं द्राविडभूषार्हं पैत्तलं पित्तहेतुकम् ।

राजरीत्यां ब्रह्मरीतिः स्वर्णरीतिर्महेश्वरी ।।

३-२१

वङ्गं सीसं च योगेष्टं त्रपुः स्यान्मुखभूषणम् ।

अयः कृष्णायसं लोहं तीक्ष्णं कालायसं मतम् ।।

३-२२

मन्दप्रियं च कठिनमयस्कान्ते त्वयोमणिः ।

रत्नं तु रत्नसामान्ये मणिर्माणिक्यमेव च ।।

३-२३

मण्यं मणिकं शबलमनर्घं जीवरत्नकम् ।

दाक्षायणं रत्नवरं तत्तु जम्बूनदीभवम् ।।

३-२४

पद्मरागे रविमणिः कुरुविन्दं तु कोरकम् ।

पक्वदाडिमबीजाभं माणिक्यं शिखरं मतम् ।।

३-२५

इन्द्रनीले मसारं स्यान्महानीलं महोपलम् ।

तद्भेदे तु तृणग्राही तत्पारावतमुच्यते ।।

३-२६

विडूरजे विडुरजं प्रावृड्जं वालवायजम् ।

श्यामं मरकतं पक्ष्यं स्निग्धं मसृणमुच्यते ।।

३-२७

गोमेधिकं मेधिकं स्याद्भुर्जरं घसृणं स्मृतम् ।

मुक्तामणिः शौक्तिकेयं श्वेतद्वीपभवं वसुः ।।

३-२८

माणिक्यं पौष्यकं शङ्खः पुलको विमलादयः ।

शैलोऽगः पर्वतो क्ष्माभृत्सानुमान्दुर्गमो गिरिः ।।

३-२९

कुध्रः कुत्कीलबन्धाकी फलिगस्तु शिलोच्चयः ।

चित्रकूटः सुवेले स्यात्त्रिकूटस्त्रिककुत्समः ।।

३-३०

परापरश्चक्रवालो लोकान्तो लोकवीक्षणः ।

मलयस्त्रिकलाषाढौ विन्ध्यस्तु जलवालकः ।।

३-३१

हिरण्यनाभो मैनाकः सुदारुः पारियात्रिकः ।

माल्यवांस्तु प्रस्रवणो हिमवांस्तु हिमालयः ।।

३-३२

रजताद्रिश्च कैलासो हराद्रिर्महिषश्च सः ।

वेङ्कटो वृषभः सिंहः केसरः केशवप्रियः ।।

३-३३

उदयः प्रातरद्रिः स्यात्पराद्रिः पश्चिमाचलः ।

गैरिकं पीतधातुः स्यात्कुनटी तु मनःशिला ।।

३-३४

रेचनी रञ्जनी हृद्या रसनेत्रा महारसा ।

करवीरकरा विद्युन्नागजिह्वा मनोऽभिधा ।।

३-३५

कानने वृक्षकं वाक्ष्यं जटिलो बहुपाद्वटे ।

कामाङ्कः स्त्रीप्रियश्चूतः कपिचूतः कपिप्रियः ।।

३-३६

श्रीवृक्षः श्मामलोऽश्वत्थः प्लक्षश्चलदलोऽङ्गुलः ।

उदुम्बरः प्राणिफलो मशकी हेमदुग्धकः ।।

३-३७

पलाशो किंशुकः पर्णो वातपोतस्त्रिपर्णकः ।

बिल्वे मालूरमांगल्यौ नारंगे तत्र वासनः ।।

३-३८

बीजपूरे मातुलुङ्गो लुङ्गः सुफलपूरकौ ।

अथात्यम्ला मातुलुङ्गी पूतिपुष्पी वृकाम्लिका ।।

३-३९

छत्रे तु करको वृक्षो मल्लिकाकुसुमप्रियः ।

स्त्रीप्रियो वञ्चुलोऽशोकः कङ्केलिः कर्णपूरकः ।।

३-४०

हेमपुष्पोऽप्यथोऽङ्कोलः सिद्धौषधफलोदयः ।

द्रोहग्राहे तु कतको द्रावणः स्त्रवरःसराः ।।

३-४१

उल्लेखनीयो लक्ष्मीवांस्तेरस्तोयप्रसूदनः ।

गुग्गुलौ कालनिर्यासो देवधूपो महेश्वरः ।।

३-४२

कामः पुरो जटायुश्च कुम्भोलूखलकं वरम् ।

शोभाञ्जने तीक्ष्णगन्धः शिग्रुकाक्षिबमोचकाः ।।

३-४३

कृष्णे मरुङ्गी रक्तेऽस्मिन्मधुशिग्रुः ।

वासन्ते स्यात्कुरवको मदनो धूर्तनामकः ।।

३-४४

बालपत्रे तिक्तसारः खदिरो दन्तधावनः ।

तिलके पुलकः श्रीमान्सुगन्धो मुखमण्डनः ।।

३-४५

निम्बे पार्वतकैडर्यद्वेषिच्छर्दनमाधिकाः ।

हलिः पृदुच्छदः शाकः पुत्रजीव्यक्षकः फलः ।।

३-४६

महामुनिः स्याद्रुद्राक्षे द्विमुखे तु पराङ्मुखः ।

एकास्ये त्वत्र महिमोऽमुख्यमक्षकमीर्यते ।।

३-४७

चम्पके कमनीयः स्याद्गन्धफल्यस्य मञ्जरी ।

कपिला पिच्छिला भस्मगर्भा मण्डलपत्रिका ।।

३-४८

जम्ब्वां त्रिसारा विरुजा महाजम्ब्वां महाफला ।

भल्लातक्यां त्रिलिङ्गोऽयमग्निमुख्यप्यरुष्करः ।।

३-४९

कोकिलाक्षे तु काण्डेक्षुरिक्षुरः क्षुरकः क्षुरः ।

सोमवल्लिः पूतिफलिः सोमराजिरवल्गुजा ।।

३-५०

मल्लिकायां विचाकिलो मङ्गलं तस्य सौरभः ।

माङ्गल्यं तु वरारोहा कथ्यते नवमल्लिका ।।

३-५१

मालती राजपुत्री स्यात्सुगन्धा नवमालिका ।

भारती तुलसी सेव्या द्रोणो वैकुण्ठ ईश्वरी ।।

३-५२

अल्पमाले तु वैकुण्ठो बिल्वगन्धो वचाच्छदः ।

कालपर्ण्यां तु सुरभिः करालः कालमालिका ।।

३-५३

ऋषिणी द्रोणिका छत्रा चक्षुष्या द्रोणपुष्पिका ।

नागवल्ली तु ताम्बूली तथा ताम्बूलमल्लिका।।

३-५४

ब्राह्म्यां सत्यवती ब्रह्मी मत्स्याक्षी सोमवल्लरी ।

मारिषो जीवमारिषः काण्डमारीष ओलकः ।।

३-५५

जलजोऽसौ सञ्जटको भूस्फोटं भूमिकन्दकम् ।

हरिपर्णे मूलकोऽस्त्री सैरिभं नीलकण्ठिका ।।

३-५६

ज्योत्स्ना स्वल्पफला ग्राम्या मृदङ्गः कृतवेधनः ।

अथ श्रृङ्ग्यां दीर्घफलं मागधीमनलोत्तमा ।।

३-५७

तुम्ब्यलाबूः पिण्डफला गोतुम्बी तु नृपात्मजा ।

शारद्यां लाङ्गली तोयपिप्पली शकुलादनीः ।।

३-५८

गोलोम्यां जटिलोग्रोग्रन्धा तीक्ष्णा जया वचा ।

वारं तु पिङ्गली वज्रं ह्रीबेरं दीर्घरोमकम् ।।

३-५९

चामरश्चामरं ज्येष्ठं बर्हिष्ठं जटिलं जटी ।

शैलमूलं तु कच्चोरं पलाशो हिमजा शटिः ।।

३-६०

अर्शोघ्नी मुसली ताली तालमूली खलिन्यपि ।

खञ्जोऽरिष्टो ग्रहोच्छिष्टो रसोनो गृञ्जनः कटुः ।।

३-६१

लशुनं दीर्घपत्रश्च पिच्छगन्धो महौषधः ।

वेणौ तु वंशकर्मारौ मृत्युपुष्पस्तृणध्वजः।।

३-६२

तृणराजे तलस्तालो महापत्रः फलेरुहः ।

क्रमुको वाटिको घण्टो गुवाङ्गुः क्रूर आसवः ।।

३-६३

कषायोनागवाक्पूगः फले तस्य तु पर्कटम् ।

तच्छुष्के खरमित्युक्तं चिक्कणं चक्कणं मतम् ।।

३-६४

दीर्घवृन्ते रामपूगो लतापूगे तु योजनः ।

भूपूगे तु लघूकः स्यात्क्षुद्रो कटुः खिलः ।।

३-६५

हिन्तालस्तृणराजश्च नारिकेले तु लाङ्गली ।

दाक्षिणात्योऽफले बालः सुतङ्गः कृच्छ्रकेसरः ।।

३-६६

खर्जूरे तु मधुक्षीरस्तस्मिन्खर्जूरिकाल्पके ।

केतक्यां गुप्तरागः स्याद्रजः पुष्पौ वलीनकौ ।।

३-६७

ताल्यां दृढदला ताली पत्रताली वराङ्गना ।

इक्षुः पुष्यो मधुतृणः खड्गपत्रो महारसः ।।

३-६८

मुञ्जस्तु मुञ्जको मेध्ये मृदुत्वग् ब्रह्ममेखलः ।

उल्लूकस्तूलपो दर्भमूर्ध्वमूलं खरच्छदः ।।

३-६९

दूर्वा सहस्रवीर्यातु शतवीर्या तु सा सिता ।

शष्पं बालतृणं शादः सर्वं तु तृणमर्जुनम् ।।

३-७०

सिंहः सुगन्धिः पारीन्द्रः शार्दूलः श्वेतपिङ्गलः ।

कण्ठीरवो महानादो हरिः शार्दूलविक्रमः ।।

३-७१

शार्दूलो हिंसरुश्चन्द्रकी दृङ्मृगादनः ।

पिण्डारकस्तु चित्राङ्गो महादंष्ट्रो वरोटकः ।।

३-७२

घोणी जलप्रियो वज्रदंष्ट्रो वाराहको हरिः ।

कामरूपी स्तब्धरोमा पीनस्कन्धस्तलेक्षणः ।।

३-७३

दीर्घरोमा च भल्लूको विकरालोऽच्छभल्लुकः ।

माहिषः सैरिभोऽश्वारिर्जरन्तो गद्गदस्वनः ।।

३-७४

हेरम्बः कृष्णश्रुङ्गश्च तुलायः कासरो गुरुः ।

कृष्णः स्यात्कृष्मसारे तु निरञ्जननिरञ्जकौ ।।

३-७५

यज्ञार्हः शम्बरः स्वल्पे पृषदस्तु स बिन्दुमान् ।

महो रुरुः कृष्णसार एणको विपुलोन्नतः ।।

३-७६

पोटरूपो गदाभासो रोहिषो बृहतिर्महान् ।

वातप्रमी गोजवी स्याद्वातायुः शिवविग्रहः ।।

३-७६अ

मृदूच्चकोरमयुक्तः प्रियरो मसृणः स्मृतः ।

श्वेतचन्द्रः श्वेतरेखो नीलः स श्वेतनीलकः ।।

३-७७

बिलेशयः कदलिकोमृदू रुक्षश्च कर्बुरः ।

श्यामला श्यामिका श्वेतबिन्दुः स्यात्षोडशायता ।।

३-७८

चतुरा चम्द्रका श्यामा स्निग्धरोमा वनप्रिया ।

कृष्णाथवा गोधूमाभा स्निग्धोच्चमृगरोहिका ।।

३-७९

मृगाद्याः कृष्णसाराद्यास्त एव पशवः स्मृताः ।

अष्टपादो गजारातिः शरभस्तूत्पदे रविः ।।

३-८०

गोवाही स्याद्वनगवो गवयो वाहवारणः ।

शिबेबः स्याद्गन्धमृगः कस्तूरी मृगवालकः ।।

३-८१

अण्डस्तु तस्याः कस्तूरी राजार्हं शितिचन्दनम् ।

मदनी वेधमुख्या तु मार्जारी गन्धवेलिका ।।

३-८२

श्वभीरुः सृगालो भेरुः क्रोष्टा च मृगमत्तकः ।

मर्कटः स्यान्महावेगः कुरङ्गो भल्लुकः पृथुः ।।

३-८३

सौरभेयी श्रुङ्गिणी गौरघ्र्या महिरुषा शुभा ।

तम्पा तम्बा निलिम्पा चोस्त्रानड्वाहीनिलिम्पिकाः ।।

३-८४

रजःपूता रक्तवर्णा रोहिणी वायुसम्भवा ।

शबली प्रक्षराङ्गी च सुमना व्योमसम्भवा ।।

३-८५

वराङ्गा तु चतुर्वर्षा द्विवर्षा तु द्विहायनी ।

एकवर्षा तु सा धन्या बहुक्षीरा तु वञ्चुला ।।

३-८६

नैचकी गौर्गृहश्रेष्ठा भद्रा गौर्गोमतल्लिका ।

काल्योपसर्या प्रजनी पलिक्नी बालगर्भिणी ।।

३-८७

चिरसूता बष्कयणी वशा वन्ध्या वृषस्वसा ।

दुःखदोह्या तु वरटा सुखदोह्या तु सुव्रता ।।

३-८८

धेनुर्नवप्रसूतिर्गौर्बहुसूतिःपरेष्टुका ।

अभिवन्यान्यवत्सा गौर्वृषाक्रान्ता तु सन्धिनी ।।

३-८९

आपीनमूधो वृन्तस्तु स्तनो वत्सस्तु तर्णकः ।

उक्षा गौर्वृषलोऽनड्वान्वाह्यः स्कन्धवहो वशी ।।

३-९०

शाक्वरो बाडबेयश्च वर्षभेयश्च वर्धकः ।

ककुदी गोवृषो घोषः ककुद्मान्वृषभो वृषः ।।

३-९१

षण्डस्तु गोपतिः श्रीमान् स कर्मचर ईश्वरः ।

कण्ठः कण्ठविहीनः स्यात्षण्डस्तु छिन्नपुच्छकः ।।

३-९२

गोमान्गोमी च गोस्वामी गोविन्दोऽधिकृतो गवाम् ।

नैचकी गोशिरोदेशः सास्ना तु गलकम्बलः ।।

३-९३

गोशकृद्गोमयोऽप्यस्त्री गोग्रन्थिः शुष्कगोमयः ।

करिषं दोहलं हव्यं नकुलं गोधनं समे ।।

३-९४

गोमहिष्यादिकं जीवधनं स्यात्पादबन्धनम् ।

आरङ्गे लम्बकर्णश्च तच्छगस्तबकः पशुः ।।

३-९५

छगी मञ्जी सर्वभक्षा चुलुम्बा च गलस्तनी ।

जटिलस्तु वनच्छागो बालविन्ध्यो निरादनः ।।

३-९६

एडकोऽप्यरणो मीथ उरभ्रो रोमजोऽप्यविः ।

खररासभचक्रीवद्वाहवाहकगर्दभः ।।

३-९७

ईषस्वरो धूम्रकण्ठो नैकभारसहः शलः ।

चिरमेषी गर्दनकः कोलिण्टो बडवापतिः ।।

३-९८

करभश्च मयस्तूष्ट्रो महाग्रीवस्तु वर्तकः ।

भषकः सारमेयः स्याच्छ्वा शुनो मृगदंशकः ।।

३-९९

रतिकीलो गृहमृगः कुक्कुरः क्रोधनः शुनिः ।

यक्ष इन्द्रमृगः श्वालः कपिलो मण्डलः सुनः ।।

३-१००

जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः ।

शुनी तु सरमा श्वाली विचरो ग्रामसूकरः ।।

३-१०१

जाहको गात्रसंकोची मण्डली नखरायुधः ।

पशुस्तु मुलको मोकः कुवः शुद्धजडश्चरिः ।।

३-१०२

हिंस्रो व्याघ्रादिको व्यालः श्वापदो मरुलः शिरिः ।

मनुष्या मानवा मर्त्या मनुजा मानुषा नराः ।।

३-१०३

द्विपादो नहुषो गोधा व्राताः पञ्चजना नरः।

ब्रह्मक्षत्रियविट्शूद्रा इति वर्णचतुष्टये ।।

३-१०४

उपवर्णास्तु संकीर्णा विवर्णास्त्वन्तजातयः ।

एकवर्णाः स्ववर्णाः स्युर्हीनवर्णास्तु जुङगिताः ।।

३-१०५

भूदेवो ब्राह्मणो विप्रो मुखजो वेदसम्भवः ।

अग्रजन्मा बाडबकः श्रेष्ठवर्णः कराग्रिमान् ।।

३-१०६

उपनायस्तूपनय आनायाश्च वटूकृतिः ।

ब्रह्मचारी व्रती वर्णी नैष्ठिकस्तु स आश्रमी ।।

३-१०७

गायत्रस्तूपकुर्वाणो वैदिकोऽधीतवेदकः ।

निस्स्वाध्यायो निराकृतिर्वैवाही गृहमेधिकः ।।

३-१०८

उच्छिष्ठभोजनो देवनिवेद्यबलिभोजनः ।

जातिमात्रोपजीवस्तु यः स स्याद्ब्राह्मणब्रुवः ।।

३-१०९

अजपस्त्वसदध्येता देवाजीवस्तु देवलः ।

आघायवो वातरता विगीताः ख्यातगर्हणाः ।।

३-११०

अवगीताश्च हन्ता तु गुरूणां नरकीलकः ।

शश्विदानो दुराचारो निषिद्धैकरुचिः खरुः ।।

३-१११

त्यक्तात्मा त्यक्तसंवासोऽवकीर्णी तु क्षतव्रतः ।

शाखारण्डोऽन्यशाखास्थो वर्णिलिङ्ग्यादयस्त्रिषु ।।

३-११२

अग्नीन्धनं त्वग्निकार्यं चाग्निध्री चाग्निकारिका ।

ग्रासे तु पवनी भिक्षा पुष्कलं तच्चतुष्टयम् ।।

३-११३

ते चत्वारो हन्तकारो हन्तकारद्वयं घनम् ।

मुष्ट्यष्टकोऽव्ययं किंचित्पुष्कलं तु तदष्टके ।।

३-११४

पुष्कलानि तु चत्वारि पूर्णपात्रकमस्त्रियाम् ।

भिक्षाचरः कौकिटिकः कटिको भक्षुकः पुमान् ।।

३-११५

द्विजायिनी ब्रह्मसूत्रं सूत्रं यज्ञोपवीतिकम् ।

पवित्रं चोपवीतं तूपोद्धृते दक्षिणे भुजे ।।

३-११६

प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ।

कृष्णाजिनं कर्णिकः स्यात्कृत्तिः स्त्री चर्म चाजिनम् ।।

३-११७

परमाप्तो गुरुर्ब्रह्म आत्मलाभकरः शिवः ।

वरूथः प्रवरो ज्ञानी ब्राह्मणो ज्योतिरात्मवान् ।।

३-११८

गृहस्थः स्नातकी चक्री गृहमेधी गृहीति च ।

पृथुचित्रः कुण्डधान्यो विघसाशी दिनत्रयी ।।

३-११९

यायवरश्चक्रवरः सद्यःपक्षालितान्नकः ।

उत्सवो मह उद्धर्ष उद्धवो हर्षवेणुकः ।।

३-१२०

क्षणः पर्व च कल्याणं मधुपर्कं तु निष्ठकम् ।

यज्ञाध्ययनदानानि याजनाध्यापनग्रहाः ।।

३-१२१

षट्कर्माणि महायज्ञो ब्रह्मयज्ञादि पञ्चकम् ।

यष्टा तु यजुरादेष्टा यजमानश्च होत्रवित् ।।

३-१२२

सोमे तु दीक्षितः सोम्यो यज्वा स्यादिष्टवानसौ ।

सर्ववेदाः स यो यागो दत्तसर्वस्वदक्षिणः ।।

३-१२३

यज्ञत्यागी वृथाजातोऽपञ्चयज्ञो मलिम्लुचः ।

याजका भारता यज्ञालिहः कुरव ऋत्विजः ।।

३-१२४

पाकयज्ञा पार्वणाद्या हविर्यज्ञास्त्वसोमकाः ।

पशुबन्धास्तु पशवः सोमसौम्याश्च सोमिनः ।।

३-१२५

सवनैस्त्रिभिरेकाहास्तैरावृतैरहर्गणाः ।

ते दीक्षितैः कृताः सत्राण्यहीना याजकैःकृताः ।।

३-१२६

अहीना द्वादशाहान्वान्सत्रादूर्ध्वं स तु द्वयम् ।

सर्वेऽमी यज्ञक्रतवस्त एवैन्द्राः प्रजागमाः ।।

३-१२७

अग्निष्टोमश्चतुष्टोमो ज्योतिरानृण्यमित्यपि।

अथ यज्ञोपकरणं यजत्रं यजनं च तत् ।।

३-१२८

होमधेनुस्त्वग्निहोत्री होमकाष्ठी तु नालिका ।

होमधूमस्तु निगणो होमभस्म तु वैष्णुतम् ।।

३-१२९

होमेन्धनं स्यादिध्मोऽस्त्री पुमानेधः समित्स्त्रियाम् ।

पुरोडाशस्तु तृप्रको होमपात्रं हविश्चरुः ।।

३-१३०

वृत्तस्याध्ययनस्यापि संपत्तिर्ब्रह्मवर्चसम् ।

त्यागो दानं वितरणं विश्राणनविसर्जने ।।

३-१३१

विहापनं निर्वापणं स्पर्शनं प्रतिपादनम् ।

उत्सर्जनं प्रदेशनमपसर्जनमंहतिः ।।

३-१३२

अतोयं सात्विकं दानमुदपूर्वं तु पौष्टिकम् ।

आशिषा शान्तिकं दानं वरणं कामदं भवेत् ।।

३-१३३

आशासनेऽर्थना याच्ञा याचनाध्येषणार्धना ।

भिक्षार्चा सनिरक्ली स्यान्मार्गणा तु गवेषणा ।।

३-१३४

पर्येषणा परीच्छा च मृगतान्वेषणा मृगः ।

चान्द्रायणं च चन्द्रवतं प्राजापत्यं तु कृच्छ्रिकम् ।।

३-१३५

प्राजापत्यं तु गोकृच्छ्ं कृतं गोमूत्रयावकैः ।

उपवासस्तूपवस्त्रं संन्यासः स्यादनाशनम् ।।

३-१३६

द्वादशाहे तु पराकं षोडशाहे तुरायणम् ।

तुरायणद्वयं सौम्यं चातुर्मास्ये परायणम् ।।

३-१३७

पञ्चरात्रं पयःपानं संगमं संगमश्च सः ।

योगपट्टस्तु गीता स्यात्पर्यसतिरवसक्थिका ।।

३-१३८

ऋषिस्त्रिकालदर्शःस्यन्मौनी वाचंयमी मुनिः ।

तपनः कुम्भपुत्रः स्यादगस्त्यः पीतसागरः ।।

३-१३९

और्वशेयः कुम्भयोनिरगस्तर्विन्ध्य कूटकः ।

मैत्रावरुणिराग्नेयो मुनिर्वातापिसूदनः ।।

३-१४०

दक्षिणाशारतः काथिरनसत्याग्निमारुतौ ।

अस्य कौषितकी भार्या लोपामुद्रा वरप्रदा ।।

३-१४१

तस्य ज्येष्टिस्तु सन्मौनी जन्मनक्षत्रनामकः ।

प्राचेतसस्तु वाल्मीकिर्वल्मीकश्च कुशी कविः ।।

३-१४२

शालातुरीयको दाक्षिपुत्रः पाणिनिराहिकः ।

हलभूतिस्तूपवर्षः कृतकोटिकविश्च सः ।।

३-१४३

योगज्ञो याज्ञवल्के च वसिष्ठे ह्यायवः स्मृतः ।

पराशरे तु यज्ञास्यः शतानन्दस्तु गौतमे ।।

३-१४४

यवक्रीतो रोहिते स्याज्जरत्कारुर्ययावरः ।

कुशारणिस्तु दुर्वासा ह्याष्टावक्रस्तु गर्भजः ।।

३-१४५

च्यवनो मत्स्यगुच्छश्च गोनर्दीयः पतञ्जलिः ।

अथ व्याडिर्विन्ध्यावासी नन्दनीनन्दनोऽपि च।।

३-११४६

कात्यायनो वररुचिर्मेघजिच्च पुनर्वसुः ।

वात्स्यायनस्तु कौटिल्यो विष्णुगुप्तो वराणकः ।।

३-१४७

द्राविलः पक्षिलः स्वामी मल्लनागोऽङ्गुलोऽपि च ।

विद्वान्सन्कोविदः सूरिर्मेधावी पण्डितो बुधः ।।

३-१४८

सुधीर्विपश्चित्संख्यावान्प्राज्ञो धीमान्विचक्षणः ।

दीर्घदर्शी दूरदर्शी लब्धवर्णः पलंहतिः ।।

३-१४९

ब्रह्मभूयं ब्रह्मभावे देवभूयादिकं तथा ।

अमृतत्वं तु कैवल्यं मुक्तिर्मोक्षोऽपुनर्भवः ।।

३-१५०

मोक्षावलम्बिनः प्रायः पाषण्डा बाह्यलिङ्गिनः ।

ते च हेरुकशोभाद्या प्रोक्ताः षण्णवतिः कचित् ।।

३-१५१

दशोत्तरशतं कैश्चित्पाषण्डानां प्रदर्शितम् ।

शतत्रयं षष्ठ्यधिकमुक्तं चीनेशसंसदि ।।

३-१५२

वेषजीवकृतान्ताद्यैस्तेषां भेदाः परः शतम् ।

क्षत्रं बाहुदरादन्यौ भूशक्रः क्षत्रियो विराट् ।।

३-१५३

राजा तु पार्थिवो भूभृद्भूपो नरपतिर्नृपः ।

सार्वभौमश्चक्रवर्ती नृपोऽन्यो मण्डलेश्वरः ।।

३-१५४

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ।

राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।।

३-१५५

षट्कं कामो मदो मानो मोहो रुषाणि च ।

मृगयक्षाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे ।।

३-१५६

दण्डपारुष्यमित्येतन्महाव्यसनसप्तकम् ।

देवी राजकुलोत्था चेत्परिवृत्ती तु पूजिता ।।

३-१५७

वावाता तु प्रियतमा स्वाधीनी तु नृपात्मजा ।

पालगली युद्धजिता नृपस्योढाः प्रिया इमाः ।।

३-१५८

अनूढा तु प्रिया राज्ञः कालज्ञा गणिका स्मृता ।

गणिका सा प्रगणिका यानाप्तपरिहारिका ।।

३-१५९

अथालगणिकाप्याज्ञागणिका कुलसम्भवा ।

शय्यास्त्रग्भूषणादौ तु नियुक्ता परिचारिका ।।

३-१६०

शत्रुर्दस्युरमित्रोऽरिररातिरहितो द्विषत् ।

द्वेषणः प्रत्यनीको द्विड्जिघांसुर्हिंसनो रिपुः ।।

३-१६१

सैन्यं चक्रं बलं सेना पृतना ध्वजिनी चमूः ।

अनीकिनीपताकिन्यौ वाहिनी च वरूथिनी ।।

३-१६२

सैन्यं तु भिन्नकूटं तन्नष्टावान्तरनायकम् ।

शून्यमूलं तदस्थानमन्तःसल्यं सदोषकम् ।।

३-१६३

हस्त्यश्वरथपादातं बलं स्याच्चतुरङ्कम् ।

कुम्भो मत्तगजो हस्ती दन्ती कुम्भी करी रदी ।।

३-१६४

स्तम्बेरमो गजो गर्जो द्विरदोऽनेकपो द्विपः ।

दन्तावलो महाकायो वारणः कुञ्जरोऽसुरः ।।

३-१६५

महामृगः शूर्पकर्णः सामाजः सिन्धुरः कपिः ।

मन्दवृन्दः कुली कम्बुः शुण्डालः षष्ठिहायनः ।।

३-१६६

वेगदण्डश्च वेदण्डो हस्तनासश्च पेचकी ।

भद्रो मन्द्रो मृग इति गजाः संस्कारजास्तथा ।।

३-१६७

बिम्बकस्तु शिरोमध्यं पाकलौ तस्य पार्श्वयोः ।

विताने तद्बहिःपार्श्वौ कुम्भमध्ये विदुः पुमान् ।।

३-१६८

कर्णमूले वितलिका चूलिका पिप्पलाति च ।

विञ्जूषः कर्णपार्श्वेऽस्मिन्नारक्षौ कुम्भयोरथः ।।

३-१६९

उरःपार्श्वे तु विक्षोभौ दर्दुरौ गलपार्श्वकौ ।

तत्पलं त्विभमध्याङ्गं स्कन्धदेशेऽप्यमासनम् ।।

३-१७०

कटस्तु करटो गण्डो गात्रं पूर्वोऽङ्घ्रिरस्य तु ।

मू – रोधः प्रतीकाशः क्षयश्च पलदायकः ।

३-१७१

कूर्मः संदानभागश्च प्रोह उत्संङ्ग इत्यपि ।

विशेषभागो वैशाखी तद्गात्रेषु च पाकलः ।

३-१७२

पुष्पवंशोऽपदंशः स्यान्निष्कोशः कुक्षिमध्यकम् ।

अत्याहः कुकुदं मेढ्रे करिका चूचुकान्तरम् ।।

३-१७३

अथ पुच्छे स्थिताः किल्ली संवालो वालपुष्करम् ।

दन्तभागः पुरोभागः पक्षभागस्तु पार्श्वकः ।।

३-१७४

मुखे पृषन्ति पद्मानि वमथुः करशीकरः ।

चूला कक्ष्या वरत्रा स्यादङ्कुशोऽस्त्री शृणिः षणि ।।

३-१७५

अश्वस्तुङ्गस्तुरगो हयः सप्तिस्तुरङ्गमः ।

शालिहोत्री व्रती कुण्डी प्रोथी वारुः प्रकीर्णकः ।।

३-१७६

कुदुरो णेटकस्ताक्ष्र्यः क्रमणो ग्रहभोजनः ।

पालकः पुरुलः पीतो माषाशी सिंहविक्रमः ।।

३-१७७

श्रीवृक्षकी प्रक्षिणी चेद्रोमावर्तो मुखेऽपि च ।

अश्वत्थपत्रसदृशपुण्ड्रः श्रीवत्सकी स्मृतः ।।

३-१७८

मल्लिकाक्षः सितैर्नेत्रैर्विष्णोरिन्द्रायुधो हयः ।

पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ।।

३-१७९

निहीनास्त्वब्जकारट्टशम्बला दोषिणः परे ।

तत्र श्रुङ्गी श्रुङ्गपदे मांसबुद्बुदवान्हयः ।।

३-१८०

अश्वानां तु गतिर्धारा विभिन्ना सा च पञ्चधा ।

आस्कन्दितं धौरितकं रोचितं वल्लितं प्लुतम् ।।

३-१८१

इत्येषां तु पञ्चानां नामैकं बहुभेदकम् ।

गत्यर्थास्तद्वदर्था हि सर्वे ते वाच्यलिङ्गकाः ।।

३-१८२

स तु वल्लभः पालेयो राजेष्टः परिवरधकः ।

अमृताद्वाष्पतो वह्नेर्देवेभ्यः क्रोधतः फलात् ।।

३-१८३

साम्ना लक्ष्म्या हयोत्पत्तिः सप्तधेति प्रकीर्तिता ।

वाहनं यानं संयुग्यं वाह्यं धोरणमित्यपि ।।

३-१८४

अस्मिंश्चक्रयुते गन्धः शताङ्गःस्यन्दनो रथः ।

वहित्रं वाहनं चास्मिंश्चतुरस्त्रे सकूबरे ।।

३-१८५

दीर्घद्विपक्षवहनमनः क्लीं शकटोऽस्त्रियाम् ।

प्रवाहिर्ना वृत्तमध्ये पक्षकूबरवर्जिते ।।

३-१८६

देवतार्थो देवरथो युद्धार्थः साम्परायिकः ।

क्रीडार्थः स्यात्पुष्यरथः कृतः कर्णिरथो मृदा ।।

३-१८७

युगो द्वितीयः प्रासङ्गः पताका तु ध्वजोऽस्त्रियाम् ।

सेवका युधि योद्धृणां भटा योधाश्च योधकाः ।।

३-१८८

पदातिपत्तिपादाताः पदातिकपदाजयः ।

पादिकः पदकः पत्तो राथिको रथिको रथी ।।

३-१८९

सेनाधिपस्तु सेनानी साहस्रास्तु सहस्त्रिणः ।

धन्वी धनुष्मान्धानुष्कः पुरोगमपुरस्सरौ ।।

३-१९०

शूरो वीरश्च विक्रान्तो भटश्चारभटोऽपि च ।

अशूरो हतकः क्लीबो जिष्णौ तु जयजित्वरौ ।।

३-१९१

शिक्षितः कृतहस्ते तु सांयुगीनो रणेऽपि च ।

जवने जवनिमा स्याज्जङ्घालोऽतिजवेति च ।।

३-१९२

धीरो मन्दगतिः कुट्टी स्यादुरस्वानुरस्तिकः ।

त्वक्त्रं तु दंसनं वर्म तनुत्रं कवचोऽस्त्रियाम् ।।

३-१९३

हिरिका स्यादयोवर्म जङ्घत्राणं तु मत्कुणम् ।

पट्टस्तु लिपिसंनाहो बाहुलं बाहुरक्षकृत् ।।

३-१९४

मर्दनी पादरक्षा स्यादङ्गुलत्रे कपिः पुमान् ।

शीर्षत्राणे तु शीर्षण्यमधिकाङ्गं तु कङ्कटे ।।

३-१९५

शस्त्रे स्यान्न क्लिको हेतिर्‍ऋष्टिः खड्‍गे प्रचारकः ।

चन्द्रहासोऽर्धचन्द्राग्रेऽप्युली तु करवालिका ।।

३-१९६

हरकस्तरवारिः स्त्री पुलकास्त्वणुराज्यः ।

अथासिपुत्रच्छुरिका सातिदीर्घासिधेनुका ।।

३-१९७

कार्मुकं धन्व कोदण्डं धर्ममस्त्रं शरासनम् ।

कार्मुकं तु चतुर्हस्तं कोदण्डं त्र्यङ्‍गुलं विना ।।

३-१९८

कवटो लघुकाष्ठा स्यात्सयष्ठिर्यष्ठिवारणः ।

लोहाविहार उद्योगे राज्ञां नीराजनाविधिः ।।

३-१९९

यत्सेनायाभिनिर्याणं पत्यास्तदभिषेणनम् ।

विरतं तु भटोद्योगोऽभ्याक्रमो यानमभ्यरीन् ।।

३-२००

मृध आस्कन्दनं युद्धं समिदाधेयोधनं रणम् ।

स्वक्षेत्रे सुकृतिकाङ्‍क्षी वीराङ्‍को वीरदर्शनः ।।

३-२०१

वीराणां यद्रणे नृत्तं तस्मिन्वीरजयन्तिका ।

नाशस्त्वपक्रमोऽपायो विप्रयाणं पलायनम् ।।

३-२०२

पिञ्जस्तु घात उन्माथो विशरः प्रमथो वधः ।

उद्वासनं प्रशसनं क्षणनं परिवर्जनम् ।।

३-२०३

रुण्डोऽशिराः कबन्धोऽस्त्रीकुणपोऽरिशवोऽस्त्रियाम् ।

शवयानं कटः कोटिश्चिता चित्या चिति स्त्रियाम् ।।

३-२०५

शिरो रूढं व्रणस्थाने व्रणशान्तिस्तु रोपणम् ।

आस्फेटो रणसंनाहस्तुमुलं रणसङ्कुलम् ।। ३-२०५

आर्या भूमिस्पृशो वैश्या ऊरव्या ऊरुजा विशः ।

आजीवो जीवका वृत्तिर्वार्तावर्तनजीवने ।।

३-२०६

व्रीहिस्तु रेणुको बीजो धान्यं सस्यं तु रीरिका ।

व्रीहयस्तम्बकरयः शालेयाः श्वेततण्डुलाः ।।

३-२०७

सुगन्धिको महाशालिः षष्ठिकः सूक्ष्मतण्डुलः ।

कलावकास्तु कलमाः प्रवराः शालषष्ठिकाः ।।

३-२०८

माषस्तु मलदो मांसं घरी बीजवरो बली ।

मुद्गस्तु प्रथनो लोह्यो बलाङ्गो हरितो हरिः ।।

३-२०८अ

पीतेऽस्मिन्वसुखण्डीरप्रवालजयशारदाः ।

वनमुद्गे तु कुट्टः स्यान्निगूढकुलिकालुकाः ।।

३-२०९

खण्डी च राजमुद्गे तु मरुष्टकमयष्टकौ ।

जर्तिलोऽरण्यजतिलो जालकस्तूलकस्तिलकः ।।

३-२१०

तिलपुष्पं वज्रपुष्पं मसूरस्तु मसूरकः ।

अलसान्द्रे राजमाषो निष्पावः श्वेतशिम्बिका ।।

३-२११

आढकी तुवरी वल्गा सौराष्ट्री करवीरिका ।

छत्रा कुस्तुम्बरी धान्या धान्यकं च धनीयिका ।।

३-२१२

गोधूमस्तु म्लेच्छभोज्यः सुमनाः सुमनो गुरुः ।

शतपर्वा बहवकः कोद्रवे कोरदूषकः ।।

३-२१३

क्रुद्धमावसितं धान्यं बहुलीकृतं संस्कृतम् ।

खलपूः स्याद्बहुकरश्छादितेयश्छदितृणम् ।।

३-२१४

क्रयकः क्रयिकः क्रेता विपूर्वाः क्रेयवस्तुके ।

क्रेये प्रसारितँ क्रय्यं विक्रेयं पणितव्यकम् ।।

३-२१५

परिवर्तो विनिमयो वैमेयो विमयोऽपि च ।

सत्यंकारः पुनः सत्याकृतिः सत्यापनं च तत् ।।

३-२१६

पण्याजीवः सार्थवाहो नैगमो वणिजो वणिक् ।

वैदेहिकः प्रापणिकः क्रयविक्रयिकोऽपि च ।।

३-२१७

कोशमस्त्री हिरण्यं च हेमरूप्यं कृताकृतम् ।

ओषध्यो जातिमात्रं स्युरजातौ सर्वमौषधम् ।।

३-२१८

स्त्री शुण्ठिरूषणं विश्वभेषजं सिंहलं कटुः ।

पिप्पली मागधी शौण्डी ग्रथिनी तीक्ष्णतण्डुला ।।

३-२१९

कपिवल्यां कोलवल्ली गण्डिनी हस्तिपिप्पली ।

मरीचं च शिरावृत्ता भूषणं धर्मपत्तनं ।।

३-२२०

लोभाख्यं श्यामवल्ली च त्र्युषणं कटुंकत्रयम् ।

क्षारो गुडोऽस्य विकृतौ मत्स्या स्यात्खण्डशर्करा ।।

३-२२१

फणितं क्षुद्रखण्डं च चत्कुली खण्डमस्त्रियाम् ।

मधूकं तु मधुरस्त्री मधुकं तत्पुरातनम् ।।

३-२२२

भ्रामरं तु भ्रामरीकं क्षौद्रं सारसमाक्षिके ।

मदनं तु मधूच्छिष्टं मेणवं तु विलाकरम् ।।

३-२२३

स्नेहो तिलानां तैलं स्यादन्येषां नामपूर्वकम् ।

घृतमाज्यं हविः सर्पिः कौम्भं त्वाज्यं दशाब्दकम् ।।

३-२२४

हैयंगवीनं तक्रेजं नवनीतं घृताकरम् ।

दधि विप्रप्रियं हृद्यं श्रीघनं क्षीरजं शरः ।।

३-२२५

रक्षितं तूद्घृतं स्नेहान्मथितात्तु प्रमाधितम् ।

पयो दुग्धं च पीतं च स्तन्यं पुंसवनं रसः ।।

३-२२६

गव्यं श्रेष्टं मधु क्षीरं योग्यं सोमरसोद्भवम् ।

तदेव मधु यत्सद्योद्भृतं गोदोहजं घृतम् ।।

३-२७

बोलं तराग्रं मोरट्टं गोरसं तक्रमित्यपि ।

शूद्रो जघन्यजोऽप्यन्त्यवर्णः संकरसंभवः ।।

३-२२८

परिस्कन्दः परैर्जातः परैधितनियोज्यकौ ।

भरण्यं भरणं भर्म वैतनं निष्क्रयो भृतिः ।।

३-२२९

कर्मण्या तु विधा भृत्या भारवाहस्तु भारिकः ।

वार्ताहरो वैवधिको हारयष्टर्विभाङ्गिका ।।

३-२३०

शिक्यं विल्लम्बि काचश्च पाथेयं शम्बलोऽस्त्रियाम् ।

कारवः शिल्पिनः सर्वे कुलिकास्ते कुलोत्तमाः ।। ३-२३१

सौचिकस्तुन्नवायः स्यात्सूचिः सूचा च सीवनी ।

सूचिसूत्रं पिप्पलकमोतं प्रोतमुभे त्रिषु ।।

३-२३२

सीवनं सेवनं सूती रङ्गाजीवस्तु चित्रकृत् ।

लिखितं चित्रमालेख्यं पुस्तं लेख्यादिकर्मणि ।।

३-२३३

धातुलेप्यमयी नारी सा स्यादञ्जलिकारिका ।

पाञ्चालिकादि वस्त्रादिपुत्रिका शालभञ्ज्यपि ।।

३-२३४

आर्या वृद्धा तु सा देवी या स्याद्गोमयपुत्रिका ।

पलगङ्गो लेपकारः कल्पाणिः समलेखनी ।।

३-२३५

सुधा विलेपा घटिका वालुका घटिकारसः ।

संवाहकोऽङ्गमर्दः स्यादथ देहस्य रक्षके ।।

३-२३६

आरक्षकः कङ्कटी च शस्त्रमार्जोऽसिधावकः ।

मणिकारो वैघटिकः शौल्बिकस्ताम्रकुट्टकः ।।

३-२३७

नाडिंधमः स्वर्णकारः कलादो दोष्ठिकः समः ।

कर्मकः स्यादयस्कारो वोकारो लोहकारकः ।।

३-२३८

शाङ्खिकः स्यात्काम्बिविको भस्त्रा चर्मप्रसेविकः ।

धृतिः श्रुतिश्चोपध्मान्तः प्रसेवो –दनायुधः ।।

३-२३९

संदंशः स्यात्कन्दमुखः काणा मूषा बुका स्त्रियाम् ।

विध्यते येन मण्यादिराविधोऽसौ निधोऽपि च ।।

३-२४०

आस्फोटनी वेधनिका भ्रमा कुण्डलयन्त्रकम् ।

चण्डिलः क्षुरमर्दी स्यान्नापितोऽन्तवसाय्यपि ।।

३-२४१

क्षुरोऽस्य वपनं शस्त्रं कर्तिका कर्तनीत्यपि ।

शल्यस्कन्दिनी धार्या त्वक्ष्णाक्षूर्नखकृन्तनम् ।.

३-२४२

कुम्भकारः कुलालः स्याच्चक्री भार्गव इत्यपि ।

आपाकः पुटपाणः स्यात्पचनं पाकमण्डलम् ।।

३-२४३

धूसरश्चाक्रिकस्तैली पिण्याकस्तिलकस्तिली ।

आभीरस्तु महाशूद्रो गोपा गोसंख्यगोदुहौ ।।

३-२४४

गोपालो वल्लवश्चाथ वत्सीयस्त्रिषु तत्स्थिते ।

जापालः स्यादजाजीवो लम्बनस्तु क्षपालकः ।।

३-२४५

अथ स्याद्दण्डिको दण्डः काणोऽपि लकुटोलकुः ।

सन्दानं दामनी दामा रज्जुः स्याद्वलिनीति च ।।

३-२४६

गुणो वराटो रज्जुः स्त्री नना शुल्बा वटी त्रयम् ।

ग्रन्थिर्बन्धो व्रजो गोष्ठं गोष्ठीनं तु पुराव्रजः ।।

३-२४७

मन्थानं मन्थनं मन्था मन्थ्या मन्थनिकापि च ।

वैशाखोऽप्यस्य दण्डे तु वैशाखकविशाखकौ ।।

३-२४८

कुठारो मदविष्कम्भो मन्थपात्रं तु गर्गरी ।

कलशः कलशी चापि पारिकुम्भी च कुम्भिका ।।

३-२४९

घोष आभीरपल्ली स्यात्पक्कणोऽरुयन्तजातयः ।

मालाकारो माल्यजीवी मालिकः प्रतिहारिकः ।।

३-२५०

जायाजीवस्तु शैलषः शैलाली भरतो नटः ।

यो यष्टिरज्जुखड्गेषु प्रनृत्यति स पूरकः ।।

३-२५१

करांस्तु तालं कृत्वा ये नृत्तं गानं च कुर्वते ।

ते तालवचनाः प्रोक्ता इति शास्त्रविशारदैः ।।

इति नाममालिकायामहिराजेनैव संगृहीतायां

भूम्यादिनामधेयप्रकरणमिदमखिलसुकविमतम् ।

भोजनिघण्टुश्च समाप्तः

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

शब्दरत्नप्रदीपः

प्रथमो मुक्तकः

१-१

शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुत्तमम् ।

कण्ठे कुर्वन्ति विद्वांसः श्रद्धधाना दिवानिशम् ।। १ ।।

१-२

शब्धाम्बोधिर्यतोऽनन्तः कृतोऽप्यागमसम्भवात् ।

स्वानुवाचैकमानाय तस्मै वागात्मने नमः ।। २ ।।

१-३

सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदम् ।

प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधुभिः ।। ३ ।।

१-४

शिवं भद्रं शिवः शम्भुः शिवा गौरी शिवाऽभया ।

शिवः खिलः शिवा क्रोष्ट्री भवेदामलकी शिवा ।। ४ ।।

१-५

गौरी शिवप्रिया प्रोक्ता गौरी गोरोचना मता ।

गौरी स्यादप्रस्नूता गौरी शुद्धोभयान्वया ।। ५ ।।

१-६

हरिरिन्द्रो हरिर्भानुर्हरिर्विष्णुर्हरिर्मरुत् ।

हरिस्सिंहो हरिर्भेको हरिर्वाजी हरिर्कपिः ।। ६ ।।

१-७

हरिरंशुर्हरिर्भीरुर्हरिः सोमो हरिर्यमः ।

हरिश्शुको हरिःसर्पः स्वर्णवर्णौ हरिस्स्मृतः ।। ७ ।।

१-८

मधुर्मद्यं मधुः क्षौद्रं मधु पुष्परसं मृदुः ।

मधुर्दैत्यो मधुश्चैत्रो मधूकोऽपि मधु स्मृतः ।। ८ ।।

१-९

क्षुद्रा वेश्या नदी क्षुद्रा क्षुद्रोक्ता मधुमक्षिका ।

असहिष्णुः स्मृतः क्षुद्रः क्षुद्रा स्यात् कण्टकारिका ।।९ ।।

१-१०

वाहो युग्यं धनो वाहः प्रवाहो वाह उच्यते ।

वाहो मानविशेषश्च वाहो बाहुरिति स्मृतः ।। १० ।।

१-११

इष्टकादिचयो हारो हारोमुक्तागणः स्मृतः ।

हारो मापविशेषश्च हारश्च क्षेत्रमुच्यते ।। ११ ।।

१-१२

आत्मा भावो मनो भावो भावः सत्ता भवेपि च ।

भावः पूज्यतमो लोके पदार्थो भाव इष्यते ।। १२ ।।

१-१३

कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलः ।

कुथः कुशः कुथः कीटः प्रातःस्नायी द्विजः कुथः ।। १३ ।।

१-१४

कुशे काले तिले च्छागे कम्बले सलिलेऽम्बरे ।

दौहित्रे खङ्गपात्रेऽग्नौ कुतपाख्या प्रवर्तते ।। १४ ।।

१-१५

बाणे वाचि पशौ भूमौ दिशि रश्मौ जलेऽक्षणि ।

स्वर्गे मातरि वज्रेऽग्नौ मुखे सत्ये च गोध्वनिः ।। १५ ।।

१-१६

श्रियां यशसि सौभाग्ये योनौ कान्तौ महिम्नि च । सूर्ये संज्ञाविशेषेऽपि मृगाङ्गेऽपि भगः स्मृतः ।। १६ ।।

१-१७

पर्जन्ये राज्ञि गीर्वाणे व्यवहर्त्तिरि भर्तरि ।

मूर्खे बाले जिगीषौ च देवोक्तिर्नर कुष्टि(न्ति नि ।। १७ ।।

१-१८

तूर्यास्येऽसिफले पद्मे कुञ्जराग्रकरे दिवि ।

द्वीपे तीर्थे निमित्ते च विशिष्टे पुष्करध्वनिः ।। १८ ।।

१-१९

मूर्ध्नि चित्ते जले काये मुखे ब्रह्मणि मारुते ।

कामे काले सुवर्णे च कः शब्दो द्रविणे ध्वनौ ।। १९ ।।

१-२०

जीवे राज्ञि रवौ धर्मे तपस्विनि तुरंगमे ।

सिते पक्षविशेषे च हंसशब्दो हरेऽपि च ।। २० ।।

१-२१

रसो जलं रसो हर्षो रसः श्रृङ्गारपूर्वकः ।

रसः पुष्पादिनिर्यासः पारदोऽपि रसो विषम् ।। २१ ।।

१-२२

क्षीरे पुष्परसे तोये मण्डे मद्ये घुतेऽसृजि ।

सप्तस्वर्थेषु कीलालं कथयन्ति मनीषिणः ।। २२ ।।

१-२३

तिलेपिष्टे मले मांसे कम्बले कोमलेऽस्थिनि ।

वत्से क्षीबे बले प्राज्ञाः पललं परिचक्षते ।। २३।।

१-२४

हये पुच्छे ध्वजे पुण्ड्रे शैले पुंसि गुणाधिके ।

वित्ते धमनि भूषायां ललामेत्युत्तमे स्मृतम् ।। २४ ।।

१-२५

वसु सूर्यो वसुर्वह्निर्वस्वर्च्चिर्वसवोऽसवः ।

वसु रत्नं वसु द्रव्यं वसवोऽष्टौ धरादयः ।। २५ ।।

१-२६

अक्षराणि स्मृता वर्णा वर्णा श्वेतादयो गुणः ।

वर्णा नाट्यामुखे गाथा वर्णा ज्ञेया द्विजादयः ।। २६ ।।

१-२७

शुक्लो वर्णोऽर्जुनो नाम पाण्डवोऽप्यर्ज्जुनः स्मृतः ।

अर्जुनस्तृणजातिः स्यादर्जुनः ककुभो द्रुमः ।। २७ ।।

१-२८

व्रणस्यावरणं पट्टः पट्टो भूर्जाहिताक्षरः ।

वीरदीक्षापटः पट्टः पट्टः स्यादधिवासनम् ।। २८ ।।

१-२९

बलिः पूजोपहारः स्याद्बलिर्दानवपुङ्गवः ।

बलिः स्त्रीमध्यभागोर्मिर्बलिश्चर्म जराकृतम् ।। २९ ।।

१-३०

रन्ध्रे वस्त्रे तथा मध्ये व्यवधानेऽन्तरात्मनि ।

बहिर्योगेऽवकाशे च विशेषे व्यसनेऽन्तरम् ।। ३० ।।

१-३१

अरिष्टं गृहमित्युक्तं अरिष्टो वृषभासुरः ।

काकनिम्बावरिष्टौ चारिष्टं क्षेममिहीरितम् ।। ३१ ।।

१-३२

इन्द्रियं कम्बलं ज्ञेयं कम्बलो रोमजः पटः ।

कम्बलश्च गवां सास्ना कम्बलं कमलं स्मृतम् ।। ३२ ।।

१-३३

मण्डलं वर्तुलं प्रोक्तं सङ्घातो मण्डलं स्मृतम् ।

मण्डलं भूमिभागश्च मण्डलं सरमासुतः ।। ३३ ।।

१-३४

कुन्तलः केशपर्यायः कुन्तलो देशवाचकः ।

कुन्तलः सूत्रधारश्च कुन्तहस्तश्च कुन्तलः ।। ३४ ।।

१-३५

मणिर्लिङ्गाग्रिमो भागो मणिः प्रोक्तो भगध्वजः ।

मणिः कूपमुखोत्सेधः पद्मरागादिको मणिः ।। ३५ ।।

१-३६

तन्त्रं शास्त्रं कुलं तन्त्रं तन्त्रं सिद्धौषधिक्रिया ।

तन्त्रं सुखं बलं तन्त्रं तन्त्रं वपनसाधनम् ।। ३६ ।।

१-३७

नेत्रं वस्त्रविशेषः स्यात् नेत्रं चक्षुरुदाहृतम् ।

परावर्त्तगुणो नेत्रं नेत्रः कस्तूरिकामृगः ।। ३७।।

१-३८

वातादिप्रकृतिर्धातुर्धातुः शैलोद्भवः स्मृतः ।

क्रियाभावः स्मृतो धातुर्धातुर्देहरसादिकः ।। ३८ ।।

१-३९

काण्डो बाणस्तला काण्डः काण्डः संपात इष्यते ।

काण्डः कालो बलं काण्डं काण्डं मूलं तरोरपि ।। ३९ ।।

१-४०

सुधा प्रासादभाग्द्रव्यं सुधा विद्युत् सुधामृतम् ।

सुधेह भोजनं ज्ञेयं सुधा धात्री सुधा स्नुही ।। ४० ।।

१-४१

वेला कालविशेषः स्यात् सिन्धुजलोद्धतिः ।

वेला सेवाङ्गुलिच्छेदो वेला द्रोण्यन्तरावनिः ।। ४१ ।।

१-४२

उत्सवे च प्रकोष्ठे च मुहूर्ते नियमे तथा ।

क्षणशब्दो व्यवस्थायां समयेऽपि निगद्यते ।। ४२ ।।

१-४३

भ्रूणो भीरुर्द्विजो भ्रूणो भ्रूणो गर्भाश्रयाश्रयः ।

भ्रूणोऽन्त्यजः शिशुर्भ्रूणो भ्रूणो विकल उच्यते ।। ४३ ।।

१-४४

श्रेष्ठ इन्द्र इति ख्यातो देवराडिन्द्र उच्यते ।

शब्दादिविषयाः पञ्च प्रसिद्धा इन्द्र संज्ञया ।। ४४ ।।

१-४५

अहिर्दैत्यविशेषः स्यात् सूर्योऽहिरहिरध्वगः ।

भुजङ्गोऽहिः समाख्यातः सिंहिकासूनुरप्यहिः ।। ४५ ।।

१-४६

व्यालोऽहिः श्वापदो व्यालो व्यालः स्याद्व्याकुलः करी ।

प्रमादवान् नरो व्यालो सिंहो व्याल उदाहृतः ।। ४६ ।।

१-४७

पयस्विन्यर्जुनी धेनुर्धेनुःकुञ्जरकामिनी ।

असिपुत्री स्मृता धेनुर्धेनुर्वृत्तिः शुभङ्करी ।। ४७ ।।

१-४८

धर्मो वृषो वृषः श्रेष्ठो वृषो गौर्मूषिको वृषः ।

वृषो बलं वृषः कामो वृषलो वृष उच्यते ।। ४८ ।।

१-४९

शलिर्मूर्खः शलिर्भृङ्गः शलिः कीलः शलिर्गदः ।

शलिः पर्व्वविशेषश्च शलिः कलिरुदाहृतः ।। ४९ ।।

१-५०

योगो ज्यातिर्विशेषश्च संयोगो योग इत्यपि ।

योगश्चागामिलाभः स्यात् समाधिर्योग उच्यते ।। ५० ।।

१-५१

सीता लक्ष्मीरुमा सीता सीता सर्पाधिदेवता ।

सीता सीरध्वजापत्यं सीता मन्दाकिनी मता ।। ५१ ।।

१-५२

आदिमः क्षत्रियो नाभिर्नाभिश्चक्रस्य पिण्डिका ।

कुटुम्बस्याग्रणीर्नाभिर्नाभिर्निम्नोदरा मता ।। ५२ ।।

१-५३

गोत्रं नामान्वयो गोत्रं गोत्रश्च धरणीधरः ।

गोत्रा वसुन्धरा प्रोक्ता गोत्रः सत्यवच ः स्मृतः ।। ५३ ।।

१-५४

घनो मेघो घनं सान्द्रं कांस्यतालध्वनिर्घनः ।

घनो मन्द्रो घनं नित्यं घनः स्याल्लोहमुद्गरः ।। ५४ ।।

१-५५

रामा स्त्री जामदग्निश्च रामो रामौ सितासितौ ।

रामः पशुविशेषश्च रामो दशराथात्मजः ।। ५५ ।।

१-५६

वीतरागो जिनः प्रोक्तो जिनो नारायणस्तथा ।

कन्दर्पः स्याज्जिनश्चैव जिनः सामान्यकेवली ।। ५६ ।।

१-५७

शुक्रं देहवतां बीजं शुक्रमक्षिरुजं विदुः ।

ज्येष्ठमासः स्मृतः शुक्रः शुक्रो दैत्यपुरोहितः ।। ५७ ।।

१-५८

वीणादण्डः प्रवालः स्यात् प्रवालः पल्लवो नवः ।

प्रवालो विद्रुमः प्रोक्तः प्रवालः प्रबलो मतः ।। ५८ ।।

१-५९

कोणोऽश्वो महिषः कोणः कोणः कोटिरिति स्मृतः ।

कोणो गृहैकदेशः स्यात्कोणो वीणादिवादनम् ।। ५९ ।।

१-६०

तालः कालक्रियामानं तालं पातालमिष्यते ।

वृक्षभेदस्मृतस्तालः तालः करतलध्वनिः ।। ६० ।।

१-६१

काष्ठा दश ककुभ् काष्ठा काष्ठा प्रोक्ता वसुन्धरा ।

काष्ठा कालविशेषः स्यात् काष्ठं दारु निगद्यते ।। ६१ ।।

१-६२

पलाशो राक्षसः ख्यातः पलाशश्छदनं स्मृतम् ।

पलाशो हरितो वर्णः पलाशः पाश उच्यते ।। ६२ ।।

१-६३

सत्रं गृहं धनं सत्रं सत्रं दानमिहेरितम् ।

सत्रं धाम वनं सत्रं सत्रं सच्चरितं मतम् ।। ६३ ।।

१-६४

कलासु कुशलः कल्पः कल्पो ज्ञेयो निरामयः ।

कल्पं कालमिति प्रोक्तं कल्पं मद्यमिति मतम् ।। ६४ ।।

१-६५

विष्ठरो बर्हिषामुष्ठिर्विष्ठरं ज्ञेयमासनम् ।

विष्ठरो वृक्ष इत्युक्तो विष्ठरः क्रतुरेव च ।। ६५ ।।

१-६६

सभा समितिरित्युक्ता समितिः संयुगावनिः ।

समितिः समयो ज्ञोयो समितिः संगतिः स्मृता ।। ६६ ।।

१-६७

सितः शुक्लः सिते वृद्धः सितं रजतमुच्यते ।

सायकोऽपि सितो ज्ञेयः सितो दैत्यपुरोहितः ।। ६७ ।।

१-६८

चित्रकं तिलकं प्रोक्तं चित्रकः श्वापदो मतः ।

चित्रको मूलजातिश्च चित्रको व्यन्तरो मतः ।। ६८ ।।

१-६९

धातकी प्रोच्यते धात्री धात्री चामलकी मता ।

धात्री वसुंधरा ख्याता धात्री स्यात् स्तनदायिनी ।। ६९ ।।

१-७०

द्रोणः स्यात् कौरवाचार्यो द्रोणः काक इतीरितः ।

द्रोणो गिरिविशेषः स्याद् द्रोणः स्याच्चतुराढकः ।। ७० ।।

१-७१

जयन्ती नगरा प्रोक्ता जयन्ती चेटकानुजा ।

जयन्त्यौषधभेदः स्यात् जयन्ती शक्रसंभवा ।। ७१ ।।

१-७२

रोहितः शक्रकोदण्डो रोहितो मत्स्यपुंगवः ।

रोहितो लोहितो वर्णो मृगजातिश्च रोहितः ।। ७२ ।।

१-७३

बलो हली बलं सैन्यं बलं सत्वं बलौषधी ।

रत्नयोनिर्बलो दैत्यो बला लक्ष्मीर्बला मही ।। ७३ ।।

१-७४

प्रतिग्रहो द्विजग्राह्यः सैन्यपृष्ठं प्रतिग्रहः ।

प्रतिग्रहोऽनुबन्धः स्यात् प्रतिग्राहः प्रतिग्रहः ।। ७४ ।।

१-७५

कुमात्रकं कदम्बः स्यात् कदम्बो विशिखो मतः ।

कदम्बो वृक्षभेदश्च कदम्बो निर्गुणः पुमान् ।। ७५ ।।

१-७६

प्रियको बीजसारो द्रुः प्रियको द्वीपिचित्रकः ।

प्रियकः प्रियतोयः स्यात् प्रियको मुक्तक व्रती ।। ७६ ।।

१-७७

अक्षो बिभीतको वृक्षः पाशकोऽक्षोऽक्षमिन्द्रियम् ।

अक्षो रावणिरित्युक्तः कुल्यमक्षं च निम्नगम् ।। ७७ ।।

१-७८

चक्रः पक्षिविशेषश्च चक्रं व्यावर्तनं मतम् ।

चक्रं राष्ट्रं च संघश्च रथाङ्गं चक्रमायुधम् ।। ७८ ।।

१-७९

सत्यसन्धः खरो ज्ञोयः खरोऽपि परुषो मतः ।

खरो रासभ इत्युक्तो व्यवहारपटुः खरः ।। ७९ ।।

१-८०

जातिः स्यात् सहजाख्यानं मालती जातिरुच्यते ।

गोत्रादि जन्म जातिश्च जातिश्चुल्लीति कथ्यते ।। ८० ।।

१-८११

गोविषाणं फणो ज्ञेयो भुजङ्गमफणः फणः ।

फणा जटा फणा कृष्णा फणा मन्थानकुण्डली ।। ८१ ।।

१-८२

तिलको वृक्षभेदः स्यात् तिलको बिन्दुचित्रकम् ।

तिलकं क्लोमसंज्ञं स्यात् प्रधानं तिलकं मतम् ।। ८२ ।।

१-८३

गन्धर्वश्च देवजातिः स्यात् गन्धर्वः स्यात् तुरंगमः ।

गन्धर्वश्च स्मृतो गाता गन्धर्वो मृगपुंगवः ।। ८३ ।।

१-८४

शृङ्गं प्रधानमिच्छन्ति शृङ्गं च शिखरं विदुः ।

शृङ्गं विषाणमित्यहुः शब्दकोशविचक्षणः ।। ८४ ।।

१-८५

सारंगः कुञ्जरः ख्यातः सारंगश्चातको मतः ।

सारंगः पर्वतो ज्ञेयः सारंगो हरिणः स्मृतः ।। ८५ ।।

१-८६

करणं कारणं विद्यात् करणानीन्द्रियानि च ।

करणो जातिभेदश्च क्षेत्रं करणमिष्यते ।। ८६ ।।

१-८७

पुण्डरीकः स्मुतो व्याघ्रः पुण्डरीकः कमण्डलुः ।

पुण्डरीकः सितो वर्णः पुण्डरीकं सरोरुहम् ।। ८७ ।।

१-८८

कमलं कमलं प्रोक्तं कमलं चन्द्रमा भवेत् ।

कमलं क्रमयुग्मं च कमलं मस्तकं विदुः ।। ८८ ।।

१-८९

कमलं जलमाख्यातं कमलो हरिणः स्मृतः ।

कमलो जलदः प्रोक्तः कमलं मुकुटं विदुः ।। ८९ ।।

१-९०

अपत्येऽथ पृथिव्यादौ कालेऽतीते राक्षसे ।

प्रेते प्राणिनि कीनाशे भूतशब्दं प्रचक्षते ।। ९० ।।

१-९१

सरभोऽष्टापदो ज्ञेयः स्वर्णमष्टापदः स्मृतः ।

किलीतकोऽष्टापदः स्यात् कृमिजातिरुदाहृतः ।। ९१ ।।

१-९२

बालः केशो जलं बालं बालं काशतृणं तथा ।

बालकं गन्धद्रव्यं च जटाजूटं च बालकम् ।। ९२ ।।.

१-९३

बालकः खेचरो व्याघ्रो बालकः पृथुकस्तथा ।

बालः सर्पः शिशुर्बालो बालो वेग उदाहृतः ।। ९३ ।।

१-९४

श्यामा रात्रिस्त्रिवृत् श्यामा श्यामा स्त्री मुग्धयौवना ।

श्यामा प्रियङ्गुराख्याता श्यामा स्यात् वृद्धदारिका ।। ९४ ।।

१-९५

शुभा सुधा शुभा हत्या भगक्षीरी शुभा मता ।

शुभं श्रेयः शुभा शोभा शुभा प्रोक्ता हरीतकी ।। ९५ ।।

१-९६

कान्तारं काननं प्रोक्तं कान्तारः पाकशासनः ।

इक्षुभेदश्च कान्तारः कान्तारो दुर्भरोदरः ।। ९६ ।।

१-९७

खर्जूरं फलभेदश्च खर्जूरं रजतं मतम् ।

खर्जूरः क्षुद्रजातिः स्यात् खर्जूरस्तृणगोधिका ।। ९७ ।।

१-९८

गुरुः पिता गुरुर्ज्येष्टो गुरुर्देवपुरोहितः ।

दुर्वापोऽपि गुरुः प्रोक्तो गुरुः शिष्याभिषेकदः ।। ९८ ।।

इति शब्दरत्नप्रदीपे श्लोकाधिकारः प्रथमो मुक्तकः ।।

द्वितीयो मुक्तकः

२-१

इतः प्रभृत्यनेकार्थाः शब्दाः श्लोकार्धगामिनः ।

वेदितव्या बुधैः पश्चात्प्रत्यंघ्रि कृतसंग्रहाः ।। १ ।।

२-२

तटो वप्रः पिता वप्रो वप्रः प्राकार उच्यते ।

सर्पो व्याडः शफो व्याडो व्याडो ज्ञेयश्चतुष्पदः ।। २ ।।

२-३

अङ्गे दारेषु शय्यायां तल्पशबदो विधीयते ।

तारास्वग्नौ गृहस्थाने धिष्ण्यमाहुर्मनीषिणः ।। ३ ।।

२-४

अभिख्येति समाख्याता कीर्त्तौ च नाम्नि च ।

रम्भा देवाङ्गना प्रोक्ता रम्भास्यात् कदलीति च ।। ४ ।।

२-५

मोचा खल्येति विख्याता मोचापि कदली मता ।

कक्षेति भवनान्तर्भूर्मेखलागजरज्जुषु ।। ५ ।।

२-६

स्यादाषाढे विशुद्धेऽग्नौ शुक्रेऽनुपहते शुचिः ।

शक्रेऽपि वार्षिके मेघे मत्तनागे घनाघनः ।। ६ ।।

२-७

संक्षेपे भक्तसित्के तुच्छधान्ये पुलाक-वाक् ।

चले मरुति मासाद्र्धे पक्षोऽभिभवपार्श्वयोः ।। ७ ।।

२-८

वृक्षभेदे करीरः स्यात् घटे वंशाङ्कुरेऽपि च ।

देहे दारेषु केदारे क्षेत्रं बुद्धैः प्रकीर्त्यते ।। ८ ।।

२-९

श्रेष्टं कम्बलमल्पं च विद्यादेकाक्षया बुधः ।

निर्यूहो निर्गते पीडानिसर्ग्गद्वारभूमिषु ।। ९ ।।

२-१०

अविशब्दो रवौ मेघे पर्वतेऽपि निगद्यते ।

मृगपर्वतमन्त्रेषु निकृष्टेऽपि च संवरः ।। १० ।।

२-११

धुनो धवे च दम्भे च गह्वरे गहनेऽपि च ।

न्याये तुल्ये विधौ काले दण्डे वित्ते च कल्प-वाक् ।। ११ ।।

२-१२

आत्मेति ब्रह्म-धी-देह-मनो -यज्ञ -धृतिष्वपि ।

पर्याप्तौ शिक्षिते पुण्ये क्षेमे च कुशलध्वनिः ।।

२-१३ १२ ।।

प्रत्ययः शपथे छिद्रे विश्वासास्तित्वहेतुषु ।

पदं स्थाने परित्राणे क्रमे वस्तुप्रतिष्टयोः ।। १३ ।।

२-१४

दोषे व्यपगमे दण्डे स्यादत्यय इति श्रुतिः ।

स्वभावे तेजसि स्थाने धामशब्दो निगद्यते ।। १४ ।।

२-१५

ज्ञाता चात्मनि चात्मीये धने स्वाख्या प्रयुज्यते ।

कूटाख्यानृतयन्त्राभ्यां धने मायाधरेषु च ।। १५ ।।

२-१६

परिच्छेदे प्रमाणेऽल्पे मात्राख्या परिकीर्त्यते ।

इडाशब्दश्च पानीये भूमौ वा व्यसने मतः ।। १६ ।।

२-१७

साधु -सत्ता-प्रशस्तेषु त्रिष्वेव सदिति ध्वनिः ।

प्रधाने राज्यलिङ्गे च ककुदाख्या प्रवर्तते ।। १७ ।।

२-१८

मानमण्डनयोर्निष्को निष्को दीनाररुक्मयोः ।

युग्मे संयोगयोरङ्कः स्यादङ्को लेख्यलक्ष्मणोः । विशिरस्के नरे नीरे कबन्धाख्या खलेऽपि च ।। १८ ।।

२-१९

मरौ वृक्षविशेषे च धन्वन् - शब्दश्च कार्मुके ।

अक्षिलोमे स्मृतं वर्त्म वर्त्म मार्गश्च कथ्यते ।। १९ ।।

२-२०

वर्ष्म गृहप्रमाणं स्याद् वर्ष्म देहश्च कथ्यते ।

दायादः सहनः प्रोक्तो दायादस्तनयः स्मृतः ।। २० ।।

२-२१

विग्रहो वैर्यवस्कन्दो विग्रहो वपुरुच्यते ।

प्रैकोष्ठः कूर्प्परस्याधः प्रकोष्ठो द्वारकोष्ठकः ।। २१ ।।

२-२२

प्रोक्तं वितानमुल्लोचं वितानं शून्यमुच्यते ।

सती दाक्षायणी देवी सच्चरित्राबला सती ।। २२ ।।

२-२३

वधूर्नारी वधूर्भार्या वधूः पुत्रवधू स्मृता ।

भक्षे कशिपुरित्युक्तिः प्रावारः कशिपुर्मतः ।। २३ ।।

२-२४

आडम्बरो गजारावस्तूर्यानादश्च भण्यते ।

कपर्द्दो हरजूटौघः कपर्दः श्वेतकाकिणी ।। २४ ।।

२-२५

तूवरो निर्विषाणो गौर्निस्मश्रुस्तूवरः पुमान् ।

पापीयांसो नृशंसाः स्युर्नृशंसा वन्दिनो मता ।। २५ ।।

२-२६

शारदस्तु शरत्कालः स्यदधृष्टश्च शारदः ।

उपह्वरो रहःस्थानं समीपं स्यादुपह्वरः ।। २६ ।।

२-२७

कश्मलः स्यात् पिशाचश्च कश्मलो मोह उच्यते ।

अवज्ञा कथ्यते रीढा रीढा गतिरपीक्षते ।। २७ ।।

२-२८

प्रस्वेदोऽपि निदाघः स्यात् निदाघो ग्रीष्म उच्यते ।

केतुर्महाविशेषः स्याद् ध्वजः केतुरुदाहृतः ।। २८ ।।

२-२९

वद्र्धनं छेदनं प्रोक्तं वद्र्धनं वृद्धिरिष्यते ।

कशेरुकं जले कन्दे पृष्ठास्थि स्यात् कशेरुकम् ।। २९ ।।

२-३०

निवातमाश्रयं विद्यादभिन्नः कवचस्तथा ।

कीनाशश्च कदर्यः स्यात् कीनाशौ यमकार्षकौ ।। ३० ।।

२-३१

नागो वृक्षविशेषः स्यात् नागौ वारणपन्नगौ ।

कुलं संघः कुलं गोत्रं शरीरं कुलमुच्यते ।। ३१ ।।

२-३२

पूगं पूगीफलं ज्ञेयं तथा पूगं कदम्बकम् ।

ज्ञेयाः सुमनसो देवाः कुसुमानि च सज्जनाः ।। ३२ ।।

२-३३

कुसुमं पुष्पमित्याहुः स्त्रीरजश्च तदाख्यया ।

धवःपतिर्धवो भीरुर्वृक्षजातिर्धवो मतः ।। ३३ ।।

२-३४

त्र्यम्बकस्ताम्रधातुः स्यात् त्र्यम्बकश्च त्रिलोचनः

शिफा शेफालिका प्रोक्ता शिफा शिखा शिफा जटा ।। ३४ ।।

२-३५

पुण्यं सुविहितं कर्म पवित्रं पुण्यमुच्यते ।

ब्रह्म वै ज्ञानमित्युक्तं ब्रह्मा पौनर्भवो मतः ।। ३५ ।।

२-३६

खलो राशिः खलो नीचः खलः पिण्याक उच्यते ।

शाला श्लाघा शिला शाला शाखा च वेश्मनः ।। ३६ ।।

२-३७

माल्यो मान्यः स्थिरो माल्यो माला माल्यमुदाहृतम् ।

राढा देशविशेषः स्यात् शोभा राढाभिधीयते ।। ३७ ।।

२-३८

पलं मांसं पलं मानं पलो मूर्खः पला तुला ।

आलिः सहचरी ज्ञेया पङ्क्तिरालिः प्रकीर्तिता ।। ३८ ।।

२-३९

दलमद्र्धं दल पर्णं दलं हस्त्यादि साधनम् ।

आजिः स्यात् समभूभागः संग्रामोऽप्याजिरुच्यते ।। ३९ ।।

२-४०

प्रतिज्ञा संगरो ज्ञेयः संग्रामः संगरो मतः ।

उलूकः पुरुहूतः स्यात् पुरुहूतः पुरंदरः ।। ४० ।।

२-४१

अमृतं वारि विज्ञेयं देवभोज्यं तथामृतम् ।

कुन्त्या भूमिः समाख्याता कुन्त्या कुन्तकदम्बकम् ।। ४१ ।।

२-४२

अन्तकेऽजगरे कन्ते मृत्युः स्यान्मरणेऽपि च ।

संपा विद्युत् पतिः संपा संपा शङ्कुर्ध्वनिर्मतः ।। ४२ ।।

२-४३

पिण्डेऽथ कितवे द्यूते दुरोदर इति श्रुतिः ।

दीप्तौ दृष्टौ च तारासु ज्योतिः शब्दोऽभिधीयते ।। ४३ ।।

२-४४

रोगार्त्तभाग्यमूढाल्पा मन्दाः प्रोक्ता विचक्षणैः ।

शास्त्रं प्रमाणमिच्छन्ति स्थितिहेतुं च कोविदाः ।। ४४ ।।

२-४५

हरिणः पाण्डुरो वर्णः कुरङ्गो हरिणो मतः ।

करटः कातरो ज्ञेय करटो ध्वाङ्क्ष उच्यते ।। ४५ ।।

२-४६

कङ्करेदुः स्मृतो गृध्रः कङ्करेदुरमर्षणः ।

प्राध्वं बन्धनमिच्छन्ति प्राध्वं प्राध्वं सूर्यः ।। ४६ ।।

२-४७

सौधावयवविज्ञानगमनेषु कला मता ।

तुषारः क्षुद्रपाषाणस्तुषारस्तुतवेणिषु ।। ४७ ।।

२-४८

मणिः कोलिंजरो ज्ञेयो मणिको मणिरेव च ।

विषं पानीयमित्युक्तं विषमन्तकरो रसः ।। ४८ ।।

२-४९

वाजमन्नं गरुद् वाजो वाजं पीयूषमिष्यते ।

व्रजो गोष्ठो व्रजो माग्र्गो व्रजः संघो व्रजो गणः ।। ४९ ।।

२-५०

वीर्यं शक्रं बलं वीर्यं वीर्यं बीजमुदाहृतम् ।

नक्षत्रस्य मघा नाम कुन्दस्य कलिका मघा ।। ५० ।।

२-५१

द्विजिह्वः सूचको ज्ञेयो द्विजिह्वस्तु भुजंगमः ।

विज्ञेयं शयनं शय्या शय्या पुस्तकसंचयः ।। ५१ ।।

२-५२

तरसं मासमाख्यातं तरसं बलमुच्यते ।

वारुणी मदिरा ज्ञेया पश्चिमा दिक् वारुणी ।। ५२ ।।

२-५३

मन्दुरा वाजिशाला स्यादावासोर्णं च मन्दुरा ।

सूनृतः शिक्षितो मर्त्यः सूनृतः सत्यवाक् स्मृतः ।। ५३।।

२-५४

कीकसो वानरोऽपि स्यात् कीर्त्यते चास्थि कीकसम् ।

रोमन्थः स्यात् पशूद्गारो रोमन्थः कीटवर्तनम् ।। ५४ ।।

२-५५

हरिद्रा रजनी प्रोक्ता रजनी च विभावरी ।

परिघः परिघातः स्यात् परिघो दण्ड उच्यते ।। ५५ ।।

२-५६

धरा पृथ्वी धरा धारा धरः शैलो धरा धृतिः ।

क्रतौ क्रोधे तथा दैन्ये मन्युशब्दः प्रचक्ष्यते ।। ५६ ।।

२-५७

सरलो देवदारुश्च सरलः सरलो मतः ।

बहुला कृत्तिका ज्ञेया गावश्च बहुला मता ।। ५७ ।।

२-५८

मूलः पुद्नलकः कन्दः कन्दो वारिज उच्यते ।

मानदण्डनयोर्निष्को निष्को दीनाररुक्मयोः ।। ५८ ।।

२-५९

करो हस्तः करो रश्मिः करः कर्षकशोधनम् ।

द्वन्द्वे दुन्दुभिरक्षेषु दुन्दुभिः स्यात् तथानकः । ५९ ।।

२-६०

ख्यातं विपिनमुद्यृऐभनमुद्यानं गमनं मतम् ।

उपर्यभ्यधिके प्रस्थे विदुरग्रं विपक्षितः ।। ६० ।।

२-६१

निवृत्तावभिधेयेऽर्थो घने चोक्तः प्रयोजने ।

वर्द्धनी वार्घटी प्रोक्ता वर्द्धनी तृणकूर्चिका ।। ६१ ।।

२-६२

कुङ्कुमं रुधिरं प्रोक्तं रुधिरं क्षतजं मतम् ।

नंदनः स्वसमः पुत्रो नंदनं शक्रकाननम् ।। ६२ ।।

२-६३

मानसं चित्तमित्युक्तं मानसं त्रैदिवं सरः ।

धावनं शोधनं प्रोक्तं धावनं शीघ्रवर्तनम् ।। ६३ ।।

२-६४

स्यन्दनाख्या दृमस्त्रावे स्यन्दनो रथ उच्यते ।

तुरायणमसंगोक्तिः क्रियाहीनस्तुरायणः ।। ६४ ।।

२-६५

परायणं रिपुस्थानं तत्परश्च परायणः । करिपृष्ठे कुले वेणौ वंशाख्या कविभिर्मता ।। ६५ ।।

२-६६

जटाजूटे शिखण्डोक्तिः कलापे च शिखण्डिनः ।

शिष्टभाजनदेहेषु पात्रशब्दः प्रचक्षते ।। ६६ ।।

२-६७

पादत्राणे दले पक्षे लेख्यवस्तुनि पत्र-वाक् ।

द्रव्येऽसिपरिधानेऽपि क्रियापानेऽपि कोश-वाक् ।। ६७।।

२-६८

हंसेऽग्नौ गरुडे चन्द्रे द्विजराज इति ध्वनिः ।

कैवर्त्तेऽपि च कैवर्त्तः कैवर्त्तः सलिलेचरः ।। ६८ ।।

२-६९

पिप्पलाख्या जलास्वच्छावस्त्रकर्तनवस्तुषु ।

चन्द्रमाश्चन्दनो ज्ञेयश्चन्दनं मलयोद्भवम् ।। ६९ ।।

२-७०

सकला व्रीहयः सस्यं विज्ञेयाः सस्यमिक्षवः ।

दृषद्यरण्यसस्ये च कुरुविन्द इति श्रुतिः ।। ७० ।।

२-७१

करवीरश्च मारः स्यादङ्गुष्ठः करवीरकः ।

करिणां बन्धनस्थानं वारि वारि जलं मतम् ।। ७१ ।।

२-७२

प्रचूरं भूरि विज्ञेयं भूरि काञ्चनमेव च ।

सूदः स्यात्सूपकारश्च सूदो ज्ञेयो कुरंटकः ।। ७२ ।।

२-७३

भषको दुर्जनो ज्ञेयो भषकः सरमासुतः ।

सूतो भास्कर इत्युक्तःसूतः सारथिरुच्यते ।। ७३ ।।

२-७४

प्रतिरोधकस्तु चौरो दुर्जनः प्रतिरोधकः ।

सौवीरोऽश्मविशेषः स्यात् सौवीरंकाञ्जिकं मतम् ।। ७४ ।।

२-७५

दौर्मनस्यं घृणा प्रोक्ता घृणा च करुणा मता ।

मङ्गः पलायनं वीचिर्भङ्गो भङ्गश्च भञ्जनम् ।। ७५ ।।

२-७६

तीक्ष्णं समाख्यातं तिक्ष्णं लोहमुशन्ति च ।

मार्ग्गणो याचको ज्ञेयो मार्ग्गणो बाण उच्यते ।। ७६ ।।

२-७७

भृङ्गः शिलीमुखः ख्यातो नाराचोऽपि शिलीमुखः ।

भूशुण्डी सूकरः प्रोक्तो भूशुण्डी च कृषीवलः ।। ७७ ।।

२-७८

मृणालं बिसिनीमूलं मृणालं च जटौपली ।

काव्यास्तु पितरो ज्ञेयाः काव्यं ग्रन्थनिबनधनम् ।। ७८ ।।

२-७९

ह्रस्वदीर्घप्लुते ध्वानः कृतपित्तव्यथास्वपि ।

रुक्मं हेम विजानीयाद् रुक्मं रजतमुच्यते ।। ७९ ।।

२-८०

उत्पलं नळिनं प्रोक्तमुत्पलं कुष्ठमौषधिः ।

वासुरा वसती ज्ञेया वासुरा वलभी मता ।। ८० ।

२-८१

रजतं कलधौतं स्यात् कलधौतं च काञ्चनम् ।

वर्णः कृष्णोच्यतः कृष्णः प्रोक्ता कृष्णा च पिप्पली ।। ८१ ।।

२-८२

समवाये यमे देवे संयद्वर इति श्रुतिः ।

शर्व्वरश्चन्द्रमा ज्ञेयः शर्व्वरः शवरोमतः ।। ८२ ।।

२-८३

महिला रमणी ज्ञेया रमणी वेदिका मता ।

प्रधानं प्रकृतिः सांख्ये प्रधानं विदुरुत्तमम् ।। ८३ ।।

२-८४

वक्त्रमप्यरविन्दं स्यादरविन्दं सरोरुहम् ।

शृगालो जम्बुको भीरुः शृगालो वरुणोऽपि च ।। ८४ ।।

२-८५

त्रिदशा मरुतः प्रोक्ता मरुतोऽपि समीरणः ।

मायाशब्दो बुधैरिष्टः स्थलसत्वविशेषयोः ।। ८५ ।।

२-८६

कुण्डलं मण्डलं ज्ञेयं कुण्डलं कर्णभूषणम् ।

प्रतिबन्धः कुलाधारः प्रतिबन्धः खलक्रिया ।। ८६ ।।

२-८७

किषिगोत्रविशेषः स्यात् किषिः कालः किषिः कपिः । कुशिर्लोपाक इत्युक्तः कुशिर्वैखानसो मुनिः ।। ८७ ।।

२-८८

वर्त्तिर्दीपशिखासूत्रं वर्त्तिर्नेत्राञ्जनोदिता ।

धूम्राटश्च कलिङ्गः स्यात् कलिङ्गो देशवाचकः ।। ८८ ।।

२-८९

शैले तृणविशेषेऽर्क्के नृषु गर्त्तुरिति ध्वनिः ।

शेलुस्तृणविशेषश्च शेलुः शेलेष्मातको मतः ।। ८९ ।।

२-९०

शैलः पर्वत आख्यातः शैलः शिलासमुद्भवः ।

वाल्मीकश्च सीमिकः स्याद् वाल्मीको वाग्विशारदः ।। ९० ।।

२-९१

समाजः कुञ्जरो ज्ञेयः समाजः समयो मतः ।

प्राजिकः पक्षजातिः स्यात् प्राजिका नीलमक्षिका ।। ९१ ।।

२-९२

सारसो लक्ष्मणः प्रोक्तो लक्ष्मणो राघवानुजः ।

लक्ष्मणा औषधी प्रोक्ता कथयन्ति मनीषिणः ।। ९२ ।।

इति शब्दरत्नप्रदीपेऽर्द्धश्लोकाधिकारो द्वितीयो मुक्तकः ।।

तृतीयो मुक्तकः

३-१

इतः प्रभृत्यनेकार्था ज्ञेयाः प्रत्यङ्घ्रि सूरिभिः ।

राजा चन्द्रो नृपो राजा पयः क्षीरं पयो जलम् ।। १ ।।

३-२

मित्रो भानुः सुहृन् मित्रं दरं छिद्रं दरंभयम् ।

ओघः पूरोऽथ वेगश्च वनं काननम्बु च ।। २ ।।

३-३

इला भूमिर्मता गौश्च संज्ञा चित्तं च नाम च ।

शैलोद्रिरंशुमानद्रिर्भा भानुर्भानुरर्यमा ।। ३ ।।

३-४

श्रीकण्ठः स्थावरः स्थाणुः हयच्छागाच्युता अजाः ।

गोविन्दो हरिगोसंख्ये शिवः कृष्णो वृषाकपिः ।। ४ ।।

३-५

शरीरोत्सेधयोः कायः सन्धावधिप्रतिज्ञयोः ।

तेजः पुरीषयोर्वर्चो वसतिः स्थाननक्तयोः ।। ५ ।।

३-६

सरित्समुद्रयोः सिन्धुः शालः प्राकारवृक्षयोः ।

चातकापत्ययोः स्तोकः पापव्यसनयोरघः ।। ६ ।।

३-७

पिपासालोभयोस्तृष्णा भुवनं तोयलोकयोः ।

मद्यश्वमेधयोः काश्यो वाडवो ह्यग्निविप्रयोः ।। ७ ।।

३-८

निस्त्रिंशौ खड्गपापिष्ठौ भृङ्गबाणौ शिलीमुखौ ।

मानमण्डने निष्कौ स्तो बाष्प उष्मा तथाश्रु च ।। ८ ।।

३-९

वृक्षजातिगजौ पीलू प्रदरौ रोगमार्गणौ ।

सूकरोष्ट्रौ च करभौ हावौ क्रन्दनविभ्रमौ । ९ ।।

३-१०

वनवङ्क्यनलौ दावौ जीमूतौ मेघपर्वतौ ।

वल्लवौ सूदगोपालौ चिकुरौ केशचञ्चलौ ।। १० ।।

३-११

अरिष्टपिष्टकौ कल्कौ वृषौ दानववैरिणौ ।

पङ्गुपद्मरुणौ शोणावम्बरौ व्योमवाससी ।। ११ ।।

३-१२

उदानाख्यौ मरुद्बन्धौ निस्त्रंसौ वटदुग्धिलौ ।

ध्वाङ्क्षः काकौ बको ध्वाङ्क्षो नगः शैलो नगो द्रुमः ।। १२ ।।

३-१३

खटो ह्रस्वः खटः क्रूरः क्षितिः पृथ्वी क्षितिःक्षयः ।

क्षयं गेहं क्षयो ह्रासः श्रमः खेदः श्रमः क्रिया ।। १३ ।।

३-१४

कण्ठो विधिर्गलःकण्ठः प्राहिः कूपः प्राहिःसरः ।

उन्दुरे सूकरे कोलः कलिः कलहकालयोः ।। १४ ।।

३-१५

शशाङ्कस्वर्णयोश्चन्द्रः किरिः सूकरलोहयोः ।

बर्हिर्दर्भो जलं बर्हिर्लाङ्गलं हलमम्बु च ।। १५ ।।

३-१६

निमित्तहृदये हेतू हीरौ वज्रमहेश्वरौ ।

काश्मीरकशुकौ कीरौ वीरौ विक्रमबान्धवौ ।। १६ ।।

३-१७

कौशिकौ वासवोलूकौ सायकावसिमार्ग्गणौ ।

मार्ग्गणौ याचको बाणो मार्ग्गणं मृगमांसता ।। १७ ।।

३-१८

ध्वान्ताचलौ मतावन्धौ मयूराग्नी शिखण्डिनौ ।

कमरः कोमले काम्ये समरो युद्धसंघयोः ।। १८ ।।

३-१९

उत्सङ्गे सूकरे क्रोडो वत्सः स्वर्णकपुत्रयोः ।

कान्त्यनातपयोश्छाया दया हिंसानुकम्पयोः ।। १९ ।।

३-२०

द्रुमो वृक्षे पुराणेऽन्ने ध्रुवो निश्चितनित्ययोः ।

संघाते पूरणे पूरः सूरः सूर्यनरेन्द्रयोः ।। २० ।।

३-२१

धीरौ सात्त्विकधीमन्तौ वरौ श्रेष्ठहुताशनौ ।

पतङ्गौ शलभादित्यावर्कौ स्फाटिकभास्करौ ।। २१ ।।

३-२२

गुह्यं कार्ये च कौपीने संज्ञे स्तो नामचेतने ।

मधुरौ च प्रियस्वादू शम्भू ब्रह्ममहेश्वरौ ।। २२ ।।

३-२३

कार्यरिद्धौ तथा कृत्यौ बभ्रू नकुलपिङ्गलौ

स्पष्टप्राज्ञौ स्मृतौ व्यक्तौ दीप्तः स्वेच्छा तथारुचिः ।। २३ ।।

३-२४

नित्यं स्वं च निजं प्रोक्तं बलदीप्तौ तथौजसी ।

हायनं वर्णमोजश्च हेती शस्त्रार्च्चिषी मते ।। २४ ।।

३-२५

आशासंज्ञे ककुप्तृषणे स्तनमेघौ पयोधरौ ।

अभिरूपं बुधे कान्ते जामिः स्वसृकुलास्त्रियोः ।। २५ ।।

३-२६

उदयाधिगमौ प्राप्ती वह्निसूर्यौ विभावसू ।

वृजिनं मलिने पापे प्रज्ञानं बुद्धचिह्नयोः ।। २६ ।।

३-२७

असन्मायाविनौ लीकौ वीर्योद्यमौ पराक्रमौ ।

वराके मूषके दीनः प्लवकः कपिभेकयोः ।। २७ ।।

३-२८

यज्ञः पूजा च दानं च दृष्टिभीक्षौ तथामते ।

चीवरं वल्कले वस्त्रे कृष्णं काले तथोदरे ।। २८ ।।

३-२९

श्रोत्रश्च श्रवणे कर्णे तातस्तु पितृपुत्रयोः ।

कुट्टिमे शफरे मत्स्यो रूपं मूर्तौ विदुर्विधौ ।। २९ ।।

३-३०

अवटौ कालगर्तौ च निमित्ते हेतुलक्षणे ।

हिते शक्ते समर्थः स्यात् प्रशान्तकठिनौ मृदू ।। ३० ।।

३-३१

स्थूलौ जडबृहन्तौ विप्राश्च दर्शना द्विजाः ।

असदप्रियावळीकौ सहायप्रणिधी मतौ ।। ३१ ।।

३-३२

रचितोऽयमनेकार्थौ यथास्मृति युक्तके तृतीयेऽपि ।

उपजयतां सौभाग्यं पठतां श्रद्धावतामनिशम् ।। ३२ ।।

इति शब्दरत्नप्रदीपे तृतीयो मुक्तकः ।।

चतुर्थो मुक्तकः

४-१

यो जयेद् राजसूयेन मण्डलस्येश्वरश्च यः ।

पृथ्वीं प्रशस्ति यस्याज्ञा स सम्राडभिधीयते ।। १ ।।

४-२

सबुद्धिः सचिवो राज्ञस्तन्मन्त्रं निश्चिनोति यः।

नियुक्तिः कर्मणि प्राज्ञः स कर्मसचिवो मतः ।। २ ।।

४-३

यो राजरक्षवर्ग्गः स्यात् सोऽनीकस्थो निगद्यते ।

अन्तःपुरे येऽधिकृतास्तेऽन्तर्वेश्मिकसंज्ञकाः ।। ३ ।।

४-४

यथार्थयुक्तस्तु चरः प्रणिधिः प्रणिगद्यते ।

एष ग्रामाधिकृत्यश्च स्थायुषपुरुषो मतः ।। ४ ।।

४-५

षण्ढो वर्षधरः प्रोक्तो द्यूताध्यक्षश्च सारिकः ।

विषयानन्तरं शत्रुर्मित्रंच तदनन्तरम् ।। ५ ।।

४-६

यो लक्ष्याच्युतबाणः स्यात् सोऽपराद्धेषुर्भण्यते ।

कलिविन्यसनं व्यूहो वाजपक्षो भवेदिषोः ।। ६ ।।

४-७

प्रत्यासारं विदुः प्राज्ञाश्चमूजघनमाहवे ।

प्रत्यरि सेनागमनं जानीयादभिषेणकम् ।। ७ ।।

४-८

तुरङ्गरथपत्तिभिर्सेनाङ्गमभिधीयते ।

स्यात् प्रतिसर आरण्यः प्रतिरोधः समापनम् ।। ८ ।।

४-९

वृत्ते वर्त्स्यति वा युद्धे पानं स्याद् वीरपानकम् ।

चापध्वनिश्च विस्फारः कबन्धमशिरोवपुः ।। ९ ।।

४-१०

निबन्धनं मेखलाद्यमङ्गस्य ग्रहणम् समः ।

वरूथो रथगुप्तिश्च गुल्मं सज्जनमिष्यते ।। १० ।।

४-११

पुरुषो रिपुयुक्तो यः उपसय्यः स भण्यते ।

तदभिभयमाख्यातं सबलाद् भयमेव यत् ।। ११ ।।

४-१२

विषलिप्तफलो बाणो यः स दिग्ध इति स्मृतः ।

दुरापेऽपि च कृत्ये यः स्यादनवस्थितक्रियः १२ ।।

४-१३

महोत्साहः स विज्ञेयः पुरुषः कृतनिश्चयः ।

वृंहितं स्थनितं प्रोक्तमालानं बन्धनं मतम् ।। १३ ।।

४-१४

मदो दानं गजेन्द्राणां वमथुः करिसीकरः ।

दन्तान्तप्रतिमानं च सृणिरुक्तस्तदङ्कुशम् ।। १४ ।।

४-१५

बिन्दुजालं शरीरोत्थं पद्मं विज्ञाः प्रचक्षते ।

आधोरणो नियन्ता स्यान् निषादी प्राजिता गजी ।। १५ ।।

४-१६

आजानेयः कुलीनोऽश्वः पोतः प्रोक्तः किशोरकः ।

काम्भोजश्चैव बाल्हीकः साधुवाही विनीतकः ।। १६ ।।

४-१७

प्रोथं घोणान्तरं प्राहुर्द्धौरितं वलितं मतम् ।

अश्वकाङ्गः स्मृतो वाजी मृगयायां विचक्षणः ।। १७ ।।

४-१८

चक्रं चापस्करं विन्द्यात् कूबरं युगमध्यगम् ।

श्रेयमिष्टफलं दैवं तद्विपर्यासतोऽनयम् ।। १८ ।।

४-१९

इष्टार्थानर्थयोर्दूराद् दीर्घदर्श इति स्मृतः ।

वेहद् वृषोपगा गौः स्यादुत्तमा नैचिकी मता ।। १९ ।।

४-२०

काल्याऽथ सर्ज्यप्रजने समाना च सवर्णिका ।

दुह्यमानाप्यसंदाना सुव्रतेति निगद्यते ।। २० ।।

४-२१

दोहकाले पयोहीना संधिनीति विधीयते ।

प्रौढो वत्सो वत्सतरः प्रष्ठौह गर्भिणि मता ।। २१ ।।

४-२२

विद्याद् दध्यघनं द्रप्सं घृतं सर्पिर्निशान्तरम् ।

हैयङ्गवीनमित्युक्तं नवनीतं विचक्षणैः ।। २२ ।।

४-२३

समा गिरेः क्षितिःसानुरधःस्थानादुपत्यका ।

परं तीरं पारमर्वगवारमावचुः ।। २३ ।।

४-२४

राजहंसा सिता रक्तैर्मलिनैर्मल्लिकाभिधाः ।

विश्रुताश्चरणैर्हंसा धार्तराष्ट्राः सितेतरैः ।। २४ ।।

४-२५

मध्यं प्रकोष्ठमित्युक्तमरत्निमणिबन्धयोः ।

कनिष्टमणिबन्धान्तः करभः करपार्श्वगः ।। २५ ।।

४-२६

ज्येष्ठा कनिष्ठा निकटे तत्प्रदेशिन्यनामिका ।

बाह्वोश्च प्रसृताङ्गुल्योरन्तरं व्याम उच्यते ।। २६ ।।

४-२७

प्रादेश-ताल गोकर्ण-वितस्तय उदाहृताः ।

तर्जन्यादिभिरङ्गुष्ठे विततताभिः क्रियापरे ।। २७ ।।

४-२८

प्रसारिताङ्गुलिः प्राज्ञैः करः प्रतलमुच्यते ।

कृतमुष्ठिः स रत्निः स्यादरत्निर्विततताङ्गुलिः ।। २८ ।।

४-२९

पुच्छं प्रकीर्णकं सिक्तं कल्यं मद्यं चिरोषितम् ।

चतुर्विधं स्मृतं वस्त्रं त्वग्युक्तं कृमिरोमजम् ।। २९ ।।

४-३०

महाधनाख्यमित्युक्तं बहुमूल्यं विचक्षणैः ।

पौष्पं मधुः मकरन्दं गुल्मस्थं स्तबकं बुधै ः ।। ३० ।।

४-३१

बन्धनं वृन्तमिच्छन्ति विटपं तरुविस्तरम् ।

संभाविताऽस्मिका दर्पादाहोपुरुषिका मता ।। ३१ ।।

४-३२

फलं सुस्वादु पक्वं स्यात् प्रपदं पुष्टमुच्यते ।

जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ।। ३२ ।। ४-३३

वाक्यं पदसमूहः स्यादाहोसाध्यमकारणम् ।

लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।। ३३ ।।

४-३४

नितान्तं मधुरं सान्त्वं परुषं निष्ठुरं वचः ।

असद्भाष्यं बहुभाष्यमसंबद्धं निरर्थकम् ।। ३४ ।।

४-३५

कल्या कल्याणवाचोक्ता सत्यकल्पा प्रियाप्रिया ।

पूर्वापरोक्तमक्लिष्टं हृद्गतं स्वगतं मतम् ।। ३५ ।।

४-३६

स्पष्टं चित्रपदं नाम ग्राम्यमश्लीलमुच्यते ।

काञ्चनं रजतं प्रोक्तं हिरण्याख्ये कृताकृते ।। ३६ ।।

४-३७

आहते च स्मृते रूप्ये ततोऽन्यत् कुप्यमुच्यते ।

भूषणं कनकं श्रुङ्गी गवाद्यं पादबन्धनम् ।। ३७ ।।

४-३८

वेश्यवासोऽपि वेशः स्यादातोद्यं मुरजादिकम् ।

अर्थप्रयोगमाचार्याः कुशीदं परिचक्षते ।। ३८ ।।

४-३९

वार्धुषिक्यं च तद्वृत्तिस्तत्क्रिया च विकूणिका ।

स्यातां ग्राहकदातारवधमर्णोत्तमर्णकौ ।। ३९ ।।

४-४०

कुमुदः प्रतिभः श्वेतो बभ्रुः कनकपिङ्गलौ ।

रक्तश्यामः स्मृतो धूम्रः पिशङ्गो रोचनाप्रभः ।। ४० ।।

४-४१

मेचकः शिखिकणठाभो हरित् श्यामोऽसितासितिः ।

आरक्तः पाटलो वर्णः शोणः कोकनदारुणः ।। ४१ ।।

४-४२

आसारो वेगवान्वर्षः प्रावृडम्भोधरागमः ।

शीकरः पवनास्ताम्बु मेघाग्निः स्यादिरम्मदः ।। ४२ ।।

४-४३

वृष्ट्या सम्भूतशस्यो यः स देशो देवमातृकः ।

नद्यम्बुवृद्धशस्यो यः स नदीमातृको मतः ।। ४३ ।।

४-४४

वरपूर्वा तु या नारी सोच्यते दिधिषूरिति ।

सोऽग्रेदिधिषुराख्यातः पुरुषस्तत्पुरन्ध्रिकः ।। ४४ ।।

४-४५

खगा मृगा स्मृताश्छेकाः सर्वदैव गृहे रताः ।

यदुष्ट्रिकादिकं भाण्डं तदेवाऽऽवपनं मतम् ।। ४५ ।।

४-४६

रजतादिकृतं तत् स्यात् भृङ्गारं जलदायकम् ।

अवकेशी फलैर्वन्ध्यः सर्वलोहं च तैजसम् ।। ४६ ।।

४-४७

व्याख्याता भैक्षदाता च प्राज्ञैश्च विकुलाविति ।

स्थानं मूलादधिष्ठानात् शाखानगरमुच्यते ।। ४७ ।।

४-४८

संसप्तकाश्च समये संग्रामादनिवर्त्तिनः ।

पद्यातः पधसंबन्धो गव्यूतिः क्रोशकद्वयम् ।। ४८ ।।

४-४९

आगन्तुवर्तमानाभ्यां सहाहोभ्यां च पक्षिणी ।

श्रुतिविद्भिः स्मृता रात्रिः पुण्या हवनकर्मणि ।। ४९ ।।

४-५०

चिररात्रमिति ख्यातं चिरकालं च सूरिभिः ।

गणरात्रं तथा रात्रिर्बहुशश्चाभिवासिता ।। ५० ।।

४-५१

तत् शललीकमाख्यातं प्रच्छन्नं शललैरपि ।

अन्तर्गतास्थिकं कुड्यमेडूकं कवयो विदुः ।। ५१ ।।

४-५२

पञ्चरागिकवस्त्रेण निर्मिताः पुत्रिकास्तु याः ।

पञ्चालिका इति प्रोक्ता बालक्रीडनकाश्चताः ।। ५२ ।।

४-५३

सपरिच्छदकन्यायाः प्रदाता कूकदो मतः ।

सोपप्लवस्थितो भानुरुपरक्तोऽवा शशी ।। ५३ ।।

४-५४

पोगण्ड इति विख्यातो देहेन विफलः पुमान् ।

मासौ द्वौ चैत्रवैशाखौ तावेव मधुमाधवौ ।। ५४ ।।

४-५५

ज्येष्ठाषाढौ तथैव द्वौ प्रोक्तो शुक्रशुची इती ।

नभः श्रावण इत्युक्तो नभस्यस्तदनन्तरं ।। ५५ ।।

४-५६

इषोर्ज्जाविति विज्ञेयौ मासावाश्विनकार्तिकौ ।

स्यातां सहःसहस्यौ द्वौ मार्गपौषौ यथाक्रमम् ।। ५६ ।।

४-५७

तपस्तु माघ इत्युक्तस्तपस्यः फाल्गुनो मतः ।

एकसर्ग्गजनं विन्ध्यादेकायनमिति स्फुटम् ।। ५७ ।।

४-५८

अनेडमूक इत्युक्तः श्रोतुं वक्तुं च यः क्षमः ।

समरात्रिदिनं कालं विषुवन्तमुशन्ति च ।। ५८ ।।

४-५९

वात्या वातसमूहः स्यादिल्वला मृगतारकाः ।

राकानुमतिराचार्याः पौर्णमासीद्वयं विदुः ।। ५९ ।।

४-६०

राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिः स्मृता ।

शिनीवालप्रमाणोऽर्क्कसांनिध्ये यत्र चन्द्रमाः ।। ६० ।।

४-६१

दृश्यते सा त्वमावास्या शिनीवालिति भण्यते ।

कुहेति कोकिलाध्वाने कलामात्रं विधौः स्थितिः ।। ६१ ।।

४-६२

यत्रोपि स्यादमावास्या नष्टचन्द्रा कुहूरिति ।

ऋचो यजूंषि सामानि कर्म विद्या त्रयी मता ।। ६२ ।।

४-६३

आन्वीक्षकी तर्कविद्या वार्ता कृष्यादि कर्मभाक् ।

समग्रमर्थशास्त्राणि दणडनीतिरितीष्यते ।। ६३ ।।

४-६४

मन्वादिधर्मशास्त्राणि स्मृतयः स्मरणादपि ।

ऋग्यजुषोरधीती यः स होताऽध्वर्युरिष्यते ।। ६४ ।।

४-६५

सान्नाय्यं हविरेव स्यादुद्गातासामतो मतः ।

आषाढो व्रतिनां दण्डः सोमपीथीति सोमपः ।। ६५ ।।

४-६६

स्वसंस्काराद् द्विजो भ्रष्टो व्रात्य इत्याभिधीयते ।

त्यक्ताग्निर्वीरहा प्रोक्तो दीक्षितो मखसोमपः ।। ६६ ।।

४-६७

यजमानः स्मृतो यष्टा हुताग्नौ च वषट् कृतम् ।

इष्टापूर्त ध्रुवं दानमन्यत् पूर्वमुदाहृतम् ।। ६७ ।।

४-६८

ब्रह्मस्वाध्यायसंवृत्तिर्ब्रह्मचर्यं समिष्यते ।

अभिमन्त्र्य हुतं सम्यग् विन्द्यादुपाकृतं पशुम् ।। ६८ ।।

४-६९

अन्वाहार्यं विदुः श्राद्धं मासिकं विधिकोविदाः ।

दर्शस्त्वसितपक्षान्ते सदस्या विधिदर्शिनः ।। ६९ ।।

४-७०

दिव्यः स्यादिति सत्रस्य शेषं प्राज्ञैरुदाहृतम् ।

सिद्धश्चाष्टगुणैर्युक्तस्त्रिवर्गो धर्मपूर्वकः ।। ७० ।।

४-७१

प्राचीनावीती विख्यातः सत्यपाणौ समुद्धृते ।

हव्यं दैवे विधातव्यं पैत्रे कव्यमिति स्मृतम् ।। ७१ ।।

४-७२

योषिद् मुख्या वरारोहा वीरा स्यात् पतिपुत्रिणी ।

प्रसाधनज्ञा स्ववशा सैरन्ध्रीति निगद्यते ।। ७२ ।।

४-७३

कात्यायन्यद्‌र्धवृद्‌धा च सा राजवरवर्णिनी ।

मध्यस्थानं भ्रुवोः कूर्चस्तारकाक्षिकनीनिका ।। ७३ ।।

४-७४

स्त्रीणां पूर्वकटीभागं जघनं कोविदा विदुः ।

नितम्बमपरं भागं गुल्फं पादस्य पूर्वतः ।। ७४ ।।

४-७५

मुखान्तराळमास्यं स्यात् पूर्वे सन्धिश्च लक्षणे ।

दृष्टे यत्र प्रसीदन्ति नयनानि मनांसि च ।। ७५ ।।

४-७६

प्रासादः स तु विज्ञेयः सौधः स्यात् सुधया सितः ।

मन्त्रोद्‌धारविधानज्ञः क्रियाकाण्डविशारदः ।। ७६ ।।

४-७७

आचार्यः प्रोच्यते सम्यक् स्वाम्नायोन च आचरन् ।

उपेत्याधीयते यस्माद् वाङ्मयं समुपागते ।। ७७ ।।

४-७८

उपाध्यायः स विज्ञेयो वृत्तिमात्रोपजीवकः ।

उपमर्द्दाप्तिवैमल्याः तण्डुलाः पाकयुक्तितः ।। ७८ ।।

४-७९

प्रमथितेन ते मन्दाः क्लिन्नत्वादोदनः स्मृतः ।

मुद्गादिदलप्रस्विन्नाः स्वच्छाः स्वपस्निमाययोः ।। ७९ ।।

४-८०

प्राच्यादीनां दिशां देवाः पालनाद्विदिशामपि ।

दिक्पाला इति विख्याताः शक्रवह्नियमादयः ।। ८० ।।

४-८१

पाञ्चजन्यं विदुः शङ्खं हरेश्चक्रं सुदर्शनम् ।

कौमोदकी गदा शाङ्र्गं कार्मुकं नन्दकस्त्वसिः ।। ८१ ।।

४-८२

शिवस्य समिध्या वारिस्वशब्दं स्थिरमेव च ।

शिवगङ्गेति विज्ञेया दुष्प्रापा दुष्कृतात्मना ।। ८२ ।।

४-८३

नाम गोत्रं च मन्त्रं च या अभिव्यापकाः स्वयम् ।

सुनृणां काव्यपिण्डस्य विज्ञेयाश्चित्रधेनवः ।। ८३ ।।

४-८४

उत्पत्तिः प्रळयो वंशा मन्वन्तरविनिर्णयः ।

वंशानुचरितं यत्र तत् पुराणमिति स्मृतम् ।। ८४ ।।

४-८५

नाम्ना येऽणादयः सिद्धाः समासविधिनापि ये ।

शब्दास्ते वाक्यतो धातोर्बोद्धव्याः कविपुङ्गवैः ।। ८५ ।।

४-८६

मुक्तक एव चतुर्थो गुणभोग्यः संनिवेशतः शब्दैः ।

वाक्यविबोध्यैर्नित्यं नितरां सुश्रूयते लक्ष्मीः ।। ८६ ।।

इति शब्दरत्नप्रदीपे चतुर्थो मुक्तकः समाप्तः ।।

पञ्चमो मुक्तकः

५-१

स्थानान्तर प्रधानत्वात् व्यामिश्रा भवतोऽपि च ।

साम्प्रतं पृथगुच्यन्तेऽनेकार्थवाचकाव्ययाः ।। १ ।।

५-२

समुच्चये विकल्पोक्तौ व्यभिचारे व्यवस्थितौ ।

औपच्येऽतिशये हेतौ चकारोऽन्वाचयादिषु ।। २ ।।

५-३

व्यवच्छेदे विवक्षायां विकल्पौपम्यहेतुषु ।

पक्षान्तरविनिर्णीतौ वा शब्दः स्यात् समुच्चचे ।। ३ ।।

५-४

हि स्फुटे हा विषादोक्तौ हन्त निर्दिष्टबोधने । हासोपहाससमवित्तिभावसंबोधनादिषु ।। ४ ।।

५-५

अहो साकल्यसाहित्यवृत्तिमात्रेषु दृश्यते ।

परं वा निश्चयेत्यर्थव्यवच्छेदकृतार्थयोः ।। ५ ।।

५-६

पश्चात्सत्यवितर्केषु न परेति विनिश्चये ।

हर्षविस्मयखेदेषु बत शब्दो निबध्यते ।। ६ ।।

५-७

किल संख्यावतौपम्यपूर्वसूचनहेतुषु ।

असंबुद्धौ निषेधे च वाक्यस्मरणयोरपि ।। ७ ।।

५-८

अतिरक्तौ विषादे च न संबुद्धिनिषेधयोः ।

आमित्येवमतीते स्म मा स्म चेति निगद्यते ।। ८ ।।

५-९

इतीव संभावनौपम्यपादपूरणहेतुषु ।

नु वितर्के द्रुतेऽह्वा किमुत प्रश्नवितर्कयोः ।। ९ ।।

५-१०

उपहासे विषादे हि स्फुटानन्तरयोरुत ।

मिथोऽन्योन्यं ततश्चातः पुनः स्याच्च विनिश्चये ।। १० ।।

५-११

अन्तरेणान्ताराशब्दौ व्यतिरेकोदितौ विना ।

सुष्ठु प्रायः प्रगे प्रातः पुनरत्यर्थतथ्ययोः ।। ११ ।।

५-१२

अहर्मात्रणकाः प्रोक्ता वैतथ्याद्यावृता मुधा ।

अयीत्यामन्त्रणौत्सुक्ययुक्तिसंभावनादिषु ।। १२ ।।

५-१३

अहो संभावनालापसंभ्रामामन्त्रणेषु च ।

अरे अनादराख्यायां स्थाने युक्तिमितीष्यते ।। १३ ।।

५-१४

संभावने वितर्के च ए हे हामन्त्रणे ह्वयम् ।

नु संबुद्धावन्योऽन्यं नीवेद्यदि समुच्चये ।। १४ ।।

५-१५

स्वीकारे ऊररी ऊरी उरी बोधनिषेधयोः ।

वायुश्च जवितो मङ्क्षु वै स्फुटार्थस्य संमताः ।। १५ ।।

५-१६

आहोस्विदथवेत्यर्थे आनन्तर्ये तथा अहो ।

आश्चर्यपदसंबुद्धिसंभावेषु निगद्यते ।। १६ ।।

५-१७

एवावधारणे जातु कदाचित् खलु निश्चये ।

मा निषेधे अभावे च दिष्ट्यानन्दे मृषाऽनृते ।। १७ ।।

५-१८

अतान्द्रातादि शीघ्रार्थे ह्यञ्जसा सहसा द्रुतम् ।

अथाऽऽनन्तयमाङ्गल्ये प्रश्नधिक्कारयुक्तिषु ।। १८ ।।

५-१९

संबुद्धौ च निषेधे च एव स्यादवधारणे ।

प्राक् पूर्वं देशकालादौ प्रत्यक् प्रत्यक्ष दर्शने ।। १९ ।।

५-२०

ईषदर्थे मनाक् सम्यग् निश्चये कं सुखाम्बुयोः ।

अलं भूषणपर्याप्तिवारणेषुनिगद्यते ।। २० ।।

५-२१

आ स्मृतौ संभ्रमे मोहे कामं स्यादतिशायिनि ।

धिक् तिरस्करणे कच्चित् साधुप्रश्नप्रवृत्तिषु ।। २१ ।।

५-२२

अन्वगित्यनुगत्यर्थे समाप्ताविति भण्यते ।

प्रश्ने विशेषयोगे च स्वित् संशयविकल्पयोः ।। २२ ।।

५-२३

युगपदेककालार्थं सातत्यादेश्चिदिष्यते ।

समन्ताद् विष्वगित्युक्तिर्विभागे पृथगुच्यते ।। २३ ।।

५-२४

इ प्रहासे इ संबंधे नु आमन्त्रणतथ्ययोः ।

पितृप्रीतौ तथा स्वाहा तर्पणे जातवेदसः ।। २४ ।।

५-२५

सहार्थ समया ज्ञेया हंहोऽनिर्दिष्टबोधने ।

संसुखे सत् प्रतिष्ठायां तूष्णमिध्यव्यतिक्रमे ।। २५ ।।

५-२६

प्राहुर्नक्तं रजन्यर्थे दिनार्थे च दिवा दिनम् ।

संज्ञायां नामसत्तायामस्ति साधोभिधीयते ।। २६ ।।

५-२७

उत्सारणे फडित्याहुर्वषट् वौषट् तु तर्प्पणे ।

अभि सामीप्यदूरोद्र्ध्वदेशेषु परिकीर्त्यते ।। २७ ।।

५-२८

सामीप्ये समया-शब्दः सामीप्ये निकषोच्यते ।

नानाऽनेकप्रकारार्थे तत्क्षणात्सपदि स्मृतः ।। २८ ।।

५-२९

चिराच्चिरेण कालस्य प्रकर्षोक्तौ चिराय-वाक् ।

दुराद् दूरेण दूरं च अविकृष्टं च देशकम् ।। २९ ।।

५-३०

लघु-शब्दोपि शीघ्रार्थे दूरोराप्तव्ययान्तिके ।

अङ्गत्यामन्त्रणे हाहा क्रोधकृत्यनिवारणे ।। ३० ।।

५-३१

विकल्पेऽहह हाहेति नं प्रतीते च वर्जने ।

प्रदोषे सायमित्याहुर्बाढमत्यर्थयुक्तयोः ।। ३१ ।।

५-३२

समं साकं सहार्थे च कलयं श्वरमनुद्धते ।

पश्चान्न वरे सत्ये च ध्रुवं कृत्ये च निश्चये ।। ३२ ।।

५-३३

अभिन्नेषु पुनर्भूयो मध्येऽतः प्रणतो मतः ।

पूजायामति -सु प्रोक्तौ नीचैर्निम्नः शनैर्मनाक् ।। ३३ ।।

५-३४

प्रकटीकरणे प्रादुराविर्विश्वसितेऽनिशम् ।

बहिर्बाह्यो अधोऽधस्तात् परोऽग्रमिङ्गिते द्रुते ।। ३४ ।।

५-३५

तिरश्चीने तरीत्युक्तस्तरी सत्यार्थकीर्तने ।

आहि त्वरायामाहीति आक्षेपे आहि कीर्त्यते ।। ३५ ।।

५-३६

बाहुल्यार्थे स्मृतः प्रायः उच्चैरत्यर्थतुङ्गयोः ।

ह्योऽतीते मते काले ह्यनागते मते श्वो निगद्यते ।। ३६ ।।

५-३७

प्रश्ने तर्के च किं प्रोक्तो वरमिष्टप्रशंसने ।

अमाशब्दः सहार्थ ः स्यान् निषेधे वाभिधीयते ।। ३७ ।।

५-३८

प्रहासाग्रनयोरोभिः प्रतिपत्तावहा तथा ।

एकत्वेऽर्ते सकृद् विद्यादुत्कर्षे निश्चये परम् ।। ३८ ।।

५-३९

पूर्वकाले पुरा माहुः प्राचुर्ये रभसा बलात् ।

नित्यं प्रतिदिनं ज्ञेयं सर्वत्रार्ते परि-ध्वनिः ।। ३९ ।।

५-४०

ततो च ज्योतिके द्योते यम्यैवसगुच्यते ।

तथैत्थं स्वयं स्वार्थे हि यस्मादिति विस्मये ।

कौत्स्ये मृदुरातीक्ष्णे योऽयं कुष्ठीविधीयताम् ।। ४० ।।

इति शब्दरत्नदीपे पञ्चमो मुक्तः समाप्तः ।।

This is prepared an d compiled by

Dr.P .Srinivas , Lecturer in Vyakarana , S.V.V.V.S.College , Bowenpally, Secunderabad, A.P.500011

SABRP शब्दरत्नप्रदीपः

शिवं १-४ - भद्रं १-४

शिवः १-४ - शम्भुः १-४ , खिलः १-४

शिवा १-४ -गौरी १-४ ,अभया १-४ , क्रोष्ट्री १-४ ,आमलकी १-४ , खिलः १-४

गौरी १-५ -शिवप्रिया १-५ ,गोरोचना१-५, अप्रसूता १-५ , शुद्धोभयान्वया १-५

हरिः १-६ - इन्द्रः १-६ ,भानुः १-६,विष्णुः १-६ , मरुत् १-६ , सिंहः १-६ , भेकः १-६ , वाजी १-६ , कपिः १-६

अंशु १-७ - भीरुः १-७ , सोमः १-७ , यमः १-७ ,

शुकः १-७ , सर्पः १-७ , स्वर्णवर्णौ १-७

मधुः १-८ - मद्यं १-८ , क्षौद्रं १-८ , पुष्परसं १-८ ,

मृदुः १-८ , दैत्यः १-८ , चैत्रः १-८ , मधूकः १-८

क्षुद्रा १-९ - वेश्या १-९ , नदी १-९ , मधुमक्षिका १-९ , कण्टकारिका १-९

क्षुद्रः १-९ - असहिष्णुः १-९

वाहः १-१० -युग्यं १-१० ,धनः १-१० ,प्रवाहः १-१० , मानविशेषः १-१० , बाहुः १-१०

हारः १-११ -इष्टकादिचयः १-११, मुक्तागणः १-११ ,मापविशेषः १-११ , क्षेत्रम् १-११

भावः १-१२ - आत्मा १-१२ , मनः १-१२ , सत्ता १-१२ , भवः १-१२ , पूज्यतमः लोके १-१२ , पदार्थः १-१२

कुथा १-१३ - कन्था १-१३

कुथः १-१३ -करिकम्बलः १-१३ , कुशः १-१३ , कीटः १-१३ , प्रातःस्नायी१-१३ द्विजः १-१३

कुतपा १-१४ - कुशः १-१४ , कालः १-१४ , तिलः १-१४ , च्छागः १-१४ , कम्बलः १-१४ , सलिलं १-१४ , अम्बरं १-१४ , दौहित्रः १-१४ ,

खड्गपात्रं १-१४ , अग्निः १-१४

गोः १-१५ - बाणः १-१५ , वाक् १-१५ , पशुः १-१५ , भूमिः १-१५ , दिक् १-१५ , रश्मिः १-१५ , जलं

१-१५ , अक्षि १-१५ , स्वर्गः १-१५ ,

मातृ १-१५ , वज्रः १-१५ , अग्निः १-१५ , मुखं १-१५ , सत्यं १-१५

भगः(शर-१-१६ - श्रीः (शर-१-१६ , यशः(शर-१-१६ , सौभाग्यं(शर-१-१६ , योनिः १-१६ ,

कान्तिः१-१६ , महिमा१-१६ , सूर्यः१-१६ , संज्ञाविशेषः१-१६ , मृगाङ्गः १-१६

देवः १-१७ -पर्जन्यः १-१७ , राजा १-१७ , गीर्व्वाणः १-१७ , व्यवहर्ता १-१७ ,

भर्ता १-१७ , मूर्खः १-१७ , बालः १-१७ , जिगीषुः १-१७ , नरः १-१७ ,

कुष्टी १-१७

पुष्करं १-१८ - तूर्यास्यं १-१८ , असिफलं १-१८ , पद्मं १-१८ , कुञ्जराग्रकरः १-१८ ,

द्यौः १-१८ , द्वीपः १-१८ , तीर्थः १-१८ , निमित्तं १-१८ , विशिष्टः १-१८

कः १-१९ -मूर्धा १-१९ , चित्तं १-१९ , जलं १-१९ , कायः १-१९ , मुखं १-१९ ,

ब्रह्मा १-१९ , मारुतः १-१९ , कामः १-१९ , कालः १-१९ ,

सुवर्णं १-१९ , द्रविणं १-१९ , ध्वनिः १-१९

हंसः १-२० - जीवः १-२० , राजा १-२० , रविः १-२० , धर्मः १-२० ,

तपस्वी १-२० , तुरंगमः १-२० , सितपक्षः १-२० , हरः १-२०

रसः १-२१ - जलं १-२१ , हर्षः १-२१ , श्रृङ्गाररसः १-२१ ,

पुष्पादिनिर्यासः १-२१ , पारदः १-२१ , विषम् १-२१

कीलालं १-२२ - क्षीरे १-२२ , पुष्परसे १-२२ , तोये १-२२ , मण्डे १-२२ ,

मद्ये १-२२ , घृते १-२२ , असृजि १-२२

पललं १-२३ - तिलपिष्टे १-२३ , मले १-२३ , मांसे १-२३ , कम्बले १-२३ ,

कोमले १-२३ , अस्थिनि १-२३ , वत्से १-२३ , क्षीबे १-२३ , बले १-२३

ललामः १-२४ - हये १-२४ , पुच्छे १-२४ , ध्वजे १-२४ ,

पुण्डे १-२४ , शैले १-२४ , गुणाधिके १-२४

ललामा १-२४ - वित्ते १-२४ , धमनि १-२४ , भूषायां १-२४

वसुः १-२५ - सूर्यः १-२५ , वह्निः १-२५ , स्वर्च्चिः १-२५

वसवः १-२५ - असवः १-२५ , अष्टौ धरादयः १-२५

वसु १-२५ - रत्नं १-२५ , द्रव्यं १-२५

वर्णाः १-२६ - अक्षराणि १-२६ , श्वेतादयो गुणाः १-२६ ,

नाट्यामुखे गाथाः १-२६ , द्विजादयः १-२६

अर्जुनः १-२७ -शुक्लोवर्णः १-२७ , पाण्डवः १-२७ , स्तृणजातिः १-२७ , ककुभो द्रुमः १-२७

पट्टः १-२८ - व्रणस्यावरणं १-२८ , भूर्जाहिताक्षरः १-२८ , वीरदीक्षापटः १-२८ , अधिवासनम् १-२८

बलिः १-२९ - पूजोपहारः १-२९ , दानवपुङ्गवः १-२९ ,

स्त्रीमध्यभागोर्मिः १-२९ , जराकृतम् चर्म १-२९

अन्तरम् १-३० - रन्ध्रे १-३० , वस्त्रे १-३० , मध्ये १-३० , व्यवधाने १-३० ,

अन्तरात्मनि १-३० , बहिर्योगे १-३० , अवकाशे १-३० , विशेषे १-३० ,

व्यसने १-३०

अरिष्टं १-३१ - क्षेमं १-३१ , गृहं १-३१

अरिष्टः १-३१ -वृषभासुरः १-३१ , काकः १-३१ , निम्बः १-३१

कम्बलं १-३२ - इन्द्रियं १-३२ , कमलं १-३२

कम्बलः १-३२ - रोमजः पटः १-३२ , गवां सास्ना १-३२

मण्डलं १-३३ - वर्तुलं १-३३ , सङ्घातः १-३३ , भूमिभागः १-३३ , सरमासुतः १-३३

कुन्तलः १-३४ - केशपर्यायः १-३४ , देशवाचकः १-३४ ,

सूत्रधारः १-३४ , कुन्तहस्तः १-३४

मणिः १-३५ - लिङ्गाग्रिमो भागः १-३५ , भगध्वजः १-३५ , कूपमुखोत्सेधः १-३५ , पद्मरागादिकः १-३५

तन्त्रं १-३६ - शास्त्रं १-३६ , कुलं १-३६ , सिद्धौषधिक्रिया १-३६ , सुखं १-३६ ,

बलं १-३६ , वपनसाधनम् १-३६

नेत्रं १-३७ - वस्त्रविशेषः १-३७ , चक्षुः १-३७ , परावर्त्तगुणः १-३७

नेत्रः १-३७ - कस्तूरिकामृगः १-३७

धातुः १-३८ - वातादिप्रकृतिः १-३८ , शैलोद्भवः १-३८ ,

क्रियाभावः १-३८ , देहरसादिकः १-३८

काण्डः १-३९ - बाणस्तला १-३९ , संपातः १-३९ , कालः १-३९

काण्डं १-३९ - बलं १-३९ , तरोःमूलं १-३९

सुधा १-४० - प्रासादभाग्द्रव्यं १-४० , विद्युत् १-४० , अमृतम् १-४० , भोजनं १-४० ,

धात्री १-४० , स्नुही १-४०

वेला १-४१ - कालविशेषः १-४१ , सिन्धुजलोद्धतिः १-४१ , सेवाङ्गुलिच्छेदः १-४१ ,

द्रोण्यन्तरावनिः १-४१

क्षणं १-४२ - उत्सवे १-४२ , प्रकोष्ठे १-४२ , मुहूर्ते १-४२ ,

नियमे १-४२ , व्यवस्थायां १-४२ , समये १-४२

भ्रूणः १-४३ - भीरु १-४३ , द्विजः १-४३ , गर्भाश्रयाश्रयः १-४३ , अन्त्यजः १-४३ ,

शिशुः १-४३ , विकलः १-४३

इन्द्रः १-४४ - श्रेष्ठः १-४४ , देवराट् १-४४ , पञ्चशब्दादिविषयाः १-४४

अहिः १-४५ - दैत्यविशेषः १-४५ , सूर्यः १-४५ , अध्वगः १-४५ , भुजङ्गः १-४५ ,

सिंहिकासूनुः १-४५

व्यालः १-४६ -अहिः १-४६ , श्वापदः १-४६ , व्याकुलः करी १-४६ , प्रमादवान्नरः १-४६ ,

सिंहः १-४६

धेनुः १-४७ - पयस्विनी १-४७ , अर्जुनी १-४७ , कुञ्जरकामिनी १-४७ ,

असिपुत्री १-४७ , शुभङ्करीवृत्तिः १-४७

वृषः १- ४८ - धर्मः १- ४८ , श्रेष्ठः १-४८ , गौः १-४८ ,

मूषिको १-४८ , बलं १-४८ , कामः १-४८ , वृषलः १-४८

शलिः १-४९ - मूर्खः १-४९ , भृङ्गः १-४९ , कीलः १-४९ ,

गदः १-४९ , पर्व्वविशेषः १-४९ , कलिः १-४९

योगः १-५० -ज्यातिविशेषः १-५० , संयोगः १-५० , आगामिलाभः १-५० , समाधिः १-५०

सीता १-५१ -लक्ष्मीः १-५१ , उमा १-५१ , सर्पाधिदेवता १-५१ , सीरध्वजापत्यं १-५१ ,

मन्दाकिनी १-५१

नाभिः १-५२ - आदिमः क्षत्रियः १-५२ , चक्रस्य पिण्डिका १-५२ , कुटुम्बस्याग्रणीः १-५२ ,

निम्नोदरा १-५२

गोत्रं १-५३ - अन्वयः १-५३ , धरणीधरः १-५३

गोत्रा १-५३ - वसुन्धरा १-५३

गोत्रः १-५३ - सत्यवचः १-५३

घनः १-५४ -मेघः १-५४ , कांस्यतालध्वनिः १-५४ , मन्द्रः १-५४ , लोहमुद्गरः १-५४

घनं १-५४ - सान्द्रं १-५४ , नित्यं १-५४

रामा १-५५ - स्त्री १-५५

रामः १-५५ - पशुविशेषः १-५५ , दशरथात्मजः १-५५ , जामदग्निः १-५५

रामौ १-५५ - सितासितौ १-५५

जिनः १-५६ - वीतरागः १-५६ , नारायणः १-५६ , कन्दर्पः १-५६ , सामान्यकेवली १-५६

शुक्रं १- ५७ - देहवतां बीजं १- ५७ , अक्षिरुट् १- ५७

शुक्रः १- ५७ - ज्येष्ठमासः १- ५७ , दैत्यपुरोहितः १- ५७

प्रवालः १-५८ -वीणादण्डः १-५८ , पल्लवो नवः १-५८ , विद्रुमः १-५८ , प्रबलः १-५८

कोणः १-५९ - अश्वः १-५९ , महिषः १-५९ , कोटिः १-५९ , गृहैकदेशः १-५९ ,

वीणादिवादनम् १-५९

तालः १-६० - कालक्रियामानं १-६० , वृक्षभेदः १-६० , करतलध्वनिः १-६०

तालं १-६० - पातालम् १-६०

काष्ठा १-६१ - दश १-६१ , ककुभ् १-६१ , वसुन्धरा १-६१ , कालविशेषः १-६१

काष्ठं १-६१ - दारु १-६१

पलाशः १-६२ -राक्षसः १-६२ , छदनं १-६२ , हरितोवर्णः १- ६२ , पाश १-६२

सत्रं १-६३ - गृहं १-६३ , धनं १-६३ , दानं १-६३ , धाम १-६३ , वनं १-६३ ,

सच्चरितं मतम् १-६३

कल्पः १-६४ -कलासु कुशलः १-६४ , निरामयः १-६४

कल्पं १-६४ - कालं १-६४ , मद्यं १-६४

विष्ठरः १-६५ - बर्हिषामुष्ठिः १-६५ , आसनम् १-६५ , che वृक्षः १-६५ , क्रतुः १-६५

समितिः १-६६ - सभा १-६६ , संयुगावनिः १-६६ ,

समयः १-६६ , संगतिः १-६६

सितः १-६७ -शुक्लः १-६७ , वृद्धः १-६७ , सायकः १-६७ , दैत्यपुरोहितः १-६७

सितं १-६७ - रजतं १-६७

चित्रकं १-६७ - तिलकं १-६७

चित्रकः १-६७ -श्वापदः १-६७ , मूलजातिः १-६७ , व्यन्तरः १-६८

धात्री १-६९ - धातकी १-६९ , आमलकी १-६९ ,

वसुंधरा १-६९ , स्तनदायिनी १-६९

द्रोणः १-७० -कौरवाचार्यः १-७० , काकः १-७० , गिरिविशेषः १-७० , चतुराढकः १-७०

जयन्ती १-७१ - नगरा १-७१ , चेटकानुजा १-७१ ,

औषधभेदः १-७१ , शक्रसंभवा १-७१

रोहितः १-७२ - शक्रकोदण्डः १-७२ , मत्स्यपुंगवः १-७२ ,

लोहितो वर्णः १-७२ , मृगजातिः १-७२

बलः १-७३ - हली १-७३ , रत्नयोनिः १-७३ , दैत्यः १-७३

बलं १-७३ - सैन्यं १-७३ , सत्वं १-७३ , बलौषधी १-७३

बला १-७३ - लक्ष्मीः १-७३ , मही १-७३

प्रतिग्रहः १-७४ - द्विजग्राह्यः १-७४ , सैन्यपृष्ठं १-७४ ,

अनुबन्धः १-७४ , प्रतिग्राहः १-७४

कदम्बः १-७५ - कुमात्रकं १-७५ , विशिखः १-७५ ,

वृक्षभेदः १-७५ , निर्गुणः पुमान् १-७५

प्रियकः १-७६ - बीजसारो द्रुः १-७६ , द्वीपिचित्रकः १-७६ ,

प्रियतोयः १-७६ , मुक्तक व्रती १-७६

अक्षः १-७७ -बिभीतकोवृक्षः १-७७ , पाशकः १-७७ , रावणिः १-७७

अक्षं १-७७ - इन्द्रियं १-७७ , कुल्यं १-७७ , निम्नगं १-७७

चक्रः १-७८ - पक्षिविशेषः १-७८

चक्रं १-७८ - व्यावर्तनं १-७८ , राष्ट्रं १-७८ , संघः १-७८ , रथाङ्गं १-७८ , आयुधं १-७८

खरः १-७९ -सत्यसन्धः १-७९ , परुषः १-७९ , रासभः १-७९ , व्यवहारपटुः १-७९

जातिः १-८० - सहजाख्यानं १-८० , मालती १-८० ,

गोत्रादिजन्म १-८० , चुल्ली १-८०

फणः १-८१ - गोविषाणं १-८१ , भुजङ्गमफणः १-८१

फणा १-८१ -जटा १-८१ , कृष्णा १-८१ , मन्थानकुण्डली १-८१

तिलकः १-८२ - वृक्षभेदः १-८२ , बिन्दुचित्रकम् १-८२

तिलकं १-८२ - क्लोमं १-८२ , प्रधानं १-८२

गन्धर्वः १-८३ - देवजातिः १-८३ , तुरंगमः १-८३ ,

गाता १-८३ , मृगपुंगवः १-८३

शृङ्गं १-८४ -प्रधानं १-८४ , शिखरं १-८४ , विषाणं १-८४ , शब्दकोशविचक्षणः १-८४

सारंगः १-८५ - कुञ्जरः १-८५ , चातकः १-८५ ,

पर्वतः १-८५ , हरिणः १-८५

करणं १-८६ - कारणं १-८६ , इन्द्रियं १-८६ , क्षेत्रं १-८६

करणः १-८६ - जातिभेदः १-८६

पुण्डरीकः १-८७ -व्याघ्रः १-८७ , कमण्डलुः १-८७ , सितोवर्णः १-८७

पुण्डरीकं १-८७ - सरोरुहं १-८७

कमलं १-८८ - कमलं १-८८ , चन्द्रमा १-८८ , क्रमयुग्मं १-८८ , मस्तकं १-८८ , जलं १-८९ , मुकुटं १-८९

कमलः १-८९ - हरिणः १-८९ , जलदः १-८९

भूतः १-९० -अपत्यं १-९० , पृथिव्यादि १-९० , अतीतःकालः १-९० , राक्षसः १-९० , प्रेतः १-९० , प्राणी १-९० , कीनाशः १-९०

अष्टापदः १-९१ -शरभः १-९१ , स्वर्णं १-९१ , किलीतकः १-९१ , कृमिजातिः १-९१

बालः १-९२ - केशः १-९२ , सर्पः १-९३ , शिशु १-९३ , बालः १-९३ , वेगः १-९३

बालं १-९२ - जलं १-९२ , काशतृणं १-९२

बालकं १-९२ - गन्धद्रव्यं १-९२ , जटाजूटं १-९२

बालकः १-९३ -खेचरः १-९३ , व्याघ्रः १-९३ , पृथुकः १-९३

श्यामा १-९४ - रात्रिस्त्रिवृत् १-९४ , स्त्री मुग्धयौवना १-९४ , प्रियङ्गुः १-९४ , वृद्धदारिका १-९४

शुभा १-९५ - सुधा १-९५ , हत्या १-९५ , भगक्षीरी १-९५ , शोभा १-९५ , हरीतकी १-९५

शुभं १-९५ - श्रेयः १-९५

कान्तारं १-९६ - काननं १-९६

कान्तारः १-९६ - पाकशासनः १-९६ , इक्षुभेदः १-९६ , दुर्भरोदरः १-९६

खर्जूरं १-९७ - फलभेदः १-९७ , रजतं १-९७

खर्जूरः १-९७ - क्षुद्रजातिः १-९७ , तृणगोधिका १-९७

गुरुः १-९८ - पिता १-९८ , ज्येष्टः १-९८ , देवपुरोहितः १-९८ , दुर्वापः १-९८ , शिष्याभिषेकदः १-९८

द्वितीयो मुक्तकः

वप्रः २-२ - तटः २-२ , पिता २-२ , प्राकारः २-२

व्याडः २-२ - सर्पः २-२ , शफः २-२ , चतुष्पदः २-२

तल्पः २-३ - अङ्गं २-३ , दाराः २-३ , शय्या २-३

धिष्ण्यं २-३ - तारा २-३ , अग्निः २-३ , गृहस्थानं २-३

अभिख्या २-३ - कीर्त्तिः २-३ , नाम २-४ , रम्भा २-४ - देवाङ्गना २-४ ,

कदली २-४ , मोचा २-४ - खल्या २-४ , कदली २-५

कक्षा २-५ - भवनान्तर्भूमिः २-५ , खलः २-५ , अगजः २-५ , रज्जुः २-५

शुचिः २-६ - आषाढः २-६ , विशुद्धाग्निः २-६ , शुक्रः २-६ , अनुपहतः २-६

घनाघनः २-६ - शक्रः २-६ , वार्षिकः मेघः २-६ , मत्तनागः २-६

पुलाकः २-७ - संक्षेपः २-७ , भक्तसिक्तः २-७ . तुच्छधान्यं २-७

पक्षः २-७ - चलः २-७ , मरुत् २-७ , मासार्द्धः २-७ ,

अभिभवः २-७ , पार्श्वः २-७

करीरः २-८ - वृक्षभेदः २-८ , घटः २-८ , वंशाङ्कुरः २-८

क्षेत्रं २-८ - देहः २-८ , दाराः २-८ , केदारः २-८

श्रेष्ठं २-९ - कम्बलं २-९ , अल्पं २-९ , एकाक्षी २-९

निर्यूहः २-९ - निर्गतः २-९ , पीडा २-९ , निसर्ग्गद्वारभूमिः २-९

अविः २-१० - रविः २-१० , मेघः २-१० , पर्वतः २-१०

संवरः २-१० - मृगः २-१० , पर्वतः २-१० , मन्त्रः २-१०

धुनः २-११ - धवः २-११ , दम्भः २-११ , गह्वरः २-११ , गहनं २-११

वाक् २-११ - न्यायं २-११ , तुल्यः २-११ , विधुः २-११ ,

कालः २-११ , दण्डः २-११ , वित्तं २-११

आत्मा २-१२ - ब्रह्मः २-१२ , धीः २-१२ , देहं २-१२ ,

मनः २-१२ , यज्ञः २-१२ , धृतिः २-१२

कुशलः २-१२ - पर्याप्तिः २-१२ , शिक्षितः २-१२ , पुण्यं २-१२ , क्षेमः २-१२

प्रत्ययः २-१३ - शपथः २-१३ , छिद्रं २-१३ , विश्वासः २-१३ , अस्तित्वहेतुः २-१३

पदं २-१३ - स्थानं २-१३ , परित्राणं २-१३ , क्रमः २-१३ ,

वस्तु २-१३ , प्रतिष्टा २-१३

अत्ययः २-१४ - दोषः २-१४ , व्यपगमः २-१४ , दण्डः २-१४

धाम २-१४ - स्वभावः २-१४ , तेजः २-१४ , स्थानं २-१४

ज्ञाता २-१५ - आत्मा २-१५ , आत्मीयः २-१५ , धनं २-१५

कूटः २-१५ - अनृतं २-१५ , यन्त्रं २-१५ , धनं २-१५ , मायाधरः २-१५

मात्रा २-१६ - परिच्छेदः २-१६ , प्रमाणं २-१६ , अल्पः २-१६

इडा २-१६ - पानीयं २-१६ , भूमिः २-१६ , व्यसनं २-१६

सत् २-१७ - साधु २-१७ , सत्ता २-१७ , प्रशस्तिः २-१७

ककुत् २-१७ - प्रधानं २-१७ , राज्यलिङ्गः २-१७

निष्कः २-१८ - मानं २-१८ , मण्डनं २-१८ , दीनारः २-१८ , रुक्मं २-१८

अङ्कः २-१८ - युग्मं २-१८ , संयोगः २-१८ , लेख्यः २-१८ , लक्ष्म २-१८

कबन्धः २-१८ - विशिरस्कःनरः २-१८ , नीरं २-१८ , खलः २-१८

कार्मुकं २-१९ - मरुः २-१९ , वृक्षविशेषः २-१९ , धन्वन् २-१९

वर्त्म २-१९ - अक्षिलोमं २-१९ , मार्गः २-१९

वर्ष्म २-२० - गृहप्रमाणं २-२० , देहः २-२०

दायादः २-२० - सहनः २-२० , तनयः २-२०

विग्रहः २-२१ - वैर्यवस्कन्दः २-२१ , वपुः २-२१

प्रकोष्ठः २-२१ - कूर्प्परस्याधः २-२१ , द्वारकोष्ठकः २-२१

वितानं २-२२ - उल्लोचं २-२२ , शून्यं २-२२

सती २-२२ - दाक्षायणीदेवी २-२२ , सच्चरित्राबला २-२२

वधूः २-२३ - नारी २-२३ , भार्या २-२३ , पुत्रवधूः २-२३

कशिपुः २-२३ - भक्षः २-२३ , प्रावारः २-२३

आडम्बरः २-२४ - गजारावः २-२४ , तूर्यानादः २-२४

कपर्दः २-२४ - हरजूटौघः २-२४ , श्वेतकाकिणी २-२४

तूवरः २-२५ - निर्विषाणः गौः २-२५ , निश्मश्रुःपुमान् २-२५

नृशंसः २-२५ - पापीयान् २-२५ , वन्दी २-२५

शारदः २-२६ - शरत्कालः २-२६ , अधृष्टः २-२६

उपह्वरः २-२६ - रहःस्थानं २-२६ समीपं २-२६

कश्मलः २-२७ - पिशाचः २-२७ , मोहः २-२७

रीढा २-२७ - अवज्ञा २-२७ , गतिः २-२७

निदाघः २-२८ - प्रस्वेदः २-२८ , ग्रीष्मः २-२८

केतुः २-२८ - महाविशेषः २-२८ , ध्वजः २-२८

वर्द्धनम् २-२९ - छेदनं २-२९ , वृद्धिः २-२९

कशेरुकम् २-२९ - जले २-२९ , कन्दे २-२९ , पृष्ठास्थि २-२९

निवातम् २-३० - आश्रयं २-३० , अभिन्नः कवचः २-३०

कीनाशः २-३० - कदर्यः २-३० , यमः २-३० , कार्षकः २-३०

नागः २-३१ - वृक्षविशेषः २-३१ , वारणं २-३१ , पन्नगः २-३१

कुलं २-३१ - संघः २-३१ , गोत्रं २-३१ , शरीरं २-३१

पूगं २-३२ - पूगीफलं २-३२ , कदम्बकम् २-३२

सुमनः २-३२ - देवः २-३२ , कुसुमं २-३२ , सज्जनः २-३२

कुसुमं २-३३ - पुष्पं २-३३ , स्त्रीरजः २-३३

धवः २-३३ - पतिः २-३३ , भीरुः २-३३ , वृक्षजातिः २-३३

त्र्यम्बकः २-३४ -ताम्रधातुः २-३४ , त्रिलोचनः २-३४

शिफा २-३४ - शेफालिका २-३४ , शिखा २-३४ , जटा २-३४

पुण्यं २-३५ - सुविहितंकर्म २-३५ , पवित्रं २-३५

ब्रह्म २-३५ - ज्ञानं २-३५ , पौनर्भवः २-३५

खलः २-३६ - राशिः २-३६ , नीचः २-३६ , पिण्याकः २-३६

शाला २-३६ - श्लाघा २-३६ , शिला २-३६ , शाखा २-३६ , वेश्मनः २-३६

माल्यः २-३७ - मान्यः २-३७ , स्थिरः २-३७ , माला २-३७

राढा २-३७ - देशविशेषः २-३७ , शोभा २-३७

पलं २-३८ - मांसं २-३८ , मानं २-३८

पलः २-३८ - मूर्खः २-३८

पला २-३८ - तुला २-३८

आलिः २-३८ - सहचरी २-३८ , पङ्क्तिः २-३८

दलं २-३९ - अर्द्धं २-३९ , पर्णं २-३९ , हस्त्यादि साधनम् २-३९

आजिः २-३९ - समभूभागः २-३९ , संग्रामः २-३९

संगरः २-४० - प्रतिज्ञा २-४० , संग्रामः २-४०

पुरुहूतः २-४० - उलूकः २-४० , पुरंदरः २-४०

अमृतं २-४१ - वारि २-४१ , देवभोज्यं २-४१ , अमृतम् २-४१

कुन्ती २-४१ - भूमिः २-४१ , कुन्तकदम्बकम् २-४१

मृत्युः २-४२ - अन्तकः २-४२ , अजगरः २-४२ , कन्तः २-४२ , मरणं २-४२

संपा २-४२ - विद्युत् २-४२ , पतिः २-४२ , शङ्कुध्वनिः २-४२ , पिण्डः २-४२ दुरोदरः २-४३ कितवः २-४३ , द्यूतं २-४३

ज्योतिः २-४३ - दीप्तिः २-४३ , दृष्टिः २-४३ , तारा २-४३

मन्दः २-४४ -रोगः २-४४ , आर्त्तः २-४४ , अभाग्यः २-४४ , मूढः २-४४ , अल्पः २-४४

प्रमाणं २-४४ - शास्त्रं २-४४ , स्थितिहेतुः २-४४

हरिणः २-४५ - पाण्डुरोवर्णः २-४५ , कुरङ्गः २-४५

करटः २-४५ - कातरः २-४५ , ध्वाङ्क्षः २-४५

कङ्करेदुः २-४६ - गृध्रः २-४६ , अमर्षणः २-४६

प्राध्वं २-४६ - बन्धनं २-४६ , सूर्यः २-४६

कला २-४७ - सौधः २-४७ , अवयवं २-४७ , विज्ञानं २-४७ , गमनं २-४७

तुषारः २-४७ - क्षुद्रपाषाणः २-४७ , तुतवेणिः २-४७

मणिः २-४८ - कोलिंजरः २-४८ , मणिकः २-४८

विषम् २-४८ - पानीयं २-४८ , अन्तकरःरसः २-४८

हेतुः ३-१६ - निमित्तं ३-१६ , हृदयं ३-१६

हीरः ३-१६ - वज्रं ३-१६ , महेश्वरः ३-१६

कीरः ३-१६ - काश्मीरकं ३-१६ , शुकः ३-१६

वीरः ३-१६ - विक्रमः ३-१६ , बान्धवः ३-१६

कौशिकः ३-१७ - वासवः ३-१७ , उलूकः ३-१७

सायकः ३-१७ - असिः ३-१७ , मार्ग्गणः ३-१७

मार्ग्गणः ३-१७ - याचकः ३-१७ , बाणः ३-१७ , मृगमांसता ३-१७

अन्धः ३-१८ - ध्वान्तं ३-१८ अचलः ३-१८

शिखण्डी ३-१८ - मयूरः ३-१८ , अग्नी ३-१८

कमरः ३-१८ - कोमलं ३-१८ , काम्यं ३-१८

समरः ३-१८ - युद्धं ३-१८ , संघः ३-१८

क्रोडः ३-१९ - उत्सङ्गः ३-१९ , सूकरः ३-१९

वत्सः ३-१९ - स्वर्णकः ३-१९ , पुत्रः ३-१९

छाया ३-१९ - कान्तिः ३-१९ , अनातपः ३-१९

दया ३-१९ - हिंसा ३-१९ , अनुकम्पा ३-१९

द्रुमः ३-२० - वृक्षः ३-२० , पुराणमन्त्रं ३-२०

ध्रुवः ३-२० - निश्चितं ३-२० , नित्यं ३-२०

पूरः ३-२० - संघातः ३-२० , पूरणं ३-२०

सूरः ३-२० - सूर्यः ३-२० , नरेन्द्रः ३-२०

धीरः ३-२१ - सात्त्विकः ३-२१ , धीमान् ३-२१

वरः ३-२१ - श्रेष्ठः ३-२१ , हुताशनः ३-२१

पतङ्गः ३-२१ - शलभः ३-२१ , आदित्यः ३-२१

अर्कः ३-२१ - स्फाटिकः ३-२१ , भास्करः ३-२१

गुह्यं ३-२२ - कार्यं ३-२२ , कौपीने ३-२२

संज्ञा ३-२२ - नाम ३-२२ , चेतनं ३-२२

मधुरः ३-२२ - प्रियं ३-२२ , स्वादु ३-२२

शम्भुः ३-२२ - ब्रह्मा ३-२२ , महेश्वरः ३-२२

कृत्यं ३-२३ - कार्यं ३-२३ , रिद्धिः ३-२३

बभ्रूः ३-२३ - नकुलः ३-२३ , पिङ्गलः ३-२३

व्यक्तः ३-२३ - स्पष्टं ३-२३ , प्राज्ञः ३-२३

दीप्तः ३-२३ - स्वेच्छा ३-२३ , रुचिः ३-२३

नित्यं ३-२४ - स्वं ३-२४ , निजं ३-२४

ओजः ३-२४ - बलं ३-२४ , दीप्तिः ३-२४

हायनं ३-२४ - वर्णं ३-२४ , ओजः ३-२४

हेतिः ३-२४ - शस्त्रं ३-२४ . अर्चिः ३-२४

आशा ३-२५ - ककुप् ३-२५ , तृणा ३-२५

पयोधरः ३-२५ - स्तनः ३-२५ , मेघः ३-२५

अभिरूपं ३-२५ - बुधः ३-२५ , कान्तं ३-२५

जामिः ३-२५ - स्वसृकुलं ३-२५ , स्त्री ३-२५

प्राप्ती ३-२६ - उदयः ३-२६ , अधिगमः ३-२६

विभावसू ३-२६ - वह्निः ३-२६ , सूर्यः ३-२६

वृजिनं ३-२६ - मलिनं ३-२६ , पापं ३-२६

प्रज्ञानं ३-२६ - बुद्धिः ३-२६ , चिह्नं ३-२६

लीकः ३-२६ - असत् ३-२६ , मायावी ३-२६

पराक्रमः ३-२७ - वीर्यं ३-२७ , उद्यमः ३-२७

दीनः ३-२७ - वराकः ३-२७ , मूषकः ३-२७

प्लवकः ३-२७ - कपिः ३-२७ , भेकः ३-२७

यज्ञः ३-२८ - पूजा ३-२८ , दानं ३-२८ , दृष्टिः ३-२८ ,

ईक्षा ३-२८ चीवरं ३-२८ - वल्कलं ३-२८ , वस्त्रं ३-२८

कृष्णं ३-२८ - कालः ३-२८ , उदरः ३-२८

श्रोत्रः ३-२९ - श्रवणं ३-२९ , कर्णः ३-२९

तातः ३-२९ - पिता ३-२९ , पुत्रः ३-२९

मत्स्यः ३-२९ - कुट्टिमं ३-२९ , शफरः ३-२९

रूपं ३-२९ - मूर्तिः ३-२९ , विधुः ३-२९

अवटः ३-३० - कालः ३-३० , गर्तः ३-३०

निमित्तं ३-३० - हेतुः ३-३० , लक्षणं ३-३०

समर्थः ३-३० - हितं ३-३० , शक्तः ३-३०

मृदु ३-३० - प्रशान्तं ३-३० , अकठिनं ३-३०

स्थूलः ३-३१ - जडः ३-३१ , बृहत् ३-३१

विप्रः ३-३१ - दर्शनः ३-३१ , द्विजः ३-३१

अळीकः ३-३१ - असत् , ३-३१ अप्रियं ३-३१ , सहायः ३-३१ , प्रणिधी ३-३१

चतुर्थो मुक्तकः

संधिनी ४-१ - दोहकाले पयोहीना ४-१ - यः जयेद् राजसूयेन ४-१

सम्राट् ४-१ - यस्याज्ञा पृथ्वी प्रशास्ति सः ४-१

सचिवः ४-२ -सबुद्धिः राज्ञःमन्त्रं निश्चिनोति यः। ४-२

कर्मसचिवः ४-२ - कर्मणि नियुक्तः प्राज्ञः ४-२

अनीकस्थः ४-३ - राजरक्षवर्ग्गः ४-३

अन्तर्वेश्मिकः ४-३ -अन्तःपुराधिकृत् ४-३

प्रणिधिः ४-४ - यथार्थयुक्तः चरः ४-४

स्थायुषपुरुषः ४-४ - ग्रामाधिकृत्यः ४-४

षण्ढः ४-५ - वर्षधरः ४-५

सारिकः ४-५ - द्यूताध्यक्षः ४-५

शत्रुः ४-५ - विषयानन्तरः ४-५

मित्रं ४-५ - शत्रोः अनन्तरं ४-५

अपराद्धेषुः ४-६ - लक्ष्याच्युतबाणः ४-६

व्यूहः ४-६ -कलिविन्यसनं ४-६

वाजः ४-६ - इषोः पक्षः ४-६

प्रत्यासारं ४-७ - आहवे चमूजघनं ४-७

अभिषेणकं ४-७ - प्रत्यरि सेनागमनं ४-७

सेनाङ्गं ४-८ - तुरङ्गरथपत्तीभं ४-८

प्रतिसरः ४-८ - आरण्यः ४-८

प्रतिरोधः ४-८ - समापनम् ४-८

वीरपानकं ४-९ - वृत्ते वर्त्स्यति वा युद्धे पानं ४-९

विस्फारः ४-९ - चापध्वनिः ४-९

कबन्धं ४-९ - अशिरोवपुः ४-९

निबन्धनं ४-१० - मेखलाद्यं ४-१०

समः ४-१० - अङ्गस्य ग्रहणम् । ४-१०

वरूथः ४-१० - रथगुप्तिः ४-१०

गुल्मं ४-१० - सज्जनं ४-१०

उपसय्यः ४-११ - पुरुषः रिपुयुक्तः ४-११

अभिभयं ४-११ - सबलाद् भयं ४-११

३-ना-ना-६२६ करुणायां तु ता स्त्री स्याद्धातुवादे तदव्ययम् । ३-ना-ना-६२७ ते क्रीडने चाभिधेये तृट् पिपासेहयोः स्त्रियाम् ।।

३-ना-ना-६२८ स्वित्प्रश्ने च वितर्के च तुः स्याद्भेदेऽवधारणे ।

इत्येकाक्षरतान्ताः ।

३-ना-ना-६२९ रीतिः प्रचारे स्यन्दे च प्रकारे लोहकीटके । ३-ना-ना-६३० आरकूटे प्रवासे च डिम्बे गमनदुःखयोः ।

३-ना-ना-६३१ अतिवृष्टावनावृष्टौ शलभे मूषिके शुके । ३-ना-ना-६३२ अत्यासन्ने च राजानश्चाथो जातिस्तु जन्मनि ।।

३-ना-ना-६३३ छन्दोलंकारसामान्यधात्रीगोत्रेषु कीर्तितः । ३-ना-ना-६३४ पराध्यर्जन्मनि श्रेष्ठे मालत्यां स्यादथो रतिः ।।

३-ना-ना-६३५ स्मरप्रियायामिच्छायां सुरते क्रीडरागयोः । ३-ना-ना-६३६ जातः स्यादुन्नते वृद्धेऽप्युच्छ्रितोन्नद्धयोरपि ।

३-ना-ना-६३७ रीतिः स्वभावे स्रवणे दृति(?)प्रकृतिसौख्ययोः । ३-ना-ना-६३८ धृतिर्योगे धारणे च प्रवृद्धौ प्रीतिसौख्ययोः ।।

३-ना-ना-६३९ प्रज्ञानाध्वरधैर्येषु पुष्टे स्याच्छन्दसि स्त्रियाम् । ३-ना-ना-६४० भूतिर्भस्मनि मातङ्गशृङ्गारे जन्मसंपदोः ।

३-ना-ना-६४१ सत्तायामपि वृत्तस्तु वर्तुलेऽतिदृढे पुमान् । ३-ना-ना-६४२ स्वरूपे चरिते पद्ये जीवने वर्तनेऽपि च ।।

३-ना-ना-६४३ स्याद्वृत्तिर्नाट्येन्द्रजाले कोशिक्यादिकृषीषु च । ३-ना-ना-६४४ विचारे स्तम्भने ज्ञाने स्नेहे वर्तनजीवने ।।

३-ना-ना-६४५ लो(ला?)भे कवीनां रचनाभेदे ग्लीबे ज्ञाते विचारिते ।

३-ना-ना-६४६ वित्तं ख्याते धने लब्धे क्लीबे ज्ञाते विचारिते ।

३-ना-ना-६४७ ऋ‍ुतिर्गतौ जुगुप्सायां स्पर्धामङ्गलसाधके । ३-ना-ना-६४८ गतिर्मातृपणाया(?)च ज्ञाने यात्राभ्युपाययोः ।।

३-ना-ना-६४९ धूरतः स्यात्खण्डलवणे शठधुर्धूरयोरपि । ३-ना-ना-६५० दन्त उन्नतपाषाणे सानौ दंष्ट्रनिकुञ्जयोः ।

३-ना-ना-६५१ दन्ती तु वारणे क्रोडे श्वाने व्याघ्रे मृगाधिपे । ३-ना-ना-६५२ ओषधीनागहेरम्बसमेष्वेप्यथ गौरवे ।।

३-ना-ना-६५३ प्रस्तावादौ च सेवायां भक्तिः स्याद्भागपङ्कयोः । ३-ना-ना-६५४ अन्तस्तु भागेऽवसिते रचनायां च तत्परे ।।

३-ना-ना-६५५ मृतौ निषेवणे रम्ये समाप्तावग्रमध्ययोः । ३-ना-ना-६५६ स्वरूपे च समीपे च पुंलिङ्गेऽपि प्रकीर्तितः ।

३-ना-ना-६५७ हन्त हर्षेऽनुकम्पायां वाकयारम्भविषादयोः । ३-ना-ना-६५८ लिप्तं विषाक्ते भुक्ते च वाच्यवत्स्याद्विलेपिते ।।

३-ना-ना-६५९ भ्रान्तिर्भ्रमणमिथ्यानवस्थितास्वथ ब्रह्मणि । ३-ना-ना-६६० मन्तुर्ज्ञाने मनुष्यापराधयोः स्यात्ततोऽव्ययम् । ।

३-ना-ना-६६१ बतामन्त्रणसंतोषखेदानुक्रोशविस्मये । ३-ना-ना-६६२ हरिद्वर्णविशेषेऽश्वे दिशि तृणदिनेशयोः ।।

३-ना-ना-६६३ तिक्तो रसे मदे गन्धे रोहिण्यां च कषायके । ३-ना-ना-६६४ सेतुः स्थलविशेषे स्याज्जलबन्धेऽपि पुंस्ययम् ।।

३-ना-ना-६६५ हेतिर्ज्वालांशुखड्गेषु तुरङ्गे हेतु चास्त्रियाम् । ३-ना-ना-६६६ यावत्तावत्परिच्छेदे स्यात्साकल्यनिपातयोः । ।

३-ना-ना-६६७ केतुर्धवजेद्युतौ श्रेष्ठे ग्रहोत्पाताग्निलक्ष्मसु । ३-ना-ना-६६८ वार्तं फल्गुन्यरोगे तु स्त्री कृष्यां द्यूतदन्तयोः ।।

३-ना-ना-६६९ वार्ता वृत्तिजनश्रुत्योत्रिष्वप्सु च धृतामृते । ३-ना-ना-६७० पत्तिः पदातौ पुंसि स्यात्सैन्यभेदे

गतौ स्त्रियाम् ।

३-ना-ना-६७१ पङ्क्तिश्छन्दसि वार्थ्यां च दशकेऽपि प्रचक्ष्यते । ३-ना-ना-६७२ स्यात्प्रभावे प्रकरणे धारणे प्रियसौख्ययोः ।।

३-ना-ना-६७३ श्रुतिः श्रोत्रे श्रुते वेदे वार्तायां श्रोतकर्मणि । ३-ना-ना-६७४ श्रुतं शास्त्रावधृतयोः स्मृतिर्ज्ञानपुराणयोः ।।

३-ना-ना-६७५ हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि । ३-ना-ना-६७६ व्यक्तः प्रज्ञेऽपि स्पष्टार्थे प्रपञ्चे विशदे पुमान् । ।

३-ना-ना-६७७ व्यक्तिः स्वरे च बीजे च श्रेष्ठे मूर्तौ दृढेऽपि च ।

३-ना-ना-६७८ यस्ता हस्तिपके सूते भर्ता धातरि पोष्टरि ।।

३-ना-ना-६७९ पतौ पोतो यानपात्रे शिशौ चापि पुमान्भवेत् । ३-ना-ना-६८० मृते प्राण्यन्तरे प्रेतः पार्थिवे तनये सुतः । ।

३-ना-ना-६८१ भूभृद्राजनि शैले स्यादनन्ते कमठेऽपि च । ३-ना-ना-६८२ ऋ्तुः स्त्रीकुसुमे हेमन्तादिष्वप्यथ पारदे ।।

३-ना-ना-६८३ सूतः स्यात्त्वष्टृसारथ्योर्वन्दिसुष्ठूतयोरपि । ३-ना-ना-६८४ ब्रह्मण्यां क्षत्रियाज्जाते क्षत्ता स्यात्सारथावपि ।।

३-ना-ना-६८५ क्षत्रियायां शूद्रजेऽथ शक्तिः प्रभ्वादिषु स्मृतम् । ३-ना-ना-६८६ कासूसामर्थ्ययोश्चथ मूर्तिः काठिन्यकाययोः । ।

३-ना-ना-६८७ सातिर्दानेऽवसाने स्यादर्तिश्चापग्रपीडयोः । ३-ना-ना-६८८ धातुर्वार्गादिशब्दादिगैरिकादिबकादिषु ।।

३-ना-ना-६८९ श्लेष्मादिरसरक्तादिभूवादिकनकादिषु । ३-ना-ना-६९० महाभूतादि त(श ?) द्भावे योनौ च स्यात्पुमानयम् ।।

३-ना-ना-६९१ उदयेऽधिगमे प्राप्तिस्त्रेता त्वग्नित्रये युगे । ३-ना-ना-६९२ क्षितिर्भूम्यां गृहे नाशे द्वयोः स्याद्गुप्ति रक्षणे ।।

३-ना-ना-६९३ शौर्ये दीर्णे च भूतार्ते युगपर्याप्तयोः कृतम् । ३-ना-ना-६९४ फले क्रियायां विहिते हते वाच्यवदिष्यते ।।

३-ना-ना-६९५ भूतं क्ष्मादावृते युक्ते प्राण्यतीते समे त्रिषु । ३-ना-ना-६९६ पुंसि देवलके प्राप्ते कल्पिते गुह्यकेऽपि च । ।

३-ना-ना-६९७ न्यायोपमानयोस्तृप्तौ महत्पृथुलपूजयोः । ३-ना-ना-६९८ राज्ये चातः शुक्लवर्णे श्वेतं रजतनागयोः ।।

३-ना-ना-६९९ द्वीपाद्रिकुष्ठकुम्भीषु पुंलिङ्गे स्याद्वराटके । ३-ना-ना-७०० कपर्दिकायां स्त्रीलिङ्गे स्याज्जगद्विष्टपे पुमान् । ।

३-ना-ना-७०१ इङ्गे वायौ ना जङ्गमे मृगषण्डेऽप्ययं त्रिषु । ३-ना-ना-७०२ सक्तं नील्यादिरागे स्यादसृक्कुङ्कुमयोरपि ।।

३-ना-ना-७०३ भृत्ये वर्णे त्रिषु सितः शुक्रे श्वेतेऽर्जुने पुमान् । ३-ना-ना-७०४ बद्धेऽपि स्त्री शर्करायां कर्पूरे कथ्यते त्रिषु ।।

३-ना-ना-७०५ शुक्तस्तु परुषे चाम्ले शुक्तिः कज्जलभाजने । ३-ना-ना-७०६ मुक्तासंभवपात्रे स्यात्कीर्तिर्यशसि वार्तयोः(?.)

३-ना-ना-७०७ प्रदेशे कर्दमेऽपि स्याच्छिती धवलमेचकौ । ३-ना-ना-७०८ सत्ये साधौ विद्यामाने प्रशस्तेऽम्यर्हिते च सत् ।।

३-ना-ना-७०९ भवान्यां तु सती स्त्री स्यान्नक्षत्रे तु नपुंसकम् । ३-ना-ना-७१० भास्वान्कान्तिमति सूर्ये वीरुत्स्त्री गुल्मवातयोः । ।

३-ना-ना-७११ प्रति प्रतिनोधौ वीप्सालक्षणादौ प्रयोगतः । ३-ना-ना-७१२ इति हेतुप्रकरणप्रकारादिसमाप्तिषु ।।

३-ना-ना-७१३ स्वस्त्याशीःक्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति । ३-ना-ना-७१४ सकृत्सहेकवारे स्यादाराद्दूरसमीपयोः ।।

३-ना-ना-७१५ प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः । ३-ना-ना-७१६ पुनः सदार्थयोः शश्वत्साक्षात्प्रत्यक्षतुल्ययोः । ।

३-ना-ना-७१७ कुतस्तु निह्नवे प्रश्ने पञ्चम्यर्थेषु साधु तत् । ३-ना-ना-७१८ अलिङ्गं प्रतिशब्दादौ नित्यं सूरिभिरीरितम् ।।

इति द्वचक्षरतान्ताः ।

३-ना-ना-७१९ अमृतं वारिसुरयोर्निर्वाणे चातिसुन्दरे । ३-ना-ना-७२० अयाचिते यज्ञशेषे पुंसि धन्वन्तरेऽपि च । ।

३-ना-ना-७२१ पीयूषे च घृते दीप्तावाचार्ये विबुधेऽपि च । ३-ना-ना-७२२ हरीतक्यामामलक्यां गळूच्यामपि तत्स्त्रियाम् ।।

३-ना-ना-७२३ ग्रथितं गुम्भिताक्रान्तसंहितेषु समीरितम् । ३-ना-ना-७२४ अनन्तः शेषविष्णवोश्चानवधौ क्लीबमम्बरे ।।

३-ना-ना-७२५ स्त्रियां स्याच्छारिबादूर्वाविशल्यालाङ्गलीषु च । ३-ना-ना-७२६ हैमवत्यां गळूच्यां च निशान्तं गृहशान्तयोः । ।

३-ना-ना-७२७ उषःकाले नपुंसि स्याद्वनिता जनिता च ते । ३-ना-ना-७२८ अबलात्यर्थरागेषु क्लीबं याचितदुर्गयोः । ।

३-ना-ना-७२९ स्त्रैणे जलाशये चाथ गोपतिः शंकरे वृषे । ३-ना-ना-७३० सूर्यमेघेन्द्रकृष्णेषु षण्डे भर्तरि पार्थिवे । ।

३-ना-ना-७३१ आकृतिस्तु शरीरे स्याद्रूपसामान्ययोरपि । ३-ना-ना-७३२ समितिः समरे साम्ये सभायामपि च स्त्रियाम् ।।

३-ना-ना-७३३ आहतं गुणिते नाट्ये ताडिते च मृषार्थके । ३-ना-ना-७३४ नववस्त्रेऽङ्गभेदे चनामके चाथ रोहितः । ।

३-ना-ना-७३५ रुधिरे शक्रधनुषि धीरे वर्णे कुचन्दने । ३-ना-ना-७३६ गोशीर्षे च मदे भौमे कुङ्कुमे च ऋजौ तरौ । ।

३-ना-ना-७३७ अस्त्रियां मनिमृगयोः प्रकृतिः पाञ्चभूतिके ।

३-ना-ना-७३८ प्रधाने कारणे गुह्ये जन्तौ छन्दसि मातरि ।।

३-ना-ना-७३९ अमात्ये च स्वभावे च पूजायां परमात्मनि ।

३-ना-ना-७४० विभूतिः संगृहीते स्याद्भस्मनि छन्नसंपदोः । ।

३-ना-ना-७४१ विविक्तः स्यादसंपृक्ते रहस्यूर्जितपूतयोः । ३-ना-ना-७४२ अव्यक्तः शंकरे विष्णौ क्लीबे तु महदादिके ।।

३-ना-ना-७४३ परमात्मन्यात्मनि च त्रिषु स्यादस्फुटेऽजितः । ३-ना-ना-७४४ अपराजितविष्णवीशपरमात्मसु कथ्यते ।।

३-ना-ना-७४५ मनोज्ञतथ्यसुस्पष्टप्रियवाक्येषु सून-तः । ३-ना-ना-७४६ क्लीबं तु मङ्गलेऽपि स्यादुदन्तः साधुवार्तयोः । ।

३-ना-ना-७४७ उद्धते स्याद्विधूतं तु प्रतीतो ज्ञातहृष्टयोः । ३-ना-ना-७४८ सुकेतुः सुपताकायां यक्षसेनानिवेशयोः ।।

३-ना-ना-७४९ प्रवृत्तिस्तु प्रवाहे स्याद्व्यापारे भ्रान्तिवार्तयोः । ३-ना-ना-७५० मुहूर्तमल्पकाले च घटिकाद्वितयेऽपि च । ।

३-ना-ना-७५१ ललितं त्रिषु ना भावभेदे सुन्दरनृत्तयोः । ३-ना-ना-७५२ अस्त्रियां प्रमदारामे क्रीडिते जातपल्लवे ।।

३-ना-ना-७५३ संपातस्तु वशे येगे प्रवेशे वेदसंविदोः । ३-ना-ना-७५४ आसारे विजनेऽभ्यस्ते याचनाधारणार्थयोः ।।

३-ना-ना-७५५ पुंसि स्यादुचितं न्याये समिन्तः केशवेशने । ३-ना-ना-७५६ स्मार्तकर्मणि सीमान्तः प्रमाणे ग्रामभूमिनाम् । ।

३-ना-ना-७५७ किरातो लुब्धके देववाहिनीमत्स्यभेदयोः । ३-ना-ना-७५८ सरस्वान्नदमात्रेऽब्धौ कुरुक्षेत्रकुबेरयोः ।।

३-ना-ना-७५९ रसिके च विवस्वांस्तु देवतासूर्ययोरपि । ३-ना-ना-७६० पक्षिमात्रे च गरुडे गरुत्मानथ कीर्तितः । ।

३-ना-ना-७६१ जीमूतः पर्वते मेघे शकुन्तौ भासपक्षिणौ । ३-ना-ना-७६२ मरुतः पवने देवे स्पृक्कायां तु स्त्रियामपि ।।

३-ना-ना-७६३ स्थपतिः कारुभेदे च कञ्चुकिन्यपि वर्तते । ३-ना-ना-७६४ वृत्तान्तः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः ।।

३-ना-ना-७६५ आनर्तः समरे नृत्तस्थाननीवृद्विशेषयोः । ३-ना-ना-७६६ कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु । ।

३-ना-ना-७६७ शुद्धान्तः कक्ष्यभेदे च नृपस्यासर्वगोचरे । ३-ना-ना-७७८ गुह्ये चान्तःपुरे दृष्टान्तः शास्त्रे च निदर्शने ।।

३-ना-ना-७६९ विस्तारवल्ल्योर्व्रततिः वसती रात्रिवेश्मनोः । ३-ना-ना-७७० महती पूजने वीणाभेदे स्यान्नारदस्य तु । ।

३-ना-ना-७७१ जगती छन्दसि भुवि पक्षतिः पक्षभेदयोः । ३-ना-ना-७७२ मूले हंसमयूरादौ(देः?) सिकता वालुका अपि ।।

३-ना-ना-७७३ आयतिस्तूत्तरे काले स्याद्दीर्घत्वप्रभुत्वयोः । ३-ना-ना-७७४ बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ।।

३-ना-ना-७७५ वासिता स्त्रीकरिण्योश्च कृतवासे नपुंसकम् । ३-ना-ना-७७६ भाविते स्तम्भितेऽपि स्याच्छादिते च त्रिषूच्यते । ।

३-ना-ना-७७७ निमित्तं कारणे चिह्ने रजतं हेमरूप्ययोः ।

३-ना-ना-७७८ सिते त्रिषु स्यान्नक्षत्रे हारवारणदन्तयोः ।।

३-ना-ना-७७९ कंस्कृतं लक्षणोपेते कृत्रिमे च प्रकीर्तितम् ।

३-ना-ना-७८० निवातस्त्वाश्रयेऽवाते शस्त्राभेद्यै च वर्म यत् । ।

३-ना-ना-७८१ जातोन्नद्धप्रवृद्धेषु द्वौ स्यादुच्छ्रि उत्थितः । ३-ना-ना-७८२ वृद्धिमत्प्रोद्यतोत्पन्नावा(व्नेष्वा)दृदौ सादरार्चितौ ।।

३-ना-ना-७८३ लोहितोङ्गारके रक्ते विहितं युक्तकर्मणोः । ३-ना-ना-७८४ अभ्यस्तेऽप्युचितं न्याये तथा परिचितेऽपि च ।।

३-ना-ना-७८५ आवर्तः सलिलभ्रान्तौ संभ्रान्तौ तुरगागमे । ३-ना-ना-७८६ प्रचेता वरुणे श्रेष्ठे धीमत्यपि च वर्तते । ।

३-ना-ना-७८७ उद्वर्तोत्तानितेऽपि स्यात्कीलितं बन्धितेऽपुमान् ।

३-ना-ना-७८८ पुरस्तात्प्रथमे प्राच्यां पुरोर्थेग्रत इत्यपि । ।

३-ना-ना-७८९ अभितः शीघ्रसाकल्योभयता(तो?)भिमुखेषु च ।

३-ना-ना-७९० समीपे च पुरस्ता(?)दावलिङ्गं स्यात्ततः पुमान् । ।

३-ना-ना-७९१ मूर्छितस्तु मूढे स्यात्सोच्छ्रये च तदीरितम् । ३-ना-ना-७९२ दशान्तस्त्वतिवृद्धे च वर्त्यग्रेऽपि

च पुंसि वा ।।

इति त्र्यक्षरतान्ताः ।

३-ना-ना-७९३ देण्यङ्कुरे वंशपोतः स्यान्महाकुलसंभवे । ३-ना-ना-७९४ भगदत्तबृहद्दत्तौ क्षितिपालकनामनी ।।

३-ना-ना-७९५ अवधूतोपेक्षिते च कम्पिते चाश्रमान्तरे । ३-ना-ना-७९६ अपक्रान्ते भूचलितः प्रतिपत्तिस्तु गौरवे । ।

३-ना-ना-७९७ प्राप्तौ प्रवृत्तौ प्रगल्भ्ये कर्तव्यज्ञान उच्यते । ३-ना-ना-७९८ उन्मीलितं सभुत्कीर्णे समग्रोन्मेषयोयरपि ।।

३-ना-ना-७९९ दिवाकीर्तिस्तु चण्डाले नापितोलूकयोरपि । ३-ना-ना-८०० सरस्वति नदिभेदे गोवाग्देवतयोर्गिरि । ।

३-ना-ना-८०१ स्त्री पूजायामपचितिर्द्वयोश्च स्यात्क्षयार्चयोः । ३-ना-ना-८०२ नदीनगर्योर्नागानां भोगवत्यथ काञ्चने ।।

३-ना-ना-८०३ रौप्येऽपि कलधौतं स्यादवगीतं तु गर्हिते । ३-ना-ना-८०४ जन्योपश्लिष्टयोर्वाच्यलिङ्गः कुत्सितकूजिते ।।

३-ना-ना-८०५ अत्याहितं महाभीतौ कर्म जीवानपेक्षि च । ३-ना-ना-८०६ अवदातः शिते पीतेऽभिजातः कुलजे बुधे । ।

३-ना-ना-८०७ पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतःकृते । ३-ना-ना-८०८ युक्ते तु संस्कृतेऽमर्षिण्यभिनीतः प्रचक्ष्यते ।।

इति चतुक्षरतान्ताः ।

३-ना-ना-८०९ थः पुंसि भङ्गे शैलेन्दौ तरङ्गिण्यामपि स्त्रियाम् । ३-ना-ना-८१० क्लीबे भयहरे शुक्ले श्यामले पृथुलेऽपि च । ।

इत्येकाक्षरथान्ताः ।

३-ना-ना-८११ अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु । ३-ना-ना-८१२ मोक्षकारणयोश्चास्था स्थानालम्बनयत्नयोः ।।

३-ना-ना-८१३ अपेक्षायां च संस्था तु स्थितौ नाशे चरेऽपि च ।

३-ना-ना-८१४ मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।।

३-ना-ना-८१५ कथमादौ तथाप्यन्ते यत्ने गौरवभाढयोः । ३-ना-ना-८१६ पथ्या स्त्री स्याद्धरीतक्यां पुंनपुंसकयोर्हिते । ।

३-ना-ना-८१७ तीर्थं पात्रे दर्शने च पुण्यक्षेत्रे च पावने । ३-ना-ना-८१८ योनौ जलावतारे च स्त्रीरजस्यध्वरेऽपि च ।।

३-ना-ना-८१९ अष्टादशेऽमात्यसेनापतिपौरोहितेषु च । ३-ना-ना-८२० निपानागमयोर्मूले ऋषिजुष्टजले गुरौ । ।

३-ना-ना-८२१ वीथिः पङ्क्तावश्वगतौ नाट्यभेदे गृहाङ्कणे । ३-ना-ना-८२२ मार्गे प्रस्थस्तु स्यान्मानभेदे नपुंसके । ।

इति द्वयक्षरथान्ताः ।

३-ना-ना-८२३ सत्पथं दिवि सन्मर्गे तारमार्गे च विश्रुतम् । ३-ना-ना-८२४ समर्थस्त्रिषु शक्तिष्ठे संबन्धार्थे हितेऽपि च ।।

३-ना-ना-८२५ खण्डार्थं(?)तु समांशे स्याद्व्यवस्था कृत्यनिर्णये । ८२५

इति त्र्यक्षरथान्ताः ।

३-ना-ना-८२६ कर्णीरथः प्रवहणे मञ्चे राज्ञां स्वयंवरे । ३-ना-ना-८२७ दशमीस्थः क्षीणरागे वृद्धे मरणसंशये ।।

इति चतुरक्षरथान्ताः ।

३-ना-ना-८२८ दः पुंसि दातरि छेदे दे स्त्रियां क्षान्तिदानयोः । ३-ना-ना-८२९ शुद्धौ दूः परितापे स्त्री दुष्टे दिः क्षय उच्यते ।। ८३०

३-ना-ना-८३० दं क्लीबे दानवैराग्यकलत्रेष्ववलोकने । ३-ना-ना-८३१ भेद्यलिङ्गस्त्वयं मूढे ग्रहान्ते द्रावके शुचौ ।।

३-ना-ना-८३२ दर्शनज्ञाननेत्रेषु दृक् स्त्री द्रष्टनि तु त्रिषु ।

इत्येकाक्षरदान्ताः ।

३-ना-ना-८३३ वादी मङ्गलवाद्ये संख्यायां वैतालिके ध्वनौ । ३-ना-ना-८३४ नन्दी वन्दी द्वौ वृषभं स्तुतिपाठके ।।

३-ना-ना-८३५ कन्दस्तु सूरणे सस्ये मूले जलधरेऽपि च । ३-ना-ना-८३६ छन्दोऽभिप्रायवशयोर्हृदाख्याचित्तवित्तयोः । ।

३-ना-ना-८३७ अत्तादौ वृत्तशास्त्रे स्याद्वेदे च परिकीर्तितम् । ३-ना-ना-८३८ स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु ।।

३-ना-ना-८३९ प्रतिज्ञायां च संकेते तोषणाचारयोरपि । ३-ना-ना-८४० भेदो द्वैते विशेषे च उपजाते विदारणे । ।

३-ना-ना-८४१ मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः । ३-ना-ना-८४२ कृष्णवस्तुनि मद्येऽपि पादः प्रत्यन्तपर्वते ।।

३-ना-ना-८४३ तुरीयांशे वृक्षमूले चांशौ चरणभ्रंशयोः । ३-ना-ना-८४४ पूज्ये चाथ पदं शब्दे व्यवसायोपदेशयोः । ।

३-ना-ना-८४५ वाक्ये पद्ये पदन्यासे स्थाने स्याद्वाच्यलिङ्गकः । ३-ना-ना-८४६ त्राणे व्यावसिते चिह्ने वस्तुन्यथ गुणाधिके । ।

३-ना-ना-८४७ संपद्भूतौ हारभेदे वैभवे च गदोऽस्त्रियाम् । ३-ना-ना-८४८ आयुधे धनदे रोगे पुंसि कृष्णानुजेऽपि च ।।

३-ना-ना-८४९ स्वेदस्तु घर्मसलिले अब्दो मेघे च दर्पणे । ३-ना-ना-८५० प्रभवादौ पर्वते च शादो जम्बालशष्पयोः । ।

३-ना-ना-८५१ सूदस्तु व्यञ्जने पुंसि हिंसासंहारयोः स्त्रियाम् । ३-ना-ना-८५२ ककुच्छ्रेष्ठे वृषस्याङ्गे राजचिन्हेऽपि कीर्तितम् ।।

३-ना-ना-८५३ स्वाद्विष्टे मधुरे हृद्ये मृदू चातीक्ष्मकोमलौ । ३-ना-ना-८५४ मन्दः शनौ तामसे च कुण्ठेभस्वैरकारिणोः ।।

३-ना-ना-८५५ निर्भाग्ये चापटौ पुंसि चाल्पपूरुषमूञयोः ।

इति व्यक्षरदान्ताः ।

३-ना-ना-८५६ दायादौ बन्धुतनयौ तमोनुञ्चन्द्रसूर्ययोः । ३-ना-ना-८५७ वैश्वानरे च निर्वादो जनवादे च निश्चिते ।।

३-ना-ना-८५८ वादाभावे चाप्ययं स्यादामोदो हर्षगन्धयोः । ३-ना-ना-८५९ गोविन्दः स्यात्सुरगुरौ गोष्ठाध्यक्षमुकुन्दयोः ।।

३-ना-ना-८६० गोष्पदं सेविते माने प्रतिष्ठाकृत्यमास्पदम् । ३-ना-ना-८६१ शारदः सप्तपर्णे स्याच्छरत्कालोद्भवेऽपि च । ।

३-ना-ना-८६२ लाङ्गल्यां शारदी नव्ये वाण्यां कान्तौ च शारदा । ३-ना-ना-८६३ प्रसादोऽनुग्रहे कार्ये प्राणस्वास्थ्यप्रशस्तिषु ।।

३-ना-ना-८६४ नैर्मल्यहर्षयोश्चाथ आक्रन्दो दारुणे रणे । ३-ना-ना-८६५ आरावे रोदने त्रातर्यङ्गदो वालनन्दने । ।

३-ना-ना-८६६ नपुंसि वाहुवलये नर्मदः परिहासके । ३-ना-ना-८६७ नदीभेदे विषादस्तु दुःखे गरलदायके ।।

३-ना-ना-८६८ विषादी शंकरे धुःखयुक्ते गरलभोजने । ३-ना-ना-८६९ कुमुदः प्लवगाधीशे कैरवेऽपि पुमान्भवेत् ।।

३-ना-ना-८७० विनोदः शास्त्रतात्पर्ये परिहासे च धन्वनि । ३-ना-ना-८७१ निषादस्तु स्वरे व्याधे त्र्यक्षरं चापि कीर्तितम् । ।

इति त्र्यक्षरदान्ताः ।

३-ना-ना-८७२ मघनादो मेधशब्दे ओषधौ रावणात्मजे । ३-ना-ना-८७३ मुचुकुन्दो नृपे वृक्षे चापवादस्तु निन्दने ।।

३-ना-ना-८७४ आज्ञायां स्यात्परीवादस्तन्त्रीनादापवादयोः । ३-ना-ना-८७५ धर्मे रहस्युपनिषत्सुप्रगल्भौ विशारदौ । ।

३-ना-ना-८७६ विनोदबिन्दुः शास्त्राणां तात्पर्यज्ञे च लुब्धके । ३-ना-ना-८७७ मेळमन्दो मषिघटे मेळामन्दमपि स्मृतम् ।।

इति चतुरक्षरदान्ताः ।

३-ना-ना-८७८ धः पुं शिलीध्रेन्द्वोर्ध्यने श्रीदे धन्वन्तरे घटे । ३-ना-ना-८७९ धं वेशमनि धने धान्ये बुधे धीस्तु

धियि स्त्रियाम् ।।

३-ना-ना-८८० धूर्ना धूपे स्त्री तु कम्पे वित्ते भारे युगाभ्रयोः । ३-ना-ना-८८१ शंभोर्जटायां हेरम्बे धिङ् निर्भर्त्सननिन्दयोः । ।

इत्येकाक्षरदान्धाः ।

३-ना-ना-८८२ सिद्धं नित्ये प्रसिद्धे च निष्पन्नापन्नदीप्तिषु । ३-ना-ना-८८३ गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः ।।

३-ना-ना-८८४ मृत्यौ च सरभेऽपि स्यात्संधिः सङ्गसुरङ्गयोः । ३-ना-ना-८८५ भेदे संघट्टने मोक्षे लाभे नाट्याङ्गहर्षयोः । ।

३-ना-ना-८८६ धेनौ रन्ध्रे च सिद्धिस्तु योगभेदसुरेड्ययोः ।

३-ना-ना-८८७ सुधा पयसि पीयूषे मूर्वायां स्नुहिलेपयोः ।।

३-ना-ना-८८८ गङ्गायामिष्टकायां च साधुः सज्जनयोग्ययोः ।

३-ना-ना-८८९ पात्रे पूज्ये पाचके चामात्ये पूजविधावपि । ।

३-ना-ना-८९० प्रागल्भ्ये चाव्ययं क्लीबं चारौ वार्धुषिकेऽपि च । ३-ना-ना-८९१ सिन्धुर्नद्यां नदे स्त्री स्याद्देशभेदेऽम्बुधौ गजे ।।

३-ना-ना-८९२ मोक्षे सामाप्तौ लाभे च पुंसि निष्पत्तियोगयोः । ३-ना-ना-८९३ मधु मद्ये पुष्परसे वैशाखे माक्षिके गुडे ।।

३-ना-ना-८९४ क्षीरे जले दैत्यभेदे मदवृक्षविशेषयोः । ३-ना-ना-८९५ वसन्ते जातिमधुरे जपाकोशे द्वयोरपि । ।

३-ना-ना-८९६ विधुर्विष्णौ चन्द्रमसि कर्पूरे राक्षसेऽपि च । ३-ना-ना-८९७ विधिर्विधाने नियतौ दैवे काले विधातरि ।।

३-ना-ना-८९८ कल्पे नेमौ प्रवृद्धौ स्यात्पश्चाद्भागनितम्बयोः । ३-ना-ना-८९९ वृद्धिरानन्दने वृद्धौ वर्धनेऽपि कलान्तरे ।।

३-ना-ना-९०० वधूर्जायास्नुषास्त्रीषु प्रियङ्गौ शठिनामनि । ३-ना-ना-९०१ स्पृक्कायां च नवोढायां बन्धुर्बन्धूकपुष्पके । ।

३-ना-ना-९०२ वल्लभेष्टे भ्रातरि च पुंसि तत्परिकीर्तितः । ३-ना-ना-९०३ स्निग्धस्तु त्रिषु सान्द्रे च क्लीबे मसृणतेजसोः ।।

३-ना-ना-९०४ इद्धं स्याद्वर्धने कान्तौ मुग्धः सुन्दरमूढयोः । ३-ना-ना-९०५ सौम्ये नवेऽबलाभेदे चार्धं खण्डे समांशके । ।

३-ना-ना-९०६ बुद्धस्तु सुगते वृद्धः पण्डिते च वयोधिके । ३-ना-ना-९०७ स्कन्धः समुदये वृक्षे सैन्ये रूपादिपञ्चके ।।

३-ना-ना-९०८ समीहने शीर्षभुजप्रकाण्डगमनेष्वपि । ३-ना-ना-९०९ विधावृद्धिप्रकारेषु गजान्ने वर्तने विधा ।।

३-ना-ना-९१० संधा प्रतिज्ञामर्यादासंधानेष्वपि च स्त्रियाम् । ३-ना-ना-९११ स्पृहायां प्रत्यये श्रद्धा स्यादन्धस्तिमिरान्नयोः । ।

३-ना-ना-९१२ चक्षुर्हीनेऽप्यलिङ्ग स्यान्मिथोऽन्योन्ये रहस्यपि । ३-ना-ना-९१३ वृधा निरर्थकाविध्यो (ग्रन्थि?) पर्वण्यनार्जवे ।।

इति द्व्यक्षरधान्ताः ।

३-ना-ना-९१४ विवधो विषये पुंसि पर्याहारा(रे?)ध्वभारयोः । ३-ना-ना-९१५ न्यग्रोधः काष्ठवेण्वोश्च व्यामे वटतरावपि । ।

३-ना-ना-९१६ विबुधौ सुरविद्वांसावुत्सेधः काय उन्नतौ । ३-ना-ना-९१७ अवधिस्त्ववसाने स्यात्सीम्नि काले बिलेऽपि च ।।

३-ना-ना-९१८ उपाधिर्धर्मचिन्तायां कैतवेऽपि विशेषणे । ३-ना-ना-९१९ कुडुम्बवतवक्रेषु व्याजे पुं प्रणिधिः पुमान् ।।

३-ना-ना-९२० अतिनिक्षेपचरयोः प्रार्थितेऽथ रथस्थिते । । ३-ना-ना-९२१ वरूयो रथगुप्तौ स्यात्तिरोधत्ते(?) विवर्तने । ।

३-ना-ना-९२२ समाधिर्नियमे स्थाने निपाते च समर्थने । ३-ना-ना-९२३ प्रसिद्धः स्याद्भूषिते च ख्याते तूर्यतृतीयके ।।

३-ना-ना-९२४ परिधिर्यज्ञियतरोः शाखायामुपसूर्यके । ३-ना-ना-९२५ कबन्धोऽस्त्री जले दैत्येऽप्यपमूर्धकलेवरे । ।

इति त्र्यक्षरधान्ताः ।

३-ना-ना-९२६ अवरोधस्तिरोधाने राजदोरेषु तद्गृहे ।

३-ना-ना-९२७ समुन्नद्धः समुद्भूते पण्डितंमन्यदृप्तयोः ।।

३-ना-ना-९२८ अनुबन्धः प्रकृत्यादौ दोषोत्पादे विनश्वरे । ३-ना-ना-९२९ मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।।

३-ना-ना-९३० अनुबन्धेऽपि हिक्कायां भ्रष्टायामपि कथ्यते । ३-ना-ना-९३१ गाजबन्धस्तु सुरते आलाने ग्रहणेऽपि च । ।

३-ना-ना-९३२ ब्रह्मबन्धुरधिक्षेपे निर्देशेऽथावलम्बने । ३-ना-ना-९३३ अविदूरेऽप्यवष्टब्ध रुन्धे(द्धे?) क्रान्ते तिरस्कृते ।।

इति चतुरक्षरधान्ताः ।

३-ना-ना-९३४ नः पुंसि नाभौ हेरम्बे क्लीबे नं ज्ञानवाद्ययोः । ३-ना-ना-९३५ सुक्ष्मपद्यापरिक्लिष्टशून्यभिन्नेषु तत्त्रिषु । ।

३-ना-ना-९३६ धनुः शब्दे स्तुतौ स्त्री स्यान्नौः काले तरणावपि ।

३-ना-ना-९३७ नु पृच्छायां विकल्पे च निर्निश्चयनिषेधयोः ।।

इत्येकाक्षरनान्ताः ।

३-ना-ना-९३८ गमने वाहने यानं भिन्नं मिश्रे पृथक्कृते । ३-ना-ना-९३९ नस्तु पामरे लोके घवं स्याल्लोहमुद्गरे ।।

३-ना-ना-९४० कांस्ये तालादिके नृत्ते विस्तारेऽभ्रे दृढेऽधिके ।

३-ना-ना-९४१ सान्द्रेस्त्रियां तु मुस्तायां त्रिषु मूर्तिगुणे भरे । ।

३-ना-ना-९४२ दानं गजमदे त्यागे पालनच्छेदबुद्धिषु । ३-ना-ना-९४३ स्थानं स्थितौ च सादृश्ये संनिवेशावकाशयोः ।।

३-ना-ना-९४४ युक्तार्थे कारणार्थे च युद्धनृत्तार्थयोरपि । ३-ना-ना-९४५ तनुस्तु विरले काये कृशेऽल्पे च क्वचित्त्रिषु । ।

३-ना-ना-९४६ सूनुः सुतेने सहजे वधस्थानोपजिह्वयोः । ३-ना-ना-९४७ गळशुण्ठिकभेदे च सूनः स्याद्वाच्यलिङ्गकः । ।

३-ना-ना-९४८ पुष्पप्रसवयोः क्लीबं स्वप्नः सुप्तस्य संस्मृतौ । ३-ना-ना-९५९ ननु प्रश्नानुनययोस्तोके संबोधनेऽपि च ।।

३-ना-ना-९५० मानं कोपेऽभिभाने च विमाने पददण्डयोः । ३-ना-ना-९५१ शून्ये प्रमाणे प्रस्थादौ पुंसि चित्तोन्नतावपि । ।

३-ना-ना-९५२ स्नानीयेऽभिषवे स्नानं योनिः स्यात्तान्त्रिके पणे ।

३-ना-ना-९५३ स्त्रीणां गुह्ये कारणे च जन्मस्थानेऽपि कीर्तितः ।।

३-ना-ना-९५४ नाम क्लीबे नामधेयेऽव्ययं स्यादवधारणे । ३-ना-ना-९५५ स्यात्प्रकाशे प्रसिद्धे च क्रोधोपगमकुत्सने । ।

३-ना-ना-९५६ भानुर्दिवाकरे रश्म्यां ग्रावाणेऽद्रौ पुमान्भवेत् । ३-ना-ना-९५७ पत्री बाणे पक्षिभेदे वृक्षादौ वाहयुक्तके ।।

३-ना-ना-९५८ शिखी वह्नौ मयूरे च ओषधौ पर्वते द्विजे । ३-ना-ना-९५९ कुक्कुटध्वजयोश्चाथ सादी स्यात्सारथावपि ।।

३-ना-ना-९६० गजारोहे हयारोहे वाजी तुरगबाणयोः । ३-ना-ना-९६१ विहङ्गेऽथ धृतौ बुद्धिस्वभावहब्रह्मवर्ष्मसु । ।

३-ना-ना-९६२ यत्ने जीवेन्द्रिये वायौ चात्मा स्यादथ भूपतौ ।

३-ना-ना-९६३ राजा चन्द्रे क्षत्रियेन्द्रे क्षयरोगे पतौ द्रुमे ।।

३-ना-ना-९६४ इनः सूर्ये प्रभौ पुंसि ब्रह्मा वेदे द्विजेऽपि च ।

३-ना-ना-९६५ तत्त्वे तपसि योगेन्दौ सूर्ये ब्रह्मणि वेधसि । ।

३-ना-ना-९६६ वर्त्म नेत्रच्छदे मार्गे मीनो राशौ झषेऽपि च । ३-ना-ना-९६७ पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणौ गुरौ ।।

३-ना-ना-९६८ पर्वस्तु तिथिभेदे स्यादुत्सवे लक्षणान्तरे । ३-ना-ना-९६९ दर्शप्रतिप्रदोः संधौ विषुवत्प्रभृतावपि ।।

३-ना-ना-९७० ग्रन्थिप्रस्तावयोश्चापि वर्ष्म देहप्रमाणयोः । ३-ना-ना-९७१ धाम त्विषि प्रभावे च गृहे देहे च जन्मनि । ।

३-ना-ना-९७२ लक्ष्म चिह्ने प्रधाने च रत्नं श्रेष्ठे मणावपि । ३-ना-ना-९७३ स्वजाते पद्मरागादौ वनं काननवारिणौ ।।

३-ना-ना-९७४ हीनन्यूनावूनगर्ह्यौ ज्ञानी सर्वज्ञसौमययोः । ३-ना-ना-९७५ दाम रज्जौ राक्षसे च कर्म सत्कृत्यपापयोः । ।

३-ना-ना-९७६ जीवस्थानेऽथावसाने संयोगप्रतिलोमयोः । ३-ना-ना-९७७ स्थाने गतौ चानुशब्दः पश्चात्सादृश्ययोरपि ।।

३-ना-ना-९७८ पुनरप्रथमे भेदे नूनं तर्केऽर्थनिश्चये । ३-ना-ना-९७९ अनः प्राणयुतेऽपि स्यान्नानानेकोभयार्थयोः ।।

इति द्व्यक्षरनान्ताः ।

३-ना-ना-९८० भुवनं विष्टपे लोके सलिलेऽपि वियत्यपि । ३-ना-ना-९८१ शयनं सुरते निद्राशप्ययोरपि बोधितम् । ।

३-ना-ना-९८२ मदनः सिक्थके मारे दुर्धूरे शक्रपादपे । ३-ना-ना-९८३ वसन्तशत्रुमूल्येषु कठिनो दुर्जने दृढे ।।

३-ना-ना-९८४ जीवनं जीविते तोये संदानं दामदानयोः । ३-ना-ना-९८५ लोचनं स्यान्मकुलिते सुखिते शूषणे दृशि । ।

३-ना-ना-९८६ यत्ने निरूपणेऽपि स्यान्मननं त्ववबोधने । ३-ना-ना-९८७ कर्तनं छेदने प्राह नारीणां तूलसेवने । ।

३-ना-ना-९८८ शकुनिः पक्षिभेदे च नरभेदेऽपि चेष्यते । ३-ना-ना-९८९ अवनं खण्डने त्राणे गतौ तृप्तौ च याचने ।।

३-ना-ना-९९० श्रवणे च क्रियायांच अवाप्तिप्रीतिदीप्तिषु । ३-ना-ना-९९१ तलिनं विरले स्तोके स्वच्छे तुच्छेऽपि वाच्यवत् । ।

३-ना-ना-९९२ तलुनः पावने यूनि स्त्रियां तु तलनीं विदुः । ३-ना-ना-९९३ अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः ।।

३-ना-ना-९९४ मातुरेकसुते वृक्षे धवले नयनामये । ३-ना-ना-९९५ तृणभेदे गवि स्त्री स्यान्नयनं लोचने गतौ । ।

३-ना-ना-९९६ अमायां करतोये च कुट्टनायामपि स्त्रियाम् । ३-ना-ना-९९७ वितानो यज्ञविस्तारोल्लचेषु क्रतुकर्मणि ।।

३-ना-ना-९९८ वृत्तभेदेऽवसाने च त्रिषु स्यात्तुच्छमन्दयोः । ३-ना-ना-९९९ प्रधाने पटले चाथ मर्दनं तु विलोलने ।।

३-ना-ना-१००० मालिनी तु नदीभेदे छन्दोभेदेऽपि च स्त्रियाम् । ३-ना-ना-१००१ मालाकारस्त्रियां चापोनगर्यां गौरिगङ्गयोः । ।

३-ना-ना-१००२ प्रधानं स्यान्महापात्रे प्रकृते परमात्मनि । ३-ना-ना-१००३ सदोत्तमे प्रतिज्ञायामेकत्वे धारणे रणे ।।

३-ना-ना-१००४ मुख्ये मतौ मन्त्रिणि स्याद्गन्धनं सूचने द्युतौ । ३-ना-ना-१००५ उत्साहेऽपि च हिंसायां मन्थनं लोडनेऽपि च । ।

३-ना-ना-१००६ शासनं राजदत्तोर्यां लेखाज्ञापत्रनीतिषु । ३-ना-ना-१००७ शिक्षके रक्षके मर्यादाबुद्ध्योश्वान्यलिङ्गकः ।।

३-ना-ना-१००८ दर्शनं नयने स्वप्नबुद्धिधर्मोपलब्धिषु । ३-ना-ना-१००९ दश्वर्मज्ञानशास्त्रदर्पणेष्वक्षिसंविदि ।।

३-ना-ना-१०१० समये चाथ पिशुनं कुङ्कुमे सूचके खले । ३-ना-ना-१०११ घ्राणे च स्यात्कटीवस्त्रे स्पृक्कायां पिशुना मता । ।

३-ना-ना-१०१२ संतानः संततौ गोत्रे स्यादपत्ये सुरद्रुमे । ३-ना-ना-१००३ चालनी तु शतच्छिद्रे पुंश्वल्यामपि च स्त्रियाम् ।।

३-ना-ना-१०१४ नलिनी स्यात्सरोजिन्यां व्योम्नि सिन्धौ सरोवरे । ३-ना-ना-१०१५ नालिकायामपि स्त्री स्यान्नलिनं कमले जले । ।

३-ना-ना-१०१६ पद्मिनी स्त्रीविशेषे च सरस्यामम्बुजे स्त्रियाम् । ३-ना-ना-१०१७ निधनं सामभक्तौ च बहिर्मुष्टो कुलक्षये । ।

३-ना-ना-१०१८ जघनं स्यात्कटेः पूर्वे श्रोणिभागापराधयोः । ३-ना-ना-१०१९ विमानोऽस्त्री देवयाने सप्तभूमिकसद्मनि ।।

३-ना-ना-१०२० प्रार्थना याचने नाम्नि चाथ मत्ताविदग्धयोः । ३-ना-ना-१०२१ वाणिनी दूतिकायां च नर्तक्यां माननोऽस्त्रियाम् । ।

३-ना-ना-१०२२ स्तम्भने मानभेदे संमाने मत्तनिकृन्तयोः । ३-ना-ना-१०२३ सीमन्तिन्यां मदस्यन्द्यां मानना मानिनी समा ।।

३-ना-ना-१०२४ विन्दिनी क्षेपणे नग्ने क्षुद्रे प्रेते दिगन्तरे । ३-ना-ना-१०२५ भूतात्मा धातरि तनौ शिखरी तरुशैलयोः । ।

३-ना-ना-१०२६ अपामार्गे हायनस्तु व्रीहिभेदेऽर्चिवर्षयोः । ३-ना-ना-१०२७ वृजिनं कल्मषे क्लीबं क्लेशे ना कुटिले त्रिषु ।।

३-ना-ना-१०२८ वाहिनी तु स्त्रियां नद्यां सेनायां कीर्तियुक्तके । ३-ना-ना-१०२९ रजनी नीलिकालाक्षाहरिद्रायमिनीषु च । ।

३-ना-ना-१०३० हादिनी बज्रतटितोः कामिनी योषिति स्त्रियाम् । ३-ना-ना-१०३१ श्यामापारावतीचक्रवाकीवन्दासु चेष्यते । ।

३-ना-ना-१०३२ केतनं तु गृहे कृत्ये ध्वजे चोपनिमन्त्रणे । ३-ना-ना-१०३३ व्यञ्जनं लाञ्छने श्मश्रुनिष्ठानावयवेष्वपि ।।

३-ना-ना-१०३४ कादिक्षान्तेऽथ राजानां द्यूतलोकापवादयोः । ३-ना-ना-१०३५ कौलीनं स्यात्कुलीनत्वगुह्यजन्यकुकर्मसु ।।

३-ना-ना-१०३६ कौलेयकविहंगाहिपशूनां संगरेऽपि च । ३-ना-ना-१०३७ स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।।

३-ना-ना-१०३८ देवनं व्यवहारे च द्युतौ मोदे मदेऽपि च । ३-ना-ना-१०३९ स्तुतौ च विजिगीषायां क्रीडास्वप्नगतिष्वपि ।।

३-ना-ना-१०४० उत्थानं पौरुषै तन्त्रे संनिविष्टोद्गमे मुदि । ३-ना-ना-१०४१ मलत्यागे समाप्तौ च व्युत्थानं वैरपूजयोः । ।

३-ना-ना-१०४२ समाधौ च निवृत्तौ च प्रतिरोधेऽथ मारणे । ३-ना-ना-१०४३ साधनं मृतसंस्कारे गतौ द्रव्येऽर्थदापने ।।

३-ना-ना-१०४४ निर्वर्तनोपकरणानुव्रज्यासु च मेहने । ३-ना-ना-१०४५ चिह्ने सैन्ये च करणे व्यसनं किल्बिषेऽशुभे ।।

३-ना-ना-१०४६ निष्परोद्यमने सक्तौ दोषे भ्रंशे विपद्यपि । ३-ना-ना-१०४७ कामजे कोपजे चाथ मैथुनं संगतौ रतौ ।।

३-ना-ना-१०४८ मिथुनं राशिभेदे स्याद्युगं स्त्रीपुंसयोगयोः । ३-ना-ना-१०४९ कौपीनं चीरखण्डे स्याद्गुह्ये कार्ये तदिष्यते ।।

३-ना-ना-१०५० प्रसूनं पुष्पफलयोः प्रज्ञानं बुद्धिचिह्नयोः । ३-ना-ना-१०५१ क्रन्दने रोदनाह्वाने संस्थानं तु चतुष्पथे । ।

३-ना-ना-१०५२ संनिवेशे च मृत्यौ स्यादाकृतौ केतनेऽपि च । ३-ना-ना-१०५३ समानो वायुभेदे च समे चैके च सज्जने।।

३-ना-ना-१०५४ तरस्वी वेगिनि शूरे वृद्धौ छेदे च वर्धनः । ३-ना-ना-१०५५ आसनं तु गजस्कन्धे पीठेऽपि च नपुंसके ।।

इति त्र्यक्षरनान्ताः ।

३-ना-ना-१०५६ वैरोचनस्तु सुगते बलिकर्णयमेषु च । ३-ना-ना-१०५७ शनौ विरोचनस्तु स्यात्प्रह्लादतनयार्कयोः ।।

३-ना-ना-१०५८ अग्नौ चन्द्रे च कान्तौ स्यादथ नेत्रे विलोचनः ।

३-ना-ना-१०५९ अन्धके विषये क्लीबे अभिज्ञानं स्मृतावपि ।।

३-ना-ना-१०६० गर्वे ज्ञाने च हिंसायां प्रणवे च समीरितम् । ३-ना-ना-१०६१ उपासनं शराभ्यासे क्षुश्रूषायां च हिंसने । ।

३-ना-ना-१०६२ अग्रजन्मा द्विजे ज्येष्ठभ्रातरि ब्रह्मणि स्मृतम् । ३-ना-ना-१०६३ निबन्धनं तु संसर्गे हेतौ संयमनेऽपि च ।।

३-ना-ना-१०६४ कौतुके चानुरागे च लक्ष्येऽभिज्ञान उच्यते । ३-ना-ना-१०६५ उपधानं विशेषे स्याद्गड्डके प्रणयेऽपि च ।।

३-ना-ना-१०६६ रसायनं विहङ्गे स्याद्व्यधीनां च कृतौषधे । ३ना-ना- १०६७ प्रतियत्नस्तु संस्कारे चोपग्रहणलिप्सयोः ।।

३-ना-ना-१०६८ शक्रघातुकमत्तेभनीरदेषु घनाघनः । ३-ना-ना-१०६९ निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।।

३-ना-ना-१०७० स्नंपिधानं तु वस्त्रे चाच्छादनेऽपि प्रकीर्तितम् । ३-ना-ना-१०७१ आराधनं साधने स्यादवाप्तौ तोषणेऽपि च । ।

३-ना-ना-१०७२ अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि । ३-ना-ना-१०७३ अभिपन्नोऽपराद्धेऽभिग्रस्ते व्यापद्गतावपि ।।

३-ना-ना-१०७४ विश्वकर्मा दिमकरे सुरशिल्पिनि पुंस्ययम् । ३-ना-ना-१०७५ महासेनस्तु सेनान्यां षण्मुखे वासवेऽपि च ।।

३-ना-ना-१०७६ दुःशासनस्तु दुर्दण्डे सुयोधनसुते पुमान् । ३-ना-ना-१०७७ विकर्तनश्चोद्वलने मार्ताण्डे नृपतावपि ।।

३-ना-ना-१०७८ संकेतनं लालने च संज्ञाध्वजगृहेषु च । ३-ना-ना-१०७९ आचञ्चनं प्रतीवापे जवनाप्यायनार्थयोः ।।

३-ना-ना-१०८० आलोचनं दर्शने स्याद्यतिबुद्ध्या निरीक्षणे ।

३-ना-ना-१०८१ विष्वक्सेनोऽच्युतः पुंसि घृष्टिगन्धफलिन्ययोः । ।

इति चतुरक्षरनान्ताः ।

३-ना-ना-१०८२ इन्द्रे तु गोत्रोद्दलनः कुलघ्ने गिरिदारणे । ३-ना-ना-१०८३ लाक्षायां च हरिद्रायां फलघ्ने गिरिदारणे ।।

३-ना-ना-१०८४ स्त्रीरत्ने रोचनेऽपि स्यादुपस्पर्शनमुच्यते । ३-ना-ना-१०८५ स्पर्शे स्नानाचमनयोश्छादने त्वपवारणम् ।।

इति राघवीयनानातमञ्जर्यां तवर्गान्तवर्गाः परिसमाप्ताः ।

३-ना-ना-१०८६ पः पुमान्पचने शैले प्रकाशे कौस्तुभे क्षणे । ३-ना-ना-१०८७ शुभलग्नै च पुं क्लीबे हेम्नि पाः पातृपानयोः ।।

३-ना-ना-१०८८ स्यात्स्त्रियामम्बुधारायां सुधायां समितावपि । ३-ना-ना-१०८९ पुस्त्रिष्वार्ते प्रपन्ने च पूः स्त्री पुरशरीरयोः ।।

३-ना-ना-१०९० पूरणे चाथ पुंशब्दः पुरुषे परमात्मनि । ३-ना-ना-१०९१ रूपं शब्दे पशौ श्लोके ग्रन्थावृत्तौ सितादिषु । ।

इत्येकाक्षरपान्ताः ।

३-ना-ना-१०९२ सौन्दर्ये च स्वभावे च मृगे स्थाने च नाविके ।

३-ना-ना-१०९३ आकारवपुषोश्चाथ गोपो गोष्ठपतौ शिवे ।।

३-ना-ना-१०९४ ग्रामौघकृतकीटेषु(?) वल्लभाब्धिन्दीन्दुराजसु । ३-ना-ना-१०९५ गोपी गोपालमहिलाशारिबारक्षिकासु च ।।

३-ना-ना-१०९६ कल्पः स्यात्प्रलये न्याये शास्त्रे ब्रह्मदिने विधौ ।

३-ना-ना-१०९७ क्षेपो विलम्बे निन्दायां बाष्पो नेत्रजलोष्मणोः ।।

३-ना-ना-१०९८ नीपः कदम्बे निम्बायां पुलके च हरिप्रिये । ३-ना-ना-१०९९ अन्ववायप्रभेदे स्यादपिः प्रश्नविनोधयोः ।।

३-ना-ना-११० संभावनायां गर्हायां समुच्चयवितर्कयोः । ३-ना-ना-११०१ तल्पं शव्याट्टदारेषु पापः कुत्सेषदर्थयोः । ।

इति द्व्यक्षरपान्ताः ।

३-ना-ना-११०२ कलापो भूषणे बर्हे तूणीरे संहतावपि । ३-ना-ना-११०३ आच्छादनेऽन्ने कशिपुरावापः परिचिन्तने ।।

३-ना-ना-११०४ वृक्षस्कन्धोर्ध्वशाखायां तृणगुच्छे द्रुविस्तृतौ । ३-ना-ना-११०५ पल्लवे विटमुख्ये च विटपः पुंनपुंसकम् ।।

३-ना-ना-११०६ सुकृपा मञ्जुबुधयोर्यद्यपीत्यवधारणे । ३-ना-ना-११०७ पच्छपी कूर्मयोषायां वीणाभेदेऽपि च स्त्रियाम् ।।

इति त्र्यक्षरपान्ताः ।

३-ना-ना-११०८ अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च । ३-ना-ना-११०९ वित्ताधिपः कुबेरे स्यात्प्रभौ धनिकयक्षयोः ।।

३-ना-ना-१११० परिवापः परिच्छेदे पर्याप्तौ सलिलस्थितौ ।

३-ना-ना-११११ वृषाकपिः शिवे विष्णो जिष्णावञ्जलिनी पुमान् ।

३-ना-ना-१११२ प्राप्तरूपाभिरूपौ द्वौ विद्वांसे सुन्दरेऽपि च । ।

३-ना-ना-१११३ वंशदीपो यष्टिदीपे परिधापी तु वत्सरे । ३-ना-ना-१११४ स्फो जञ्झानिल आस्फोटे फूत्कारे वारणेऽपि च ।।

इति चतुरक्षरपान्ताः

३-ना-ना-१११५ फा स्त्रियां निष्ठुरोक्तौ च कलाकेलीकुटीषु च । ३-ना-ना-१११६ अथ स्फारे परोक्षे च फः शब्दो वाच्यलिङ्गकः ।।

इत्येकाक्षरफान्ताः ।

३-ना-ना-१११७ शिफा तरुजटायां च शाखामांसीनदीषु च । ३-ना-ना-१११८ शफं तरूणां मूले च गवादीनां खुरेऽपि च ।।

३-ना-ना-१११९ रेफः शब्दे रवर्णे स्यादधमे क्षयकामयोः । ३-ना-ना-११२० कफः श्लेष्मे कफी तु स्यात्श्लेष्मलेऽपि पुमान्भवेत् । ।

इति व्यक्षरफान्ताः । त्र्यक्षराद्याप्रसिद्धम् ।

३-ना-ना-११२१ बः कुम्भे वरुणे बिन्दौ विकले च गुरौ मदे । ३-ना-ना-११२२ विभूति कारे कलहे पक्षे गर्भे च पर्वाणि ।।

३-ना-ना-११२३ बा स्त्रियां काहलीवल्लीशृङ्खलास्वमले त्रिषु ।

इत्येकाक्षरबान्ताः ।

३-ना-ना-११२४ निम्बस्तु पिचुमन्दे च पारिभद्रतरावपि । ३-ना-ना-११२५ बिम्बोऽस्त्री मण्डले सोमसूर्ययोर्मुखलक्ष्मणोः ।।

३-ना-ना-११२६ प्रतिबिम्बे प्रतिकृतौ स्त्रियां स्यादि्बम्बिकाफले ।

३-ना-ना-११२७ शम्बः स्यान्मुसलाग्रस्थलोहमण्डलके पवौ ।।

३-ना-ना-११२८ शुभान्विते शुभंयौ च कम्बुर्वलयशङ्खयोः । ३-ना-ना-११२९ क्लीबं नपुंसके षण्डे वाच्यलिङ्गमविक्रमे ।।

इति व्यक्षरबान्ताः ।

३-ना-ना-११३० कादम्बः कलहंसेक्ष्वोर्द्विजिह्वे मार्गणेऽपि च । ३-ना-ना-११३१कदम्बः पुंसि नीपे स्यात्तिनिशे वरुणद्रुमे । ।

३-ना-ना-११३२ धूल्यां समूहे गन्धे च विडम्बस्त्यागनिन्दयोः ।

३-ना-ना-११३३ नितम्बः पश्चिमश्रोणीभागेऽद्रिकटकेऽपि च ।।

इति त्र्यक्षरबान्ताः । चतुरक्षरमप्रसिद्धम् ।

३-ना-ना-११३४ भः शंभौ भ्रमरे भावे शुक्रेंऽशे जलदे पुमान् । ३-ना-ना-११३५ भा भुव्यलंकृतौ दीप्तौ स्त्रियां भाः किरणे द्युतौ ।

३-ना-ना-११३६ भं कलीबे गगने राशौ नक्षत्रे च सुदर्शने । ३-ना-ना-११३७ भीः स्त्री भीत्यां खगे पुंसि स्थानभूम्योस्तु भूः स्त्रियाम् ।।

इत्येकाक्षरभान्ताः ।

३-ना-ना-११३८ जम्भो दैत्यान्तरे दम्भे जम्बीरे भक्षणेऽपि च ।

३-ना-ना-११३९ कुम्भः स्यात्कुम्भकर्णस्य पुत्रे वेश्यापतौ घटे ।।

३-ना-ना-११४० गुग्गुलौ गजमूर्धांशे राशौ त्रिवृतमानयोः । ३-ना-ना-११४१ कुम्भीभपाटलावारिपर्णीपिठरकट्फले । ।

३-ना-ना-११४२ शिशुबालिशयोर्डिम्भः स्तम्भस्तु स्थूमजाड्ययोः ।

३-ना-ना-११४३ निश्चेष्टालानकाष्ठेषु शंभुर्ब्रह्मेशविष्णुषु ।।

३-ना-ना-११४४ गर्भोऽपवरकेऽन्तःस्थे सुते नग्रे च कन्दरे । ३-ना-ना-११४५ कुक्षौ कुक्षिस्थजन्तौ च भ्रणे पनसकण्टके ।।

३-ना-ना-११४६ सुम्भो दैत्ये बालके च नाभिः प्रण्यङ्गजे पुमान् ।

३-ना-ना-११४७ क्षत्रिये मध्यकोष्ठे च शुक्रास्तचक्रवर्तिनोः ।।

३-ना-ना-११४८ क्षेत्रे प्रधाने चक्रस्य मध्ये कस्तूरिकामदे ।

३-ना-ना-११४९ सभा संसदि सभ्येन्दीवरसामाजिकेष्वपि ।।

३-ना-ना-११५० द्यूते दुरोवरे कान्तियुक्ते त्रिष्वपि विश्रुतम् ।

३-ना-ना-११५१ कदल्यप्सरसो रम्भा शोभा स्त्री कान्तिरागयोः ।।

इति व्यक्षरभान्ताः ।

३-ना-ना-११५२ कौस्तुभः स्याद्देवमणौ कण्ठावर्तेऽपि वाजिनाम् । ३-ना-ना-११५३ आलम्भमवसाने च कलभः करिपोतके ।।

३-ना-ना-११५४ अङ्गलेपनवस्तूनां विळेशेषपि पुमान्भवेत् । ३-ना-ना-११५५ सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः ।।

३-ना-ना-११५६ गन्धोपले कामधेनौ सल्लकीमातृभेदयोः । ३-ना-ना-११५७ सुगन्धे च मनोज्ञे च विद्वांसे घ्राणतर्पणे ।।

३-ना-ना-११५८ विष्कम्भो योगभेदे स्यात्संरम्भः संभ्रमे क्रुधि । ३-ना-ना-११५९ ककुभस्त्विन्द्रवृक्षे स्याद्दिक्षु पक्षिण्यपि द्वयोः । ।

३-ना-ना-११६० आरम्भस्तु त्वरायां च दर्पे चोद्यमने वधे । ३-ना-ना-११६१ शरभः शलभे चाष्टपदे वनमृगान्तरे ।।

३-ना-ना-११६२ वल्लभो दयितेऽध्यक्षे पतौ सर्वकलावति । ३-ना-ना-११६३ अतिप्रीतेऽतिसौन्दर्ये कुलीनेऽश्वे मनोहरे ।।

३-ना-ना-११६४ प्रधानेऽल्पे च वीरेऽथ प्रणये चापि हिंसने । ३-ना-ना-११६५ विस्रम्भः केकि(लि?)कलहे विश्वासे च प्रकीर्तितः ।।

३-ना-ना-११६६ दुन्दुभिर्दैत्यभेदे च वाद्ये वर्षे त्रिकद्वये ।

३-ना-ना-११६७ कुसुम्भं सोमनि क्लीबे स्यान्महारजने घटे ।।

३-ना-ना-११६८ संनिभं तु समीपे च पुंसि वा साम्यवस्तुनि ।

इति त्र्यक्षरभान्ताः ।

३-ना-ना-११६९ अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि ।

इति चतुरक्षरभान्ताः ।

३-ना-ना-११७० मः शंभौ धातरीन्द्रे च चन्द्रे मासे च पुंस्ययम् । ३-ना-ना-११७१ मा स्त्री माने मृतौ वेलामेघापद्मासु च स्त्रियाम् ।।

३-ना-ना-११७२ अव्ययं प्रतिषेधे च जने तु स्यान्नपुंसकम् । ३-ना-ना-११७३ मुः पुंसि बन्धनेऽपि स्यात्पिङ्गलाभिधवर्णयोः ।।

इत्येकाक्षरमान्ताः ।

३-ना-ना-११७४ दमस्तु दण्डे कर्दमे दमनेऽपि च । ३-ना-ना-११७५ क्रमः शक्तौ परीपाट्यां रीत्यां चलनकम्पयोः ।

३-ना-ना-११७६ ग्रन्थे च पादक्षेपे च पर्याये च पराक्रमे । ३-ना-ना-११७७ क्षेमं स्यान्मङ्गले लब्धे क्षेमः कुशलचोरयोः ।।

३-ना-ना-११७८ क्षेमा द (ध)नहरीगौर्योः क्षमः पुंसि क्षमान्विते । ३-ना-ना-११७९ क्षमा धरित्रीक्षान्त्योः स्त्री युक्ते शक्ते हिते सहे ।।

३-ना-ना-११८० युक्तादौ वाच्यलिङ्गः स्यात्कामः काम्ये मनोभवे । ३-ना-ना-११८१ इच्छायां रेतसि क्लीबे निकामे व्यसनेऽव्ययम् । ।

३-ना-ना-११८२ रागाभ्यनुज्ञयोश्चापि त्रिषु श्यामस्तु मेचके । ३-ना-ना-११८३ हरित्प्रयागान्यग्रोधघटवृद्धेषु दारके ।।

३-ना-ना-११८४ मारे शुके पिके कृष्णे मरीचे लवणे नपुम् ।

३-ना-ना-११८५ अप्रसूताङ्गनायां स्त्री सोमवल्ल्यां महौषधौ ।।

३-ना-ना-११८६ कृष्णाप्रियङ्ग्वोर्गुन्द्रायां निशाशारिबयोरपि ।

३-ना-ना-११८७ नील्यां शोभात्रिवृतयोस्तृणभेदेऽपि कथ्यते ।।

३-ना-ना-११८८ भामः क्रोधे रवौ दीप्तौ नरकग्रहभेदयोः । ३-ना-ना-११८९ थर्मः पुण्ये यमे न्याये स्वभावाचारयोः कृतौ ।।

३-ना-ना-११९० उपमायामहिंसायां भावे चापे च यज्वनि । ३-ना-ना-११९१ स्वरेषूपनिषद्राज्ञोर्वामं सव्येऽतिसुन्दरे । ।

३-ना-ना-११९२ प्रतीपे द्रविणे पुंसि वामस्थे रम्यचक्रयोः । ३-ना-ना-११९३ गर्हिते योषिति हरे वामी तु

बडबासृजौः ।।

३-ना-ना-११९४ रासभीकरभीभृङ्गेष्वथ सोमो धनाधिपे । ३-ना-ना-११९५ दिव्यौषधौ श्यामलताचन्द्रयोर्वासरे जले ।।

३-ना-ना-११९६ वसुभेदे च कर्पूरे समे स्त्री योषितीति च (?) । ३-ना-ना-११९७ स्यात्पद्मा लाञ्छनेऽभिख्याविध्योर्लोकेश्वरार्कयोः ।।

३-ना-ना-११९८ धनदे च सरस्वत्यां तारालक्ष्म्योश्च वाच्यवत् । ३-ना-ना-११९९ पद्मं स्यात्पद्मकव्यूहे निधौ संख्यान्तरेऽम्बुजे ।।

३-ना-ना-१२०० ऊर्मिस्तरङ्गे पीडायां वेगे भङ्गप्रकाशयोः । ३-ना-ना-१२०१ उत्कण्ठवस्त्रसंकोचरेखेषु परिचक्ष्यते । ।

३-ना-ना-११०२ लक्ष्मीः संपत्कान्तिरमारूपभेदप्रियङ्गुषु । ३-ना-ना-११०३ रामो मनोज्ञे शरभे जामदग्नौ (ग्न्ये?) बले सिते ।।३-ना-ना-१२

३-ना-ना-१२०४ त्रिषु नीले राघवे च परशौ रमणेऽपि च । ३-ना-ना-१२०५ ग्लीबे तु वास्तौ कुष्ठे स्त्री स्याद्रमायां च योषिति ।।

३-ना-ना-१२०६ शुष्मा तेजोर्कयोः पुंसि शुष्मं क्षीरे नभस्यपि । ३-ना-ना-१२०७ पद्मके बिन्दुजाले च पद्मा भाङ्गींश्रियोरपि ।।

३-ना-ना-१२०८ भ्रमोऽम्बुनिर्गभे भ्रान्तौ कान्ताख्ये शिल्पयन्त्रके । ३-ना-ना-१२०९ भीमो भये भमिसेने सूक्ष्ममध्यात्मदभ्रयोः ।।

३-ना-ना-१११० श्रमोऽभ्यास उपये च सूर्मिः स्यात्सालभञ्जिके । ३-ना-ना-१२११ यमः कृतान्ते यमने युग्मजाते हिते त्रिषु । ।

३-ना-ना-१२१२ आनृशंस्याक्षमासत्याहिंसार्जवदमेषु च । ३-ना-ना-१२१३ ज्ञानप्रसादमाधुर्यमार्दवे पुंनपुसकम् ।।

३-ना-ना-१२१४ आमोऽपक्वे रोगभेदे समस्तक्राटकार्धयोः(?) । ३-ना-ना-१२१५ यामो दिनस्याष्टमांशे वाङ्क्षे संयमनेऽपि च ।।

३-ना-ना-१२१६ घर्मः स्यादातपे ग्रीष्मे प्रवर्ग्ये देवतान्तरे । ३-ना-ना-१२१७ किरणे प्रग्रहे रश्मिर्ग्रामः शब्दादिवृन्दयोः ।।

३-ना-ना-१२१८ षड्जादौ स्यात्संवसथे चाथ सेनामुखे रुजि । ३-ना-ना-१२१९ स्तम्बेऽपि गहने गुल्म ऊष्म स्वेदाम्भसोरपि ।।

३-ना-ना-१२२० धाम कान्त्यमथालस्ये जामी स्वसृकुलस्त्रियोः । ३-ना-ना-१२२१ जिह्मस्तु कुटिले मन्दे रसनायां तु तत्स्त्रियाम् । ।

३-ना-ना-१२२२ न पुंसि कपटे वक्रे सिंहः श्रेष्ठमृगेन्द्रयोः । ३-ना-ना-१२२३ अमा सह समीपे च सामि त्वर्धे जुगुप्सने ।।

३-ना-ना-१२२४ नाम प्रकाश्यसंभाव्यक्रोधोपगमकुत्सने ।

इति व्यक्षरमान्ताः ।

३-ना-ना-१२२५ ललाम च ललामं च भूषाप्राधान्यवाजिषु ।

३-ना-ना-१२२६ चिह्नप्रभावपुण्ड्रेषे पुच्छे कान्तौ त्रिषु ध्वजे ।।

३-ना-ना-१२२७ शृङ्गे च पुरुषश्रेष्ठे मध्यमस्तु त्रिलिङ्गके । ३-ना-ना-१२२८ मध्यदेसे स्वरे रात्रौ छन्दोभेदेऽन्तरे नले ।।

३-ना-ना-१२२९ अङ्गुलौ कर्णिकायां च तथा दृष्टरजःस्त्रियाम् । ३-ना-ना-१२३० सत्तमश्चान्यवत्पूज्ये श्रेष्ठसाधीयसोरपि । । ३-ना-ना-१२३१ नियमो यन्त्रणायां च प्रतिज्ञायां च संयमे ।

३-ना-ना-१२३२ शौचाध्वरतपःसत्यस्वाध्यायेषु व्रतेऽपि च । ।

३-ना-ना-१२३३ उपस्थनिग्रहे स्नाने पुंसि मौनोपवासयोः । ३-ना-ना-१२३४ कुट्टिमं बद्धभूमौ स्याद्विभ्रमो भ्रान्तिशोभयोः ।।

३-ना-ना-१२३५ संशये भयसौन्दर्यविलासेषु प्रकीर्तितः । ३-ना-ना-१२३६ निगमोऽस्त्री पुरे वेदे वाणिज्ये च वणिग्धने ।।

३-ना-ना-१२३७ नैगमो नागरे वैश्ये पुंसि स्याच्छ्रौतकर्मणि । ३-ना-ना-१२३८ परमः स्यात्प्रधानाद्योरोंकारेऽपि पुरातने ।।

३-ना-ना-१२३९ अनुज्ञाने च कुमुमं नेत्ररोगे फले सुमे । ३-ना-ना-१२४० स्त्रीणां रजस्यथो त्लपे ता (च) न्द्रभासेवितानके । ।

३-ना-ना-१२४१ कुट्टिमे तिलिम प्रोक्तं सुषणा परमद्युतौ । ३-ना-ना-१२४२ सुषीमः शिशिरे चारौ सुषिरे

पन्नगान्तरे ।

३-ना-ना-१२४३ सुषमं चारुसमयोरजिह्मः सत्कृतावृजौ । ३-ना-ना-१२४४ व्यायामो मानभेदे स्याद्दीर्घव्यापारयोः कृतौ ।।

३-ना-ना-१२४५ आगमः शास्त्रभेदे स्यात्कल्पागमनयोरपि । ३-ना-ना-१२४६ अधमः कुत्सिते न्यूने अधःस्थध्मानयोरपि ।।

३-ना-ना-१२४७ विक्रमः स्याद्वर्षभेदे चाक्रान्तौ च पराक्रमे । ३-ना-ना-१२४८ पूर्वे तिथौ च प्रथमः सुकर्म पुण्ययोगयोः ।।

इति त्र्यक्षरमान्ताः ।

३-ना-ना-१२४९ परिणामस्तु संतोषे वायिके नमनेऽपि च । ३-ना-ना-१२५० सार्वभौमो दिग्गजे च चक्रवर्तिनिशीशयेः । ।

३-ना-ना-१२५१ प्लवंगमः कपौ भेके शौर्योद्योगौ पराक्रमौ । ३-ना-ना-१२५२ उपक्रमश्चिकित्सायां प्रारम्भे विक्रमेऽपि च ।।

३-ना-ना-१२५३ उपायपूर्वोपधासु वत्सरेऽपि इहैषमः । ३-ना-ना-१२५४ जीर्णे च परिभुक्ते च यातयामं प्रकीर्तितम् ।।

३-ना-ना-१२५५ अथ प्रियङ्गुश्यमा स्यात्स्त्रियामसुरयोषिति ।

इति चतुरक्षरमान्ताः ।

इति राघवीयनानार्थमञ्जर्यां पवर्गान्तवर्गाः परिसमाप्ताः ।

३-ना-ना-१२५६ यस्त्यागे निलये वायौ यामे दातरि यातरि । ३-ना-ना-१२५७ या स्त्रियां यानमञ्जर्योः शोभालक्ष्म्योश्च निर्मितौ ।।

३-ना-ना-१२५८ त्रिषु स्यात्सर्वनामाख्ये व्यये हेतावथो स्त्रियाम् । ३-ना-ना-१२५९ ख्या ख्यातौ च प्रकथने ज्या मौर्वीमातृभूमिषु ।।

३-ना-ना-१२६० द्यौर्ना दिव्यह्नि वह्नौ च स्वर्व्योम्नोः पुंसि च स्त्रियाम् ।

इत्येकाक्षरयान्ताः ।

३-ना-ना-१२६१ संध्या तु कालभेदे स्याव्द्यवहारत्मनोरपि ।

३-ना-ना-१२६२ काव्यासुरस्त्रियां स्त्री स्यात्पुंसि रामायणादिषु ।।

३-ना-ना-१२६३ स्मयो बले प्रवत्से च दर्पशौण्डीर्ययोरपि । ३-ना-ना-१२६४ मृत्युः किंपाकमरणलक्षणेषु यमेऽपि च ।।

३-ना-ना-१२६५ नयो नीत्यां षट्पवर्णे(?) वेध्यं लक्ष्येऽपि कीर्तितम् ।

३-ना-ना-१२६६ चित्यं तैत्यं चिताकम्ब्वोरुद्देशे द्रौ सुरालये ।।

३-ना-ना-१२६७ संख्या युद्धे हस्तिबिन्द्वोर्निधव्यूहान्तरादिषु । ३-ना-ना-१२६८ गणनायां वयो यूनि कथ्योद्गमकथार्हयोः ।।

३-ना-ना-१२६९ कक्ष्या वैकक्ष्यके काञ्च्यां रज्जौ मध्येभबन्धने । ३-ना-ना-१२७० हर्म्यादेश्च प्रकोष्ठे च स्त्रियां बृहतिकच्छयोः । ।

३-ना-ना-१२७१ वरत्रायां शयस्तु स्याच्छयालौ सुखहस्तयोः । ३-ना-ना-१२७२ भुजंगमेऽपि शय्यायां दायो वित्ते च यौतके ।।

३-ना-ना-१२७३ भाषणे सील्लुण्ठने च विभक्तव्यपितुर्धने । ३-ना-ना-१२७४ जनितव्ये रणे क्लीबेऽ पवादजनजल्पयोः ।।

३-ना-ना-१२७५ अस्त्री वरवधूज्ञातिप्रियतुल्यहितेषु च । ३-ना-ना-१२७६ जन्यस्त्रिषु जने साधौ जनितोत्पादनीययोः ।।

३-ना-ना-१२७७ जन्या तु मातृसख्यां च मदे हट्टे जनेऽपि च । ३-ना-ना-१२७८ लोके जन्तावथो वीर्यं प्रभावे शुक्लतेजसोः ।।

३-ना-ना-१२७९ सामर्थ्येऽपि च गुह्यं तु योनौ रहसिदम्भयोः । ३-ना-ना-१२८० कूर्मे, शैलान्तरारोग्यसोढव्येषु नपुंसकम् । ।

३-ना-ना-१२८१ पुंसि स्याद्ङ्गभेदे च कुमार्गेऽस्वैरिपक्षयोः । ३-ना-ना-१२८२ स्त्रियां तु शाखानगरे छेकरूषितयोरपि ।।

३-ना-ना-१२८३ सत्यं तु शपथे तथ्ये साधुसप्तमलोकयोः । ३-ना-ना-१२८४ चोद्यं तु चोदनार्हे स्याद्द्भुतेऽपि गद्यते ।।

३-ना-ना-१२८५ पद्यः शूद्रे पुंनपुंसि सृतौ श्लोकेऽपि गद्यते । ३-ना-ना-१२८६ भव्यं सत्ये शुभेऽरोगे कर्मरङ्गतरौ स्त्रियाम् ।।

३-ना-ना-१२८७ शुद्धे करिकणायां च भेद्यवद्योग्यभाविनोः । ३-ना-ना-१२८८ छाया स्त्री सूर्यभार्यायां प्रतिबिम्बे अनातपे ।।

३-ना-ना-१२८९ पालनोत्कोचयोः कान्तिसच्छोभाकाव्यपङ्क्तिषु । ३-ना-ना-१२९० मध्यस्तु मध्यभागेऽल्पेऽवलग्नोपरिदेशयोः । ।

३-ना-ना-१२९१ न्याय्येऽपि प्रायस्तुल्ये च बाहौ मृत्यौ क्षये मृते । ३-ना-ना-१२९२ वयस्यनशने भूम्नि पण्यं विक्रयवस्तुनि ।।

३-ना-ना-१२९३ अट्टे च व्यभिचारे च पुण्यं धर्ममनोज्ञयोः । ३-ना-ना-१२९४ कृत्या क्रियादेवतयोः कुटिले कीर्त्यते त्रिषु ।।

३-ना-ना-१२९५ सामन्ते परसेनायाः पतौ चापि पुमानयम् । ३-ना-ना-१२९६ शल्यं शङ्कौ शरे वंशे योग्याभ्यासार्कयोरपि ।।

३-ना-ना-१२९७ अयि प्रश्ननुनययोश्चैत्यमायतने पुमान् । ३-ना-ना-१२९८ उद्यानपादपे बिम्बे बुघ्न्ये चार्यस्तु बाहुजे ।।

३-ना-ना-१२९९ मुख्यं भूपालान्त्यमण्योरयः पुंसि गतावपि ।

३-ना-ना-१३०० शुभावहे चाभ्युदये तार्क्ष्यश्च गरुडाश्वयोः । ।

३-ना-ना-१३०१ रथेऽनूरावश्वकर्णे पुंसि स्यान्न रसाञ्जने ।

३-ना-ना-१३०२ क्षयो रोगे गतौ हिंसागृहहानिषु कथ्यते ।।

३-ना-ना-१३०३ तिष्यःपुष्ये कलियुगे दीप्त्यामलकयोः स्त्रियाम् । ३-ना-ना-१३०४ पूज्यस्तु श्वशुरे मान्ये क्रतौ क्रुधि ।।

३-ना-ना-१३०५ द्रव्यं भव्ये त्रिषु द्युम्ने क्लीबे जतुनि भेषजे । ३-ना-ना-१३०६ गुणाश्रयेऽपि धिष्ण्यं तु शक्तौ भे निलयेऽनले ।।

३-ना-ना-१३०७ यज्ञे होत्रादिपुरतः स्थिते स्यात्पुंनपुंसकम् । ३-ना-ना-१३०८ क्तिया कर्मणि चेष्टायां चिकित्सायां च निष्कृतौ ।।

३-ना-ना-१३०९ आरम्भोपायशिक्षासु पूजनेऽपि च पुंसि वा । ३-ना-ना-१३१० संप्रधारणसंस्काररचनासु स्त्रियामपि । ।

३-ना-ना-१३११ धात्वर्थाख्यातयोर्भाग्यं शुभे चाशुभकर्मणोः । ३-ना-ना-१३१२ कल्यो निरामये सज्ये दक्षे साधौ कलासु च ।।

३-ना-ना-१३१३ प्रभातेऽपि नपुंसि स्यादर्थ्यसतु विबुधेऽपि च । ३-ना-ना-१३१४ आत्मवाननपेतार्थशिलाजतुषु पुस्ययम् ।।

३-ना-ना-१३१५ रूप्यः प्रशस्ते रूपेऽपि रजते तन्नपुंसकम् । ३-ना-ना-१३१६ सौम्यं तु सुन्दरे सोमदैवते पुंसि वा बुधे ।

३-ना-ना-१३१७ दस्युः स्यात्तस्करे पुंसि द्वेषणेऽपि प्रकीर्तितम् ।

इति द्व्यक्षरयान्ताः ।

३-ना-ना-१३१८ कुलायः परगेहे स्याल्लुलायो महिषेऽपि च । ३-ना-ना-१३१९ कौर्णेयो राक्षसे वायावीशानानलयोरपि ।।

३-ना-ना-१३२० तपःस्थिते फाल्गुनिके पुंस्येवाप्युच्छ्रयो नगे । ३-ना-ना-१३२१ उच्छ्रयेऽपि जघन्यस्तु सुरभे नीचकर्मणि । ।

३-ना-ना-१३२२ अधमेऽन्त्ये च लिङ्‌गे च पुंनपुंसकयोरपि । ३-ना-ना-१३२३ कषायो मधुरे स्निग्धे तिक्तेऽपि सुरभिण्यपि ।।

३-ना-ना-१३२४ अङ्‌गरागे च निर्यासे लोहिते च विलेपने । ३-ना-ना-१३२५ रञ्जकाश्मकशक्वाथविप्लवेषु च रूषिते ।।

३-ना-ना-१३२६ आश्चर्यहाहागन्धर्वनिगर्वेष्वपि विस्मयः । ३-ना-ना-१३२७ अनयो व्यसने दैवे चाशुभे चापदि स्मृतः ।।

३-ना-ना-१३२८ अत्ययोऽतिक्रमे कृच्छ्रे देषे दण्डविनाशयोः । ३-ना-ना-१३२९ अभिख्या कीर्तिमाहात्म्यनामशोभास्वपि स्त्रियाम् ।।

३-ना-ना-१३३० प्रलयो मृत्युकल्पान्तमूर्छालेषु प्रशस्यते । ३-ना-ना-१३३१ विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च । ।

३-ना-ना-१३३२ गोचरे च प्रबन्दादेर्यस्य ज्ञातस्य तस्य च । ३-ना-ना-१३३३ प्रत्ययः शपथे रन्ध्रे

विश्वासाचारहेतुषु ।।

३-ना-ना-१३३४ प्रथितत्वे च संनादावधीने ज्ञानशब्दयोः । ३-ना-ना-१३३५ गाङ्गेयः षण्मुखे भीष्मे जातरूपकशेरुणोः ।।

३-ना-ना-१३३६ मुस्तायां पुंनपुंसि स्यान्मङ्गल्यस्त मसूरके । ३-ना-ना-१३३७ बिल्वेऽश्वत्थे त्रायमाणे दधिकल्याणयोरपि ।।

३-ना-ना-१३३८ मनोज्ञै रोजनायां च प्रयङ्गुशतपुष्पयोः ।

३-ना-ना-१३३९ अधःपुष्पे शङ्खपुष्पे शमीशुक्लवचासु च ।।

३-ना-ना-१३४० हृदयं जीविते वित्ते भावे मनसि वक्षसि ।

३-ना-ना-१३४१ पुत्रे मातरि सौभाग्यं सौन्दर्ये शोभनेऽपि च । ।

३-ना-ना-१३४२ संपत्तिज्ञानमाहात्म्यपुण्यमुक्तिषु कथ्यते । ३-ना-ना-१३४३ शरव्यं सायके लक्ष्ये मृगयासाधनेऽन्यवत् ।।

३-ना-ना-१३४४ प्रणयः स्यात्परिचये याच्ञायां सौहृदेऽपि च ।

३-ना-ना-१३४५ निष्क्रिया बुद्धिसामर्थ्ये उन्मूले निर्गतेऽपि च ।।

३-ना-ना-१३४६ भुजिष्यः किंकरेऽपि स्याच्छ्वशुर्यौ स्यालदेवरौ ।

३-ना-ना-१३४७ पर्जन्यौ रसदब्देन्द्रौ भ्रातृव्यौ भ्रातृजद्विषौ ।।

३-ना-ना-१३४८ स्यादर्यः स्वामिवणिजोः पर्यायोऽवसरे क्रमे । ३-ना-ना-१३४९ निर्वाणे च प्रकारे च समयो नियमे पुमान् ।।

३-ना-ना-१३५० शापथाचारसिद्धान्तकालसंवित्सु पुंस्ययम् । ३-ना-ना-१३५१ संकेतेऽवसरे चाथ समवाये च संनयः । ।

३-ना-ना-१३५२ पश्चादवस्थायिबले संस्त्यायः संनिवेशने । ३-ना-ना-१३५३ संधातेऽवयवेऽपि स्याद्विशल्या तु महौषधे ।।

३-ना-ना-१३५४ त्रिपुटालाङ्गलीदन्तीगतशल्यामृतासु च । ३-ना-ना-१३५५ वक्तव्यो वचनीयेऽपि गर्ह्योऽधीने नपुंसकम् ।।

३-ना-ना-१३५६ वार्तिके चावदानी तु वाचि वल्ववलग्नयोः ।

इति त्र्यक्षरयान्ताः ।

३-ना-ना-१३५७ सां(सं)परायः स्मृतो युद्धे विपदुत्तरकालयोः ।

३-ना-ना-१३५८ भयेऽप्यनुशयो द्वेषे पश्चात्तापानुबन्धयोः ।।

३-ना-ना-१३५९ पौरुषेयो विकारे स्ायत्पुरुषस्य पदान्तरे । ३-ना-ना-१३६० पुंसां समूहवधयोः पुरुषेण कृतेऽपि च । ।

३-ना-ना-१३६१ व्यवसायः कारणे च व्यापारे कृषिकर्मणि । ३-ना-ना-१३६२ स्थूलोच्चयस्त्वसाकल्ये नागानां मध्यमे गते ।।

३-ना-ना-१३६३ गन्धशीले चानुशयो दीर्घद्वेषानुतापयोः । ३-ना-ना-१३६४ समवायः समूहे स्यादथोर्ध्वश्रयणेऽपि च ।।

३-ना-ना-१३६५ उन्नत्यां च विरोधे च स्यात्प्रतिश्रय आस्पदे ।

३-ना-ना-१३६६ साधारणे चाश्रयणे सभायां च प्रकीर्तितः ।।

३-ना-ना-१३६७ करतोयः सदानीरे नदीभेदेऽपि कथ्यते । ३-ना-ना-१३६८ अवश्ययो हिमे गर्वे बहुधान्योऽब्दपट्णयोः ।।

इति चतुरक्षरयान्ताः ।

३-ना-ना-१३६९ वृषाकपायी श्रीगौर्योरिन्द्राणीवह्निभार्ययोः ।

इति पञ्चाक्षरयान्ताः ।

३-ना-ना-१३७० रः पुमान्पावके कामे क्षये वज्रे शयेऽप्यरौ । ३-ना-ना-१३७१ रा स्त्रियां हेम्नि शालायामाशंसायां गतावपि । ।

३-ना-ना-१३७२ रं क्लीबे रुधिरि मूर्ध्नि ध्याने व्योमाण्डकुश्रिषु । ३-ना-ना-१३७३ त्रिषु स्याद्वक्त्रभययोर्विरसे त्यागतीक्ष्णयोः ।।

३-ना-ना-१३७४ रास्तु द्वयोर्ध्वनौ वर्णो रिशब्दस्तु स्त्रवे क्षये । ३-ना-ना-१३७५ स्त्री रुग्ज्वालेच्छयोः कान्तौ रुर्ना युद्धे भये ध्वनौ ।।

३-ना-ना-१३७६ स्त्री कामिनीवप्रिकयोर्दुः स्वर्णे पादपेऽपि च । ३-ना-ना-१३७७ श्रीर्वेषरचनावृक्षभासंपत्सरघासु च ।।

३-ना-ना-१३७८ वाणीलक्ष्मीलवङ्केषु विषे बिल्वेऽप्ययं त्रिषु । ३-ना-ना-१३७९ जटायां पूरणे स्रुक्स्त्री होमाङ्गे च गतौ स्त्रियाम् ।।

३-ना-ना-१३८० धूः स्याद्यानमुखे भारे कम्पने च तदिष्यते । ३-ना-ना-१३८१ दर्शनज्ञाननेत्रेषु दृक् स्त्री द्रष्टरि तु त्रिषु । ।

इत्येकाक्षररान्ताः ।

३-ना-ना-१३८२ वारः समूहेऽवसरे सूर्यादिदिवसे क्रमे । ३-ना-ना-१३८३ संभागे वरणे शीघ्रे हरे कूपकवृक्षके ।।

३-ना-ना-१३८४ मद्यपात्रे कुन्तले च द्वारे करिणि पुंस्ययम् । ३-ना-ना-१३८५ आवृत्तौ क्ली वारिघट्टे जलवारणवृन्दयोः ।।

३-ना-ना-१३८६ गजबन्धिनि वारी स्यान्मारौ मन्मथशात्रवौ । ३-ना-ना-१३८७ पत्रं तु वाहने पक्षे पर्णे स्याच्छरपक्षिणोः ।।

३-ना-ना-१३८८ पट्टे च तिलके पुंसि पात्रं भाजनयोग्ययोः । ३-ना-ना-१३८९ नाटकादिप्रवेशेर्हावध्वा(?) स्त्री राजमन्त्रिणि ।।

३-ना-ना-१३९० पर्णे स्रुवादौ विभवे न पुं तीरद्वयान्तरे । ३-ना-ना-१३९१ वित्तनिक्षिप्तपात्रे स्याञ्चित्रमालेख्य अद्भुते । ।

३-ना-ना-१३९२ मङ्गले तिलके हेम्नि व्योम्नि पद्मे नपुंसकम् । ३-ना-ना-१३९३ स्त्री त्वाखुपर्णीगोदुग्धासुभद्रादन्तिकासु च ।।

३-ना-ना-१३९४ नक्षत्राप्सरसर्पेषु पुंसि स्याद्वह्निसंज्ञके । ३-ना-ना-१३९५ कर्बुरे च रिपौ वृत्ते घने ध्वान्ते च दानवे ।।

३-ना-ना-१३९६ शैले चक्रे सुपर्णे च चारः स्यात्पिप्पलिद्रुमे । ३-ना-ना-१३९७ गतौ सर्पे च मन्थाने प्रियालस पर्श(श?)योरपि ।।

३-ना-ना-१३९८ नपुंस्युपाये रन्ध्रे च तारस्तरलशुद्धयोः । ३-ना-ना-१३९९ मुक्ताहारे नेत्रमध्ये नक्षत्रे शुद्धमौक्तिके ।।

३-ना-ना-१४०० गुरुसग्रीवभार्यायां बुद्दयोषित्यपि स्त्रियाम् । ३-ना-ना-१३०१ पाते च शेखरे स्वर्णे पलानामयुतद्वये ।।

३-ना-ना-१३०२ विविधे पुंनपुंसि स्यात्प्रणवे रजतेऽपि च । ३-ना-ना-१३०३ उच्चस्वरेऽप्यनवचि मित्नः स्नेहितसूर्ययोः ।।

३-ना-ना-१३०४ शूरः पराक्रमे सूर्ये वीरः शूरे रतिप्रिये । ३-ना-ना-१३०५ कविसामर्थ्ययोर्धीरश्चक्रं सैन्यरथाङ्गयोः ।।

३-ना-ना-१३०६ जलावर्ते च संसारे व्याजे यन्त्रान्तरेऽपि च । ३-ना-ना-१३०७ छद्मन्यस्त्रान्तरे संघे चक्रवाके पुमानयम् ।।

३-ना-ना-१३०८ तैलिकीये कोम्भकारे ग्रामजाले च राष्ट्रके । ३-ना-ना-१३०९ संग्रामे कुम्भकारस्य भाण्डे स्यात्साधनान्तरे ।।

३-ना-ना-१४१० चक्री तु पद्मनाभे च कुलाले चक्रवर्तिनि । ३-ना-ना-१४११ परः स्यादुत्तमानाप्तवैरिदूरेषु केवले । ।

३-ना-ना-१४१२ पुंनपुंस्यव्ययेऽपि स्यात्परमात्मन्यनात्मनि । ३-ना-ना-१४१३ पुरं तु नगरे गेहे देहे पुंसि तु गुग्गुलौ ।।

३-ना-ना-१४१४ पुराव्ययं पूर्वकाले पुरस्तात्पाटलीसुते ।

३-ना-ना-१४१५ प्रबन्धेऽपि चिरातीते निकटागामिकेऽपि च ।।

३-ना-ना-१४१६ बभ्रुर्विशाले नकुले कृशानौ यादवेऽपि च ।

३-ना-ना-१४१७ शूलिन्यब्जे पिङ्गले च यथावत्कथितो बुधैः ।।

३-ना-ना-१४१८ चन्द्रः शशाङ्के कर्पूरकम्पिक्लस्वर्णवारिषु । ३-ना-ना-१४१९ रम्ये शुभकरे क्लीबे दरोऽस्त्री भयरन्ध्रयोः ।।

३-ना-ना-१४२० शङ्खे चालिङ्गमल्पार्थे मात्रा कर्णादिभूषणे । ३-ना-ना-१४२१ औषधेऽवधृते कार्त्स्न्येऽक्षरावयववृत्तयोः । ।

३-ना-ना-१४२२ परिच्छेदे च मानेऽल्पे प्रत्ययेंऽशेऽवधारणे । ३-ना-ना-१४२३ वरोऽभीष्टे देवतादेः श्रेष्ठे जामातृषिद्गयोः ।।

३-ना-ना-१४२४ अथ काश्मीरजे वृत्ते वोढरीषत्प्रिये त्रिषु । ३-ना-ना-१४२५ त्रिफलायां शतावर्यां स्त्रीलिङ्गे स्याद्वरावरी ।।

३-ना-ना-१४६ शरं दध्नि जले पुंसि बाणे शैलेऽम्बरे खगे । ३-ना-ना-१४२७ दन्ते तेजनके मूले काशे कमठवंशयोः ।।

३-ना-ना-१४२८ कार्पासे चास्त्रशस्त्राश्रुशोणितेषु प्रकीर्तितम् । ३-ना-ना-१४२९ नेत्रं पथि गुणे वस्त्रे तरुमूले विलोचने ।।

३-ना-ना-१४३० नद्यां रथे मत्कुणे च वल्के नाव्यन्तरेऽपि च । ३-ना-ना-१४३१ त्रिषु स्यान्नेतरि क्षेत्रं शरीरे पुरगेहयोः । ।

३-ना-ना-१४३२ केदारयोनिभार्यासु सिद्धस्थानेऽपि चेष्यते । ३-ना-ना-१४३३ कारो वेधे निश्चये च बले यत्ने पतावपि ।।

३-ना-ना-१४३४ तुषाराद्रेः स्त्रियां दूत्यां बन्धने बन्धनालये । ३-ना-ना-१४३५ प्रसेवके कालिकायां हेतावथ करः पुमान् ।।

३-ना-ना-१४३६ नभांशुहस्तकरणोपधाघनशिलासु च । ३-ना-ना-१४३७ राजदेयेभशुण्डायां कर्तर्यथ कुलेऽचले ।।

३-ना-ना-१४३८ गोत्रं नाम्नि वने मार्गे चित्रे चोरे भुवि स्त्रियाम् । ३-ना-ना-१४३९ संभावनीये गोवृन्दे बले त्रातरि च त्रिषु ।।

३-ना-ना-१४४० सारं वरेण्ये वानीरे धने च क्वचिदिष्यते । ३-ना-ना-१४४१ द्वारं पुरान्निर्गमनेऽप्युपाये रन्ध्रमुच्यते । ।

३-ना-ना-१४४२ गौरः पीतेऽरुणे श्वेते विरुद्धे मृगमोदयोः । ३-ना-ना-१४४३ आधिक्येऽपि नपुं पद्मकेसरे सितसर्षपे ।।

३-ना-ना-१४४४ स्त्रियां शशिनि गौरी तु नागकन्योमयोर्मता । ३-ना-ना-१४४५ रोचनीरचनीपिङ्गीप्रियङ्गुवसुधासु च ।।

३-ना-ना-१४४६ नदीभेदे च वरुणयोषित्यथ मखे वने । ३-ना-ना-१४४७ आच्छादने सदादाने दम्भे सद्रक्षके त्रिषु ।।

३-ना-ना-१४४८ सादने चं क्वचित्पात्रे संदेये सत्रमव्ययम् । ३-ना-ना-१४४९ गृहे पशौ च तन्त्रं तु करणे च परिच्छदे ।।

३-ना-ना-१४५० तन्तुवाये प्रधाने च शास्त्रसिद्धान्तयोरपि । ३-ना-ना-१४५१ तथाष्टीसायकोपाये श्रुतिशाखान्तरेऽपि च । ।

३-ना-ना-१४५२ कुडुम्बार्थे च कर्तव्यतायां मुख्ये घटोत्तमे । ३-ना-ना-१४५३ सिरायाममृतायां च तन्त्री वीणागुणे तनौ ।।

३-ना-ना-१४५४ शुत्रः काव्येऽनले ज्येष्ठे केतौ शुभ्राक्षिरोगयोः ।

३-ना-ना-१४५५ क्लीबं क्षेत्रे महेन्द्रे च कुटजेऽर्जुनभूरुहे ।।

३-ना-ना-१४५६ भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे ।

३-ना-ना-१४५७ वृषे पुंसि तिथौ रुद्रे वाच्यवच्छ्रेष्ठसाधुनोः ।।

३-ना-ना-१४५८ गजभेदे नृभेदे च मन्दाकिन्यां स्त्रियामपि । ३-ना-ना-१४५९ कट्फलानन्तकृष्णासु रास्नायामथ कथ्यते ।।

३-ना-ना-१४६० क्षुद्रस्त्रिष्वधमे क्रूरे स्वल्पे कृपणवर्णयोः । ३-ना-ना-१४६१ व्यङ्गावेश्यानटीकण्टकारिकासरघासु च । ।

३-ना-ना-१४६२ स्त्रियां, पुंसि दरिद्रे स्यात्क्षुद्रकर्मणि चेष्यते । ३-ना-ना-१४६३ क्षौद्रं मधुनि पानीये चेन्द्रः शतमखार्कयोः ।।

३-ना-ना-१४६४ योधेऽन्तरात्मनि पतौ श्रेष्ठेऽपि स्यात्फणिज्जके ।

३-ना-ना-१४६५ स्वरुर्वज्रे यूपखण्डे यज्ञाणत्रे शिलीमुखे ।।

३-ना-ना-१४६६ निषादादावुदात्तादावकारादावपि स्वरः । ३-ना-ना-१४६७ गुरुर्बृहस्पतौ पितृमात्रादौ दुर्भरेऽधिके ।।

३-ना-ना-१४६८ निषेकादिकृतिस्थूले त्रिषु मात्राद्वयेऽपि च । ३-ना-ना-१४६९ हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु ।।

३-ना-ना-१४७० सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च । ३-ना-ना-१४७१ स्वर्णे मणौ च कपिले त्रिष्वथ प्राज्यहोमयोः । ।

३-ना-ना-१४७२ विधिदामोदरेशेषु भूरिश्चन्द्रेन्द्रयोरपि ।

३-ना-ना-१४७३ धात्री जनन्यामलकीवसुमत्युपमातृषु ।।

३-ना-ना-१४७४ वप्रः प्रासादतटयोश्च साले सानौ विदारणे । ३-ना-ना-१४७५ रन्ध्रं छिद्रे निम्नगेऽवकाशे समयदोषयोः ।।

३-ना-ना-१४७६ पार्श्वेऽथ कन्दलीतुलस्यो रिन्ध्रः(?) स्याद्भरो धरे।

३-ना-ना-१४७७ भारे लाभे दुर्भरे च रागभेदे रणेऽपि च ।।

३-ना-ना-१४७८ वज्रं तु कुलिशे शस्त्रेऽप्यशनौ रचनान्तरे । ३-ना-ना-१४७९ मणिभेदे सूचिभेदे योगे चामलके स्त्रियाम् ।।

३-ना-ना-१४८० वज्रवल्ल्यां गळूच्यां स्यात्सुरः सूर्येऽमरे पुमान् ।

३-ना-ना-१४८१ सुरा देवस्त्रियां मद्ये शारिः पर्याणपक्षिणोः । । १४८०

३-ना-ना-१४८२ क्लीबे द्यूतगुणेऽपि स्यादग्रमालम्बनेऽधिके । ३-ना-ना-१४८३ पुरोपरिप्रान्ताद्येषु न पुंसि प्रमिताशने ।।

३-ना-ना-१४८४ मरुर्निर्जलदेशेऽद्रावद्रिः शैलेऽर्कवृक्षयोः । ३-ना-ना-१४८५ वृत्रस्तु दानवे शत्रौ ध्वान्ते चक्रघने गिरौ ।।

३-ना-ना-१४८६ अस्त्रस्तु कुन्तले कोणे रक्ते नेत्राम्बुनि समृतः । ३-ना-ना-१४८७ शारो वायौ नरी (?) पुंसि कर्बुरे वाच्यलिङ्गकः ।।

३-ना-ना-१४८८ मन्त्रो वेदे गुप्तवादे देवादीन्साधनेऽपि च । ३-ना-ना-१४८९ बभ्रुर्हिरण्यगर्भेऽग्नौ विपुले नकुलेऽपि च ।।

३-ना-ना-१४९० पिङ्गले त्रिषु विष्णौ चाथो सारस्तु वरे त्रिषु । ३-ना-ना-१४९१ क्लीबे न्याये वले पुंसि स्थिरांशेऽपि तथा भवेत् । ।

३-ना-ना-१४९२ यात्रा स्याद्यापने याने देवतादिमहोत्सवे । ३-ना-ना-१४९३ इरा भूवाक्सुराप्सु स्यात्स्त्रियामप्सरयोषिति ।।

३-ना-ना-१४९४ तन्द्री निद्राप्रमीले च तन्द्रापि च समार्थके ।

३-ना-ना-१४९५ मात्रा परिच्छदेऽल्पे च परिमाणे च पुंसि वा ।।

३-ना-ना-१४९६ कार्त्स्न्यऽवधारणे क्लीबे स्त्रियां स्याद्भूषणे घने ।

३-ना-ना-१४९७ वर्णवृत्तांशयोश्चापि खरो बालेयवर्षयोः ।।

३-ना-ना-१४९८ निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः । ३-ना-ना-१४९९ मुखाग्रे क्रोडहलयोः पोत्रं क्षीरं पयोम्बुनोः ।।

३-ना-ना-१५०० राष्ट्रेऽस्त्री विषये चोपद्रवे व्यग्रस्तु नाकुले । ३-ना-ना-१५०१ अव्यासक्ते च देशे च क्रूरौ कठिननिर्दयौ । ।

३-ना-ना-१५०२ मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः । ३-ना-ना-१५०३ धारा संपातपुरयोर्नरोऽजे मानवेऽर्जुने ।।

३-ना-ना-१५०४ तिरोऽन्तर्धौ तिर्यगर्थे ऊरी विस्तारसंमतौ ।

इति द्व्यक्षररेफान्ताः ।

३-ना-ना-१५०५ शृङ्गारः सुन्दरे नाट्ये रसेऽपि गजमण्डने । ३-ना-ना-१५०६ नपुंसि चूर्णसिन्दूरलवङ्ककुसुमेषु च ।।

३-ना-ना-१५०७ गान्धारः स्वरभेदे स्यान्न स्त्री देशे रतान्तरे । ३-ना-ना-१५०८ मुर्मुरस्तु तुषाग्नौ च किशोरस्तुरगेऽर्भके ।।

३-ना-ना-१५०९ कुटीरं क्षुद्रभेदे स्याच्चत्वरं तु चतुष्पथे । ३-ना-ना-१५१० शीघ्रे च शम्बरौ दैत्यभेदे क्लीबे जले पुमान् । ।

३-ना-ना-१५११ विष्फारो धनुषः स्वाने प्रभूते जृम्भितेऽपि च । ३-ना-ना-१५१२ विधुरस्त्वरितेऽधीरे कष्टविश्लेषयोरपि ।।

३-ना-ना-१५१३ नागरे कौरवामात्ये विवशे विकलेऽन्यवत् । ३-ना-ना-१५१४ अपत्नीके सुन्दरी तु पल्लवे विद्रुमस्त्रियोः ।।

३-ना-ना-१५१५ सिन्दूरं तु शिलाभेदे नागसंभववृक्षयोः । ३-ना-ना-१५१६ केसरोऽस्त्री स्कन्धरोम्णि किञ्जल्के वकुले तु ना ।।

३-ना-ना-१५१७ पुंनागे च नपुंसि स्यान्नागकेसरहिङ्गुनोः । ३-ना-ना-१५१८ कर्परस्तु कपाले स्याच्छस्त्रे घटकपालके ।।

३-ना-ना-१५१९ कान्तारो दुर्गमे मार्गे दुर्भिक्षे पातके वने । ३-ना-ना-१५२० संस्तरः प्रस्तरे यज्ञे बर्बरः पामरे पुमान् ।।

३-ना-ना-१५२१ कुन्तलानां च विन्यासनीवृदन्तरयोरपि । ३-ना-ना-१५२२ स्त्रियां तु कञ्जिकायां च पुष्पदेवेन्द्रयोरपि ।।

३-ना-ना-१५२३ बन्धुरं मङ्गले रम्ये नम्रे हंसे तु पुंसि तत् । ३-ना-ना-१५२४ बन्धूके च विहङ्गे च बन्धुरापण्ययोरपि ।।

३-ना-ना-१५२५ दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः । ३-ना-ना-१५२६ करीरः कलशे वृक्षभेदे वंशाङ्कुरेऽपि च ।।

३-ना-ना-१५२७ करीरूश्चीरिकायां च दन्तमूले च दन्तिनाम् । ३-ना-ना-१५२८ करीरं कोणमध्यस्थपुलिने दर्दुरे तटे ।।

३-ना-ना-१५२९ शर्करा खण्डविकृतावुपलाकर्परांशयोः । ३-ना-ना-१५३० शर्करान्वितदेशे च रुग्भेदे शकलेऽपि च । ।

३-ना-ना-१५३१ कावेरी स्यात्सरिद्भेदे पण्यनारीहरिद्रयोः । ३-ना-ना-१५३२ गाङ्गेरी बृहतीर्हिंसामक्षिकामातृकेषु च ।।

३-ना-ना-१५३३ पिञ्जरं कनके राजभेदे पीते च पुंसि तत् ।

३-ना-ना-१५३४ शिखरं शैलवृक्षाग्रे रक्षापुलककोटिषु ।।

३-ना-ना-१५३५ पक्वजाजिमबीजाभमाणिक्यकलशेषु च ।

३-ना-ना-१५३६ पुंलिङ्गे तु शिवाभेदे खट्वाङ्गे द्वारपालके ।।

३-ना-ना-१५३७ ईश्वरो दैवते चाढ्ये शंभौ स्वामिनि मन्मथे । ३-ना-ना-१५३८ समर्थेऽब्देश्वरीच्छायां पार्वत्यामीश्वरा मता ।।

३-ना-ना-१५३९ तमिस्त्रं तिमिरे रोगे तमिस्त्रा तामसीनिशि । ३-ना-ना-१५४० कुमारो बालके स्कन्दे पुत्रे नामनि वाच्यवत् ।।

३-ना-ना-१५४१ नमेरुः सुरपुंनागे सुमेरुः कनकाचले । ३-ना-ना-१५४२ आधार आलवालेऽम्बुबन्धे च किरणेऽपि च ।।

३-ना-ना-१५४३ स्थानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम् । ३-ना-ना-१५४४ परिधानेऽवधौ मध्येऽन्तरात्मनि नपुंसके ।।

३-ना-ना-१५४५ विनावसरबाह्येषु चाम्बरं व्योम्नि वाससि । ३-ना-ना-१५४६ सुगन्धिनि च कार्पासे गोपुरं द्वारमात्रके ।।

३-ना-ना-१५४७ पुस्तके च पुरद्वारे पुरे सौधेन्द्रियेऽपि च । ३-ना-ना-१५४८ शारीरः क्षोभकरणे शुके शकुनिकान्तरे । ।

३-ना-ना-१५४९ युद्धार्थे गजपर्याणे व्यवहारे च वाच्यवत् ।

३-ना-ना-१५५० आसारः स्यात्प्रहरणे वेगे वृष्टौ सुहृद्बले । । ३-ना-ना-१५५१ प्रवेशे च प्रसारे च कुञ्जरः कुन्तले पुमान् । ३-ना-ना-१५५२ मस्तके भूषणे नागे पुष्करो द्वीपसर्पयोः ।।

३-ना-ना-१५५३ तीर्थे खड्गफले तोयकरिहस्ताग्रयोरपि । ३-ना-ना-१५५४ वाद्यभाण्डमुखे पद्मे व्योम्नि मार्गे तिथावपि ।।

३-ना-ना-१५५५ विहारो भ्रमणे स्पन्दे लीलायां सुरतालये । ३-ना-ना-१५५६ रुधिरोऽङ्कारके छागे कुङ्कुमे शोणिते पुमान् ।।

३-ना-ना-१५५७ प्रकारो भेदसादृश्यकृतिष्वस्त्रीङ्गितेऽपि च । ३-ना-ना-१५५८ द्वापरो युगभेदे स्यात्संशयेऽपि पुमान्भवेत् ।।

३-ना-ना-१५५९ किंशारुर्धान्यशूकेषुकङ्कपक्षिषु कथ्यते । ३-ना-ना-१५६० प्रदरो भङ्गनारीरुग्बाणभीर्दारणेषु च ।।

३-ना-ना-१५६१ दीर्णे स्वयं चावटे स्यात्तूवरस्तु प्रचक्षते । ३-ना-ना-१५६२ अजातशृङ्गेऽप्यश्मश्रौ संगरस्तु विषापदोः ।।

३-ना-ना-१५६३ शमीफले क्रियाकारे प्रतिज्ञासंविदाजिषु । ३-ना-ना-१५६४ विष्टरो विटपौ दर्भमुष्टौ पीठाद्य आसने ।।

३-ना-ना-१५६५ मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु । ३-ना-ना-१५६६ क्रोधे च मक्षिकायां कलत्रं श्रोणिभार्ययोः ।।

३-ना-ना-१५६७ नृपतिप्रभृतीनां तु दुर्गस्थानेऽपि च स्मृतम् । ३-ना-ना-१५६८ अजीरं विषये काये चाङ्गणेऽपि तदिष्यते ।।

३-ना-ना-१५६९ अक्षरं स्याद्ब्रह्मणि च वर्णे मोक्षेऽप्यनाशने । ३-ना-ना-१५७० गह्वरं तु गुहादम्भनिकुञ्जगहनेष्वपि ।।

३-ना-ना-१५७१ औशीरं चामरे दण्डे चासने शयने भवेत् । ३-ना-ना-१५७२ पिठरो मन्थदण्डे स्यात्स्थाल्यां स्त्री मुस्तहिंस्रयोः ।।

३-ना-ना-१५७३ नागरः सुरते संज्ञा चान्तर्जाते नपुंसकम् ।

३-ना-ना-१५७४ राजीवकन्दे चर्यां(?) प्रवीणाकुत्सितयोर्विना ।।

३-ना-ना-१५७५ शार्वरं त्वन्धतमसि घातुके भेद्यलिङ्गकम् ।

३-ना-ना-१५७६ शबरे कुञ्जरे वाच्यलिङ्गः स्याद्धिसनेऽपि च ।।

३-ना-ना-१५७७ कुक्षौ तु जठरो न स्त्री त्रिषु वृद्धकाठोरयोः । ३-ना-ना-१५७८ आधरस्तु निकृष्टौष्ठायादेशेष्वपि(?) वाच्यवत् ।।

३-ना-ना-१५७९ एकाग्रमेकातानेऽनाकुले चोत्तरमुच्यते । ३-ना-ना-१५८० उपर्युदीच्यश्रेष्ठेषु प्रतिवाक्येऽप्यपुङ्गके (?) १५८०

३-ना-ना-१५८१ विराटतनये ऋक्षे स्त्रियां पुंसि च शस्यते । ३-ना-ना-१५८२ मधुरस्तु प्रिये स्वादौ सरभेदे पुरे स्त्रियाम् ।।

३-ना-ना-१५८३ उदारो दातृमहतोरितरस्त्वन्यनीचयोः । ३-ना-ना-१५८४ उररी चोररी द्वे च विस्तारेऽङ्गीकृतेऽपि च ।।

३-ना-ना-१५८५ विकारि (री?) वर्षेऽङ्गहीने शर्वरी रात्रिवर्षयोः ।

३-ना-ना-१५८६ कबरी केशपाशे च हिङ्गुपत्रेऽपि च द्वयोः ।।

इति त्र्यक्षररेफान्ताः ।

३-ना-ना-१५८७ अर्धचन्द्रस्तदाकारे बाणे बर्हे शिखण्डिनः । ३-ना-ना-१५८८ शतपत्रं पक्षिभेदे दारुडाते कुशेशये ।।

३-ना-ना-१५८९ घनसारस्तु कर्पूरे महामेघे च चन्दने । ३-ना-ना-१५९० अलंकारः शास्त्रभेदे मण्डनेऽथ जवे पुमान् ।।

३-ना-ना-१५९१ उच्छ्राये चातिमात्रः स्यान्मद्गुरौ तु भयंकरः । ३-ना-ना-१५९२ भये सहचरी तु स्यादनुचारे सहाशने ।।

३-ना-ना-१५९३ तुलाधरस्तु वणिजि श्लक्ष्णराशौ दिवाकरे । ३-ना-ना-१५९४ संप्रहारो हृते युद्धेऽश्वतरः सुरवाजिनोः ।।

३-ना-ना-१५९५ कुलाङ्कुरो मूलदेशे चोरे करवटेऽपि च । ३-ना-ना-१५९६ धार्तराष्ट्रो हंसभेदे दुर्योधनकुलेऽपि च ।।

३-ना-ना-१५९७ गिरिसारं तु लोहेऽपि लक्ष्मीपुत्रस्तु मन्मथे । ३-ना-ना-१५९८ धनाढ्येऽश्वे परिकरः पर्यङ्कपरिवारयोः ।।

३-ना-ना-१५९९ प्रगाढे गात्रिकाबन्धे व्राते चारम्भसंज्ञयोः । ३-ना-ना-१६०० हस्तसूत्रे प्रतिसरो माल्यमन्त्रविशेषयोः । ।

३-ना-ना-१६०१ विभूषणे सैन्यपृष्ठे प्राणशुद्धौ च कङ्कणे । ३-ना-ना-१६०२ पयोधरः स्तने मेघे नाळिकेरे च सागरे ।।

३-ना-ना-१६०३ इक्षुभेदे कशैरौ च धेनौ च परिचक्ष्यते । ३-ना-ना-१६०४ अवस्करस्तु विष्ठायां गुह्ये चाडम्बरोऽस्त्रियाम् ।।

३-ना-ना-१६०५ तूर्यशब्दे च संरम्भे गजेन्द्राणां च गर्जिते । ३-ना-ना-१६०६ अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ।।

३-ना-ना-१६०७ स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ।

३-ना-ना-१६०८ द्वारि द्वाःस्थे प्रतीहारः प्रतिहार्यप्यनन्तरे ।।

३-ना-ना-१६०९ राजस्त्रीणामलंकारः कृतायामपि च स्त्रियाम् ।

३-ना-ना-१६१० दुरोदरो द्यूतकारे पणे द्यूते नपुंसि वा ।।

३-ना-ना-१६११ अरुष्करो घातुके च व्रणकार्येऽप्यनुत्तरः । ३-ना-ना-१६१२ नोदीच्यां नोपरि श्रेष्ठे चोपह्वरमुदाहृतम् ।।

३-ना-ना-१६१३ हायने सर्वधारी स्याद्रुधिरोद्गारि वत्सरे ।

इति चतुरक्षररेफान्ताः ।

३-ना-ना-१६१४ लः खण्डने त्रिष्वाधाने स्त्री नेन्द्रे लवणे तु लम् ।

इत्येकाक्षरलान्ताः ।

३-ना-ना-१६१५ हली कृषीकले पुंसि कृष्णस्यैवाग्रजन्मनि । ३-ना-ना-१६१६ पलं स्यान्मत्सरे मांसे मल्लो मल्लकशक्तयोः ।।

३-ना-ना-१६१७ स्थली खनित्रे कुद्दाले क्षेत्रभेदे नपुंस्यपि । ३-ना-ना-१६१८ खलो नीचे दुर्जने च कुलटायामपि स्त्रियाम् ।।

३-ना-ना-१६१९ हर्षितेऽव्यक्तमधुरे रवे स्याद्वाच्यलिङ्गकः । ३-ना-ना-१६२० कला शिल्पे कालभेदे चन्द्रांशे शकलेऽपि च ।।

३-ना-ना-१६२१ वित्तवृद्धौ च मूले च मुषुमाविद्ययोस्तथा । ३-ना-ना-१६२२ तत्तदागमसिद्धासु गुरुणि स्त्रीरजस्यपि ।।

३-ना-ना-१६२३ कलं शुक्रे वाच्यलिङ्गमव्यक्तमधुरे ध्वनौ ।

३-ना-ना-१६२४ कामशास्त्रे च संगीते मन्त्रशास्त्रेऽपि च स्त्रियाम् ।।

३-ना-ना-१६२५ कलिः स्यात्कलहे शूरे देशेऽप्यन्त्ययुगे पुमान् । ३-ना-ना-१६२६ पापे च कैतवे शोके कालस्तु यमकृष्णयोः ।।

३-ना-ना-१६२७ महाकालेऽपि समये मृत्युमञ्जिष्ठयोः पुनः । ३-ना-ना-१६२८ काली गौर्यां क्षीरकीटे नील्यां त्रिद्याति(?)च स्त्रियाम् ।।

३-ना-ना-१६२९ तलं क्लीबे तालतरौ पेटे ज्याघातवारणे । ३-ना-ना-१६३० खड्गमुष्टौ वितस्तौ च स्वरूपेऽधरपृष्ठयोः । ।

३-ना-ना-१६३१ तालः कालक्रियामाने करास्फोटद्रुभेदयोः । ३-ना-ना-१६३२ वाद्यभाण्डेऽपि कांस्ये च तालं तु हरितालके ।।

३-ना-ना-१६३३ बलं गन्धे रसे धूपे स्वामिनि स्थौल्यसैन्ययोः । ३-ना-ना-१६३४ शक्त्याभिमानयोः क्लीबे पुंसि तु स्याद्धलायुधे ।।

३-ना-ना-१६३५ बलिस्तु दैत्यभेदे च बलवत्काकयोः पुमान् । ३-ना-ना-१६३६ अस्त्री चामरदण्डे च त्वक्कोचे गृहदारुणि ।।

३-ना-ना-१६३७ नैवेद्ये गन्धके पाणौ वली चापि प्रकीर्तितः । ३-ना-ना-१६३८ वाट्यालके बला तूक्ता वलं चोन्मादमानयोः ।।

३-ना-ना-१६३९ बालो मूर्खेऽर्भके व्यालग्राहावश्वेभपुच्छयोः । ३-ना-ना-१६४० ह्रीबेरकेशयोर्बाला योषिद्भूषात्रुटीषु च । ।

३-ना-ना-१६४१ शुक्लः शुभ्रे रेतसि च रोगभेदे च वत्सरे । ३-ना-ना-१६४२ कुलं वर्गे समूहे च देहे गोत्रे गुणेऽपि च ।।

३-ना-ना-१६४३ सजातीये जनपदे मन्दिरे च नपुंसकम् । ३-ना-ना-१६४४ मूलं तु रोगे नक्षत्रे शिफायामन्तिकाद्ययोः ।।

३-ना-ना-१६४५ स्वीये वीकृते चाथ जालमानायवृन्दयोः । ३-ना-ना-१६४६ गवाक्षे क्षारके दम्भे कोशतक्यां स्त्रियां भवत् ।।

३-ना-ना-१६४७ वेला काले जलनिधेस्तीरनीरविकारयोः । ३-ना-ना-१६४८ अक्लिष्टमरणे रागे सीम्नि वारबुधस्त्रियोः ।।

३-ना-ना-१६४९ मर्यादयां चाथ फलं फले मासे धनेऽपि च । ३-ना-ना-१६५० भोगे लाभे च निष्पत्तौ बीजबाणाग्रयोरपि ।।

३-ना-ना-१६५१ सस्ये हेतुकृते जातिफले च फलकेऽपि च । ३-ना-ना-१६५२ कर्कोल त्रिफलावार्क्षु मुक्ताधान्यकणेषु च ।।

३-ना-ना-१६५३ मुष्टौ क्रषचतुष्के स्यात्पलं चापि प्रयोजने । ३-ना-ना-१६५४ लीला तु विभ्रभे हेतौ क्रियायां भाविलासयोः ।।

३-ना-ना-१६५५ कीलो धूर्ते रथाक्षे च शङ्कौ ज्वालामहीध्रयोः ।

३-ना-ना-१६५६ स्त्रियां कपोमिनिर्घाते प्रहारे रतिसंभवे ।।

३-ना-ना-१६५७ पुलः स्यात्पुलके चापि विशाले महतीष्यते । ३-ना-ना-१६५८ खिलमप्रहते शून्ये उत्तप्तौ केवले त्रिषु ।।

३-ना-ना-१६५९ मौलिः किरीटे चूडायामशोके संयते कचे । ३-ना-ना-१६६० पीलुर्गजे शरे पुष्पे परमाणुद्रुभेदयोः । ।

३-ना-ना-१६६१ व्यालः पुंसि शठे सर्पे श्वपदे दुष्टकुञ्जरे । ३-ना-ना-१६६२ मलोऽस्त्री पापविट्किट्टकृपणेषु

त्रिषूच्यते ।।

३-ना-ना-१६६३ वसायामपि शूलं तु ध्वजे योगान्तरे रुजि । ३-ना-ना-१६६४ आयुधे विक्रये वध्याशङ्कौ गर्भेऽपि योषिताम् ।।

३-ना-ना-१६६५ आलिः पङ्क्तौ वयस्ये स्याद्भृङ्गे पालिस्तु पुंसि वा ।

३-ना-ना-१६६६ अंशभेदे च पङ्कौ च संजातश्मश्रुयोषिति ।।

३-ना-ना-१६६७ अस्त्रे च कर्णतालाग्रे यूके प्रस्थे च कथ्यते । ३-ना-ना-१६६८ शील स्वभावे सद्वृत्ते चेलं वस्त्रेऽधमे त्रिषु ।।

३-ना-ना-१६६९ जिषि (?) स्त्रियामथ सतूलं पीवरे च जडेऽपि च ।

३-ना-ना-१६७० एला सूक्ष्मे त्रुटौ स्त्री स्याल्लोलच्चलसतृष्णयोः ।।

३-ना-ना-१६७१ भल्लो भल्लूकशरयोर्वार्तासंभाव्ययोः किल । ३-ना-ना-१६७२ अलं भूषणपर्याप्तिशक्तिवारणवाचके ।।

३-ना-ना-१६७३ निषेधवाक्यालङ्कारेजिज्ञासानुनये खलु ।

इति व्यक्षरलान्ताः ।

३-ना-ना-१६७४ कुण्डलं वलये पाशे क्लीबे कर्णविभूषणे । ३-ना-ना-१६७५ गळूच्यां स्त्री काञ्चनाद्रौ सर्पे पुंसि तु कुण्डली ।।

३-ना-ना-१६७६ मण्डलं वर्तुले राष्ट्रे कुष्टे द्वादशराजके । ३-ना-ना-१६७७ देवतायतने बिम्बे स्थले वृन्दे पुमाञ्शुनि ।।

३-ना-ना-१६७८ मेखला खड्गबन्धे स्यात्काञ्जीशैलनितम्बयोः ।

३-ना-ना-१६७९ मुञ्जरज्जौ शाड्वलस्तु पुंसि कर्दमदेशयोः ।।

३-ना-ना-१६८० अचलः पर्वते वृक्षे कीलावसुधयोः स्त्रियाम् ।

३-ना-ना-१६८१ चञ्चलः कामुके वायौ लक्ष्म्यां तटिति च स्त्रियाम् । ।

३-ना-ना-१६८२ जाङ्गलं मांसमिलिते स्त्रियां स्याच्छारदीजले ।

३-ना-ना-१६८३ शृङ्खला त्रिषु संदर्भविशेषे निगलेऽपि च ।।

३-ना-ना-१६८४ गोपालः पशुपाले स्याद्वैकुण्ठे च जितेन्द्रिये ।

३-ना-ना-१६८५ सृगालो दैत्यभेदे च क्षुद्रशत्रौ च जम्बुके ।।

३-ना-ना-१६८६ न्यूने हीने च विकलो दुष्टे च ननियन्त्रके । ३-ना-ना-१६८७ नकुलः पाण्डुतनये सर्पभुक्कुलहीनयोः ।।

३-ना-ना-१६८८ उत्तालो भणिणे मत्ते विलालो विकटस्थले । ३-ना-ना-१६८९ लाङ्गली नालिकेरे च जामदग्नौ च पुंस्ययम् ।।

३-ना-ना-१६९० लाङ्गूलं वानरे पुच्छे फल्गुन्यां लवली स्त्रियाम् ।

३-ना-ना-१६९१ अनलं राज्ञि नाले च पुंस्यग्न्यौषधिभेदयोः । ।

३-ना-ना-१६९२ दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके । ३-ना-ना-१६९३ उपलः प्रस्त्रे रत्ने चाश्मरूपमृदि स्त्रियाम् ।।

३-ना-ना-१६९४ ऐक्षवे चपलः शीघ्रे दुर्नीतावस्थिते रसे । ३-ना-ना-१६९५ स्त्रियां विद्युति चाभीलः कृच्छ्रे भीतेऽथ वातुलः ।।

३-ना-ना-१६९६ वातसहेऽपि वात्यायां पुंस्युन्मत्तेऽपि च त्रिषु ।

३-ना-ना-१६९७ कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे ।।

३-ना-ना-१६९८ कुरङ्गभेदे कमलः स्त्रियां तु श्रीवरस्त्रियोः । ३-ना-ना-१६९९ कम्बलो नागराजे चसास्नायां मृगरोमजे ।।

३-ना-ना-१७०० गजप्रवरणे चैव निष्कला विगतार्तवा । ३-ना-ना-१७०१ कलाहीने चावलिस्तु रेखायामपि कथ्यते ।।

३-ना-ना-१७०२ बहुलो वह्न्यसितयोः कृत्तिकायां गवि स्त्रियाम् । ३-ना-ना-१७०३ बलायां कृष्णपक्षे च कीलालं शोणितेऽम्भसि ।।

३-ना-ना-१७०४ पटिलं नेत्ररोगे च परिच्छेदसमूहयोः । ३-ना-ना-१७०५ तिलके पुंनपुंसि स्याच्छदिः स्त्री पटलीति च ।।

३-ना-ना-१७०६ पातालं वडवाग्नौ स्याद्बलिसद्मनि चेष्यते । ३-ना-ना-१७०७ कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।।

३-ना-ना-१७०८ निर्णीते केवलमिति स्त्रिलिङ्गं त्वेककृत्स्नयोः । ३-ना-ना-१७०९ पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।।

३-ना-ना-१७१० भारवाहे प्रवालं तु वीणादण्डे च विद्गुमे । ३-ना-ना-१७११ अङ्कुरे स्यात्किसलये करालो दन्तुरे पुमान् । ।

३-ना-ना-१७१२ तुङ्गेऽथ पेशलो दक्षे चारौ च मुसले हरे । ३-ना-ना-१७१३ मुदुले कोकिले प्रोक्त अनिलस्तु प्रभञ्जने ।।

३-ना-ना-१७१४ विमलो निर्मले शुभ्रे हिन्तालः पादपान्तरे । ३-ना-ना-१७१५ उन्नते उत्थितेऽपि स्यादुत्तालः परिकीर्तितः ।।

३-ना-ना-१७१६ शाण्डिल्यो मुनिभेदे च शिल्पे च परिकीर्तितः ।

इति त्र्यक्षरलान्ताः ।

३-ना-ना-१७१७ गण्डशैलः कपोले च द्रोणपाषाणभेदयोः । ३-ना-ना-१७१८ महानीलो भृङ्गराजे मणिनागविशेषयोः ।।

३-ना-ना-१७१९ उत्कोचेऽस्त्री कटफलः कर्मशीलस्तु कर्मठे । ३-ना-ना-१७२० अनुकूलस्त्वनादेशे विधेयेऽनुगुणेऽपि च । ।

३-ना-ना-१७२१ महाबली दैत्यभेदे बलबत्यपि कथ्यते । ३-ना-ना-१७२२ नपङ्क्तौ विष्णुदाम्नि वनमाला प्रकीर्तिता ।।

३-ना-ना-१७२३ गोलाङ्गूलः कृष्णकपौ पशुपुच्छे नपुंसकम् । ३-ना-ना-१७२४ तृणशालो राजताल्यां वेणौ रतिकिलः शुनि ।।

इति चतुरक्षरलान्ताः ।

३-ना-ना-१७२५ वः पुमान्सानत्वने वायौ संयमे वरुणे स्मरे । ३-ना-ना-१७२६ वा स्याद्विकल्पोपमयोरेवार्थे ।।

३-ना-ना-१७२७ विश्चक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि ।

३-ना-ना-१७२८ विट् पुरीषे जने वैश्ये क्रमात्पुंसि द्वयोः स्त्रियाम् ।।

३-ना-ना-१७२९ स्वोऽस्त्री धने पुमाञ्ज्ञातौ त्रिष्वात्मीये स्वमात्मनि ।

३-ना-ना-१७३० स्वः स्वर्गे परलोके च त्विट् कान्तिज्वालयोः स्त्रियाम् ।।

३-ना-ना-१७३१ वल्के लवङ्कवल्के त्वग्द्वाद्वारोपाययोः स्त्रियाम् । ३-ना-ना-१७३२ रमायां देवपूजायां शक्तौ शोभावरेण्ययोः ।।

इत्येकाक्षरवान्ताः ।

३-ना-ना-१७३३ भवः संसारसंतप्तिश्रेयः शंकरजन्मसु । ३-ना-ना-१७३४ पादाने भस्मनि च सत्ताप्राप्त्योश्च वत्सरे ।।

३-ना-ना-१७३५ भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । ३-ना-ना-१७३६ क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु ।।

३-ना-ना-१७३७ रतिवेगे शब्दवृत्तौ निमित्ते रसबन्धिनि ।

३-ना-ना-१७३८ प्राप्तौ च भवसंबन्धे योनौ च स्याद्विकल्पने ।।

३-ना-ना-१७३९ त्रिषु भं भामवति भे (?) प्रभावे च पुमान्भवेत् ।

३-ना-ना-१७४० नवस्तु नूतने सौम्ये संख्यायामपि तत्त्रिषु ।।१७४०

३-ना-ना-१७४१ सूर्ये समूद्रतरणौ पटे नावा स्त्रियामपि । ३-ना-ना-१७४२ जीवो वृक्षे सुरगुरौ तन्तौ प्राणे च जीविते ।।

३-ना-ना-१७४३ जीवा जीवन्तिकाभूम्योर्वचामौर्व्योस्त्रिषूच्यते । ३-ना-ना-१७४४ धवः पतौ नरे धूर्ते धूतपादपयोरपि ।।

३-ना-ना-१७४५ हवो यज्ञे तथाह्वाने स्यान्निदेशाज्ञयोः पुमान् । ३-ना-ना-१७४६ ध्रुवः कीले शिबे शङ्कौ वंशे योगे वसौ मुनौ ।।

३-ना-ना-१७४७ निश्चिते निश्चले तर्के नक्षत्रे शाश्वते वटे । ३-ना-ना-१७४८ स्त्रुचि मौर्व्यां तालभेदे स्त्रियामथ शिवं शुभे ।।

३-ना-ना-१७४९ मोक्षे मुखे च सलिले माने योगे मनोहरे । ३-ना-ना-१७५० शिवो हरे गुग्गुलौ च कीले

चालुकि (?) वालुके ।।

३-ना-ना-१७५१ पुण्डरीकद्रुमे स्त्री तु भवान्यां जम्बुकेऽपि च ।

३-ना-ना-१७५२ अभयायां नदीभेदे चामलक्यां महौषधौ ।।

३-ना-ना-१७५३ झाटाशम्योश्चाभयायां चाथ देवः सुरे घने । ३-ना-ना-१७५४ राज्ञि क्लीबं त्विन्द्रिये स्त्री तेजनीस्पृक्कयोरपि ।।

३-ना-ना-१७५५ भट्टारिकायां द (दा?) र्वी तु देवदारुहरिद्रयोः ।

३-ना-ना-१७५६ स्रुचि दारुहरिद्रायां सत्त्वं द्रव्ये बले गुणे ।।

३-ना-ना-१७५७ स्वभावे च पिशाचादौ व्यवसायेऽपि प्राणिषु । ३-ना-ना-१७५८ चित्तसद्भावयोर्जन्तावैश्वर्यामोदयोरपि ।।

३-ना-ना-१७५९ विश्वं समस्ते जगति विश्वेदेवेषु नागरे । ३-ना-ना-१७६० वा पुंसि स्यात्स्तियां विश्वातिविषाकरशब्दयोः । ।

३-ना-ना-१७६१ द्वंद्वं रहस्ये कलहे युग्मे पात्रप्रसाधने । ३-ना-ना-१७६२ दिवं स्वर्गेऽन्तरिक्षे च लवो रामात्मजे कुशे ।।

३-ना-ना-१७६३ विनाशे छेदने दावदवौ वनवनानलौ । ३-ना-ना-१७६४ नीवी स्याद्बन्धनागारे धने स्त्रीवस्त्रबन्धने ।।

३-ना-ना-१७६५ अविर्गिरौ रवे मेषे मूषिके कम्बलेऽपि च । ३-ना-ना-१७६६ पूर्वोऽन्यलिङ्गः प्राचि स्यात्पुं बहुत्वेऽपि पूर्वजे ।।

३-ना-ना-१७६७ प्लवो भेके कपौ वर्षे नावे चेवेत्थमर्थयोः । ३-ना-ना-१७६८ एवं चाथ युवो वर्षभेदे यूनि पुमान्भवेत् ।।

इति व्यक्षरवान्ताः ।

३-ना-ना-१७६९ कैरवः कुमुदे क्लीबे पुंसि स्यात्पिशुनेऽपि च । ३-ना-ना-१७७० सुग्रीवस्तु कुकण्ठे च वालिभ्रातरि कथ्यते । ।

३-ना-ना-१७७१ गन्धर्वस्तुरगे दिव्यगायके शेखरेऽपि च । ३-ना-ना-१७७२ अन्तराभवसत्त्वे च मृगे पुरुषकोकिले ।।

३-ना-ना-१७७३ प्रभवो जन्ममूलेऽब्दे जन्मभूमौ पराप्रमे । ३-ना-ना-१७७४ आद्योपलब्धौ ज्ञाने च विभवोऽब्दे धने वृतौ ।।

३-ना-ना-१७७५ पल्लवोऽस्त्री किसलये शृङ्गारपदगर्भयोः । ३-ना-ना-१७७६ पवने विटपे षिद्गे रत्नविस्तारयोरपि ।।

३-ना-ना-१७७७ कितवो धूर्तं उन्मत्ते वञ्चके कनकाह्वये । ३-ना-ना-१७७८ प्रसवस्तु फले पुष्पे प्रभवे गर्भमोचने ।।

३-ना-ना-१७७९ माधवस्तु वसन्ते स्याद्वैशाखे गरुडध्वजे । ३-ना-ना-१७८० आहवो युद्ध आह्वानेऽध्वरे होमनिदेशयोः ।।

३-ना-ना-१७८१ निह्नहस्तु नमस्कारे विश्वासेऽपह्नवेऽपि च । ३-ना-ना-१७८२ निकृतौ चाथ सचिवः स्यात्सहाये च मन्त्रिणि ।।

३-ना-ना-१७८३ उत्सवः प्रसवेच्छाका (?)मर्षोत्सेधमहःसु च । ३-ना-ना-१७८४ द्विजह्वः सूचके सर्पे पार्थिवो हायने नृपे ।।

इति त्र्यक्षरवान्ताः ।

३-ना-ना-१७८५ अनुभावः प्रभावे च सतां च मतिनिश्चये । ३-ना-ना-१७८६ घण्टारवः शणसुमे घण्टानादे च पुंसि वा ।।

३-ना-ना-१७८७ पराभवः प्रभावे च वर्षभेदेऽपि वर्तते ।

इति चतुरक्षरवान्ताः ।

इति राघवीयनानार्थमञ्जर्यां यवर्गादिवर्गान्ताः परिसमाप्ताः ।

३-ना-ना-१७८८ शः परोक्षे त्रिलिङ्गे स्याच्छं सुखार्थाज्ञशक्तिषु । ३-ना-ना-१७८९ शिः शिवे शिवकान्तायां स्वापे निर्वाणहिंसयोः ।।

इत्येकाक्षरशान्ताः ।

३-ना-ना-१७९० दशा वर्तावस्थायां वस्त्रान्ते समयेऽपि च । ३-ना-ना-१७९१ पाशः क(के?)शान्ते संधार्थे कर्णान्ते शोभवार्थके ।।

३-ना-ना-१७९२ छिद्राद्यन्ते च निन्दार्थे पुमान्पक्ष्यादिबन्धने । ३-ना-ना-१७९३ पलायने च रज्जौ च

निधानावु(?)पलम्भयोः ।।

३-ना-ना-१७९४ वशः प्रभुत्वेच्छायत्तगजेषु त्रिषु तद्वति । ३-ना-ना-१७९५ स्ववशायां वशांयां च स्पृहायां च जनेऽपि च ।।

३-ना-ना-१७९६ वशा वन्ध्यासुतयोषाज्ञानिकुञ्जरनारिषु । ३-ना-ना-१७९७ वंशः पृष्ठास्थ्नि गेहोर्ध्वकाष्ठे वेणौ गणे कुले ।।

३-ना-ना-१७९८ नासादण्डे चाथ कुशं जले दर्भान्तरे नपुम् । ३-ना-ना-१७९९ योक्त्रे रामात्मजे द्वीपे पुमानौदुम्बरे स्त्रियाम् ।।

३-ना-ना-१८०० छन्दोगस्तोत्रगणनाशङ्कास्वथ कुशीष्यते । ३-ना-ना-१८०१ पापिष्ठमत्तयोर्वाले भल्लायामयसि स्त्रियाम् । ।

३-ना-ना-१८०२ केशो दैत्ये भगे वाले ह्नीबेरे च प्रचेतसि । ३-ना-ना-१८०३ कोशोऽस्त्री मुकुले दिव्ये शस्त्रा◌ार्थौघे गृहे तिथौ ।।

३-ना-ना-१८०४ शिश्ने जातिफले खड्गपिधाने योनिवित्तयोः । ३-ना-ना-१८०५ काशः साम्ये दर्भभेदे प्रकाशेऽपि पुमानयम् ।।

३-ना-ना-१८०६ आशा दिग्भूव्याप्तितृष्णास्वथ राशिस्तु पुंसि च । ३-ना-ना-१८०७ मेषादौ द्रव्यबाहुल्ये विशो वैश्ये नरे द्वयोः ।।

३-ना-ना-१८०८ शस्तु चारे संग्रामे भीमरे पवनेऽपि च । ३-ना-ना-१८०९ बाधने प्रणिधौ शुद्धे पुंसि प्रांश उपाङ्गके ।।

३-ना-ना-१८१० निशा रात्रीशारिबयोरश्वादेस्ताडने कशा ।

इति व्यक्षरशान्ताः ।

३-ना-ना-१८११ प्रकाशोऽतिप्रसिद्धे स्यादातपे कोशवत्यपि । ३-ना-ना-१८१२ प्रहासेऽथ पलाशस्तु हरित्किंशुकयातुषु ।।

३-ना-ना-१८१३ पत्रे नपुंसि कलशः पयस्यमृतमन्द्रयोः । ३-ना-ना-१८१४ घटे निवेशः शिबिरे वाहन्यासगृहेष्वपि ।।

३-ना-ना-१८१५ कीनाशस्तु यमे पुंसि क्षुद्रकर्षकयोस्त्रिषु । ३-ना-ना-१८१६ उपांशुघातिनि कर्कशे निदेशस्तु भाषणे ।।

३-ना-ना-१८१७ शासनोपान्तयोश्चाथाभीशुः प्रग्रहरश्मिनोः । ३-ना-ना-१८१८ विमर्शः साध्वसाधुत्वविवेकेषु प्रशरयते ।।

३-ना-ना-१८१९ कर्कशः कठिने क्रूरे कृप(पा?)णे निर्दये दृढे । ३-ना-ना-१८२० आयुर्वेदे द्रव्यभेदे कृष्णेक्षौ खर्वकाण्डयोः ।।

३-ना-ना-१८२१ अपीवरे साहसिके निस्त्रिंशः क्रूरखड्गयोः । ३-ना-ना-१८२२ निकाशस्तु प्रकाशे स्यात्सदृशे रहसि स्मृतः ।।

३-ना-ना-१८२३ निर्वेशो भोगभृतयोः शिशावज्ञेऽपि बालिशः ।

इति त्र्यक्षरशान्ताः ।

३-ना-ना-१८२४ जीवितेतशः पतौ काले जीवातौ जीविताधिपे । ३-ना-ना-१८२५ उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि ।।

३-ना-ना-१८२६ अपदेशः पदे लक्ष्ये स्यात्प्रसिद्धनिमित्तयोः । ३-ना-ना-१८२७ औदार्यशौर्यधैर्येषु निःसीमव्यपदेशयः ।।

३-ना-ना-१८२८ आश्रयाशो वीतिहोत्रे पुमानाश्रयबाधके । ३-ना-ना-१८२९ लताबंशस्तु वेत्रे स्याद्वल्लीसंघेऽपि च त्रिषु ।।

इति चतुरक्षरशान्ताः ।

३-ना-ना-१८३० षः पुमान्विषये स्वर्गे षा श्रियां षं विरामके । ३-ना-ना-१८३१ गर्भमोक्षे मर्षणे च परोक्षश्रेष्ठयोस्त्रिषु । १८३०

३-ना-ना-१८३२ त्विड्दीप्तौ व्यवसाये च जिगीषायां च धन्वनि ।

इत्येकाक्षरषान्ताः ।

३-ना-ना-१८३३ वृषो धर्मबलीवर्दश्रेष्ठमूषिकराशिषु । ३-ना-ना-१८३४ शुक्रले च पुमान्स्त्री तु कपिकच्छ्वाटरूषयोः ।।

३-ना-ना-१८३५ सुरसंघेऽक्ष्णि जिष्णौ च तुरंगे जलजेऽपि च । ३-ना-ना-१८३६ शृङ्ग्यामपि वृषा स्त्री स्याद्व्रतिनामासनं वृषी ।।

३-ना-ना-१८३७ कर्षूर्वार्ताकरीषाग्निलेखनेषु च खातने ।

३-ना-ना-१८३८ कुल्यायां तु कर्षू चाथ कर्षस्तु कर्षणे फले ।।

३-ना-ना-१८३९ वर्षस्तु वृष्टावब्दे स्याल्लोके धात्र्यंशमेघयोः ।

३-ना-ना-१८४० क्लैब्यजम्बूद्वीपयोश्च विषं गरलवारिणोः । । १८४०

३-ना-ना-१८४१ उषनिरुद्धपत्न्यां च कालभेदेऽपि पुंसि वा । ३-ना-ना-१८४२ प्रेषः प्रैषः प्रेषणे स्यान्मर्दनोन्मानमानयोः ।।

३-ना-ना-१८४३ श्लेषः स्यादुभयार्थे च अलाताङ्गारयोः पुमान् ।

३-ना-ना-१८४४ कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ।३-ना-ना-१८

३-ना-ना-१८४५ दोषः स्यद्दूषणे पापे दोषा रात्रौ भुजेऽपि च । ३-ना-ना-१८४६ शेषोऽप्रधानेऽनन्ताख्ये त्रिषु स्यादवशेषिते ।।

३-ना-ना-१८४७ शेषा प्रसादनिर्माल्याक्षतादानेषु तु स्त्रियाम् । ३-ना-ना-१८४८ तूष्णीमर्थे सुखे जोषं पुण्यकालाब्दयोर्विषुः ।।

इति व्यक्षरषान्ताः ।

३-ना-ना-१८४९ महीषी राजपत्न्यां च महिषस्य च योषिति । ३-ना-ना-१८५० पुरुषो मानवे सांख्ये ज्ञे च पुंनागजीवयोः । । १८५०

३-ना-ना-१८५१ पुराणपुरुषेऽपु स्यान्नृमाने पौरुषं त्रिषु । ३-ना-ना-१८५२ पुंभावे तत्क्रियायां च प्रभावे संततावपि ।।

३-ना-ना-१८५३ आमिचषं सुन्दराकाररूपादिविषये भवेत् । ३-ना-ना-१८५४ संभोगलोप(भ?)योर्मांसे पुंसि चोत्कोचलाभयोः ।।

३-ना-ना-१८५५ पारावारे च कनके निकषात्म(षोश्म)परीक्षके ।

३-ना-ना-१८५६ अभीषुः प्रग्रहे रश्मौ विषेशोऽवयवे नवे ।।

३-ना-ना-१८५७ निखिलातिशयाव्यक्तद्रष्टव्योत्तमवस्तुषु । ३-ना-ना-१८५८ उष्णीषस्तु शिरोवेष्टे किरीटे पुंनपुंसकम् ।।

३-ना-ना-१८५९ आकर्षः शारिफलके द्यूतेऽक्षे कार्मुकेऽपि च ।

३-ना-ना-१८६० किल्बिषं त्वपराधे स्यान्नंपुसि दुरिते रुजि ।।

३-ना-ना-१८६१ शुश्रूषा श्रोतुमिच्छायां परिचर्याप्रधानयोः । ३-ना-ना-१८६२ शैलूषो दारजीवे स्यात्किराते नटबिल्वयोः ।।

इति त्र्यक्षरषान्ताः ।

३-ना-ना-१८६३ सुरे मत्स्ये चानिमिषो नन्दिघोषो रथे पुमान् । ३-ना-ना-१८६४ अर्जुनस्य च शङ्खे च वृषभेन्द्रस्य गर्जने ।।

३-ना-ना-१८६५ आत्मघोषो वायसे स्यादात्मस्तुतिपरेऽपि च ।

इति चतुरक्षरषान्ताः ।

३-ना-ना-१८६६ सः पुंस्युमासुते वायौ देहभाःश्रीद्रुवाजिषु । ३-ना-ना-१८६७ सं पक्षिस्यन्दने क्लीबे ज्ञाने ध्याने निवारणे ।

३-ना-ना-१८६८ सू प्रेरणे गर्भमोक्षे सेऽभिधेये च सेवने । ३-ना-ना-१८६९ सत्सत्ये विदुषि श्रेष्ठे साधौ क्लीबमुडौ त्रिषु ।।

इत्येकाक्षरसान्ताः ।

३-ना-ना-१८७० हंसः सूर्ये मरालेऽश्वे यतौ च परमात्मनि । ३-ना-ना-१८७१ श्रेष्ठे निर्लोभनृपतौ शरीरमरुदन्तरे ।।

३-ना-ना-१८७२ मत्सरे मन्त्रभेदे च विष्णौ राजादिपूर्वके ।

३-ना-ना-१८७३ हिंसा चौर्ये ताडने स्यादन्योपद्रवबन्धयोः ।।

३-ना-ना-१८७४ वेधाश्चतुर्मुखे विष्णौ पण्डितेऽपि प्रचक्ष्यते । ३-ना-ना-१८७५ स्त्री त्वाशीः सर्पदंष्ट्रे हिताशंसायामनुग्रहे ।।

३-ना-ना-१८७६ हासो हासयरसे शीघ्रगमनानन्दयोरपि । ३-ना-ना-१८७७ वसुर्वृद्धौ धने रत्नेऽनले मधुरहट्टयोः ।।

३-ना-ना-१८७८ योक्त्रे रश्मौ धनाध्यक्षे देवभेदे च वाच्यवत् । ३-ना-ना-१८७९ ज्योतिः प्रकाशनक्षत्रदृक्सूर्याग्निशिखासु च ।।

३-ना-ना-१८८० पुष्यर्थाध्वरपाषाणवेदाङ्गेषु विधावपि । ३-ना-ना-१८८१ धनुः प्रियालवृक्षे च राशिभेदे शरासने । । १८८०

३-ना-ना-१८८२ धनुर्धरे च शूरे च छन्दः पद्याभिलाषयोः । ३-ना-ना-१८८३ वेदे वाक्ये वृत्तभेदे उत्सवेऽपि नपुंसकम् ।।

३-ना-ना-१८८४ रसो वीर्ये गुणे रागे शृङ्गारादौ द्रवे विषे । ३-ना-ना-१८८५ जलेऽङ्गधातौ गन्धे च तिक्तादौ पारदे धने ।।

३-ना-ना-१८८६ आस्वादनेऽथ स्रोतः स्यादिन्द्रिये निम्नगारये । ३-ना-ना-१८८७ अर्चिर्मयूखशिखयोस्तमस्तिमिरवेलयोः ।।

३-ना-ना-१८८८ गणे रोहौ च मायायां ज्ञानेऽपि परिकीर्त्यते । ३-ना-ना-१८८९ रजस्तु कौसुमे रेणौ गुणधूलीन्द्रियेषु च ।।

३-ना-ना-१८९० स्त्रीणामृतौ च न्यासस्तुनिक्षेपार्पणसद्मसु । ३-ना-ना-१८९१ दाने च मन्त्रभेदेऽथ भाषितौषधयोर्वचः ।।

३-ना-ना-१८९२ तेजो बीजे प्रतापे च प्रभायां परमात्मनि । ३-ना-ना-१८९३ कोशदण्डे मयूखेऽग्नावंशे सूर्ये बलेऽपि च ।।

३-ना-ना-१८९४ वत्सस्तर्णकपुत्रादौ वर्षे च कुटजे पुमान् । ३-ना-ना-१८९५ विष्णोर्वक्षसि वत्सं स्यात्तरश्च बलरहंसोः ।।

३-ना-ना-१८९६ तपश्चान्द्रायणादौ स्याद्धर्मे लोके हुताशने । ३-ना-ना-१८९७ माघे ग्रीष्मे धर्मराजे क्लेशे च शिशिरेऽपि च ।।

३-ना-ना-१८९८ वयः पक्षिणि बाल्यादौ सामर्थ्येऽवयवे नपुम् ।

३-ना-ना-१८९९ रेतः स्यादिन्द्रिये स्वर्णे निर्यासे स्वादनेऽमृते ।।

३-ना-ना-१९०० शब्देऽथ ओजो दीप्तौ च बले तेजसि पुंस्ययम् ।

३-ना-ना-१९०१ अवष्टम्भे च धातूनां विषमर्क्षेऽपि कथ्यते । । १९००

३-ना-ना-१९०२ प्रसूर्जनन्यां बडबायां लतायां स्त्रियां मता । ३-ना-ना-१९०३ वर्चः पुरीषे दीप्तौ च रूपे विद्वांस्तु पण्डिते ।।

३-ना-ना-१९०४ प्राप्ते चात्मविदि स्याच्च महश्चोत्सवतेजसोः । ३-ना-ना-१९०५ सहो बले सहा मार्गे हेमन्तज्योतिषोः पुमान् ।।

३-ना-ना-१९०६ हासयुक्ते चाथ नभाः श्रवणावपि कथ्यते । ३-ना-ना-१९०७ नभो व्योम्नि नपुं मेघे घ्राणे पुंसि पतद्ग्रहे ।।

३-ना-ना-१९०८ मृणालसूत्रे वर्षासु स्यादोकस्त्वाश्रये गृहे ।

३-ना-ना-१९०९ पिके पयो जले क्षीरे ज्यायान्वृद्धप्रशस्ययोः ।।

इति व्यक्षरसान्ताः ।

३-ना-ना-१९१० सारसः कमले शुभ्रे हंसे च जलपक्षिणि । ३-ना-ना-१९११ गोनर्दामैथुनीकामिष्वपुंसि तमसोऽस्त्रियाम् ।।

३-ना-ना-१९१२ नदीभेदेऽन्धकारे च श्रीवत्सस्त्वावृतौ बिले । ३-ना-ना-१९१३ आहसो ललिते कृष्णे सुमनाः कुसुमे बुधे ।।

३-ना-ना-१९१४ मालत्यां त्रिदशे चाथ कनीयाननुजाल्पयोः । ३-ना-ना-१९१५ अतियूनि स्त्रियां कामिन्युत्के मेथुनिभूतयोः ।।

३-ना-ना-१९१६ कृष्णातीरे च वाञ्छायामौत्सुक्ये लालसा द्वयोः ।

३-ना-ना-१९१७ याच्ञायामतिशङ्कायां रभसो वेगहर्षयोः ।।

३-ना-ना-१९१८ मानसस्तद्भवे स्वान्तेऽप्यञ्जसा ततत्त्वतूर्णयोः ।

३-ना-ना-१९१९ पुंस्युत्तंसः कर्णपूरे शेखरे वा नपुंसकम् ।।

३-ना-ना-१९२० दिवौकाश्चातके देवे स्यान्नक्षत्रकुरङ्गयोः । ३-ना-ना-१९२१ स्त्रीलङ्गे रोदसी भूम्यामन्तरिक्षे नपुंसि वा ।।

३-ना-ना-१९२२ बीभत्सः स्याद्रौद्ररसे हिंस्रे च विकृतेऽपि च । ३-ना-ना-१९२३ वर्शयांस्तूरुवरयोः साधीयान्सधुबाढयोः ।।

३-ना-ना-१९२४ पीनसं स्याद्रोगभेदे राक्षसोऽसृक्पवर्षयोः ।

इति त्र्यक्षरसान्ताः ।

३-ना-ना-१९२५ विश्वावसुपर्वर्षभेदे गन्धर्वेऽपि च पुंस्ययम् । ३-ना-ना-१९२६ आङ्गीरसस्त्वब्दभेदे मुनिभेदे तदीरितम् ।।

३-ना-ना-१९२७ अवतंसः कर्णपूरे शेखरे पुंसि वा भवेत् । ३-ना-ना-१९२८ कुम्भीनसो भुजंगे स्यात्स्त्रियां लवणामातरि ।।

३-ना-ना-१९२९ मदालसा दैत्यवध्वां चन्द्रहासोऽसिमात्रके । ३-ना-ना-१९३० राजरावणयोश्चाथ सूर्ये वह्नौ विभावसुः ।।

३-ना-ना-१९३१ कुकलासोऽनेकवर्णे जन्तुभेदेऽपि कीर्तितः ।

इति चतुरक्षरसान्ताः ।

३-ना-ना-१९३२ हः शंकरे हरे हंसे रमरोमाञ्चवाजिषु । ३-ना-ना-१९३३ गर्भे प्रचेतसि स्त्री तु हा त्यागे गतिवीणयोः ।।

३-ना-ना-१९३४ हं क्लीबमस्त्रसुखयोः क्वणिते मणिरोचिषि । ३-ना-ना-१९३५ परब्रह्मामान्त्रणयोस्त्रिषु तून्मत्तहास्ययोः ।।

३-ना-ना-१९३७ हेतुसंबोधनेऽपि स्यात् हा स्त्रियां परिदेवने । ३-ना-ना-१९३६ हुं वितर्के परिप्रश्ने न्यासे च भयदानयोः ।।

३-ना-ना-१९३७ ही विस्मये विषादे च हि हेतावववधारणे ।

इत्येकाक्षरहान्ताः ।

३-ना-ना-१९३९ ग्रहोऽवग्रहनिर्बन्धग्रहणेषु रणोद्यमे । ३-ना-ना-१९४० सूर्यदौ पूतनादौ च सैंहिकेयेऽपि तत्त्रिषु । ।

३-ना-ना-१९४१ पत्नीमन्दिरयोश्चाथ स्नेहस्तु लेपसौहृदे । ३-ना-ना-१९४२ नवनीतेऽप्यहिर्वृत्रासुरे सर्पे च दुर्जने ।।

३-ना-ना-१९४३ बर्हः पर्णे मयूरस्य पिञ्छे हाहा निवारणे । ३-ना-ना-१९४४ खेदे मोदे च गन्धर्वे हूहू चापि प्रकम्पने ।।

३-ना-ना-१९४५ व्यूहस्तु मेनाविन्यासे चोत्प्रेक्षावृन्दयोः पुमान् ।

३-ना-ना-१९४६ कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपि ।।

३-ना-ना-१९४७ अहो बतानुकम्पायां खेदे संबोधनेऽह्नि च । ३-ना-ना-१९४८ सह साकल्यसादृश्ययौगपद्यसमृद्धिषु ।।

३-ना-ना-१९४९ गुहस्तु षण्मुखेऽपि स्याद्देवखातबिले गुहा ।

इति द्व्यक्षरहान्ताः ।

३-ना-ना-१९५० द विग्रहः कलहे देहे कोपे विस्तारभागयोः । ३-ना-ना-१९५१ तुलासूत्रेऽश्वादिश्मौ प्रग्राहः प्रग्रहोऽपि च ।।

३-ना-ना-१९५२ द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके । ३-ना-ना-१९५३ वरस्त्रियां स्यादारोहो हलाहश्चित्रवर्णके ।।

३-ना-ना-१९५४ अहहेत्यद्भुते खेदे प्रवाहो जववेगयोः । ३-ना-ना-१९५५ सहस्त्रबाहुर्बाणेऽर्के कृतवीर्यसुतेऽपि च ।।

इति त्र्यक्षरहान्ताः ।

३-ना-ना-१९५६ परिबर्हस्त्रपार्हेऽर्थे पुंसि स्यात्तु परिच्छदे । ३-ना-ना-१९५७ पत्नीपरिजनादानमूलशापाः परिग्रहाः ।।

३-ना-ना-१९५८ तमोपहो दिवानाथे वीतिहोत्रे निशाकरे ।

इति चतुरक्षरहान्ताः । एकाक्षरळान्तमप्रसिद्धम् ।

३-ना-ना-१९५९ पाळिरश्रौ प्रदेशेङ्के रेखायां स्यात्त्सरुच्छदे । ३-ना-ना-१९६० नळस्तु तृणभेदेऽब्दे कपीन्द्रे भूपतावपि । ।

३-ना-ना-१९६१ काळिश्चामरदण्डे च जरादिश्लथचर्मणि । ३-ना-ना-१९६२ वळिर्मध्यमरेखोर्मिजीर्णत्वग्गृहदारुषु ।।

३-ना-ना-१९६३ निम्नोन्नते च वक्रे च रचनायामपीष्यते । ३-ना-ना-१९६४ मौळिः किरीटे घम्मिल्ले जटायामथ पन्नगे ।।

३-ना-ना-१९६५ दुष्टदन्तावळे व्याळ अळिः पङ्क्तौ च वृश्चिके ।

३-ना-ना-१९६६ भृङ्गे वयस्यां भूमौ स्यात्केळिस्तू परिहासके ।।

इति व्यक्षरळान्ताः ।

३-ना-ना-१९६७ सरळो रसिके रज्जौ बहुळः कुष्णपक्षके । ३-ना-ना-१९६८ नक्षत्रेऽगनौ पर्णभेदे गवि स्त्री मङ्गळः कुजे ।।

३-ना-ना-१९६९ शुभे तु मङ्गळं प्रांक्तं काहळो दुर्जनेऽपि च । ३-ना-ना-१९७० काहळी वाद्याभाण्डे स्यान्नपुंसि भृशशुष्कयोः ।।

३-ना-ना-१९७१ प्रवाळोऽस्त्री किसलये वीणादण्डे च विद्रुमे । ३-ना-ना-१९७२ कराळो दन्तुरे तुङ्गे विकृतोज्ज्वलयोरपि ।।

३-ना-ना-१९७३ विग्रहे भीषणे चाथ वञ्चुळः स्थलवेतसे । ३-ना-ना-१९७४ वानीरे द्रुमभेदे स्याद्विरळं तु तनावपि ।।

३-ना-ना-१९७५ निचुळो हिञ्जुले पद्मेऽप्यस्त्री मधुफलेऽपि च । ३-ना-ना-१९७६ हिन्दाळ उल्लसत्पूगे वकुळोऽशोकपूगयोः ।।

३-ना-ना-१९७७ कर्पूरधूल्यां द्राक्षादिमधुपूरे तु दोहळम् । ३-ना-ना-१९७८ पिङ्गळो वर्णभेदे स्याद्वर्षभेदेऽपि कथ्यते ।।

३-ना-ना-१९७९ महिळा तु द्रुभेदे स्यात्स्त्रीभेदेऽपि च कथ्यते । ३-ना-ना-१९८० कदळी वैजयन्त्यां च रम्भायां च मृगेऽपि च । ।

इति त्र्यक्षरळान्ताः ।

३-ना-ना-१९ ८१ बृहन्नळा तृणे पुंसां स्त्रीवेवेषे शतपर्वणि ।

३-ना-ना-१९८२ वर्णावळी मातृतायां तथा स्याद्गमनेऽपि च ।।

३-ना-ना-१९८३ अरिकेळिः शत्रुलीलास्त्रीरत्योश्चापि कीर्तितः । ३-ना-ना-१९८४ सुगन्धे स्यात्परिमळोऽञ्जनद्युतौ ।।

इति चतुरक्षरळान्ताः ।

३-ना-ना-१९८५ क्षः संरोधे विरोधे च क्षेमदुःखप्नयोश्च ना । ३-ना-ना-१९८६ क्षा स्त्री क्षमायां निद्रायं क्षं क्लीबे क्षेत्ररक्षसोः ।।

इत्येकाक्षरक्षान्ताः ।

३-ना-ना-१९८७ अक्षो द्यूते वरूथाङ्गे नयवादौ विभीतके । ३-ना-ना-१९८८ कर्षे व्याप्तौ कृषे चक्रे आधारव्यवहारयोः ।।

३-ना-ना-१९८९ आत्मजे पाशके दैत्यभेदे चेन्द्रियवालयोः । ३-ना-ना-१९९० ध्वाङ्क्षः काके बके वक्षः कर्षे वत्से विभूषणे ।।

३-ना-ना-१९९१ कक्षः पार्श्वे परीधाने पश्चादञ्चलपल्लवे । ३-ना-ना-१९९२ बाहुमुले तृणे सौरभे शुष्कनववीरुधोः ।।

३-ना-ना-१९९३ स्त्रियां ग्रहणिकाकाञ्चीप्रकोष्ठग्रहरज्जुषु । ३-ना-ना-१९९४ स्पर्धापदोः स्यान्दनस्य भागे दक्षः प्रजापतौ ।।

३-ना-ना-१९९५ पटौ हरवृषे ताम्रचूडे वह्नौ द्रुमे मुनौ । ३-ना-ना-१९९६ स्त्रियाभुव्यधि(?)पक्षस्तु मासार्धे ग्रहपार्श्वयोः ।।

३-ना-ना-१९९७ केशादेः परतो वृन्दे बले सखिसहाययोः । ३-ना-ना-१९९८ पतत्रचुल्लिरन्ध्रेषु देहाङ्गे राजकुञ्चरे ।।

३-ना-ना-१९९९ साध्ये विरोधे भित्तौ स्यात्परतन्त्रे कुचेऽपि च । ३-ना-ना-२००० प्रेक्षा तु नृत्ते प्रज्ञायामीक्षणे चाथ सेवने । ।

३-ना-ना-२००१ भिक्षा भृतौ च याच्ञायां नपुं भिक्षितवस्तुनि । ३-ना-ना-२००२ न्यक्षः परशुरामे स्यात्रिषु कार्त्स्न्यनिकृष्टयोः । ।

३-ना-ना-२००३ रूक्षः स्यात्पादपेऽप्रेम्ण्यचिक्कणे पौरुषेऽपि च । ३-ना-ना-२००४ शिक्षस्तु दण्डने चाथ चक्षुरीक्षमनेत्रयोः ।।

इति व्यक्षरक्षान्ताः ।

३-ना-ना-२००५ प्रत्यक्षेऽधिकृतेऽध्यक्षो गवाक्षो जालके कपौ । ३-ना-ना-२००६ रक्ताक्षी स्याद्वर्षभेदे ताम्रनेत्रस्त्रियामपि ।।

इति त्र्यक्षरक्षान्ताः ।

३-ना-ना-२००७ छायावृक्षो नमेरौ स्यान्महिषाक्षस्तु गुग्गुलौ । ३-ना-ना-२००८ दिव्यचक्षुर्ज्योतिषिके पार्थात्मज्ञानिनोरपि ।।

३-ना-ना-२००९ कमलाक्षः पद्मबीजे विष्णावपि पुमान्भवेत् । ३-ना-ना-२०१० मल्लिकाक्षः पक्षिभेदे

नीलाक्षेन्द्रायुधे पुमान् । ।

इति चतुरक्षरक्षान्ताः ।

इति राघवीयनानार्थमञ्जर्यमेदं वर्गाः परिसमाप्ताः ।

या राघवकृता श्रेष्ठा मातृकावर्गसंयुता ।

सैकाक्षरादिसंयुक्ता पूर्णा नानार्थमञ्जरी ।

अनेकार्थसङ्ग्रहः

हेमचन्द्राचार्यविरचितः

एकस्वरकाण्डः

कः(२-ना-ना-१-५)- ब्रह्मा(२-ना-ना-१-५) आत्मा(२-ना-ना-१-५) रवि(२-ना-ना-१-५) मयूर(२-ना-ना-१-५)

अग्नि(२-ना-ना-१-५) यम(२-ना-ना-१-५) अनिल(२-ना-ना-१-५)

कम्(२-ना-ना-१-५)- शीर्ष(२-ना-ना-१-५) अप्(२-ना-ना-१-५) सुखे(२-ना-ना-१-५)

खम् (२-ना-ना-१-५)

कः (२-ना-ना-१-५) स्वः(२-ना-ना-१-५) संवित्(२-ना-ना-१-५) व्योम(२-ना-ना-१-५) इन्द्रिय(२-ना-ना-१-५)

शून्य(२-ना-ना-१-६) बिन्दु(२-ना-ना-१-६) सुख(२-ना-ना-१-६)

खः (२-ना-ना-१-६) सूर्य(२-ना-ना-१-६) गौः(२-ना-ना-१-६) उदक(२-ना-ना-१-६) दृक्(२-ना-ना-१-६)

स्वर्ग(२-ना-ना-१-६) दिक्(२-ना-ना-१-६) पशु(२-ना-ना-१-६) रश्मि(२-ना-ना-१-६)

वज्र(२-ना-ना-१-६) भूमि(२-ना-ना-१-६) इषु(२-ना-ना-१-६) गो(२-ना-ना-१-६)

त्वक्(२-ना-ना-१-७) वल्कल(२-ना-ना-१-७) चर्म(२-ना-ना-१-७) न्यक्(२-ना-ना-१-७) निम्न(२-ना-ना-१-७) नीच(२-ना-ना-१-७) कार्त्स्न्य(२-ना-ना-१-७)

रुक्(२-ना-ना-१-७) शोभा(२-ना-ना-१-७) किरण(२-ना-ना-१-७) उच्छा(२-ना-ना-१-७) वाक्(२-ना-ना-१-७) भारती(२-ना-ना-१-७) वचः(२-ना-ना-१-७)

(२-ना-ना-१-८)

जूः आकाश सरस्वती पिशाची जवन ।

ज्ञः विचक्षण पद्मासन चान्द्रमस अयन ।।

(२-ना-ना-१-९)

सद्विद्यमान सत्य प्रशस्त अर्चित साधु ।

भः शुक्र भम् उडु भा अंश भूः भूमिः क्षिति ।।

(२-ना-ना-१-१०)

स्थान मः पुनः शंभु मा लक्ष्मी वारण (व्ययम्) ।

कम् क्षेप निन्द प्रश्न वितर्क ज्या मातृ ।।

(२-ना-ना-१-११)

क्ष्मा मौर्वी द्युः दंन वह्नि द्यौः स्वर्ग विहायस् ।

रः स्तीक्ष्ण दहन राः सुवर्ण जलद धन ।।

(२-ना-ना-१-१२)

द्रूः कामरूपी स्वर्ण धूः यान मुख भार ।

पूः शरीर नगर श्रीः लक्ष्मी सरलद्रव ।।

(२-ना-ना-१-१३)

वेषोपकरण वेषरचना मति गी ।

शोभा त्रिवर्ग संपत्ति स्रूः स्रूव निर्झर ।।१

(२-ना-ना-१-१४)

वः पश्चिमदिगीश ओपम्य वः (अव्यम्) पुनः ।

द्यौः स्वर्ग नभस् स्वः ज्ञाति आत्मा स्वम् निज धन ।।

(२-ना-ना-१-१५)

दृक् दृष्ट दर्शन धी अक्षिण विट् प्रवेश नृ वैश्य ।

तृट् तृष्णावत् तर्षत् लिप्सा पिपासा ।।

(२-ना-ना-१-१६)

त्विट् शोभा जिगीषा व्यवसाय रुचि गीः ।

भाः प्रभाव मयूख माः मास निशाकर ।।

(२-ना-ना-२-१)

अर्कः द्रुभेद स्फटिक ताम्र सूर्य बिडौजस् ।

अकम् दुःखाद्ययोः अङ्कः भूषा रूपक लक्ष्म ।।

(२-ना-ना-२-२)

चित्राजि नाटकाद्यंश स्थान क्रोड अन्तिक अगस् ।

एकः अन्यः केवलः श्रेष्टः संख्या कल्कः आद्य विष्टा ।।

(२-ना-ना-२-३)

दम्भ पापिन् किट्ट कङ्कः ब्राह्मणलिङ्गिन् ।

लोहपृष्ट यम कर्कः श्वेताश्व दर्पण घट ।।

(२-ना-ना-२-४)

कर्केतन अग्नि राशि काकः पीठसर्पिन् ।

द्वीप मान द्रुभेद शिरः अवक्षालन द्विक ।।

(२-ना-ना-२-५)

काकम् काकसमूह रतबन्ध योषित् ।

काका काकजङ्घा काकोली काकनासा ।।

(२-ना-ना-२-६)

काकोदुम्बरिका काकमाचिका रक्तिका ।

किष्कुः प्रकोष्ट हस्त वितस्ति कुत्सित ।। ६।।

(२-ना-ना-२-७)

कोकः वृक चक्रवाक खर्जूरीद्रुम भेक ।

छेकः विदग्ध विश्वस्त मृगनीडज ।।

(२-ना-ना-२-८)

टङ्कः नीलकपित्थ असिकोश कोप अश्मदारण ।

मानान्तर खनित्र जङ्घा टङ्कण ।।

(२-ना-ना-२-९)

तर्कः वितर्क काङ्क्षा ऊह कर्मविशेष ।

त्रिका कूपस्यनेमि त्रिकम् पृष्टाधर त्रय ।।

(२-ना-ना-२-१०)

तोकम् संतान सुत द्विकः काक कोक ।

ङङ्कुः मृग मुनि नाकः स्वः खम् नाकुः पर्वत ।।

(२-ना-ना-२-११)

मुनि वल्मीक निष्कः कर्ष हेमन् (हेम)पल ।

दीनार साष्टसुवर्णशत वक्षोविभूषण ।।

(२-ना-ना-२-१२)

पङ्कः अघ कर्दम पाकः पचन शिशु दैत्य ।

बकः रक्षोभित् श्रीद शिव मल्ली बकोट ।।

(२-ना-ना-२-१३)

भूकः छिद्र काल भेकः मेघ मण्डूक भीरु ।

मुष्कः मोक्षद्रुम संघ तस्कर मांसल अण्ड ।।१

(२-ना-ना-२-१४)

मूकः दैन्य अवाक् दीन रङ्कः कृपण मल्ल ।

राका कच्छु दृष्टरजःकन्या सरिदन्तर ।।

(२-ना-ना-२-१५)

पूर्णेन्दुपूर्णिमा रेकः शङ्का विरेक ।

हीने रोकम् क्रयणभेद नौ बिल चर ।।

(२-ना-ना-२-१६)

रोकोः अंशु लङ्का शाखा शाकिनी कुलटा पुरी ।

लोकः विश्व जन वल्कम् शकल त्वक् शल्कवत् ।।

(२-ना-ना-२-१७)

शकः देश राजभेद शङ्का संशय भय ।

शङ्कुः पत्र शराजाल संख्या कीलक शंभु ।।

(२-ना-ना-२-१८)

यादः अस्त्रभेद मेढ्र शाकः द्वीप नृप द्रुम ।

शक्ति हरितक शुकः व्यासज कीर ।।

(२-ना-ना-२-१९)

रक्षः अमात्य शुकम् ग्रन्थिपर्ण अरलु शिरीष ।

शुल्कम् घट्टादिदातव्य जामातृ बन्धक ।।

(२-ना-ना-२-२०)

शूक्रः अनुक्रोश किंशारु शोक अभिषव शुङ्ग ।

शूका हृल्लेख श्लेकः पद्यबन्ध यशस् ।।

(२-ना-ना-२-२१)

शौकम् शुकानांसमूह स्त्रीणांसमूह करणान्तर ।

सृका बाण उत्पल वात स्तोकः चातक अल्प ।।

(२-ना-ना-२-२२)

नखम् गन्धद्रव्य नखः करज षण्ड ।

न्युङ्खः सामविशेषस्य षडोङ्कार्याम् अतिप्रिय ।।

(२-ना-ना-२-२३)

पुङ्खः मङ्गलाचार शराङ्ग स्येन ।

प्रेङ्खा पर्यटन नृत्य दोला वाजिनांगति ।।

(२-ना-ना-२-२४)

मुखम् उपाय प्रारम्भ श्रेष्ठ निःसरण अस्य ।

रेखा अल्पक छद्मन् आभोग उल्लेख ।।

(२-ना-ना-२-२५)

लेखः लेख्य दैवत लेखा राज्यी लिपि ।

वीङ्खा शूकशिम्बा गतिभेद नर्त्तन ।।

(२-ना-ना-२-२६)

शङ्खः कम्बु निधिभेद नखिन् अलिकास्थन् ।

शाखा द्रुमांश वेदांश भुज पक्षान्तर अन्तिक ।।

(२-ना-ना-२-२७)

शिखाग्रमात्र चूडा केकिचूडा प्रधान ।

ज्वाला लाङ्गलिका शिफा शाखा घृणि ।।

(२-ना-ना-२-२८)

सखा सहाय मित्र सुखम् त्रिदिव शर्म ।

सुखा प्रचेतसःपुरि अगः अगवत्तर ।।

(२-ना-ना-२-२९)

शैल सरीसृप भानु अङ्गम् अन्तिक गात्र ।

उपसर्जनभूत अभ्युपाय प्रतीक ।।

(२-ना-ना-२-३०)

अङ्गा नीवृद्विशेष इङ्गः इङ्गित अद्भुत ।

ज्ञान जङ्गम खगः अर्क ग्रह पक्षि ।।

(२-ना-ना-२-३१)

शर देवे खड्गः असि खड्गि श्रृंग गण्डक ।

टङ्गः खनित्र जङ्घा आस्य त्यागः वर्जन दान ।।

(२-ना-ना-२-३२)

दुर्ग दुर्गम दुर्गा नीलिक उमा ।

नागः मतंगज सर्प पुंनाग नागकेसर ।।

(२-ना-ना-२-३३)

क्रूराचार नागदन्त मुस्तक वारिद ।

देहानिलविशेष श्रेष्ठ(उत्तरस्थितः) ।।

(२-ना-ना-२-३४)

नागम् रङ्ग सीसपत्र स्त्रीबन्ध करणान्तर ।

पुङ्गीं शमी पिङ्गा हिंगुनालि गोरोचन उम ।।

(२-ना-ना-२-३५)

पिंगम् बालक पिशंग पूगः क्रमुक संघ ।

फल्गुः काकोदुम्बरिकावृक्ष निरर्थक ।।

(२-ना-ना-२-३६)

भगोऽर्कज्ञानमाहात्म्य यशोवैराग्यमुक्तिषु ।

रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ।।

(२-ना-ना-२-३७)

भंगस्तरंगे भेदे च रुग्विशेषे पराजये ।

कौटिल्ये भयविच्छित्योर्भंगा शणे भंगिः पुनः ।।

(२-ना-ना-२-३८)

भक्तिवीच्योर्भागो रुपाद्र्धके भाग्यैकदेशयोः ।

भृंगं त्वक्पत्रं भृंगास्तु पिड्गधूम्याटमार्कवाः ।।

(२-ना-ना-२-३९)

षट्पदोऽथ भृगुः सानौ जमदग्निप्रपातयोः ।

शुक्रे रुद्रे च भोगस्तु राज्ये वेश्याभृतौ सुखे ।।

(२-ना-ना-२-४०)

धनेऽहिकायफणयोः पालनाऽभ्यवहारयोः ।

मार्गो मृगमदे मासे सौम्यर्क्षोऽन्वेषणे पथि ।।

(२-ना-ना-२-४१)

मृगः कुरंगे याञ्चायां मृगयायां गजान्तरे ।

पशौनक्षत्रभेदे च मृगी तु वनितान्तरे ।।

(२-ना-ना-२-४२)

युगं हस्तचतुष्के स्याद्रथाद्यंगे कृतादिके ।

वृद्धनामौषधे युग्मे योगो विश्रब्धघातिनि ।।

(२-ना-ना-२-४३)

अलब्धलाभे संगत्यां कार्मणध्यानयुक्तिषु ।

वपुः स्थैर्यप्रयोगे च संनाहे भेषजे धने ।।

(२-ना-ना-२-४४)

विष्कम्भादावुपाये च रङ्गः स्यान्नृत्तयुद्भुवोः

रागे रङ्गं तु त्रपुणि रागः स्याल्लोहितादिषु ।।

(२-ना-ना-२-४५)

गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे ।

लङ्गः संगे च पिङ्गे च लिङ्गं मेहनचिह्नयोः ।।

(२-ना-ना-२-४६)

शिवमूर्तावनुमाने सांख्योक्तविकृतावपि ।

वङ्गः कार्पासे वृन्ताके वङ्गा जनपादान्तरे ।।

(२-ना-ना-२-४७)

वङ्गं त्रपुणि सीसे च वल्गुश्छागमनोज्ञयोः ।

व्यङ्गो भेके हीनाङ्गे च वेगो रयप्रवाहयोः ।।

(२-ना-ना-२-४८)

रेतः किंपाकयोश्चापि शाङ्र्गं विष्णुधनुर्द्ध नुः ।

शुङ्ग्याम्राते वटे प्लक्षे श्रुङ्गं चिह्नविषाणयोः ।।

(२-ना-ना-२-४९)

क्रीडाम्बुयन्त्रे शिखरे प्रभुत्वोत्कर्षसानुषु ।

श्रुंगः कूर्चशीर्षे श्रुंगी स्वर्णमीनविशेषयोः ।।

(२-ना-ना-२-५०)

विषायामृषभौषध्यां सर्गस्त्यागस्वभावयोः ।

उत्साहे निश्चयेऽध्याये मोहानुमतिसृष्टिषु ।।

(२-ना-ना-२-५१)

अर्घः पूजाविधौ मूल्येऽर्घं दुःखे व्यसनैनसोः ।

उद्यो हस्तपुटे वह्नौ श्लाघायां देहजानिले ।।

(२-ना-ना-२-५२)

औघः प्रवाहः संघातो द्रुतनृत्तं परंपरा ।

उपगेशश्च मेघस्तु मुस्तके जलदेऽपि च ।।

(२-ना-ना-२-५३)

मोघो दीने निष्फले च मोघा स्यात् पाटलातरौ ।

लघुः स्पृक्कालघ्वसारं ह्नस्वं चार्वगुरुद्रतम् ।।

(२-ना-ना-२-५४)

श्लाघोपास्तीच्छयोः स्तोत्रेऽर्चापूजाप्रतिमाऽपि च ।

कचः शुष्कव्रणे केशे बन्धे पुत्रे च ग्रीष्पतेः ।।

(२-ना-ना-२-५५)

कचा करेण्वां काचोऽक्षिरोगे शिक्ये मणौ मृदि ।

काञ्ची गुञ्जामेखलयोः पूर्यां कूर्चो विकत्थने ।।

(२-ना-ना-२-५६)

श्मश्रुणि दम्भे भ्रूमध्ये कौञ्चो द्वीपे खगे गिरौ ।

चर्चा स्याञ्चर्ममुण्डायां चिन्तास्थासकयोरपि ।।

(२-ना-ना-२-५७)

चंचुः पंचांङ्गुले त्रोट्यां नीचः पामरखर्वयोः ।

मोचाशाल्मलिकदल्योर्मोचः शिग्रौरुचिर्द्युतौ ।।

(२-ना-ना-२-५८)

स्पृहाऽभिष्वङ्गशोभासु वचः शुके वचौषधौ ।

शारिकायां वीच्याल्यूर्म्योरवकाशे सुखाल्पयोः।।

(२-ना-ना-२-५९)

शचीन्द्राणी शतावर्योः शुचिः शुद्ध सितेऽनले।

ग्रीष्माषाढानुपहतेषूपधाशुद्धमन्त्रिणि ।।

(२-ना-ना-२-६०)

श्रृङ्गारे सूच्यभिनये व्यधने करणे स्त्रियाः

अच्छो भल्लके स्फटिकेऽमलेच्छाभिमुखेऽव्ययम् ।।

(२-ना-ना-२-६१)

कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च ।

कच्छास्तु देशे कच्छा स्यात् परिधानापराञ्चले ।।

(२-ना-ना-२-६२)

चीर्यं वाराह्यां च गुच्छो गुच्छे हारकलापयोः ।

पिच्छः पुच्छे पिच्छं वाजे पिच्छा शाल्मलिवेष्टके ।।

(२-ना-ना-२-६३)

पङ्क्तिः पूगच्छटाकोशमण्डेष्वश्वपदामये ।

मोचायां पिच्छिले म्लेच्छो जातिभेदेऽपभाषणे ।।

(२-ना-ना-२-६४)

अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे ।

अब्जो धन्वन्तरौ चन्द्रे शङ्खेब्जं पद्मसंख्ययोः ।।

(२-ना-ना-२-६५)

आजिः क्षणे समक्ष्मायां युध्यूर्जः कार्तिके बले ।

कञ्जो वेधसि केशे च कञ्जं पीयूषपद्मयोः ।।

(२-ना-ना-२-६६)

कुञ्जो हनो दन्तिदन्ते निकुञ्जे च कुजो द्रुमे ।

आरे नरकदैत्ये च कुब्जो न्युब्जद्रुभेदयोः ।।

(२-ना-ना-२-६७)

खजा दर्वीमथोः खर्जुः खर्जूरी कीटकण्डुषु ।

गञ्जो भाण्डागारे रीढाखन्योर्गञ्जा सुरागृहे ।।

(२-ना-ना-२-६८)

गुञ्जा तु कृष्णलायां स्यात् पटहे मधुरध्वनौ ।

द्विजो विप्रक्षत्रिययोर्वैश्ये दन्ते विहंगमे ।।

(२-ना-ना-२-६९)

द्विजा भार्गीरेणुकयोर्ध्वजः पूर्वदिशो गृहे ।

शिश्नेचिह्नेपताकायांखट्वांगेशौण्डिकेऽपि च ।।

(२-ना-ना-२-७०)

निजो नित्ये स्वकीये च न्युब्जः कुशेस्त्रुचि ।

अधोमुखेऽपि च न्युब्जं कर्मरङ्गे तरोः फले ।।

(२-ना-ना-२-७१)

प्रजा लोके संततौ च पिंजा तूल हरिदयोः ।

पिंजो व्यग्रे वधे पिंजं बले बीजं तु रेतसि ।।

(२-ना-ना-२-७२)

स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे ।

भुजो बाहौ करे मर्जूः शिध्दौ च रजकेऽपि च ।।

(२-ना-ना-२-७३)

राजी रेखायां पंक्तौ च रुजा त्वामयभङ्गयोः ।

लज्जः पट्टे च कच्छे च लाजः स्यादार्द्रतण्डुलाः ।।

(२-ना-ना-२-७४)

लाजास्तु भृष्टधान्ये स्युर्लाजं पुनरुशीरके ।

व्रजोऽध्वगोष्टसंघेषु वणिग् वाणिज्यजीविनि ।।

(२-ना-ना-२-७५)

वाणिज्ये करणभेदे वाजं सर्पिषि वारिणि ।

यज्ञान्ते वाजस्तु पक्षे मुनौ निस्वनवेगयोः ।।

(२-ना-ना-२-७६)

व्याजः शाठ्येऽपदेशे च सज्जौ संनद्धसंभृतौ ।

संजौ ब्रह्मशिवौ प्रज्ञः प्राज्ञे प्रज्ञा तु शेमुषी ।।

(२-ना-ना-२-७७)

यज्ञः स्यादात्मनि मखे नारायणहुताशयोः ।

संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचने ।।

(२-ना-ना-२-७८)

चेतनाऽर्कस्त्रियोरट्टो हट्टाऽट्टालकयोर्भृशे ।

चतुष्कभक्तयोरिष्टमीप्सिते क्रतुकर्मणि ।।

(२-ना-ना-२-७९)

पूज्ये प्रेयसि संस्कारे योगेऽथेष्टिर्मखेच्छयोः ।

संग्रहश्लोकेऽथ कटो गजगण्डे कटौ भृशे ।।

(२-ना-ना-२-८०)

शवे शवरथौषध्योः क्रियाकारश्मशानयोः ।

किलिञ्जे समये चापि कष्टं गहनकृच्छ्रयोः ।।

(२-ना-ना-२-८१)

कट्वकार्ये मत्सरे च दूषणे च कटू रसे ।

तिक्ते प्रियङ्गुसुरभिकटुकाराजिकास्वपि ।।

(२-ना-ना-२-८२)

कुटः कोटे शिलाकुट्टे घटे गेहा कुटी मुरा ।

चित्रगुच्छः कुम्भदासी कूटं पुर्द्वारयन्त्रयोः ।।

(२-ना-ना-२-८३)

माया दम्भाद्रिश्रृंगेषु सीराङ्गेऽनृततुच्छयोः ।

निश्चलेऽयोघने राशौ कृष्टिः कर्षणधीमतोः ।।

(२-ना-ना-२-८४)

कोट्युत्कर्षाटनी संख्याश्रिषु खस्टतृणे कफे ।

टङ्केंऽधकूपे प्रहारे खाटिः शवरथे किणे ।।

(२-ना-ना-२-८५)

एकग्रहेऽथ खेटः स्याद्ग्रामभेदे कफेऽधमे।

स्फरे मृगव्ये गृष्टिस्तु सकृत्सूतगवी भवेत् ।।

(२-ना-ना-२-८६)

वराहक्रान्ता च घटा घटने गजसंहतौ ।

गोष्ट्यां घटस्त्विभशिरः कूटे समाधिकुम्भयोः।।

(२-ना-ना-२-८७)

घृष्टिः स्पर्धाघर्षणयोर्विष्णुक्रान्तावराहयोः ।

घोण्टा पूगबदरयोश्चटुश्चाटुपिचण्डयोः ।।

(२-ना-ना-२-८८)

व्रत्यासने जटाकेशविकारे मांसिमूलयोः ।

झाटोव्रणादि संमार्ष्टौ कुन्तकान्तारयोरपि ।।

(२-ना-ना-२-८९)

त्वष्टाऽर्के विश्वकृत्तक्ष्णोस्त्रुटिः संशयलेशयोः ।

सूक्ष्मैलायां कालमाने त्रोटिचञ्च्वां खगान्तरे ।।

(२-ना-ना-२-९०)

मीनकज्जुलयोर्दिष्टं दैवे दिष्टस्त्वनेहसि ।

दिष्टिरानन्दे माने च दृष्टिर्ज्ञानेऽक्षिणिदर्शने ।।

(२-ना-ना-२-९१)

पट्टश्चतुष्पथे पीठे राजादेः शासनान्तरे ।

व्रणादिबन्धने पेषाश्मनि पट्टी ललाटाका ।।

(२-ना-ना-२-९२)

रोध्रेऽथ पटु लवणे पटुस्तीक्ष्णपटोलयोः ।

स्फुटे रोगविहीने च छत्रायां चतुरेऽपि च ।।

(२-ना-ना-२-९३)

पुष्टिः स्यात् पोषणे वृद्धो फटा तु कैतवे फणे ।

भटो वीरे म्लेच्छभेदेऽपि च भृष्टिस्तु भर्जने ।।

(२-ना-ना-२-९४)

शून्यवाद्यामथ म्लिष्टं म्लानमस्पष्टभाषितम् ।

यष्टिर्भाग्यां मधुयष्ट्यां ध्वजदण्डेऽस्त्रहारयोः ।।

(२-ना-ना-२-९५)

रिष्टंक्षेमेऽशुभे रिष्टोऽसौ लाटो वस्त्रदेशयोः ।

वटो गोलेगुणे भक्ष्ये वृक्षेसाम्यवराटयोः ।।

(२-ना-ना-२-९६)

वाटः पथि वृतौ वाटं वरण्डेऽङ्गान्नभेदयोः ।

वाटी वास्तौ गृहोद्यानेत्कट्योर्विटस्तु मूषिके ।।

(२-ना-ना-२-९७)

खदिरे लवणे षिङ्गेद्रौ च व्युष्टं फले दिने ।

पर्युषिते प्रभाते च व्युष्टिः स्तुतिफलर्द्धिषु ।।

(२-ना-ना-२-९८)

विष्टिः कर्मकरे मूल्ये भद्राजूप्रेषणेषु च ।

सटा जटाकेसरयोः स्फुटो व्यक्तप्रफुल्लयोः ।।

(२-ना-ना-२-९९)

सिते व्याप्ते स्फुटिस्त्वंह्निस्फोटे निर्भिन्नचिर्भटे ।

सृष्टिः स्वभावे निर्माणे सृष्टं निश्चितयुक्तयोः ।।

(२-ना-ना-२-१००)

प्रचुरे निर्मिते चाथ हृष्टः स्यात् केशरोमसु ।

जातहर्षे प्रतिहते विस्मिते हृषिते यथा ।। che

(२-ना-ना-२-१०१)

कठो मुनौ स्वरऋचां भेदे तत्पाठिवेदिनोः ।

कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे ।।१०१।।

(२-ना-ना-२-१०२)

काष्ठं दारुणि काष्ठा तु प्रकर्षे स्थानमात्रके ।

दिशि दारुहरिद्रायां कालमानप्रभिद्यपि ।।

(२-ना-ना-२-१०३)

कुण्ठोऽकर्मण्ये मूर्खे च कुष्ठं भेषजरोगयोः ।

कोष्ठो निजे कुसूले च कुक्षेरन्तर्गृहस्य च ।।

(२-ना-ना-२-१०४)

गोष्ठं गोस्थानके गोष्ठी संलापे परिषद्यपि ।

ज्येष्ठः स्यादग्रजे श्रेष्ठे मासभेदातिवृद्धयोः ।।

(२-ना-ना-२-१०५)

ज्येष्ठा भे गृहगोधायां निष्ठोत्कर्षव्यवस्थयोः ।

क्लेशे निष्पत्तौ नाशेऽन्ते निर्वाहे याचने व्रते ।।

(२-ना-ना-२-१०६)

पृष्ठं पश्चिममात्रे स्याच्छरीरावयवान्तरे ।

वण्ठः कुन्तायुधे खर्वे भृत्याकृतविवाहयोः ।।

(२-ना-ना-२-१०७)

शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च ।

श्रेष्ठोऽग्रे धनदे षष्ठीगौरी षण्णां च पूरणी ।।

(२-ना-ना-२-१०८)

हठोऽम्बुपर्ण्यां प्रसभेऽण्डं पेशीकेशमुष्कयोः ।

इडेलावत् स्वर्गनाडीभूवाग्गोषु बुधस्त्रियाम् ।।

(२-ना-ना-२-१०९)

काण्डो नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे ।

सहः श्लाघाम्बुषु स्तम्बे क्रीडा केल्यामनादरे ।।

(२-ना-ना-२-११०)

कुण्डी कमण्डलौ कुण्डो जाराज्जीवत्पतेः सुते ।

देवतोयाशये स्थाल्यां क्ष्वेडः कर्णामये ध्वनौ ।।

(२-ना-ना-२-१११)

विषे वक्रे क्ष्वेडा सिंहनादवंशशलाकयोः ।

क्ष्वेडं लोहितार्कफले घोषपुष्पे दुरासदे ।।

(२-ना-ना-२-११२)

क्रोडः कोले शनौ क्रोडमङ्के खण्डोऽर्द्धऐक्षवे ।

मणिदोषे च गण्डस्तु वीरे पिटकचिह्नयोः ।।

(२-ना-ना-२-११३)

कपोले गण्डके योगे वाजिभूषणबुद्बुदे ।

गडुः पृष्ठगुडे कुब्जे गडो मीनान्तराययोः ।।

(२-ना-ना-२-११४)

गुडः कुञ्जरसंनाहे गोलकेक्षुविकारयोः ।

गुडाति गुडिका स्नुह्यो गोण्डः स्यादुवृद्धनाभिके ।।

(२-ना-ना-२-११५)

पामरजातौ चण्डस्तु यमदासेऽतिकोपने ।

तीव्रे दैत्यविशेषे च चण्डी तु शिवयोषिति ।।

(२-ना-ना-२-११६)

चण्डा धनहरीशङ्खपुष्प्योश्चूडा शिखाग्रयोः ।

बाहुभूषावलभ्योश्च चोडः कञ्चुकदेशयोः ।।

(२-ना-ना-२-११७)

जडोमूर्खे हिमाघ्राते जडा स्याच्छूकशिम्बिका ।

ताडोऽद्रौ ताडने घोषे मुष्टिमेयतृणादिके ।।

(२-ना-ना-२-११८)

ताडी ताली दलतरौ दण्डः सैन्ये दमे यमे ।

मानव्यूहग्रहभेदेष्वश्वेऽर्कानुचरे मथि ।।

(२-ना-ना-२-११९)

प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः ।

नाडी कुहनचर्यायां घटिकागण्डदूर्वयोः ।।

(२-ना-ना-२-१२०)

नाले गुणान्तरे स्नायौ नीडं स्थाने खगालये ।

पण्डः षण्ढे पण्डा बुध्दौ पाण्डुः कुन्तीपतौ सिते ।।

(२-ना-ना-२-१२१)

पिन्डो वृन्दे जपापुष्पे गोलबोलेऽङ्गसिह्लयोः ।

कवले पिण्डं तु वेश्मैकगेशे जीवनायसोः ।।

(२-ना-ना-२-१२२)

बले सान्द्रे पिण्ड्यलाबूखर्जूर्योस्तगरेऽपि च ।

पीडार्तिमर्दनोत्तं सकृपासु सरलद्रुमे ।।

(२-ना-ना-२-१२३)

भाण्डं मूलवणिग्वित्ते तुरङ्गणां च मण्डने ।

नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च ।।

(२-ना-ना-२-१२४)

मण्डो मस्तुनि भूषायामेरण्डे सारपिच्छयोः ।

शाके मण्डा चामलक्यां मुण्डो मण्डितशीर्षयोः ।।

(२-ना-ना-२-१२५)

राहौ दैत्यान्तरे रण्डात्वाखुकर्णी मृतप्रिया ।

व्याडो हिंस्रपशौ सर्पे शुण्डा करिकरः सुरा ।।

(२-ना-ना-२-१२६)

जलेभी नलिनी वारस्त्री शुण्डो मदनिर्भरे ।

शौम्डी च विकपिप्पल्योः शौण्डो विख्यातमत्तयोः ।।

(२-ना-ना-२-१२७)

षडः पेयान्तरे भेदे षण्डः कानन इद्धरे ।

गूढं रहः संवृतयोर्दाढा दंष्ट्राभिलाषयोः ।।

(२-ना-ना-२-१२८)

दृढः शक्ते भृशे स्थूले, बाढं भृशप्रतिज्ञयोः ।

माढिर्दैन्यं पत्रशिरार्चा मूढस्तन्द्रिते जडे ।।

(२-ना-ना-२-१२९)

राढा सुह्मेषु शोभायां व्यूढा न्यस्तोरुसंहताः ।

वोढा स्याद् भारिके सूते शण्ढषण्ढौ तु सौविदे ।।

(२-ना-ना-२-१३०)

वन्ध्यपुंसीद्धरे क्लीबे सोढा मर्षणशक्तयोः ।

अणिराणिवदश्रौ स्यात्सीमन्यक्षाग्रकीलके ।। che

(२-ना-ना-२-१३१)

अणू व्रीह्यल्पयोरुषणा ग्रीष्मदक्षातपोऽहिमाः ।

ऊर्णा भ्रू मध्यगावर्ते मेषादीनां च लोमनिः ।।

(२-ना-ना-२-१३२)

ऋणं देये जलदुर्गे कणो धान्यांशलेशयोः ।

कणा जीरकपिप्पल्योः कर्णश्चापापतौ श्रुतौ ।।

(२-ना-ना-२-१३३)

क्षणः कालविशेषे स्यात् पर्वण्यवसरे महे ।

व्यापारविकलत्वे च परतन्त्रत्वमध्ययोः ।।

(२-ना-ना-२-१३४)

काणः क्षिप्ते हते छन्ने कुणिः कुकरवृक्षयोः ।

कृष्णः कालेपिकेवर्णेविष्णौ व्यासेऽर्जुनेकलौ ।।

(२-ना-ना-२-१३५)

कृष्णा तु नील्यां द्रौपद्यां पिप्पलीद्राक्षयोरपि ।

कृष्णां तु मरिचे लोहे कोणो वीणादिवादने ।।

(२-ना-ना-२-१३६)

लगुडेऽश्रौ लोहिताङ्गे गणः प्रथमसंख्ययोः ।

समूहे सौन्यभेदेऽथ गुणो ज्यासूदतन्तुषु ।।

(२-ना-ना-२-१३७)

रज्जौ सत्वादौ संध्यादौ शौर्यादौ भीम इन्द्रिये ।

रुपादावप्रधाने च दोषान्यस्मिन् विशेषणे ।।

(२-ना-ना-२-१३८)

गेष्णो नटे गायने च घ्राणं तु घ्रातघोणयोः ।

घृणा तु जुगुप्सायां करुणायां घृणिः पुनः ।।

(२-ना-ना-२-१३९)

अंशुज्वालातरङ्गेषु चूर्णानि वासयुक्तिषु ।

चूर्णं क्षोदे क्षारभेदे जर्णो जीर्णद्रुमेन्दुषु ।।

(२-ना-ना-२-१४०)

जिष्णुः शक्रेऽर्जुने विष्णौ जित्वरेऽर्के वसुष्वपि ।

झूर्णिः क्रमुकभेदे स्याद्दुष्टदैवश्रुतावपि ।।

(२-ना-ना-२-१४१)

त्राणं त्राते रक्षणे च त्रायमाणौषधावपि ।

तीक्षणं समुद्रलवणे विषायोऽमरकाजिषु ।।

(२-ना-ना-२-१४२)

आत्मत्यागिनि तिग्मे च तूणी नीलीनिषङ्गयोः ।

द्रुणः स्याद् वृश्चिके भृङ्गे द्रुणंचापकृपाणयोः ।।

(२-ना-ना-२-१४३)

द्रुणी कूर्म्यां जलद्रोण्यां देष्णो दातरि दुर्दमे ।

द्रोणः पार्थगुरौ काके माने द्रोणी तु नीवृति ।।

(२-ना-ना-२-१४४)

नौभेदे शैलसंधौ च पणः कार्षापणे ग्लहे ।

विक्रय्यशाकादि बद्धमुष्टौ मूल्ये भृतौ धने ।।

(२-ना-ना-२-१४५)

व्यवहारे च द्यूताद्युत्सृष्टे गण्डकविंशतौ ।

पर्णस्त्रिपत्रे पर्णं तु पत्रे प्राणोऽनिले बले ।।

(२-ना-ना-२-१४६)

हृद्वायौ पूरिते गन्धरसे प्राणास्तु जीविते ।

पार्ष्णिः कुम्भ्यां चमूपृष्टे पादमूलोन्मदस्त्रियोः ।।

(२-ना-ना-२-१४७)

पूर्णः कृत्रने पूरिते च फाणिर्गुडकरम्बयोः ।

बाणो वृक्षविशेषे स्याच्छरस्यावयवे शरे ।।

(२-ना-ना-२-१४८)

बलिपुत्रेऽप्यथ भ्रूणो गर्भिण्यां श्रोत्रियाजे ।

अर्भके स्त्रैणगर्भे च मणिस्त्वजागलस्तने ।।

(२-ना-ना-२-१४९)

मेढ्राग्रेऽलिञ्जरे रत्ने मोणः सर्पकरण्डके ।

वाने नक्रमक्षिकायां रणः कोणे क्वणे युधि ।।१४९।।

(२-ना-ना-२-१५०)

रेणुर्धूल्यां पर्पटके वर्णः स्वर्णे व्रते स्तुतौ ।

रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे ।।

(२-ना-ना-२-१५१)

भेदे गीतक्रमे चित्रे यशस्तालविशेषयोः ।

अङ्गरागे च वर्णं तु कुङ्कुमे वाणिरम्बुदे ।।

(२-ना-ना-२-१५२)

व्यूतौ मूल्ये सरस्वत्यां वीणा स्याद्वल्लकी तडित् ।

वृष्णिर्मेषे यादवे च वेणी सेतुप्रवाहयोः ।।

(२-ना-ना-२-१५३)

देवताडे केशबन्धे वेणुर्वंशे नृपान्तरे ।

शाणःकषे मानभेदे श्रेण्याल्यां कारुसंहतौ ।।

(२-ना-ना-२-१५४)

शोणो नदे रक्तवर्णे श्योनाकेऽग्नौ हयान्तरे ।

स्थाणुः कीले हरे स्थूणासूर्म्यां स्तम्भे रुगन्तरे ।।

(२-ना-ना-२-१५५)

अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः ।

अवयवेऽप्यर्थार्हन् स्यात् पूज्ये तीर्थकरेऽपिच ।।

(२-ना-ना-२-१५६)

अस्तः क्षिप्ते पश्चिमाद्रावर्तिस्त्वटनिपीडयोः ।

आप्तो लब्धे च सत्ये चाप्याप्तिः संबन्धलाभयोः ।।

(२-ना-ना-२-१५७)

ईतिरजन्ये प्रवासे स्यादूतिः स्यूतिरक्षयोः ।

ऋतं शिलोञ्छे पानीये पूजिते दीप्तसत्ययोः ।।

(२-ना-ना-२-१५८)

ऋतिर्जुगुप्साकल्याणगतिस्पर्धास्वथो ऋतुः ।

स्त्रीणां पुष्पे वसन्तादावेतः कर्बुर आगते ।।

(२-ना-ना-२-१५९)

क्षत्ता शूद्रात् क्षत्रियायां जाते सारथिवेधसोः ।

नियुक्ते दासजे द्वाःस्थे कन्तुः कामकुसूलयोः ।।

(२-ना-ना-२-१६०)

कान्तो रम्ये प्रिये ग्राव्णि कान्ता प्रियङ्गयोषितोः ।

कान्तिः शोभाकामनयोः क्षितिर्गेहे भुवि क्षये ।। che

(२-ना-ना-२-१६१)

कीर्तिर्यशसि विस्तारे प्रासादे कर्दमेऽपि च ।

कृतं पर्याप्तयुगयोर्विहिते हिंसिते फले ।।

(२-ना-ना-२-१६२)

कृत्तं छिन्ने वेष्टिते च केतुर्द्युतिपताकयोः ।

ग्रहोत्पातारिचिह्नेषु गर्तोऽवटे ककुन्दरे ।।

(२-ना-ना-२-१६३)

त्रिगर्तांशेऽप्यथ ग्रस्तं जग्धे लुप्तपदोदिते ।

गतिवहद्रवणे ज्ञाने यात्रोपायदशाध्वसु ।।

(२-ना-ना-२-१६४)

गीतिश्छन्दसि गाने च गीतं शब्दितगानयोः ।

गुप्तं गूढे त्राते गुप्तिर्यमे भूगर्तरक्षयोः ।।

(२-ना-ना-२-१६५)

कारायां घृतमाज्याम्बुदीप्तेष्वथ चिताचिती ।

मृतार्थदारुषु चये जगल्लोकेऽङ्गवायुषु ।।

(२-ना-ना-२-१६६)

जातं जात्योद्यजनिषु जातिः सामान्यगोत्रयोः ।

मालत्यामामलक्यां च चुल्ल्यां काम्पिल्यजन्मनोः ।।

(२-ना-ना-२-१६७)

जातीफले छन्दसि च ज्ञातिः पितृसगोत्रयोः ।

ततं वीणादिवाद्ये स्यात् ततो व्याप्तेऽनिल्लेपृथौ ।।

(२-ना-ना-२-१६८)

तातोऽनिकम्प्ये पितरि तिक्तस्तु सुरभौ रसे ।

तिक्ता तु कटुरोहिण्यां तिक्तं पर्पटकौषधे ।।

(२-ना-ना-२-१६९)

त्रेता युगेऽग्नित्रये च दन्तो दशनसानुनोः ।

दन्त्यौषध्यामथ दितिर्दैत्यमातरि खण्डने ।।

(२-ना-ना-२-१७०)

दीप्तं निर्भासिते दग्धे द्रुतं शीघ्रविलीनयोः ।

द्युतिस्तु शोभादीधित्योर्धाता वेधसि पालके ।।

(२-ना-ना-२-१७१)

धातू रसादौ श्लेष्मादौ भ्वादिग्रावविकारयोः ।

महाभूतेषु लोहेषु शब्दादाविन्द्रियेऽस्थनि ।।

(२-ना-ना-२-१७२)

धुतं त्यक्ते कम्पिते च धूतः कम्पितभर्त्सितौ ।

धूर्तं तु खण्डलवणे धूर्तो धत्तूरमायिनोः ।।

(२-ना-ना-२-१७३)

धृतिर्योगविशेषे स्याद्धारणाधैर्ययोः सुखे ।

संतोषाध्वरयोश्चापि नतस्तगरनम्रयोः ।।

(२-ना-ना-२-१७४)

नीतिर्नये प्रापणे च पक्तिर्गौरवपाकयोः ।

पङ्क्तिछन्दः श्रेण्योः सेनाभित्पद्रगयोर्गतौ ।।

(२-ना-ना-२-१७५)

प्राप्तिर्महोदये लाभे पित्सन् पिपत्षन् यथा ।

पतनेच्छौ विहङ्गे च पीतो वर्णनिपीतयोः ।।

(२-ना-ना-२-१७६)

पीता हरिद्रा पीतिः पानेऽश्वे प्रीतिः स्मरस्त्रियाम् ।

प्रेम्णि योगमुदो पुस्तं शिल्पे लेप्यादिकर्मणि ।।

(२-ना-ना-२-१७७)

पुस्तके प्लुतमश्वस्य गतौ प्लुतस्त्रिमात्रके ।

पूर्तं पूरितखाताद्योः पृषतवत्पृषन् मृगे ।।

(२-ना-ना-२-१७८)

बिन्दौ प्रेतो मृते भूतविशेषे च परेतवत् ।

पोतः शिशौ प्रवहणे प्रोतं गुम्फितवाससोः ।।१

(२-ना-ना-२-१७९)

भक्तमन्ने तत्परे च भर्ता पोष्टरि धारके ।

भक्तिः सेवागौणवृत्त्येर्भङ्ग्यां शद्धविभागयोः ।।

(२-ना-ना-२-१८०)

भास्वान् दीप्रे रवौ भ्रान्तर्मिथ्याज्ञानेऽनवस्थितौ ।

भित्तिः कुड्ये प्रदेशे च भूतं सत्योपमानयोः ।।

(२-ना-ना-२-१८१)

प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुयुक्तयोः ।

भूभृन्महीधरे पृथ्वीपतौ भूतिस्तु भस्मनि ।।

(२-ना-ना-२-१८२)

मांसपाकविरोषे च संपदुत्पादयोरपि ।

भृतिर्भरणमूल्ययोर्मतं तु संमतेऽर्चिते ।।

(२-ना-ना-२-१८३)

महदबृहति धीतत्वे राज्ये मरुत्सुरेऽनिले ।

मतिर्बूद्धीच्छयोर्माता गौर्दुर्गाजननी मही ।। १८३ ।।

(२-ना-ना-२-१८४)

मातरस्तु ब्रह्माण्याद्यया मितिरैयत्यमानयोः ।

मुक्ता मौतिकपुंश्चल्योर्मुक्तिर्मोचनमोक्षयोः ।।

(२-ना-ना-२-१८५)

मूर्तिः पुनः प्रतिमायां कायकाठिन्ययोरपि ।

मृतं मृत्यौ याचिते च यन्ता सूते निषादिनि ।।

(२-ना-ना-२-१८६)

यतिर्निकारे विरतौ भिक्षौ युतोऽन्विते पृथक् ।

युक्तिर्न्याये योजने च रक्तं नील्यादिरञ्जिते ।।

(२-ना-ना-२-१८७)

कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे ।

रतिः स्मरस्त्रियां रागे रते रीतिस्तु पित्तले ।।

(२-ना-ना-२-१८८)

वैदर्भ्यादौ लोहकिट्टे सिमनि स्त्रवणे गतौ ।

लता ज्योतिष्मतीदूर्वाशाखावल्लीप्रियङ्गुषु ।।

(२-ना-ना-२-१८९)

स्पृक्कामाधव्योः कस्तूर्यां लिप्तं भुक्तविलिप्तयोः ।

विषाक्ते लूता तु रोगे पिपीलकोर्णनाभयोः ।।

(२-ना-ना-२-१९०)

वर्तिर्गात्रानुलेपिन्यां दशायां दीपकस्य च ।

दीपे भेषजनिर्माणे नयनाञ्जनलेखयोः ।।

(२-ना-ना-२-१९१)

व्यक्तो मनीषिस्फुटयोर्वार्त्ता वार्त्ताक्युदन्तयोः ।

कृष्यादौ वर्तने वार्त्तं त्वारोग्यारोगफल्गुषु ।।

(२-ना-ना-२-१९२)

वृत्तिशालिन्यथ व्याप्तिर्व्यापने लम्भनेऽपि च ।

वास्तु स्याद्गृहभूपुर्योर्गृहे सीमसुरङ्गयोः ।।

(२-ना-ना-२-१९३)

वित्तं विचारिते ख्याते धने वित्तिस्तु संभवे ।

ज्ञाने लाभे विचरे च वीतमङ्कुशकर्मणि ।।

(२-ना-ना-२-१९४)

असाराश्वगजे शान्ते वीतिरश्वेऽशने गतौ ।

प्रजने धावने दीप्तौ वृत्तं वृत्तौ दृढे मृते ।।

(२-ना-ना-२-१९५)

चरित्रे वर्तुले छन्दस्यतीताधीतयोर्वृते ।

वृन्तं स्तनमुखे पुष्पबन्धे वृत्तिस्तु वर्तने ।।

(२-ना-ना-२-१९६)

कैशिक्यादौ विवरणे वृतिर्वरणवाटयोः ।

शक्तिरायुधभेदे स्यादुत्साहादौ बले श्रियाम् ।।

(२-ना-ना-२-१९७)

शस्तं क्षेमे प्रशस्ते च शान्तो दान्ते रसान्तरे ।

शास्ता जिने शासके च शान्तिर्भद्रे शमेऽर्हति ।।

(२-ना-ना-२-१९८)

शितं शातौ कृशे तीक्ष्णे शितिर्भूर्जे सितेऽसिते ।

श्रीमान् मनोज्ञे तिलकपादपे धनवत्यपि ।।

(२-ना-ना-२-१९९)

शीतो हिमे च जिह्मे च वानीरबहुवारयोः ।

शीतं गुणे शुक्तमम्ले पूतिभूते च कर्कशे ।।

शुक्तिः शङ्खनके शङ्खे कपालखण्डदृग्रुजोः

नख्यश्चावर्तयोर्मुक्तारफोटदुर्नामयोरपि ।। che

(२-ना-ना-२-२०१)

श्रुतमाकर्णिते शास्त्रे श्रुतिराम्नायवार्तयोः ।

षड्जाद्यारम्भिकायां च कर्णाकर्णनयोरपि ।।

(२-ना-ना-२-२०२)

श्वेतं रुप्ये श्वेतो द्वीपे वर्णे शैले कपर्दके ।

श्वेतातुशङ्खिनीकाष्ठपाटल्योः स्यात् सतीपुनः ।।

(२-ना-ना-२-२०३)

कात्यायन्यां च साध्व्यां च सातिर्दानावसानयोः ।

सितस्त्ववसिते बध्दे वर्णे सिता तु सर्करा ।।

(२-ना-ना-२-२०४)

स्थित ऊर्ध्वे सप्रतिज्ञे स्थितः स्थाने च सीम्नि च ।

सीता जनकजागङ्गाभेदयोर्हलपद्धतौ ।।

(२-ना-ना-२-२०५)

सुतः पुत्रे नृपे सुप्तिः स्वापे स्पर्शाज्ञता रुजि ।

सूतः पारदसारथ्योः प्रसूतेरितबन्दिषु ।।

(२-ना-ना-२-२०६)

ब्राह्मण्यां क्षत्रियाज्जाते तक्ष्णि सृतिर्गतौ पथि ।

स्मृतिः स्मरणधीच्छासु शास्त्रे सेतुस्तु संवरे ।।

(२-ना-ना-२-२०७)

नदीसंक्रमेऽथ हस्तः करे मानोडुभेदयोः ।

केशात्कलापे शुण्डायां हरिद्विदशि तृणान्तरे ।।

(२-ना-ना-२-२०८)

वर्णभेदेऽश्वभेदे च हितं पथ्ये गते धृते ।

हेतिर्ज्वालास्त्रसूर्यांशुष्वर्थो हेतौ प्रयोजने ।।

(२-ना-ना-२-२०९)

निवृत्तौ विषये वाच्ये प्रकारद्रव्यवस्तुषु ।

आस्था यत्नालम्बनयोरास्थनापेक्षयोरपि ।।

(२-ना-ना-२-२१०)

कन्था पुरे प्रावरणे क्वाथो व्यसनदुःखयोः ।

द्रवनिष्पापकेऽथ कुथः स्यादास्तरणदर्भयोः ।।

(२-ना-ना-२-२११)

कोथस्ति मथने नेत्ररुग्भेदे शटितेऽपि च ।

ग्रन्थो गुम्फे धने शास्त्रे द्वात्रिंशद्वर्णनिर्मितौ ।।

(२-ना-ना-२-२१२)

ग्रन्थिर्वस्त्रादिबन्धे रुग्भेदे कौटिल्यपर्वणोः ।

ग्रन्थि तु ग्रन्थिपर्णे स्याद्गगाथा वाग्भेदवृत्तयोः ।।

(२-ना-ना-२-२१३)

तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ।

ऋ‍ुषिजुष्टे जले सत्त्रिण्युपाये स्त्रीरजस्यपि ।।

(२-ना-ना-२-२१४)

योनौ पात्रे दर्शने च तुत्थोऽग्नौ तुत्थमञ्जने ।

तुत्था नील्यां सूक्ष्मैलायां दुःस्थो दुर्गतमूर्खयोः ।।

(२-ना-ना-२-२१५)

प्रस्थः सानौ मानभेदे पीथोऽर्के पीथमम्भुनि ।

पृथुर्विशाले भूपाले वापिकाकृष्णजीरयोः ।।

(२-ना-ना-२-२१६)

प्रोथोऽष्वघोणाध्वगयोः कट्यां मन्थो रवौ मथि ।

साक्तवे नेत्ररोगे च यूथं तिर्यग्गणे गणे ।।

(२-ना-ना-२-२१७)

यूथी तु मागधीपुष्पविशेषयोः कुरण्टके ।

रथस्तु स्यन्दने पादे शरीरे वेतसद्रमे ।।

(२-ना-ना-२-२१८)

वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे नाट्यरुपके ।

संस्थास्पशे स्थितौ मृत्यौ सार्थो वृन्दे वणिग्गणे ।।

(२-ना-ना-२-२१९)

सिक्थं नील्यां मधूतच्छिष्टे सिक्थो भक्तपुलाकके ।

अब्दः संवत्सरे मेघे मुस्तके गिरिभिद्यपि ।।

(२-ना-ना-२-२२०)

अन्दूः स्यान्निगडे भूषाभेदे ककुदवत् ककुत् ।

श्रेष्ठेवृषाङ्गेराट्चिह्नेक्रव्यान्मांशिरक्षसोः ।।

(२-ना-ना-२-२२१)

कन्दोऽब्दे सूरणे सस्यमूले कुन्दोऽच्युते निधौ ।

चक्रभूमौ च माघ्ये च क्षोदः पेषणचूर्णयोः ।।

(२-ना-ना-२-२२२)

गदः कृष्णानुजे रोगे गदा प्रहरणान्तरे ।

छदः पत्रे पतत्रे च ग्रन्थिपर्णतमालयोः ।।

(२-ना-ना-२-२२३)

छन्दो वशेऽभिप्राये च दृषत् पाषाणमात्रके ।

निष्पेषणार्थपट्टेऽपि धीदा कन्यामनीषयोः ।।

(२-ना-ना-२-२२४)

नदो वहेऽब्धौ निनदे, नन्दा संपद्यलिञ्जरे ।

तिथिभेदेऽपु नन्दिस्तु, प्रतीहारे पिनाकिनः ।।

(२-ना-ना-२-२२५)

आनन्दने च द्युते च निन्दा कुत्सापवादयोः ।

पदं स्थाने विभक्त्यन्ते, शब्दे वाक्येऽङ्कवस्तुनोः ।।

(२-ना-ना-२-२२६)

त्राणे पादे पादचिह्ने व्यवसायापदे शयोः ।

पादौ मूलास्त्रतुर्यांशाङ्घ्रिषु प्रत्यन्तपर्वते ।।

(२-ना-ना-२-२२७)

भन्द्रं कल्याणे सौख्ये च, भसद्र भास्वरमांसयोः ।

भेदो विदारणे द्वैधे उपजापविशेषयोः ।।

(२-ना-ना-२-२२८)

मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः ।

कस्तूरिकायां क्षेब्ये च मदी कृषकवस्तुनि ।।

(२-ना-ना-२-२२९)

मन्दो मूढे शनौ रोगिण्यलसे भाग्यवर्जिते ।

गजजातिप्रभेदेऽल्पे स्वैरे मन्दरते खले ।।

(२-ना-ना-२-२३०)

मृद्वतीक्ष्णे कोमले च, रदो दन्ते विलेखने ।

विदा ज्ञानधियोर्बिन्दुविप्रुट्ज्ञात्रो रदक्षते ।।

(२-ना-ना-२-२३१)

वेदिरङ्गुलिमुद्रायां, बुधेऽलंकृतभूतले ।

शब्दोऽक्षरे यशोगीत्योर्वाक्ये खेश्रवणे ध्वनौ ।।

(२-ना-ना-२-२३२)

शकद्र वर्षात्यये वर्षे, शादः कर्दमशष्पयोः।

संवित्संभाषणे ज्ञाने, संग्रामे नाम्ति तोषणे ।।

(२-ना-ना-२-२३३)

त्रियाकारो प्रतिज्ञायां, संकेताचारयोरपि ।

संपादृद्धौ गुणोत्कर्षे, हारे स्वादुस्तु सुन्दरे ।।

(२-ना-ना-२-२३४)

मृष्टे सूदः सूपकारे व्यञ्जनेऽपि च सूपवत् ।

स्वेदो धर्मे स्वेदने चान्धोन्धकारेऽकक्षिवर्जिते ।।

(२-ना-ना-२-२३५)

अर्धः खण्डेऽर्धं समांशेऽथाब्धिः सरसि सागरे ।

आधिर्मनोर्त्तौव्यमनेऽधिष्टानेबन्धकाशयोः ।।

(२-ना-ना-२-२३६)

श्रृद्धं समृद्धे सिद्धान्ने, गन्धः संबन्धलेशयोः ।

गन्धकामोदगर्वेषु, स्याद्गगाधः स्ताधवप्सयोः ।।

(२-ना-ना-२-२३७)

गोधा प्राणिविशेषे स्याज्ज्याघातस्य च वारणे ।

दिग्धो लिप्ते विशाक्तेषौ प्रवृद्धस्नेहयोरपि ।।

(२-ना-ना-२-२३८)

दुग्धं क्षीरे पूरिते च, दोग्धा गोपालवत्सयोः ।

अर्थोपजीवककवौ, बन्ध आधौ च बन्धने ।।

(२-ना-ना-२-२३९)

बन्धुर्भ्रातृबान्धवयोर्बाधा दुःखनिषेधयोः ।

बुधः सौम्ये कवौ बुद्धः, पण्डिते बुद्धिते जिने ।।

(२-ना-ना-२-२४०)

बोद्धिर्बौद्धसमाधौ चार्हद्धर्माप्तौ च पिप्पले ।

मधुश्चैत्रर्तुदैत्येषु जीवाशाकमधूकयोः ।।

(२-ना-ना-२-२४१)

मधु क्षीरे जले मद्ये, क्षौद्रे पुष्परसेऽपि च ।

मिद्धं चित्ताभिसंक्षेपे निद्रालसतयोरपि ।।

(२-ना-ना-२-२४२)

मुग्धो मूढे रम्ये मेधः क्रतौ मेधा तु शेमुषी ।

राधो वैशाखमासे स्याद्, राधा विद्यद्विशाखयोः ।।

(२-ना-ना-२-२४३)

विष्णुक्रान्तामलक्योश्च, गोपीवेध्यविशेषयोः ।

लुब्ध आकाङ्क्षिणि व्याधे, वधोहिंसकहिंसयोः ।।

(२-ना-ना-२-२४४)

वधूः पत्न्यां स्नुषानार्योः, स्पृक्का शारिवयोरपि ।

नवपरिणीतायां च, व्याधो मृगयुदुष्टयोः ।।

(२-ना-ना-२-२४५)

विद्धं सदृग्वेदितयोः क्षिप्ते विधर्द्धिमूल्ययोः ।

प्रकारे भान्नविधिशु, विधिब्रर्ह्मविधानयोः ।।

(२-ना-ना-२-२४६)

विधिवाक्ये च दैवे च प्रकारे कालकल्पयोः ।

विधुश्र्चन्द्रेच्युते विरुल्लतायां विटपेऽपि च ।।

(२-ना-ना-२-२४७)

वृद्धः प्राज्ञे स्थविरे च वृद्धं शैलेयरूढयोः ।

वृद्धिः कलान्तरे हर्षे, वृर्द्धनेभेषजान्तरे ।।

(२-ना-ना-२-२४८)

श्रद्धा स्तिक्येऽभिलाषे च श्रद्धं श्रद्धासमन्विते ।

हव्यकव्यविधाने च , शुद्धः केवलपूतयोः ।।

(२-ना-ना-२-२४९)

स्कन्धः प्रकाण्डे कायें ऽसे, विज्ञानादिषु पञ्चसु ।

नृपे समूहे व्यूहे च , सन्धा स्थितिप्रतिज्ञयोः ।।

(२-ना-ना-२-२५०)

सन्धिर्योनौ सुरगायां नाट्याऽ श्र्लेषभेदयोः ।

साधुर्जैनमुनौ वार्धुषिके सज्जनरम्ययोः ।।

(२-ना-ना-२-२५१)

सिद्धो व्याडयादिके देवयोनौ निष्पन्नमुक्तयोः ।

नित्ये प्रसिद्धे सिद्धिस्तुमोक्षेनिष्पत्तियोगयो ः ।।

(२-ना-ना-२-२५२)

सिन्धुर्नद्यां गजमदेऽब्धौ देशनदभेदयोः ।

सुधा गङ्-गेष्टिकास्नुह्योर्मूर्वालेपामृतेषु च ।।

(२-ना-ना-२-२५३)

अन्नं भक्तेऽशितेऽर्वाश्वेऽधमेऽध्वा कालवर्त्मनोः ।

संस्थाने सारत्रवस्कन्धेऽर्थिनौ याचकसेवकौ ।।

(२-ना-ना-२-२५४)

आत्मा चित्ते धृतौ यत्ने, धिषणायां कलेवरे ।

परमात्मनि जीवेर्के हुताशनसमीरयोः ।।

(२-ना-ना-२-२५५)

स्वभावेऽथेन ईशेर्केऽथोन्नं क्लिन्ने दयापरे ।

ऊष्माणस्तु निदाघोष्णग्रीष्माः शषसहा अपि ।।

(२-ना-ना-२-२५६)

कर्म कारकभेदे स्यात्क्रियायां च शुभाशुभे ।

कामी स्यात्कमने चक्रवाके पारावतेऽपि च ।।

(२-ना-ना-२-२५७)

कृती योग्ये बुधे खड्गी गण्डके खड्गधारिणि ।

ग्रावाश्मनि गिरौ गोमी फेरौ गोमत्युपासके ।।

(२-ना-ना-२-२५८)

घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे ।

सङ्घे मुस्ते घनं मध्यनृत्तवाद्यप्रकारयोः ।।

(२-ना-ना-२-२५९)

चर्म त्वचि स्फुरे चर्मी, भूर्जे फलकिभृङ्घिणोः ।

चक्री कोके कुलालेऽहो वैकुण्ठे चक्रवर्तिनि ।।

(२-ना-ना-२-२६०)

चिन्हमङ्के पताकायां, चीनो देशैणतन्तुषु ।

व्रीहौ वस्त्रे छद्मशाठ्येऽपदेशे घातिकर्मणि ।।

(२-ना-ना-२-२६१)

छन्नं रहश्छादितयोश्छिन्ना स्यादमृतेत्वरी ।

छिन्नं भिन्ने जनो लोके जगद्भेदे पृथग्जने ।।

(२-ना-ना-२-२६२)

जनी स्नुषावनितयोर्जिनोऽर्हद्बुद्धविष्णुषु ।

ज्योत्स्ना स्याज्ज्योतिः संयुक्तनिशिचन्द्रातपेऽपि च ।।

(२-ना-ना-२-२६३)

ज्यौत्स्नी पटोली ज्योत्स्नावन्निशोस्तनुर्वपुस्त्वचोः ।

विरलेऽल्पे कृशे दण्डी, यमे द्वाः स्थसदण्डयोः ।।

(२-ना-ना-२-२६४)

दानं मतङ्गजमदे, रक्षणच्छेदशुद्धिषु ।

विश्राणनेऽप्यथ द्युम्नं द्रविणवद्धनौजसोः ।।

(२-ना-ना-२-२६५)

धनं वित्ते गोधने च स्याद्धन्वस्थलचापयोः ।

धन्वामरौ धन्वी पार्थे छेके ककुभचापिनोः ।।

(२-ना-ना-२-२६६)

धनुः शब्द पियालद्रौ राशिभेदे धनुष्यपि ।

धामरश्मौ गृहे देहे, स्थाने जन्मप्रभामयोः ।।

(२-ना-ना-२-२६७)

धाना भृष्टयवेङ्कुरे धन्याके चूर्णसक्तुषु ।

धेनः समुद्रे धेनो तु नद्यां नग्नो विवाससि ।।

(२-ना-ना-२-२६८)

मागधे क्षपणके च, नन्दी गिरशवेत्रणि ।

गर्दभाण्डे वटे न्यूनं हीनवच्चोनगर्ह्ययोः ।।

(२-ना-ना-२-२६९)

पर्व प्रस्तावोत्सवयोर्ग्रन्थौ विषुवदादिषु ।

दर्शप्रतिपत्सन्धौ च तिथिग्रन्थविशेषयोः ।।

(२-ना-ना-२-२७०)

पक्ष्माऽक्षिलोम्नि तन्त्वादिसुक्ष्मांशे कुसुमच्छदे ।

गरुत्किञ्जल्कयोश्चापि पत्रीकाण्डे खगे द्रुमे ।।

(२-ना-ना-२-२७१)

रथेऽद्रौ रथिके श्येने, प्रेम ति स्नेहनर्मणोः ।

ब्रह्मा तु तपसि ज्ञाने, वेदेऽध्यात्मे द्विजे विधौ ।।

(२-ना-ना-२-२७२)

ऋत्विग्योगभिदोश्चाथ बुध्ने गिरिशमूलयोः ।

भर्म भारे भृतौ हेम्नि, भानिरंशौ रवौ दिने ।।

(२-ना-ना-२-२७३)

भिन्नोऽन्यः संगतः फुल्लो दीर्णो भोगी भुजङ्गमे ।

वैयावृत्यकरे राज्ञि गामण्यां नापितेऽपि च ।।

(२-ना-ना-२-२७४)

मानं प्रमाणे प्रस्थादौ, मानश्चित्तोन्नतौ ग्रहे ।

मीनो मन्स्ये राशिभेदे, मृत्स्ना तुवर्यपि ।।२७४।।

(२-ना-ना-२-२७५)

यानं युग्ये योनिः, कारणे भगताम्रयोः ।

रत्नं स्वजातिश्रेष्ठे स्यान्मणौ राजा तु पार्थिवे ।।

(२-ना-ना-२-२७६)

निशाकरे प्रभौ शक्रे यक्षक्षत्रिययोरपि ।

रास्नैलापर्णी सर्पाक्ष्योः, रागो कामिनि रङ्क्तरि ।।

(२-ना-ना-२-२७७)

रोही रोहीतकेऽश्वत्थे, वटे लग्नं तु लज्जिते ।

राशीनामुदये सक्ते, लक्ष्म प्रधानचिन्हयोः ।।

(२-ना-ना-२-२७८)

वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने ।

वस्नंऽवस्त्रे धने मूल्ये, भृतौ वर्ष्म पुनस्तनौ ।।

(२-ना-ना-२-२७९)

प्रमाणे सुन्दराकारे वर्त्म नेत्रच्छदेऽध्वनि ।

वर्णी पुनश्चित्रकारे, लेखके ब्रह्मचारिणि ।।

(२-ना-ना-२-२८०)

वानं शुष्कफले शुष्के, सीवने गमने कटे ।

जलसंप्लुतवातोर्मिसुरङ्गासौरभेषु च ।।

(२-ना-ना-२-२८१)

वाग्मी पटुबृहस्पत्योर्वाजी वाणे हये खगे ।

विन्नं विचारिते लब्धे, स्थते वृषा तु वासवे ।।

(२-ना-ना-२-२८२)

वृषभे तुरङ्गे पुंसि, शाखी तु द्रुमवेदयोः ।

राजभेदे शिखीत्वग्नौ, वृक्षे केतुग्रहे शरे ।।

(२-ना-ना-२-२८३)

चूडावति बलीवर्दे, मयूरे कुक्कुटे हये ।

शीनो मूर्खाजगरयोः, श्येनः शुक्ले पतत्त्रिणि ।।

(२-ना-ना-२-२८४)

स्वप्नः स्वापे सुप्तज्ञाने, स्थानं स्थत्यवकाशयोः ।

सादृश्ये सन्निवेशे च स्नानं स्नानीय आप्लवे ।।

(२-ना-ना-२-२८५)

स्त्यानं स्यात्स्निग्ध आलस्ये, प्रतिध्वानघनत्वयोः ।

सादी तुरङ्गमारोहे, निषादिरथिनोरपि ।।

(२-ना-ना-२-२८६)

स्वामी प्रभौ गुहे सूनं, पुष्पे सूना पुनः सुता ।

अधोजिह्वा वधस्थानं, सूनुः पुत्रेऽनुजे रवौ ।।२८६।।

(२-ना-ना-२-२८७)

हनुः कपोलावयवे, मरणामययोरपि ।

हरिद्रायामायुधे च, हली कृषकसीरिणोः ।।

(२-ना-ना-२-२८८)

क्ल्पो विकल्पे कल्पद्रौ, संवर्ते ब्रह्मवासरे ।

शास्त्रे न्याये विधौ कूपो, गर्तेऽन्धौ गुणवृक्षके ।।

(२-ना-ना-२-२८९)

मृन्माने कूपके क्षेपो, गर्वे लङ्घननिन्दयोः ।

विलम्बे रणहेलासु, गोपौ भूपालवल्लवौ ।।

(२-ना-ना-२-२९०)

ग्रामोघगोष्ठाधिकृतौ, गोपी गोपालसुन्दरी ।

शारिवा रक्तिका तल्पमट्टे शय्याकलत्रयोः ।।

(२-ना-ना-२-२९१)

त्रपा लज्जाकुलटयोस्त्रपु सीसकरङ्गयोः ।

तापः संतापे कृच्छे च तापी तु सरिदन्तरे ।।

(२-ना-ना-२-२९२)

दर्पो मृगमदे गर्वे, पुष्पं विकास आर्तवे ।

धनदस्य विमाने च, कुसुमे नेत्ररुज्यपि ।।

(२-ना-ना-२-२९३)

बाष्प ऊष्माऽक्षिजलयो, रुपं तु श्लोकशब्दयोः ।

पशावाकारे सौन्दर्ये, नाणके नाटकादिके ।।

(२-ना-ना-२-२९४)

ग्रन्थावृत्तौ स्वभावे च, रेपः क्रूरे विगर्हिते ।

रोपौ रोपणेषू रोपं, रन्ध्रे लेपस्तु लेपने ।।

(२-ना-ना-२-२९५)

अशने च सुधायां च,वपा विवरमेदसोः ।

शष्पं तु प्रतिमाहीनतायां बालतृणेऽपि च ।।

(२-ना-ना-२-२९६)

शापः शपथ आक्रोशे शिष्यं स्त्रुवे क्रियोचिते ।

स्वापो निद्रायां रुग्भेदे, शयनाज्ञानमात्रयोः ।।

(२-ना-ना-२-२९७)

गुम्फो दोर्भूषणे दृब्धौ, रेफोऽवद्यरवर्णयोः ।

शफं खुरे गवादीनां, मूले विटपिनामपि ।।

(२-ना-ना-२-२९८)

शिफा मातरि मांस्यां च, जटायां च सरित्यपि ।

कम्बिर्वंशलतादर्व्योः कम्बुर्वलयशङ्खयोः ।।

(२-ना-ना-२-२९९)

गजे शम्बूके कर्चूरे ग्रीवायां नलकेऽपि च ।

जम्बूर्मेरुतरङ्गिण्यां द्वीपवृक्षविशेषयोः ।।

(२-ना-ना-२-३००)

डिम्ब एरण्डभययोर्विप्लवे प्लीह्निपुप्फुसे ।

बिम्बं प्रतिबिम्बे स्यान्मण्डले बिम्बिकाफले ।।

(२-ना-ना-२-३०१)

शम्बः पवौ लोहकाञ्च्यां, स्तम्ब आलानगुल्मयोः ।

ब्रीह्यादीनां प्रकाण्डे च, कुम्भो वेश्यापतौ घटे ।।

(२-ना-ना-२-३०२)

द्विपाङ्गे राक्षसे राशौ कुम्भं त्रिवृतिगुग्गुलौ ।

कंभ्युखायां पाटलायां, वारिपर्ण्यां च कट्वफले ।।

(२-ना-ना-२-३०३)

गर्भः कुक्षौ शिशौ सन्धौ, भ्रूणे पनसकण्टके ।

मध्येऽग्नावपवरके, जम्भः स्याद्दानवान्तरे ।।

(२-ना-ना-२-३०४)

दन्तभोजनयोरंशे हनौ जम्बीरतूणयोः ।

जृम्भा जृम्भणे विकासे, डिम्भो वैधेयबालयोः ।।

(२-ना-ना-२-३०५)

दम्भः कल्के कैतवे च, नाभिः क्षत्रप्रधानयोः ।

चक्रमध्ये मृगमदे, प्राण्यङ्गे मुख्यराजि च ।।

(२-ना-ना-२-३०६)

निभः स्यात्सदृशे व्याजे, दम्भो वैणवदण्डके ।

रम्भा त्रिदशभामिन्यां. कदल्यां च विभुः प्रभौ ।।

(२-ना-ना-२-३०७)

व्यापके शङ्करे नित्ये, शम्भुर्ब्रह्मार्हतोः शिवे ।

शुभो योगे शुभं भद्रे, स्तम्भः स्थूणाङ्गजाड्ययोः ।।

(२-ना-ना-२-३०८)

सभा सभ्येषु शालायां, गोष्ठ्यां द्यूतसमूहयोः ।

स्वभूर्विष्णौ विधावामोऽपक्वे रुग्भेदरोगयोः ।।

(२-ना-ना-२-३०९)

उमा गौर्यां हरिद्रायां, कीर्तिकान्त्यतसीष्वपि ।

ऊर्मिः पीडा जवोत्कण्ठाभङ्गप्रकाशवीचिषु ।।

(२-ना-ना-२-३१०)

वस्त्रसंकोचलेखायां, क्रमः कल्पांहि-शक्तिषु ।

परिपाट्यां क्षमः शक्ते, हिते युक्ते क्षमावति ।।

(२-ना-ना-२-३११)

क्षमा क्षान्तौ क्षितौ कामं, बाढेऽनुमितिरेतसोः।

कामः स्मरेच्छाकाम्येषु क्षूमा स्यान्नीलिकातसी ।।

(२-ना-ना-२-३१२)

कृमिः क्रिमिश्च लाक्षायां, कीटे क्षेमस्तु मङ्गले ।

लब्धरक्षणे मोक्षे च, क्षेमोमा धनहर्यपि ।।

(२-ना-ना-२-३१३)

क्षौमं स्यादतसीवस्त्रे दुकूलेऽट्टालकेऽपि च ।

खर्मं क्षौमे पौरुषे च गमोऽध्वद्यूतभेदयोः ।।

(२-ना-ना-२-३१४)

सदृक्पाठेऽप्यथ ग्रामो, वृन्दे शब्दादिपूर्वकः ।

खड्गादौ संवसथे च, गुल्मः सैन्योपरक्षणे ।।

(२-ना-ना-२-३१५)

रुक्सैन्यघट्टभेदेषु, स्तम्बे गुल्मी पटौकसौ ।

आमलक्येलयोर्वन्यामथ घर्म्मो निदाघवत् ।।

(२-ना-ना-२-३१६)

स्वेदाम्भस्यातपे ग्रीष्मोष्मणोर्जाल्मिस्तु पामरे ।

असमीक्ष्यकारिणि च जामिः स्वसृकुलस्त्रियोः ।।

(२-ना-ना-२-३१७)

जिह्मः कुटिले मन्दे च, जिह्मं तगरपादपे ।

तोक्मं कर्णमले तोक्मः,स्याद्धरिते हरिद्यवे ।।

(२-ना-ना-२-३१८)

दमः स्यात्कर्दमे दण्डे, दमने दमथेऽपि च ।

दस्मस्तु हव्यवाहे स्याद् यजमाने मलिम्लुचे ।।

(२-ना-ना-२-३१९)

धर्मो यमोपमापुण्यस्वभावाचारधन्वसु ।

स्त्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि ।।

(२-ना-ना-२-३२०)

धर्मं दानादिके नेमस्त्वर्धे प्राकारगतयोः ।

अवधौ केतवे काले, नेमिः कूपत्रिकाप्रधेः।।

(२-ना-ना-२-३२१)

तिनिशोऽरिष्टनेमिश्च, पद्म व्यूहे निधावहौ ।

संख्याब्जयोः पद्ममिभबिन्दौ ब्राह्मी तु भारती ।।

(२-ना-ना-२-३२२)

शाकभेदः पङ्कगडी हञ्जिका सोमवल्लरी ।

ब्रह्मशक्तिर्भ्रमस्तु स्याद्भ्रमणे वारिनिर्गमे ।।

(२-ना-ना-२-३२३)

भ्रान्तौ कुन्दाख्ययन्त्रे च,भीमो घोरे वृकोदरे ।

हरेऽम्लवेतसे चाथ भीष्मो गाङ्गेयरुद्रयोः ।।

(२-ना-ना-२-३२४)

राक्षसे भीषणे भौमोऽङ्गारके नरकासुरे ।

यमः कालयमजयोरहिंसादिषु पञ्चसु ।।

(२-ना-ना-२-३२५)

संयमे यमने ध्वाङ्क्षे यामौ प्रहरसंयमौ ।

रमः कान्ते रक्ताशोके, मन्भथे च रमा श्रियाम् ।।

(२-ना-ना-२-३२६)

रश्मिर्घृणिप्रग्रहयो, रामः श्यामे हलायुधे ।

पशुभेदे सिते चारौ, राघवे पेणुकासुते ।।

(२-ना-ना-२-३२७)

पामं तु वास्तुके कुष्ठे. रामा हिङ्गुलिनीस्त्रियोः ।

रुक्मं लोहे सुवर्णे च, रुमा स्याल्लवणाकरे ।।

(२-ना-ना-२-३२७)

सुग्रीवपत्न्यां लक्ष्मीः, श्रीशोभासंपतप्रियङ्गुषु ।

वमिर्षान्तेऽनले वामः, कामे सव्ये पयोधरे ।।

(२-ना-ना-२-३२९)

उमानाथे प्रतिकूले, चारौ वामा तु योषिति ।

वामी शृगाल्यां करभीरासभीवडवासु च ।।

(२-ना-ना-२-३३०)

शमी द्रुभेदे वल्गुल्यां, शिम्ब्यां श्यामोऽम्बुदे शितौ ।

हरिते प्रयागवटे कोकिले वृद्धदारके ।।

(२-ना-ना-२-३३१)

श्यामं सैन्धवे मरिचे, श्यामा सोमलतानिशोः ।

शारिवा वल्गुनीगुन्द्रा - त्रिवृत्कृष्णाप्रियङ्गुषु ।।

(२-ना-ना-२-३३२)

अप्रसूतस्त्रियां नील्यां, श्रामो मण्डपकाल्योः ।

शुष्ममोजसि सूर्ये च, समं साध्वखिलं सदृक् ।।

(२-ना-ना-२-३३३)

सीमाघाटे स्थितौ क्षेत्रे, सूक्ष्मोऽणौ सूक्ष्ममल्पके ।

अध्यात्मे कतके सोमस्त्वौषधी तद्रसेन्दुषु ।।

(२-ना-ना-२-३३४)

दिव्यौषध्यां घनसारे समीरे पितृदैवते ।

वसुप्रभेदे सलिले, वानरे किन्नरेश्वरे ।।

(२-ना-ना-२-३३५)

हिमं तुषारे शीते च, हिमश्चन्दन पादपे ।

होमिः सर्पिषि वह्नौ च, स्यादर्य्यः स्वामिवैश्ययोः ।।

(२-ना-ना-२-३३६)

अर्थ्यं शिलाजतुन्यर्थशालिनि न्यायविज्ञयोः ।

अन्योऽसदृशेतरयोरन्त्यस्त्वन्तभेवेऽधमे ।।

(२-ना-ना-२-३३७)

अर्ध्यमर्घार्थमर्घार्हमास्यं मुखभवे मुखे ।

मुखान्तरास्या तु स्थित्यामाथ्र्यो सज्जनसौविदौ ।।

(२-ना-ना-२-३३८)

अार्योमाच्छन्दसोरिज्या दाने सङ्गेऽध्वरेऽर्चने ।

इभ्यो धनवतीभ्या तु, करेण्वां सल्लकीतरौ ।।

(२-ना-ना-२-३३९)

कल्यं प्रभाते मधुनि, सज्जे दक्षे निरामये ।

कल्या कल्याणवाची स्यात्कश्यं कशार्हमद्ययोः ।।

(२-ना-ना-२-३४०)

अश्वमध्ये क्षयो गेहे, कल्पान्तेऽपचये रुजि ।

कन्या नार्य्यां कुमार्य्यां च राश्यौषधिविशेषयोः ।।

(२-ना-ना-२-३४१)

कक्ष्या गृहप्रकोष्ठे स्यात्साहृश्योद्योगकाञ्चिषु ।

बृहतिकेभ्यनाडयोश्च, कार्यः हेतौ प्रयोजने ।।

(२-ना-ना-२-३४२)

कायः कदैवते मूर्तौ, सङ्धे लक्ष्यस्वभावयोः ।

कायं मनुष्यतीर्थे च, काव्या स्यात्पूतनाधियोः ।।

(२-ना-ना-२-३४३)

काव्यं ग्रन्थे काव्यः शुक्रे कांस्यं तैजसवाद्ययोः ।

पानपात्रे मानभेदे क्रियाकरणचेष्टयोः।।

(२-ना-ना-२-३४४)

कर्मोपायचिकित्सासु , निष्कृतौ सम्प्रधारणे ।

अर्चाप्रारम्भशिक्षासु कुल्यतु कुलजेऽस्थनि ।।

(२-ना-ना-२-३४५)

सुर्पामिषाष्टद्रोणीषु. कुल्या सरिति सारणि ।

कृत्यो विद्विषि कार्ये च, कृत्यास्याद्देवताक्रिया ।।

(२-ना-ना-२-३४६)

गव्यं क्षीरादिके ज्यायां, रागवस्तुनि गोहिते ।

गव्या गोवृन्दगव्यूत्योर्गुह्यः कमठदम्भयोः ।।

(२-ना-ना-२-३४७)

गुह्यमुपस्थे रहस्ये, गृह्यं तु मलवर्त्म नि ।

गुह्योऽस्वैरिणि पक्ष्ये च, गृगासक्तभृगण्डजे ।।

(२-ना-ना-२-३३४८)

गृह्या तु शाखानगरे, गेयौ गातव्यगायनौ ।

गोप्यौ दासेरगोप्तव्यौ, चयः प्राकारपीठभूः ।।

(२-ना-ना-२-३४९)

समूहेऽप्यथ चव्या स्याच्चविकाशतपर्वयोः ।

चित्यं मृतकचैत्ये स्याच्चित्य मृतचितावपि ।।

(२-ना-ना-२-३५०)

चैत्यं जिनौकस्तद्बिम्बं, चेत्यो जिनसभातरुः ।

उद्देशवृक्षश्चोद्यं तु, प्रेर्ये प्रश्नेऽद्भुतेऽपि च ।।

(२-ना-ना-२-३५१)

छायापङ्क्तौ प्रतिमायामर्कयोषित्यनातपे ।

उत्कोचे पालने कान्तौ, शोभायां च तमस्यपि ।।

(२-ना-ना-२-३५२)

जयो जयन्ते विजये, जयोमा तत्सखी तिथिः ।

पथ्या जयन्त्यग्निमन्थे, जन्यो जामातृवत्सले ।।

(२-ना-ना-२-३५३)

जनके जननीये च नवोढानुचरादिके ।

जन्यं कौलीने यिध्यट्टे जन्या मातृसखीमुदोः ।।

(२-ना-ना-२-३५४)

त्रयीत्रिवेद्यां त्रितये, पुरन्ध्र्यां सुमतावपि ।

तार्क्ष्यस्तु स्यन्दने वाहे, गरुडे गरुडाग्रजे ।।

(२-ना-ना-२-३५५)

अश्वकर्माह्वयतरौ स्यात्तार्क्ष्यं तु रसाञ्जने ।

तिष्यः पुष्यवत्कलौ भे, तिष्या त्वामलकीतरौ ।।

(२-ना-ना-२-३५६)

द्रव्यं भव्ये धने क्ष्मादौ, जतुद्रुमविकारयोः ।

विनये भेषजे रीर्य्यां दस्युः प्रत्यर्थिचौरयोः ।।

(२-ना-ना-२-३५७)

दायो दाने यौतकादिधने शोल्लुण्ठभाषणे ।

विभक्तव्ये पितृद्रव्ये, दिव्यं वल्गुलवङ्गयोः ।।

(२-ना-ना-२-३५८)

द्युभवे दिव्यामलक्यां, दूष्यं वाससि तद्गृहे ।

दूषणीये चाथ दैत्योऽसुरे दैत्या मुरौषधौ ।।

(२-ना-ना-२-३५९)

धन्यः पुण्ययुते धन्यामलक्यामुपमातरि ।

धान्यं तु ब्रीहौ धन्याके धिष्ण्यं स्थानोडुवेश्मसु ।।

(२-ना-ना-२-३६०)

बले धिष्ण्योऽग्नौ शुक्रे च नयः स्यान्नैगमादिषु ।

नीतिद्यूतभिदोः पथ्यं, हितं पथ्या हरीतकी ।।

(२-ना-ना-२-३६१)

पद्योऽन्त्यवर्णे स्यात्पद्यं श्लोके पद्या तु वर्त्मनि ।

प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः ।।

(२-ना-ना-२-३६२)

प्रियो वृद्ध्यौषधे हृद्ये, पत्यौ पुण्यं तु सुन्दरे ।

सुकृते पावने धर्मे, पूज्यः श्वसुरवन्द्ययोः ।।

(२-ना-ना-२-३६३)

बल्यं रेतोबलकृतोर्भयं भीतौ भयङ्करे ।

कुब्जकपुश्पे भव्यं तु फले योग्ये शुभेऽस्थनि ।।

(२-ना-ना-२-३६४)

सत्ये भाविनि भव्यस्तु, कर्मरङ्गतरौ सति ।

भव्योमाकरिपिप्पल्योर्भाग्यं कर्म शुभाशुभम् ।।

(२-ना-ना-२-३६५)

मध्यं न्याय्येऽवलग्नेऽन्यर्मयो दैत्योष्ट्रवेसराः ।

मयुर्मृगाश्वमुखयोर्मन्युर्दैत्ये क्रतौ क्रुधि ।।

(२-ना-ना-२-३६६)

माल्यं मालाकुसुमयोःस्यान्माया शाम्बरी कृपा ।

दम्भो बुध्दिश्च मायस्तु पीताम्बरेम्बरेऽपि च ।।

(२-ना-ना-२-३६७)

मूल्यं वस्ने वेतने च ययुर्यज्ञहये हये ।

याम्याऽपाच्यां भरन्यां च, योग्यो योगार्हशक्तयोः ।।

(२-ना-ना-२-३६८)

उपायिनि प्रवीणे च, योग्यमृद्धयाह्वद्ययोः ।

योग्यार्कयोषित्यभ्यासे, रम्यश्चम्पकहृद्ययोः ।।

(२-ना-ना-२-३६९)

रम्या रात्रावथ रथ्यो रथांशे रथवोढरि ।

रथ्या तु रथसङ्घाते प्रतोल्यां पथि चत्वरे ।।

(२-ना-ना-२-३७०)

रुप्यमाहतहेमादौ, रजते रुपवत्यपि ।

लयस्तूर्यत्रयीसाम्ये, संश्लेषणविलासयोः ।।

(२-ना-ना-२-३७१)

लभ्यं लब्धव्ये युक्ते च, विन्ध्यो व्यधाद्रिभेधयोः ।

विन्ध्या त्रुटौ लवल्यां च, वीर्यं तेजःप्रभावयोः ।।

(२-ना-ना-२-३७२)

शुक्रे शक्तौ च वीक्ष्यं तु द्रष्टव्ये विस्मयेऽपि च ।

विक्ष्यस्तु लासके वाहे वेश्यं तु गणिकागृहे ।।

(२-ना-ना-२-३७३)

वेश्या तु पन्ययोषायां, शल्यः स्यान्मदनद्रुमे ।

नृपभेदे श्वाविधि च सीम्नि शस्त्रशलाकयोः ।।

(२-ना-ना-२-३७४)

शय्या तल्पे शब्दगुम्फे, शून्यं बिन्दौ च निर्जने ।

शून्या तु नलिका शौर्यं चारभट्यां बलेऽपिच ।।

(२-ना-ना-२-३७५)

सह्यमारोग्ये सोढव्ये, सह्योऽद्रौ सव्यं दक्षिणे ।

वामे च प्रतिकूले च, सत्यं तु शपथे कृते ।।

(२-ना-ना-२-३७६)

तथ्ये तद्वति सत्यस्तु, लोकभित्संख्यमाहवे ।

संख्यैकादौ विचारे च सन्ध्या कालनदीभिदोः ।।

(२-ना-ना-२-३७७)

चिन्तायां संश्रवे सीम्नि सन्धाने कुसुमान्तरे ।

साध्यो योगे साधनीये, गणदैवतभिद्यपि ।।

(२-ना-ना-२-३७८)

सायः शरेऽपराहणे च, स्थेयोऽक्षदृक्पुरोधसोः ।

सेव्यमुशीरे सेवार्हे, सैन्यं सैनिकसेनयोः ।।

(२-ना-ना-२-३७९)

सौभ्यः सोमात्मजेऽनुग्रे मनोज्ञे सोमदैवते ।

सौम्याः पुनर्मृगशिरः, शिरःस्थाः पञ्चतारकाः ।।

(२-ना-ना-२-३८०)

हार्यः कलिद्रौ हर्तव्ये हृद्यं धवलजीरके ।

हृत्प्रिये हृद्धिने हृज्जे हृद्या तु वृद्धभेषजे ।।

(२-ना-ना-२-३८१)

हृद्यस्तु वशकृन्मन्त्रेऽग्रं पुरः प्रथमेऽधिके ।

उपर्य्यालम्बने श्रेष्ठे परिमाणे पलस्य च ।।

(२-ना-ना-२-३८२)

भिक्षाप्रकारे सङ्घाते प्रान्तेऽप्यद्रिस्तु पर्वते ।

सूर्ये शाखिनि चाभ्रं तु त्रिदिवे गगनेऽम्बुदे ।।

(२-ना-ना-२-३८३)

अस्त्रः शिरसिजे कोणे स्यादस्त्रं शोणितेऽश्रुणि ।

अस्त्रं चापे प्रहरणेऽप्यंह्रः पादद्रुमूलयोः ।।

(२-ना-ना-२-३८४)

अरो जिनेऽरं चक्राङ्गे शीघ्रशीघ्रगयोरपि ।

आरो रीरी शनिर्भौमि आरा चर्मप्रभेदिनी ।।

(२-ना-ना-२-३८५)

इराम्भोवाक्सुराभूमिष्विन्द्रःशक्रेऽन्तरात्मनि ।

आदित्ये योगभेदे स्यादिन्द्रा तु फणिज्जके ।।

(२-ना-ना-२-३८६)

उग्रः क्षत्रियतः शूद्रा सूनावुत्कटरुद्रयोः ।

उग्रावचाछिक्किकयोरुस्रा गवोपचित्रयोः ।।

(२-ना-ना-२-३८७)

उस्रोमयूखे स्यादुष्ट्रि मृद्भाण्डे करभस्त्रियाम् ।

ऐन्द्रिरिन्द्रसुते काकेऽण्योड्रा जनपदान्तरे ।।

(२-ना-ना-२-३८८)

औड्रो जने जपावृक्षे, करः प्रत्यायशुण्डयोः ।

रश्मौ वर्णोवले पाणौ क्षरो मेघे क्षरं जले ।।

(२-ना-ना-२-३८९)

कद्रुः कनकपिङ्गे स्यात्कद्रूस्तु नागमातरि ।

कारो बलौ वधे यत्ने, हिमाद्रौ निष्चये यतौ ।।

(२-ना-ना-२-३९०)

कारा बन्धनशालायां, बन्धे दूत्यां प्रसेवके ।

स्याद्धेमकारिकायां च क्षारः काचे रसे गुडे ।।

(२-ना-ना-२-३९१)

भस्मनि धूर्तलवणे, कारिः शिल्पी क्रियाऽपि च ।

कारुस्तु कारके शिल्पे, विश्वकर्मणि शिल्पिनि ।।

(२-ना-ना-२-३९२)

कीरः शुके जनपदे, क्षीरं पानियदुग्धयोः ।

क्षुरो गोक्षुरके कोकिलाक्षे छेदनवस्तुनि ।।

(२-ना-ना-२-३९३)

क्षुद्रो दरिद्रे कृपणे, निकृष्टेऽल्पनृशंसयोः ।

क्षुद्रा व्याघ्रीनटीव्यङ्गाबृहतीसरघासु च ।।

(२-ना-ना-२-३९४)

चाङ्गेरिकायां हिंस्रायां, मक्षिकामात्रवेश्ययोः ।

कुरुः स्यादोदने भूपभेदे श्रीकण्ठजाङ्गले ।।

(२-ना-ना-२-३९५)

क्रीरा नृशंसघोरोष्णकठिनाः कृच्छ्रमंहसि ।

कष्टे सान्तपने क्षेत्रं भरतादौ भगाङ्गयोः ।।

(२-ना-ना-२-३९६)

केदारे सिद्धभूपत्न्योः क्रोष्ट्री क्षीरविदारिका ।

शृगालिका लाङ्गली च, क्षौद्रं तु मधुनीरयोः ।।

(२-ना-ना-२-३९७)

खरो रक्षोऽन्तरे तीक्ष्णे दुःस्पर्शे रासभेऽपि च ।

खरुः स्यादश्वहरयोर्दर्पदन्तसितेषु च ।।

(२-ना-ना-२-३९८)

खुरः शफे कोलदले गरस्तूपविषे विषे ।

रोगे गरं स्यात्करणे गात्रमङ्गशरीरयोः ।।

(२-ना-ना-२-३९९)

गजाग्रदेशेऽथ गिरिः पूज्येऽक्षिरुजि कन्दुके ।

शैले गिरियके गीर्णावपि गुन्द्रस्तु तेजने ।।

(२-ना-ना-२-४००)

गुन्द्रा प्रियङ्गौ कैवर्तीमुस्तके भद्रमुस्तके ।

गुरुर्महत्याङ्गिरसे, पित्रादै धर्मदेशके ।।

(२-ना-ना-२-४०१)

अलघौ दुर्जरे चापि, गृद्ध्रो गृध्नौ खगान्तरे ।

गोत्रं क्षेत्रेऽन्वये छत्रे, सम्भाव्यबोधवर्त्मनोः ।।

(२-ना-ना-२-४०२)

वने नाम्नि च गोत्रोऽद्रौ,गोत्रा भुवि गवाङ्गणे ।

गौरः श्वेतेऽरुणे पीते, विशुद्धे चन्द्रमस्यपि ।।

(२-ना-ना-२-४०३)

विशदे गौरं तु श्वेतसर्षपे पद्मकेसरे ।

गौर्युमानग्निकोर्वीषु प्रियङ्गौ वरुणस्त्रियाम् ।।

(२-ना-ना-२-४०४)

रजन्यां रोचनीनद्योर्घस्त्रो वासरहिंस्त्रयोः ।

घोरो हरे दारुणे च चरः स्याज्जङ्गमे स्पशे ।।

(२-ना-ना-२-४०५)

चले द्यूतप्रभेदे च चक्रं प्रहरणे गणे ।

कुलालाद्युपकरणे राष्ट्रे सैन्यरथाङ्गयोः ।।

(२-ना-ना-२-४०६)

जलावर्त्ते छले चक्रः कोके चन्द्रोऽम्बुकाम्ययोः ।

स्वर्णे सुधांशौ कर्पुरे कम्पिल्ये मेचकेऽपि च ।।

(२-ना-ना-२-४०७)

चरुर्हव्यान्ने भाण्डे च चारो बन्धावसर्पयोः ।

गतौ पियालवृक्षे च, चित्रं खे तिलकेऽद्भुते ।।

(२-ना-ना-२-४०८)

आलेख्ये कर्बुरे चित्रा त्वाखुपर्णीसुभद्रयोः ।

गोडुम्बाप्सरसोर्दन्त्यां, नक्षत्रोरगभेदयोः ।।

(२-ना-ना-२-४०९)

चीरं वाससि चूडायां, गौस्तने सीसपत्रके ।

चीरी कच्छाटिकाझिल्ल्योश्चुक्रस्त्वम्लेऽम्लवेतसे ।।

(२-ना-ना-२-४१०)

वृक्षाम्ले चुक्री चाङ्गेर्य्यां, चैत्रो मासाद्रिभेदयोः ।

चैत्रं मृतकचैत्ये च, चौरो दस्युसुगन्धयोः ।।

(२-ना-ना-२-४११)

छत्रं स्यादातपत्राणे, छत्रा मधुरिकौषधौ ।

धान्यके च शिलीन्ध्रे च, छिद्रं विवररन्ध्रवत् ।।

(२-ना-ना-२-४१२)

गर्ते दोषे जारस्तूपपत्तौ जायैषिधीभिदि ।

जीरस्त्वजाज्यां खङ्गे च, टारो लङ्गतुरङ्गयोः ।।

(२-ना-ना-२-४१३)

तन्त्रं सिद्धान्ते राष्ट्रे च, परच्छन्दप्रधानयोः ।

अगदे कुदुम्बकृत्ये तन्तुवाने परिच्छदे ।।

(२-ना-ना-२-४१४)

श्रुतिशाखान्तरे शास्त्रे, करणे द्व्यर्थसाधके ।

इति कर्तव्यता तन्त्वोस्तन्त्री स्याद्वल्लकी गुणे ।।

(२-ना-ना-२-४१५)

अमृतायां च नद्ध्यां च, सिरायां वपुषोऽपि च ।

तरिर्दशायां बेडायां, वस्त्रादीनां च पेटके ।।

(२-ना-ना-२-४१६)

तन्द्री नद्रा प्रमीला च, तारो निर्मलमौक्तिके ।

मुक्ताशुद्धावुच्चनादे, नक्षत्रनेत्रमध्ययोः ।।

(२-ना-ना-२-४१७)

तारं रुप्ये तारा बुद्धदेव्यां सुरगुरुस्त्रियाम् ।

सुग्रीवपत्न्यां ताम्रं तु, शुल्वे शुल्वनिभेऽपि च ।।

(२-ना-ना-२-४१८)

तीव्रं कटूष्णात्यर्थेषु, तीव्रा तु कटुरोहिणी ।

गण्डदूर्वा सुरी,तीरो, वङ्गे तीरं पुनस्तटे ।।

(२-ना-ना-२-४१९)

तोत्रं वेणुके प्रतोदे, दरः स्याद्भयगर्तयोः ।

दरी तु कन्दरे दस्रः खरो दस्रौ रवेः सुतौ ।।

(२-ना-ना-२-४२०)

द्वारं निर्गमेऽभ्युपाये, धरः कूर्माधिपे गुरौ ।

कर्पासतूलेऽथ धरा मेदो भूमिजरायुषु ।।

(२-ना-ना-२-४२१)

धारो जलधरासारवर्षणे स्यादृणोऽपि च ।

धारोत्कर्षे खड्गाद्यग्रे सैन्याग्रे वाजिनां गतौ ।।

(२-ना-ना-२-४२२)

जलादिपाते सन्तत्यां, धात्री भुव्युपमातरि।

आमलक्यां जनन्यां च, धीरो ज्ञे धैर्यसंयुते ।।

(२-ना-ना-२-४२३)

स्वैरे धोरं तु घुसृणे, नरोमर्त्येऽच्युतेर्जुने ।

नरं तु रामकर्पूरे, नक्रं नासाग्रदारुणोः ।।

(२-ना-ना-२-४२४)

नक्रो यादसि नीव्रं तु, वलीकवननेमिषु ।

चन्द्रे च रेवतीभे च, नेत्रं वस्त्रे मंथोगुणे ।।

(२-ना-ना-२-४२५)

मूलाक्षिनेतृषु परो दूरान्यश्रेष्ठशत्रुषु ।

परन्तु केवले पत्रं, यानं पक्षश्छदश्छुरी ।।

(२-ना-ना-२-४२६)

पारं प्रान्ते परतटे, पारी पूरपरागयोः ।

पात्र्यां कर्करिकायां च, पादबंधे च हस्तिनः ।।

(२-ना-ना-२-४२७)

पात्रं तु कूलयोर्मध्यै, पर्णे नृपतिमन्त्रिणि ।

योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि ।।

(२-ना-ना-२-४२८)

पुरं शरीरे नगरे गृहपाटलिपुत्रयोः ।

पुरस्तु गुग्गुलौ पुण्ड्रः कृमौ दैत्येक्षुभेदयोः ।।

(२-ना-ना-२-४२९)

वासन्त्यां तिलके पुण्डरीके पुण्ड्रास्तु नीवृति ।

पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोः ।।

(२-ना-ना-२-४३०)

पूरः स्यादम्भसो वृद्धौ, व्रणसंशुद्धिखाद्ययोः ।

पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च ।।

(२-ना-ना-२-४३१)

पौरं कत्तृणे पुरजे, बभ्रुः पिङ्गाग्निशूलिषु ।

मुनौ विशाले नकुले, विष्णौ भद्रं तु मङ्गले ।।

(२-ना-ना-२-४३२)

मुस्तकश्रेष्ठयोः साधौ, काञ्चने करणान्तरे ।

भद्रे रामचरे हस्तिजातौ मेरुकदम्बके ।।

(२-ना-ना-२-४३३)

गवि शम्भौ भद्रा विष्टौ, नभः सरिति कट्फले ।

कृष्णानन्तारास्नासु च भरोऽतिशयभारयोः ।।

(२-ना-ना-२-४३४)

भरुर्भर्तृकनकयोर्भारो दशशतीद्वये ।

पलानां वीवधे चापि, भीरुर्योषिति कातरे ।।

(२-ना-ना-२-४३५)

भूरि स्वर्णे प्रचुरे च, मन्त्रो देवादिसाधने ।

वेदांशे गुप्तवादे च, मरुः पर्वतदेशयोः ।।

(२-ना-ना-२-४३६)

मारोऽनङ्गे मृतौ विघ्ने, मारी चण्ड्यां जनक्षये ।

मात्रं त्ववधृतौ स्वार्थे, कात्स्न्ये मात्रापरिच्छदे ।।

(२-ना-ना-२-४३७)

अक्षरावयवे द्रव्ये, मानेऽल्पे कर्मभषणे ।

काले वृत्ते च मित्रं तु, सख्यौ मित्रे दिवाकरे ।।

(२-ना-ना-२-४३८)

यात्रोत्सवे गतौ वृत्तौ, राष्ट्रमुत्पातनीवृतोः ।

रुरुर्दैत्ये मृगे रेत्रं, पीयूषपटवासयोः ।।

(२-ना-ना-२-४३९)

रेतः सूतकयोरोध्रो रोध्रमघागसोः ।

रौद्रो भीष्मे रसे तीव्रे, रौद्री गौर्यां वरो वृतौ ।।

(२-ना-ना-२-४४०)

विटे जामातरि श्रेष्ठे, देवतादेरभीप्सिते ।

वरं तु घुसृणे किञ्चिदिष्टे वरी शतावरी ।।

(२-ना-ना-२-४४१)

वक्रं पुटभेदे वक्रः, कुटिले क्रूरभूमयोः ।

वक्त्रमास्ये छन्दसि च, वप्रःप्राकाररोधसोः ।।

(२-ना-ना-२-४४२)

क्षेत्रे ताते चये रेणौ, वज्रं कुलिशहीरयोः ।

बालके वज्रात्वमृता, वर्ध्रः सीसवरत्रयोः ।।

(२-ना-ना-२-४४३)

व्यग्रो व्यापृताकुलयोर्वारः सूर्यादिवासरे ।

महेश्वरावसरयोर्वृन्दे कुब्जाख्ययपादपे ।।

(२-ना-ना-२-४४४)

वारं तु मदिरापात्रे, वारि ह्रीवेरनीरयोः ।

वारिर्घट्यां सरस्वत्यां गजबन्धनभुव्यपि ।।

(२-ना-ना-२-४४५)

व्याघ्रः करञ्जे शार्दूले, रक्तैरण्डतरावपि ।

श्रेष्ठे तूत्तरपदस्थः स्याद् व्याघ्री कण्टकारिका ।।

(२-ना-ना-२-४४६)

वीरो जिने भटे श्रेष्ठे, वीरं शृङ्ग्यां नतेऽपि च ।

वीरा गम्भारिकारम्भातामलक्येलवालुषु ।।

(२-ना-ना-२-४४७)

मदिराक्षीरकाकोलीगोष्ठोदुम्बरिकासु च ।

पतिपुत्रवतीक्षीरविदारीदुश्चिकास्वपि ।।

(२-ना-ना-२-४४८)

वृत्रो मेघे रिपौ ध्वान्ते दानवे वासवे गिरौ ।

वेरं घुसृणवृन्ताकशरीरेषु शरं जले ।।

(२-ना-ना-२-४४९)

शरः पुनर्दधिसारे काण्डतेजनयोरपि ।

शक्रोऽर्जुने तराविन्द्रे, कुटजे शास्त्रमायुधे ।।

(२-ना-ना-२-४५०)

लोहे शस्त्री छुरिकायां शद्रिर्जिष्णौ तडित्वति ।

शरुः कोपे शरे वज्रे शारः शबलवातयोः ।।

(२-ना-ना-२-४५१)

द्यूतस्य चोपकरणे शास्त्रं ग्रन्थनिदेशयोः ।

शारिः कुञ्जरपर्याणे शकुनौ द्यूतसाधने ।।

(२-ना-ना-२-४५२)

शिग्रुः शोभाञ्जने शाके, शीघ्रं चक्राङ्गतूर्णयोः ।

उशीरे शुक्रस्तु शुक्ले, ज्येष्ठमासेऽग्निकाव्ययोः ।।

(२-ना-ना-२-४५३)

शक्रं तु रेतोऽक्षिरुजोः, शुभ्रं दीप्तेऽभ्रके सिते ।

शरश्चारभटे सूर्य्ये, सरौ दध्यग्रसायकौ ।।

(२-ना-ना-२-४५४)

स्वरः शब्देऽचि षड्जादौ सत्रमाच्छादने क्रतौ ।

सदादाने वने दम्भे स्वरुः स्याद्यूपखण्डके ।।

(२-ना-ना-२-४५५)

अध्वरे कुलिशे भाणे सारो मज्जास्थिरांशयोः ।

बले श्रेष्ठे च सारन्तु द्रविणन्याय्यवारिषु ।।

(२-ना-ना-२-४५६)

स्फारस्तु स्फरकादीनां, बुद्बुदे विपुलेऽपि च ।

स्थिरो मोक्षे निश्चले च, स्थिरा भूः शालपर्ण्यपि ।। (२-ना-ना-२-४५६)

(२-ना-ना-२-४५७)

सिप्रः स्वेदे सिप्रा नद्यां सिरा नाड्यम्बुवाहिनी ।

सिरस्तु पिप्पलीमूलं सीरः स्यादंशुमालिनि ।।

(२-ना-ना-२-४५८)

लाङ्गलेऽथ सुरो देवे, सुरा चषकमद्ययोः ।

सुत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः ।।

(२-ना-ना-२-४५९)

स्वैरो मन्दे स्वतन्त्रे च, हरो रासभरुद्रयोः ।

वैश्वानरेऽप्यथ हरिर्दिवाकरसमीरयोः ।।

(२-ना-ना-२-४६०)

यमवासवसिंहांशुशशाङ्ककपिवाजिषु ।

पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्रशुकाहिषु ।। (२-ना-ना-२-४६१)

लोकान्तरे च हारस्तु मुक्तादामनि संयुगे ।

हिंस्रः स्याद्घातुके हिंस्रा मांसी काकादनी वसा ।।

(२-ना-ना-२-४६२)

हीरो वज्रे हरे सर्पे हीरा पिपीलिकाश्रियोः ।

होरा तु लग्ने राश्यर्द्धे शास्त्ररेखाप्रभेदयोः ।।

(२-ना-ना-२-४६३)

अलिः सुरापुष्पलिहोरम्लो रसेऽम्लवेतसे ।

अम्ली चाङ्गेर्यामालं स्यादनर्थहरितालयोः ।।

(२-ना-ना-२-४६४)

आलिः सख्यावलीसेत्वनर्थेषु विशदाशये ।

आलुर्गलन्तिकायां स्यादालु भेलककन्दयोः ।।

(२-ना-ना-२-४६५)

इलोर्वी वाग् बुधस्त्री गौः कलं त्वजीर्णरेतसोः ।

अव्यक्तमधुरध्वाने कला स्यात्कालशिल्पयोः ।।

(२-ना-ना-२-४६६)

कलने मूलरैवृद्धौ षोडशांशे विधोरपि ।

कलिर्बिभीतके शूरे, विवादेऽन्त्ययुगे युधि ।।

(२-ना-ना-२-४६७)

कालः पुनः कुष्णवर्णे महाकालकृतान्तयोः ।

मरणानेहसोः काली कालिकाक्षीरकीटयोः ।।

(२-ना-ना-२-४६८)

मातृभेदोमयोर्नव्यमेघौघपरिवादयोः ।

काला कृष्णत्रिवृन्नील्योर्जिङ्ग्यां कीलोऽग्नितेजसि ।।

(२-ना-ना-२-४६९)

कफणिस्तम्भयोः शङ्कौ, कीला रताहतावपि ।

कुलं कुल्यगणे गेहे, देहे जनपदेऽन्वये ।।

(२-ना-ना-२-४७०)

कूलं तटे सैन्यपृष्ठे, तडागस्तूपयोरपि ।

कोलो भेलक उत्सङ्गेऽङ्कपाल्यां चित्रके किरौ ।।

(२-ना-ना-२-४७१)

कोलं तु बदरे कोला पिपल्लयां चव्यभेषजे ।

खलं कल्के भुवि स्थाने क्रूरे कर्णे जपेऽधमे ।।

(२-ना-ना-२-४७२)

खल्लो निम्ने वस्त्रभेदे, चर्मचातकपक्षिणोः ।

खल्ली तु हस्तपादावमर्दनाह्वयरुज्यपि ।।

(२-ना-ना-२-४७३)

गलः कण्ठे सर्जरसे गोलः स्यात्सर्ववर्तुले ।

गोला पत्राञ्जने गोदावर्य्यां सख्यामलिञ्जरे ।।

(२-ना-ना-२-४७४)

मण्डले च कुनट्यां च, बालक्रीडनकाष्ठके ।

चिल्लः खगे सचुल्लश्च, पिल्लवत् क्लिन्नलोचने ।।

(२-ना-ना-२-४७५)

क्लिन्नाक्षिण चुल्ली तूद्धाने चेलं गर्हिवस्त्रयोः।

छलं छद्मस्खलितयोः छल्ली सन्तानवीरुधोः ।।

(२-ना-ना-२-४७६)

वल्कले पुष्पभेदे च जलं गोकलले जडे ।

ह्रीवेरेऽम्बुनि जालं तु, गवाक्षे क्षारके गणे ।।

(२-ना-ना-२-४७७)

दम्भानाययोश्च जालो नीपे जाली पटोलिका ।

झला पुत्र्यामातपोर्मौ,झिल्ली तुद्वर्तनांशके ।।

(२-ना-ना-२-४७८)

वर्त्यातपरुचोश्चिर्य्यां, तलं ज्याधातवारणे ।

तलश्चपेटे तालद्रौ, स्वभावाधरयोः त्सरौ ।।

(२-ना-ना-२-४७९)

तल्लो जलाधारभेदे, तल्ली तु वरुणस्त्रियाम् ।

तालः कालक्रियामाने, हस्तमानद्रुभेदयोः ।।

(२-ना-ना-२-४८०)

करास्फोटे करतले, हरिताले त्सरावपि ।

तुला माने पलशते सादृश्ये राशिभाण्डयोः ।।

(२-ना-ना-२-४८१)

गृहाणां दारुबन्धाय पीठ्यां तूलं तु खे पिचौ ।

ब्रह्मदारुण्यथ दलं, शस्त्रिच्छदेऽर्द्धपर्णयोः ।।

(२-ना-ना-२-४८२)

उत्सेधवद्वस्तुनि च, नलो राज्ञि कपौ नडे ।

पितृदेवे नलं तु स्यात्पद्मे नली मनःशिला ।।

(२-ना-ना-२-४८३)

नालं काण्डे मृणाले च, नाली शाककलम्बके ।

नीलो वर्णे मणौ शैले, निधिवानरभेदयोः ।।

(२-ना-ना-२-४८४)

नील्योषध्यां लाञ्छने च पलमुन्मानमांसयोः ।

पल्लिस्तु ग्रामके कुड्यां पालिर्युकाश्रिपङ्क्तिषु ।।

(२-ना-ना-२-४८५)

जातश्मश्रुस्त्रियां प्रान्ते सेतौ कल्पितभोजने ।

प्रशंसाकर्णलतयोरुत्सङ्गे प्रस्थचिन्हयोः ।।

(२-ना-ना-२-४८६)

पिलुः पुष्पे द्रुमे काण्डे परमाणौ मतङ्गजे ।

तालास्थिखण्डेऽथ पुलः पुलके विपुलेऽपि च ।।

(२-ना-ना-२-४८७)

फलं हेतुकृते जातीफले फलकसस्ययोः ।

त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः ।।

(२-ना-ना-२-४८८)

फली फलिन्यां फालं तु वाससि फल उत्प्लुतौ ।

कुशिके च बलं रूपे, स्थामनि स्थौल्यसैन्ययोः ।।

(२-ना-ना-२-४८९)

बोले बलस्तु बलिनि, काके दैत्ये हलायुधे ।

बला त्वौषधिभेदे, स्याद्बलिर्दैत्योपहारयोः ।।

(२-ना-ना-२-४९०)

करे चामरदण्डे च, गृहदारूदरांशयोः ।

त्वक्सङ्कोचे गन्धके च, बालोऽज्ञेऽश्वेभपुच्छयोः ।।

(२-ना-ना-२-४९१)

शिशौ ह्नीवेरकचयोर्बाला तु त्रुटियोषितोः ।

बाली भूषान्तरे मेधौ, बिल उच्चःश्रवो हये ।।

(२-ना-ना-२-४९२)

बिलं रन्ध्रे गुहायां च, भल्लो भल्लूकबाणयोः ।

भल्ली भल्लातके भालं, स्यल्ललाटे महस्यपि ।।

(२-ना-ना-२-४९३)

भेलः प्लवे मुनिभेदे, भीरौ बुद्धिविवर्जिते ।

मल्लः कपाले बलिनि, मत्स्ये पात्रे मलस्त्वघे ।।

(२-ना-ना-२-४९४)

किट्टे कदर्ये विष्टायां, मालं तु कपटे वने ।

मालो जने स्यान्माला तु, पङ्क्तौ पुष्पादिदामनि ।।

(२-ना-ना-२-४९५)

मालुः स्त्रियां पत्रवल्ल्यां, मूलं पार्श्वद्ययोरुडौ ।

निकुञ्जशिफयोर्मेला त्वञ्जने मेलकेऽपि च ।।

(२-ना-ना-२-४९६)

मौलिः किरीटे धम्मिल्ले चूडाकङ्केल्लिमूर्द्धसु ।

लीला केलिर्विलासश्च, शृङ्गारभावजाक्रिया ।।

(२-ना-ना-२-४९७)

लोलश्चले सतृष्णे च लोला तु रसनाश्रियोः ।

वल्ली स्यादजमोदायां लतायां कुसुमान्तरे ।।

(२-ना-ना-२-४९८)

व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः ।

वेला बुधस्त्रियां काले, सीमनीश्वरभोजने ।।

(२-ना-ना-२-४९९)

अक्लिष्टमरणेऽम्भोधेस्तीरनीरवकारयोः ।

शालो हाले मत्स्यभेदे, शालौकस्तत्प्रदेशयोः ।।

(२-ना-ना-२-५००)

स्कन्धशाखायां शालिस्तु गन्धोतौ कलमादिषु ।

शालुः कषायद्रव्ये स्याच्चोरकाख्यौषधेऽपि च ।।

(२-ना-ना-२-५०१)

शिलमुञ्छः शिलाद्वाराऽधोदारु कुनटी दृषत् ।

शिली गण्डूपदी शीलं साधुवृत्तस्वभावयोः ।।

(२-ना-ना-२-५०२)

शुक्लं रूप्ये शुक्लो योगे श्वेते शूलं रुगस्त्रयोः ।

योगे शूला तु पण्यस्त्री वधहेतुश्च कीलकः ।।

(२-ना-ना-२-५०३)

शैलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके ।

सालः सर्जतरौ वृक्षमात्रप्राकारयोरपि ।।

(२-ना-ना-२-५०४)

स्थालं भाजनभेदे स्यात्स्थाली तु पाटलोखयोः ।

स्थूलः पीने जडे हालः सातवाहनपार्थिवे ।।

(२-ना-ना-२-५०५)

हाला सुरायां हेला तु स्यादवज्ञाविलासयोः ।

हेलिरालिङ्गने सूर्येऽप्यविर्मूककम्बले ।।

(२-ना-ना-२-५०६)

मेषे रवौ पर्वते च स्यादूर्ध्वं तु समुच्छ्रिते ।

उपर्युन्नतयोः कण्वो मुनौ कण्वं तु कल्मषे ।।

(२-ना-ना-२-५०७)

क्षवः क्षुते राजिकायां कविः काव्यस्य कर्तरि ।

विचक्षणे दैत्यगुरौ स्यात्कवी तु खलीनके ।।

(२-ना-ना-२-५०८)

किण्वं पापे सुराबीजे क्लीबोऽपौरुषषण्ढयोः ।

खर्वह्रस्वौ न्यग्वामनौ ग्रीवे शिरोधितत्सिरे ।।

(२-ना-ना-२-५०९)

छविस्तु रुचि शोभायां जवः स्याद् वेगवेगिनोः ।

जवौड्रपुष्पे जिह्वा तु वाचि ज्वालारसज्ञयोः ।।

(२-ना-ना-२-५१०)

जीवः स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि ।

जविते‌ऽपि च जीवा तु वचायां धनुषो गुणे ।।

(२-ना-ना-२-५११)

शिञ्जते क्षितिजीवन्त्योर्वृत्तौ तत्वं परात्मनि ।

वाद्यभेदे स्वरूपे च द्रवो विद्रवनर्मणोः ।।

(२-ना-ना-२-५१२)

प्रद्रावे रसगत्योश्च द्वन्द्वः से द्वन्द्वमाहवे ।

रहस्ये मिथुने युग्मे दवदावौ वनानले ।।

(२-ना-ना-२-५१३)

वने दर्वी फणातद्ध्र्वोर्दार्वी स्याद्देवदारुणि ।

हरिद्राद्वितये चापि दिवं खे त्रिदिवे दिने ।।

(२-ना-ना-२-५१४)

देवं हृषीके देवस्तु नृपतौ तोयदे सुरे ।

देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि ।।

(२-ना-ना-२-५१५)

धवो धूर्त्ते नरे पत्यौ द्रुमभेदेऽथ ध्रुवो वटे ।

वसुयोगभिदेरातौ शङ्कावुत्तानपादजे ।।

(२-ना-ना-२-५१६)

स्थिरे नित्ये निश्चिते च ध्रुवं खेऽजस्रतर्कयोः ।

ध्रुवा मूर्वाशालपर्ण्योःस्त्रग्भेदे गीतिभिद्यपि ।।

(२-ना-ना-२-५१७)

नवो नव्ये स्तुतौ नीवी स्त्रीकटीवस्त्रबन्धने ।

मूलद्रव्ये परिपणं प्लवः प्लक्षे प्लुतौ कपौ ।।

(२-ना-ना-२-५१८)

शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः ।

क्रमनिम्नमहीभागे कुलके जलवायसे ।।

(२-ना-ना-२-५१९)

जलान्तरे प्लवं गन्धतृणे मुस्तकभिद्यपि ।

पक्वं परिणते नाशाभिमुखे पार्श्वमन्तिके ।।

(२-ना-ना-२-५२०)

कक्षाधोऽवयवे वक्रोपायपर्शुसमूहयोः ।

प्राध्वं दूरपथे प्रह्वे,बन्धे पूर्वं तु पूर्वजे ।। che

(२-ना-ना-२-५२१)

प्रागग्रे श्रुतिभेदे च भवः सत्ताप्तिजन्मसु ।

रुद्रे श्रेयसि संसारे , भावोऽभिप्रायवस्तुनोः ।।

(२-ना-ना-२-५२२)

स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु ।

चेष्टायोन्योर्बुधे जन्तौ शृङ्गारादेश्च कारणे ।।

(२-ना-ना-२-५२३)

शब्दप्रवृत्तिहेतौ च रेवा मन्मथयोषिति ।

नील्यां मेकलकन्यायां लवः कालभिदिच्छिदि ।।

(२-ना-ना-२-५२४)

विलासे रामजे लेशे लट्वा पक्षिकुसुम्भयोः।

लघ्वो ह्रस्वाविवक्षायां, प्रभेदे स्यन्दनस्य च ।।

(२-ना-ना-२-५२५)

विश्वाः सुरेषु विश्वन्तु, शुण्ठ्यां भुवनकृत्स्नयोः ।

विश्वा विषायां शिवं तु, मोक्षे क्षेमे सुखे जले ।।

(२-ना-ना-२-५२६)

शिवो योगान्तरे वेदे, गुग्गुलौ वालुके हरे ।

पुण्डरीकद्रुमे कीले शिवा झाटामलोमयोः ।।

(२-ना-ना-२-५२७)

फेरौ शम्यां पथ्याधात्र्योः शिविर्भुर्जे नृपान्तरे ।

शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ ।।

(२-ना-ना-२-५२८)

सत्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः ।

पिशाचादावात्मभावे बले प्राणेषु जन्तुषु ।।

(२-ना-ना-२-५२९)

सान्त्वं सामनि दाक्षिण्ये, स्रुवा मूर्वा स्रुवः स्रुचि ।

हवस्तु सप्ततन्तौ स्यान्निदेशाह्वानयोरपि ।।

(२-ना-ना-२-५३०)

अंशुः सूत्रादि सूक्ष्मांसे, किरणे चण्डदीधितौ ।

आशा ककुभि तृण्णायामाशुस्तु व्रीहिशीघ्रयोः ।।

(२-ना-ना-२-५३१)

ईशः स्वामिनि रुद्रे च, स्याजीशा हलदण्डके ।

काशस्तृणे रोगभेदे कीशः कपौ दिगम्बरे ।।

(२-ना-ना-२-५३२)

कशो रामसुते दर्भे पापिष्ठे योक्त्रमत्तयोः ।

कुशी लोहविकारे स्यात्कुशा वल्गा कुशं जले ।।

(२-ना-ना-२-५३३)

केशः शिरसिजे पाशपाणौ ह्रीवेरदैत्ययोः ।

क्लेशो रागादौ दुःखे च, कोशः कोष इवाण्डके ।।

(२-ना-ना-२-५३४)

कुड्मले चषके दिव्येऽर्थचये योनिशिम्बयोः ।

जातिकोशेऽसिपिधाने, दर्शः सूर्येन्दुसङ्गमे ।।

(२-ना-ना-२-५३५)

पक्षान्तेऽष्टौ दर्शने च दंशो वर्मणि चर्मणि ।

दोषे वनमक्षिकायां खण्डने भुजगक्षते ।।

(२-ना-ना-२-५३६)

दशा वर्त्ताव्यवस्थायां, दशास्तु वसनाञ्चले ।

नाशः पलायने मृत्यौ, परिध्वस्तावदर्शने ।।

(२-ना-ना-२-५३७)

निशा हरिद्रयो रात्रौ, पशुश्छागे मृगादिषु ।

प्रमथेऽपि च पाशस्तु, मृगपक्ष्यादिबन्धने ।।

(२-ना-ना-२-५३८)

कर्णान्ते शोभनार्थः स्यात्कचान्ते निकरार्थकः ।

छात्राद्यन्ते च निन्दार्थः पेशी मांस्यसिकोशयोः ।।

(२-ना-ना-२-५३९)

मण्डभेदे पलपिण्डे, सुपक्वकणिकेऽपि च ।

भूस्पृग् वैश्ये मानवे च, राशिर्मेषादिपुञ्जयोः ।।

(२-ना-ना-२-५४०)

वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः।

वशानार्य्यां वन्ध्यगव्यां, हस्तिन्यां दुहितर्यपि ।।

(२-ना-ना-२-५४१)

वंशः सङ्घेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च ।

वेशो वेश्यागृहे गेहे, नेपथ्ये च शशः पशौ ।।

(२-ना-ना-२-५४२)

बोले लोघ्रे नृभेदे च, स्पशो हेरिकयुध्दयोः ।

स्पर्शो वर्गाक्षरे दाने, स्पर्शने स्पर्शके रुजि ।।

(२-ना-ना-२-५४३)

अक्षो रथस्यावयवे, व्यवहारे बिभीतके ।

प्रासके शकटे कर्षे, ज्ञाने चात्मनि रावणौ ।।

(२-ना-ना-२-५४४)

अक्षं सौवर्चले तुत्थे हृषीके स्यादुषा निशि ।

बाणपुत्र्यां च ऋक्षस्तु स्यान्नक्षत्राच्छभल्लयोः ।।

(२-ना-ना-२-५४५)

महीधरविशेषे च शोणके क्षतवेधने ।

ऋषिर्वेदे मुनौ कर्षः कर्षणे मानभिद्यपि ।।

(२-ना-ना-२-५४६)

कक्षो वीरुधि दोर्मूले कच्छे शुष्कवने तृणे ।

पापे कक्षा त्विभरज्जौ काञ्च्छां गेहप्रकोष्ठके ।।

(२-ना-ना-२-५४७)

भित्तो साम्ये रथभागेऽन्तरीयपश्चिमाञ्चले ।

उद्ग्राहिण्यां च कर्षूस्तु तुषाग्नौ कृषिकुल्ययोः ।।

(२-ना-ना-२-५४८)

घोषः कांस्ये स्वने गोपघोषकाभीरपल्लिषु।

घोषा तु शतपुष्पायां चोक्षः सुन्दरगोतयोः ।।

(२-ना-ना-२-५४९)

शुचौ झषस्तु मकरे वने मीने झषा पुनः ।

नागवलायां तुषस्तु धान्यत्वचि बिभीतके ।।

(२-ना-ना-२-५५०)

दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ ।

द्रुमे दक्षा तु मेदिन्यां ध्वाङ्क्षः काके बकेऽर्थिनि ।।

(२-ना-ना-२-५५१)

गृहे ध्वाङ्क्षी तु कक्कोल्यां न्यक्षः कार्त्स्न्य निकृष्टयोः ।

जामदग्न्येऽपि पक्षस्तु मासार्धे ग्रहसाध्ययोः ।।

(२-ना-ना-२-५५२)

चुल्लीरन्ध्रे बले पार्श्वे वर्गे केशात्परश्चये ।

पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जरे ।।

(२-ना-ना-२-५५३)

प्लक्षो दीपे गर्दभाण्डेऽश्वत्थे जटिनि पक्षके ।

प्रेक्षाधीरीक्षणं नृतं प्रैषः प्रेषणपीडने ।।

(२-ना-ना-२-५५४)

पौषो मासप्रभेदे स्यात्पौषं तु महयुद्धयोः ।

भिक्षा सेवाप्रार्थनयोर्भृतौ भिक्षितवस्तुनि ।।

(२-ना-ना-२-५५५)

माषो माने धान्यभेदे मूर्खे त्वग्दोषभिद्यपि ।

मिषं व्याजे स्पर्द्धने च मेषो राश्यन्तरे हुडौ ।।

(२-ना-ना-२-५५६)

मोक्षो निःश्रियसे वृक्षविशेषे मोचने मृतौ ।

यक्षः श्रीदे गुह्यके च रक्षा रक्षणभस्मनोः ।।

(२-ना-ना-२-५५७)

रूक्षोऽस्निग्धपरुषयोर्लक्षं व्यजशरव्ययोः ।

संख्यायामपि वर्षस्तु समाद्विपांशवृष्टिषु ।।

(२-ना-ना-२-५५८)

वर्षवरेऽपि वर्षा तु प्रवृष्यथ विषं जले ।

क्ष्वेडे विषा त्वतिविषा वृषो गव्याखुधर्मयोः ।।

(२-ना-ना-२-५५९)

पुंराशिभेदयोः शृङ्ग्यां वासके शुक्रलेऽपिच ।

श्रेष्ठे स्यादुत्तरस्थश्च वृषी तु व्रतिविष्टरे ।।

(२-ना-ना-२-५६०)

वृषा पुनः कपिकच्छ्वां शुषिः शुषिरशोषयोः ।

शोषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च ।।

(२-ना-ना-२-५६१)

शोषा निर्माल्यदाने स्याच्छोषः शोषणयक्ष्मणोः ।

अर्चिर्मयूखशिखयोरदोऽत्र च परत्र च ।।

(२-ना-ना-२-५६२)

आगः स्यादेनोवदघे मन्तावाशीर्हितैषणे ।

उरगस्य च दंष्ट्रायामुषः संध्याप्रभातयोः।।

(२-ना-ना-२-५६३)

उरो वक्षसि मुख्ये स्यादोजो दीप्तिप्रकाशयोः ।

अवष्टम्भे बले धातुतेजस्यौकस्तु सद्मनि ।।

(२-ना-ना-२-५६४)

ओकास्त्वाश्रयमात्रे स्यात्कंसस्तैजसमानयोः।

पानपात्रे दैत्यभेदे कासूः शक्त्यायुधे रुजि ।।

(२-ना-ना-२-५६५)

बुध्दौ विकलवाचि स्यात्गुत्सः स्तम्बगुलुञ्छयोः ।

हारभेदे ग्रन्थिपर्णे गोसो बोलविभातयोः ।।

(२-ना-ना-२-५६६)

चास इक्षुपक्षिभेदोष्छन्दः पद्येच्छयोः श्रुतौ ।

ज्यायान् वृद्धे प्रशस्ये च ज्योतिर्वह्निदिनेशयोः ।।

(२-ना-ना-२-५६७)

प्रकाशे दृशि नक्षत्रे तपः कृच्छ्रादिकर्मणि ।

धर्मे लोकप्रभेदे च तपाः शिशिरमाघयोः ।।

(२-ना-ना-२-५६८)

तमो राहौ गुणे पापे ध्वान्ते तरो जवे बले ।

त्रासो भये मणिदोषे तेजस्स्विड्रेतसोर्बले ।।

(२-ना-ना-२-५६९)

नवनीते प्रभावेऽग्नौ दासो धीवरभृत्ययोः ।

वृषले दानपात्रे च दासी झिण्ट्यपि चेद्यपि ।।

(२-ना-ना-२-५७०)

धनुः शरासने राशौ पियालर्दौ धनुर्धरे ।

नभो व्योम्नि नभा घ्राणे विसतन्तौ पतद्ग्रहे ।।

(२-ना-ना-२-५७१)

प्रावृषि श्रावणे नासा घोणा द्वारोर्ध्वदारुणोः ।

पयः क्षीरे च नीरे च प्रसूरश्वा जनन्यपि ।।

(२-ना-ना-२-५७२)

बर्हिः कुशेऽग्नौ भासस्तु भासि गृद्ध्रशकुन्तयोः ।

महस्तेजस्युत्सवे च मिसिर्मांस्यजमोदयोः ।।

(२-ना-ना-२-५७३)

शतपुष्पामधुर्योश्च मृत्सा वासी सुमृत्तिका ।

रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे ।।

(२-ना-ना-२-५७४)

चोले रागे देहधातौ तिक्तादौ पारदेऽपि च ।

रसा तु रसनापाठासल्लकीक्षितिकङ्गुषु ।।

(२-ना-ना-२-५७५)

रहो गुह्ये रते तत्वे रजो रेणुपरागयोः ।

स्त्रीपुष्पे गुणभेदे च रासः क्रीडासु गोदुहाम् ।।

(२-ना-ना-२-५७६)

भाषा शृङ्खलके वत्सा उरस्तुग्वर्षतर्णकाः ।

वयस्तारुण्यबाल्यादौ खगे वर्चस्तु तेजसि ।।

(२-ना-ना-२-५७७)

गूथे रूपे वसुस्त्वग्नौ देवभेदे नृपे रुचि ।

योक्त्रे शुष्के वसु स्वादौ रत्ने वृद्ध्यौषधे धने ।।

(२-ना-ना-२-५७८)

वपुः शस्ताकृतौ देहे व्यासो मुनिप्रपञ्चयोः ।

वासो वेश्मन्यवस्थाने वासा स्यादाटरूषके ।।

(२-ना-ना-२-५७)

विद्वान् ज्ञात्मविदोः प्राज्ञे वेधा धातृज्ञविष्णुषु ।

शंसा वचसि वाञ्छायां शिरोमूर्द्धप्रधानयोः ।।

(२-ना-ना-२-५८०)

सेनाग्रभागे श्रेयस्तु मङ्गले धर्मशस्तयोः ।

सहो बले ज्योतिषि च सहा हेमन्तमासयोः ।।

(२-ना-ना-२-५८१)

स्रोतः प्रवाहेन्द्रिययोर्हंसोऽर्के मत्सरे च्युते ।

खगाश्वयोगिमन्त्रादिभेदेषु परमात्मनि ।।

(२-ना-ना-२-५८२)

निर्लोभनृपतौ प्रणवाते श्रेष्ठेऽग्रतः स्थितः ।

हविः सर्पिषि होतव्ये हिंसा चौर्यादिके वधे ।।

(२-ना-ना-२-५८३)

अहिः सर्पे वृत्रे वप्रे स्यादीहोद्यमवाञ्छयोः ।

कुहूर्नष्टेन्दुदर्शे स्यात्कुणिते कोकिलस्य च ।।

(२-ना-ना-२-५८४)

ग्रहो ग्रहणनिर्बन्धानुग्रहेषु रणोद्यमे ।

उपरागे पूतनावादित्यादौ विधुन्तुदे ।।

(२-ना-ना-२-५८५)

ग्राहो ग्रहे जलचरे गुहः स्कन्दे गुहा पुनः।

गह्वरे सिंहपुच्छ्यां च गृहा दारेषु सद्मनि ।।

(२-ना-ना-२-५८६)

प्रौहो निपुणतर्के स्याद्गजां ह्रिपर्वणोरपि ।

बर्हः पर्णे परिवारे कलापे बहु भूयसि ।।

(२-ना-ना-२-५८७)

त्रयादिकासु च संख्यासु महावुत्सवतेजसी ।

मही भुवि नदीभेदे मोहौ मूर्च्छाविपर्ययौ ।।

(२-ना-ना-२-५८८)

लोहं कालायसे सर्वतैजसे जोङ्गकेऽपि च ।

वहो वृषस्कन्धदेशे वायौ वाहोऽश्वमानयोः ।।

(२-ना-ना-२-५८९)

वृषे वाहा तु वाहौ स्याद् व्यूहो निर्वाणतर्कयोः ।

समूहे बलविन्यासे सहः क्षमे बलेऽपि च ।।

(२-ना-ना-२-५९०)

सहोर्व्यां सहदेवायां कुमार्यां नखभेषजे ।

मूद्गपर्ण्यां च सिंहस्तु राशिभेदे मृगाधिपे ।।

(२-ना-ना-२-५९१)

श्रेष्ठे स्यादुत्तरस्थश्च सिंही स्वर्भाणुमातरि ।

वासावृहत्योः क्षुद्रायां स्नेहः प्रेम्णि घृतादिके ।।

इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे द्विस्वरकाण्डो द्वितीयः

अथ त्रिस्वरकाण्डः

अणुको निपुणेऽल्पे चाऽशोकौ कङ्केल्लिवञ्जुलौ ।

निःशोकपारदौ चाप्यशोकातु कटुरोहिणी ।।१।।

अभीको निर्भये कम्रेऽप्यनीकं रमसैन्ययोः ।

अलीकमप्रिये भावे वितथेऽनूकमन्वये ।।२।।

शीले,ऽनूको गतजन्मयंशुकं शूक्ष्मवाससि ।

उत्तरीये वस्त्रमात्रेऽप्यलकाश्चूर्णकुन्तलाः ।।३।।

अलका तु कुबेरस्य नगर्या,मन्तिकं पुनः ।

पार्श्व,ऽन्तिकातु चुल्ली स्यात्सातलाख्यौषधेऽपि च ।।४।।

नाट्योक्तौ ज्येष्ठभगिनी अत्तिका प्रोच्यतेऽपि सा ।

अलर्को नृपे श्वेतार्के रोगोन्मादितशुन्यपि ।।५।।

अम्बिकोमापाण्डुमात्रोर्देवताभिदि मातरि ।

अन्धिका तु कैतवे स्याच्छर्वरीसिद्धयोरपि ।।६।।

अम्लिका तिन्तिडीकाम्लोद्गारचाङ्गेरिकासु ।

आलोको दर्शने बन्दिभाषाणोद्योतयोरपि ।।७।।

आनकः पटहे भेर्या नदन्मेधमृदङ्गयोः ।

आतङ्को रुजि शङ्कायां सन्तापे मुरजध्वनौ ।।८।।

आह्निकं स्यात्पुनरहर्निवृत्ये नित्यकर्मणि ।

भोजने ग्रन्थभागे चाऽऽढकः प्रस्थचतुष्टयम् ।।९।।

आढकी तुवरीक्ष्वाकुः कटुतुम्ब्यां नृपान्तरे ।

स्यादुलूकः काकशत्राविन्द्रे भारतयोधिनि ।।१०।।

उष्णिका मृद्भाण्डभेदे करभस्य च योषिति ।

उदर्कस्तूचकालफले मदनकण्टके ।।११।।

उष्णको धर्म उद्युक्तातुरयोरूर्मिका पुनः ।

उत्कमण्ठयां भृङ्गनादे वस्त्रभङ्गेऽङ्गुलीयके ।।१२।।

वीच्यां च कनकं हेम्नि कनको नागकेसरे ।

धत्तूरे चम्पके काञ्चनारकिंशुकयोरपि ।।१३।।

करको दाडिमे पक्षिभेदे हस्ते कमण्डलौ ।

लट्वाकरञ्जयोर्मेधोपले च कटुकं कटु ।।१४।।

कटुरोहिणी व्योषं च कञ्जुकश्चोलवर्मणोः ।

वद्र्धपकगृहीताङ्गवसने वरबामके ।।१५।।

निर्मोके, कटकस्त्वद्रिनितम्बे बाहुभूषणे ।

सेनायां राजधन्यां च क्रमुको भद्रमुस्तके ।।१६।।

गुवाके पट्टिकालोध्रे कण्टकः क्षुद्रवैरिणि ।

वेणौ द्रुमाङ्गे रोमाञ्चे कलङ्कोऽङ्कापवादयोः ।।१७।।

कालायसमले चापि कर्णिका कर्णभूषणे ।

बीजकोशे सरोजस्य करमध्याङ्गुलावपि ।।१८।।

कुट्टिन्यां हस्तिहस्ताग्रे कर्णिका सूक्ष्मवस्तुनि ।

अग्निमन्थे, कामुकास्तु काम्यशोकातिमुक्तकाः ।।१९।।

कारकं कर्त्तृकर्माद्योः कारिका यातना नदी ।

कृतौ विवरणश्लोके नापितादिककर्मणि ।।२०।।

वावृकः कुक्कुटे कोके पीतमुण्डेऽथ कार्मुकः ।

वंशे, कार्मुकमिष्वासं कर्मठे, क्षारको रसे ।।२१।।

कोरके पक्षादिपाशे कालिका योगिनीभिदि ।

स्वर्णादिदोषे मेघाल्यां सुरागौर्योर्नवाम्बुदे ।।२२।।

क्रमेदयवस्तुमूल्ये कार्ष्ण्यवृश्चिकपत्रयोः ।

रोमाल्यां धूसरीमांस्योः काकीपटोलशाखयोः ।।२३।।

किम्पाको वृक्षभिद्यज्ञे कीटको निष्ठुरे कृमौ ।

कीचको ध्वनिमद्वंशे दैत्यभेदे द्रुमान्तरे ।।२४।।

कुलकं पञ्चादि श्लोकसमन्वये पटोलके ।

कुलकः कुलप्रधाने वल्मीके काकतिन्दुके ।।२५।।

कुलिकस्तु कुलश्रेष्ठे नागद्रुमविशेषयोः ।

कुशिको मुनिभेदे स्यात्फाले सर्ज्जे बिभीतके ।।२६।।

क्षुल्लकः पामरे स्वल्पे कनिष्ठे दुःखिते खले ।

कूपको गुमवृक्षे स्यात्तैलपात्रे ककुन्दरे ।।२७।।

कूर्चिका क्षीरविकृतौ कुञ्चिकायां च कुड्मले ।

आलेख्यकूर्चिकासूच्योः कृषकौ फालकर्षकौ ।।२८।।

कोरकं कुड्मले तु स्यात्कक्कोलकमृणालयोः ।

कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि ।।२९।।

पारम्पर्यागतस्थाने मङ्गलोद्वाहसूत्रयोः ।

गीतादौ भोगकाले च कौशिकः शक्रघूकयोः ।।३०।।

कोशज्ञे गुग्गुलावहितुण्डिके नकुले मुनौ ।

कौशिकी चण्डिकानद्योः खनकः सन्धितस्करे ।।३१।।

मूषके भूमिवित्तज्ञे खट्टिको मांसविक्रयी ।

महिषीक्षीरफेनश्च खुल्लकः स्वल्पनीचयोः ।।३२।।

खोलकः पूगकोशे स्याच्छिरस्त्रे नाकुपाकयोः ।

ग्रन्थिकं पिप्पलीमूले ग्रन्थिपर्णकभेषजे ।।३३।.

ग्रन्थिको गुग्गुलौ देवज्ञे माद्रेयकरीरयोः ।

गण्डको विघ्ने विद्यायां संख्यावच्छेदखड्गिषु ।।३४।।

गण्डकी तु सरिद्भेदे गमके ग्रहवेदिनि ।

गणिकेभ्यां यूथिकायां तर्कार्यां पण्ययोषिति ।।३५।।

ग्राहको ग्रहीतरि स्याद् व्याधानां घातिपक्षिणि ।

गान्धिको लेखके गन्धवणिजे, गुण्डकं पुनः ।।३६।।

कलोक्तौ मलिने धूलौ स्नेहपात्रेऽथ गैरिकम् ।

स्वर्णे धातौ, गोलकस्तु जारतो विधवासुते ।।३७।।

अलिञ्जरे गुडे चापि गोरङ्कुर्नग्नवेदिनोः ।

खगे च, चषको मद्ये सरके मद्यभाजने ।।३८।।

चुलकः प्रसृतौ भाण्डप्रभेदे चुलुको यथा ।

चारकोऽश्वादिपाले स्याद्बन्धे संचारकेऽपि च ।।३९।।

चित्रकं चित्रकमये द्रुमौषधिविशेषयोः ।

चुम्बकः कामुके धूर्ते बहुगुर्वश्मभेदयोः ।।४०।।

चुल्लकी कुण्डकाभेदे शिशुमारे कुलान्तरे ।

चूतकः कूप आम्र च चूलिका नाटकान्तरे ।।४१।।

करिणः कर्णमूले च जनकः पितृभूपयोः ।

जम्बुको वरुणे फेरौ जतुकं हिङ्गुलाक्षयोः ।।४२।।

जतुका च चर्मचटिका जीवको वृद्धिजीविनि ।

क्षपणे प्राणके पीतसालसेवकयोर्द्रुमे ।।४३।।

व्यालग्रहे, जीविका तु जीवन्त्यां वर्तनेऽपि च ।

झिल्लीका झिल्लिकेव स्याच्चीर्यां रुच्यातपस्य च ।।४४।।

विलेपनस्य च मले तक्षकस्त्क्षिण पन्नगे ।

द्रुमभेदे, तण्डकस्तु समस्तपदजातके ।।४५।।

तरुस्कन्धे वेश्मदारुमायाबहुलयोरपि ।

फेनखञ्जनयोश्चापि तारकः कर्णधारके ।।४६।।

दैत्ये च, तारकमुडौ नेत्रतन्मध्ययोरपि ।

तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके ।।४७।।

तिलकं रुचके क्लोम्नि त्रिशङ्कु शलभे नृपे ।

मार्जारे च तुरुष्कस्तु देशे श्रीवाससिह्लयोः ।।४८।।

तूलिका तूलशय्या स्यादालेख्यस्य च लेखनी ।

दर्शको दर्शयितरि प्रतीहारप्रवीणयोः ।।४९।।

द्रावकस्तु शिलाभेदे स्याद्धोषकविदग्धयोः ।

दारको भेदके पुत्रे दीपकः स्यादलङ्कृतिः ।।५०।।

दीपकौ दीप्तिकृद्दीपौ दीप्यकं त्वजमोदके ।

मयूरशिखायवान्योर्धनिको धान्यके धवे ।।५१।।

धनाढ्ये, धनिका वध्वां धेनुका धेनुरित्यपि ।

धैनुकं धेनुसंहत्यां करणेऽपि च योषिताम् ।।५२।।

नरकौ दैत्यनिरयौ नन्दकः कुलपालके ।

हर्षके विष्णुखड्गे च नर्तकः केलके नटे ।।५३।।

द्विपे पोटगले चापि नर्तकी लासिका द्विपी ।

नालीकोऽङ्गे शरे शल्ये नालीकं पद्मतद्वने ।।५४।।

नायको मणिभिन्नेतृप्रधानेष्वथ नालिका ।

नाले काले चूर्णरन्ध्रे विवरे वेणुभाजने ।।५५।।

निपाकः पचने स्वेदासत्क्र्मफलयोरपि ।

निर्मोको व्योम्नि सन्नाहे मोक्षके सर्पकञ्चुके ।।५६।।

नीलिका नीलिनीक्षुद्ररोगशेफालिकास्वपि ।

पराकस्तु व्रते खड्गे प्रसेकः सेचने च्युतौ ।।५७।।

पर्यङ्को पञ्चपर्यस्त्योः प्रतीकोऽङ्गप्रतीपयोः ।

पद्मकं पद्मकोष्ठेभबिन्दुजालकयोरपि ।।५८।।

पक्षकस्तु पार्श्वद्वारे पार्श्वमात्रेऽपि पथ्यते ।

पताकाङ्कध्वजे केतौ सौभाग्ये नाटकांशके ।।५९।।

पातुको जलमातङ्गे पतयालुप्रपातयोः ।

प्रामको जीवकतरौ सत्त्वजातीयबालयोः ।।६०।।

पाटको रोधसि ग्रामैकदेशेऽक्षादिपातके ।

वाद्यभेदे महाकिष्कौ मूलस्यावयवेऽपि च ।।६१।।

पालकं शाकभेदे स्यात्सल्लक्यां वाजिपक्षिणि ।

पावकोऽग्नौ सदाचारे वह्निमन्थे च चित्रके ।।६२।।

भल्लातके विडङ्गे च शोधयितृनेऽपि च ।

पिनाकः शिवकोदण्डे पांशुवृष्टित्रिशूलयोः ।।६३।।

प्रियकस्तु चञ्चरीके नीपे काश्मीरजन्मनि ।

प्रियङ्गौ चित्रहरिणे पीतशालतरावपि ।।६४।।

पिटकः स्यात्तु विस्फोटे मञ्जूषायामपीष्यते ।

पिष्टको नेत्ररोगे स्याद्धान्यादिचमसेऽपि च ।।६५।।

पिण्याकः कुङ्कुमे हिङ्गौ सिह्लके तिलचूर्णके ।

पुलको गजान्नपिण्डे रोमाञ्जे प्रस्तरान्तरे ।।६६।।

असुराज्यां मणिदोषे गल्वर्के तालके कृमौ ।

पुलाको भक्तसिक्थे स्यात्संक्षेपासारधान्ययोः ।।६७।।

पुष्पकं मृत्तिकाङ्गारशकट्यां रत्नकङ्कणे ।

कासीसे श्रीदविमाने नेत्ररोगे रसाञ्जने ।।६८।।

लोहकांस्ये रीतिकायां पुत्रकः शरभे शठे ।

शैवे वृक्षिप्रभेदे च पुत्रिका यावतूलिके ।।६९।।

पाञ्जालिकादुहित्रोश्च पूर्णकः स्वर्णचूडके ।

पूर्णिका नासिकार्दिन्यां पृथुकश्चिपिटेऽर्भके ।।७०।।

पृदाकुश्चित्रकव्याघ्रवृश्चिकेषु सरीसृपे ।

पेचकः करिलाङ्गूलमूले धूकेऽथ पेटकम् ।।७१।।

मञ्जूषायां समूहे च बहुको जलखातके ।

दात्यूहे-कर्कटेऽर्के च बन्धूकः पीतसालके ।।७२।।

बन्धुजीवे, बन्धकस्तु सत्यकारेऽथ बन्धकी ।

स्वैरिण्यां च करिण्यां च बालिका कर्णभूषणे ।।७३।।

पिछोलायां वालुकायां बालायां, बालकः पुनः ।

शिशौ मूर्खेऽश्वगजयोर्वालधौ, भस्मकं रुजि ।।७४।।

विडङ्गे कलधौते च भ्रामकः फेरुधूर्त्तयोः ।

सूर्यावर्तेऽश्मभेदे च भालाङ्कः कच्छपे हरे ।।७५।।

महालक्षणसम्पूर्णे पूरुषे करपत्रके ।

रोहिते शाकभेदे च भूतीकं कट्फलौषधौ ।।७३।।

यवान्यां घनसारे च भूनिम्बे भूस्तृणेऽपि च ।

भूमिका रचनायां तु रूपान्तरपरिग्रहे ।।७७।।

मशकः क्षुद्ररुग्जन्तुभेदयोर्मधुकं त्रपुः ।

मधुयष्टिश्च, मधुको बन्दिश्रीवदपक्षिणोः ।।७८।।

पण्डूकी मण्डूकपर्ण्यां मण्डूकौ भेकशोणकौ ।

मल्लिको हंसभेदे स्यान्मल्लिका कुसुमान्तरे ।।७९।।

मीने मृत्पात्रभेदे च मातृका करमेश्वरे ।

मातृवर्णसमाम्नायोपमातृष्वथ मालिका ।।८०।।

पक्षिमल्ले सरिद्भेदे ग्रैवेये पुष्पदामनि ।

मामकं तु मदीये स्यान्मामको मातुले स्मृतः ।।८१।।

मेचकः श्यामले कृष्णे तिमिरे बर्हिचन्द्रके ।

मोचको मोक्तृकदलीशिग्रुद्रुमविरागिषु ।।८२।।

मोदको हर्षुके खाद्ये यमको यमजे व्रते ।

यमकं वागलङ्कारे याजको राजकुञ्जरे ।।८३।।

याज्ञिके च, युतकं तु यौतके युग्मयुक्तयोः ।

संशये चलनाग्रे स्त्रीवस्त्रभेदे पटाञ्जले ।।८४।।

रजकौ धावकौ शुक्रौ रसिका कटिसूत्रके ।

रसनायां रसालायां रल्लकः कम्बले स्मृतः ।।८५।।

तथैव कम्बलमृगे रात्रकं पञ्चरात्रके ।

रात्रकस्तु पण्यवधूगृहान्तर्वर्षवासिनि ।।८६।।

राजिका पङ्क्तौ रेखायां केदारे राजसर्षये ।

रुचकं तु मातुलिङ्गे निष्के सौवर्चलेऽपि च ।।८७।।

रोचनायां विडङ्गे च मङ्गलद्रव्यदन्तयोः ।

अश्वस्याभरणे माल्ये प्रोत्कटेऽपि प्रकीर्तितः ।।८८।।

रूपकं नाटके प्रोक्तं काव्यालङ्कारधूर्तयोः ।

रेणुका तु हरेण्वां स्याज्जमदग्नेश्च योषिति ।।८९।।

लम्पाको लम्पटे देशे लासकौ केकिनर्तकौ ।

लूनकस्तु पशौ भिन्ने लोचको नीलवाससि ।।९०।।

कज्जले मांसपिण्डेऽक्षितारे स्त्रीभालभूषणे ।

निर्बुद्धौ कर्णिकामोचाज्याम्बुभ्रूश्लथचर्मणि ।।९१।।

वराकः शोच्यरमयोर्वर्तकोऽश्वखुरे खगे ।

वञ्चकः जम्बुके गेहनकुले खलधूर्तयोः ।।९२।।

कल्मीको नाकुवाल्मिक्यो रोगभेदेऽथ वर्णकः ।

विलेपने मलयजे चारणे, वसुकं पुनः ।।९३।।

रोमके, वसुकस्तु स्याच्छिवमल्ल्यर्कपर्णयोः ।

व्यलीकं व्यङ्ग्यवैलक्ष्याप्रियाकार्येषु पीडने ।।९४।।

वार्षिकं त्रायमाणायां वर्षाभवेऽथ वाल्हिकः ।

देशभेदेऽश्वभेदे च वाल्हिकं हिङ्गु कुङ्कुमम् ।।९५।।

वाल्हीकवद्वाद्र्धकं तु वृद्धत्वे वृद्धकर्मणि ।

वृद्धानां समवाये च वालुकं हरिवालुके ।।९६।।

वालुका तु सिकतासु वितर्कः संशयोहयोः ।

विपाकः परिणामे स्याद् दुर्गतिस्वादुनोरपि ।।९७।।

विवेकः पुनरेकान्ते जलद्रोणीविचारयोः ।

वृषाङ्कः साधुभल्लातशङ्करेषु महल्लके ।।९८।।

वृश्चिकस्तु द्रुणे राशावौषधे शूककीटके ।

वैजिकं कारणे शिग्रुतैले च, वैजिकोऽङ्कुरे ।।९९।।

शङ्खकं वलये कम्बौ शङ्खकस्तु शिरोरुजि ।

शम्याकस्तु विपाके स्याद्यचके चतुरङ्गुले ।।१००।।

शम्बूको दैत्यविशेषे करिकुम्भान्तशङ्खयोः ।

शलाका शारिका शल्यः श्वाविदालेख्यकूर्चिका ।।१०१।।

छत्रपञ्जरकाष्ठीषु शल्लकी श्वाविधि द्रुमे ।

शार्ककः स्याद् दुग्धफेने शर्करायाश्च पिण्डके ।।१०२।।

शिशुकः पादपे बाले शिशुमारेऽथ शीतकः ।

शीतकालेऽलसे स्वस्थे शूककः प्रावटे रसे ।।१०३।।

स्वस्तिको मङ्गलद्रव्ये गृहभेदचतुष्कयोः ।

स्यमीकः पादपे नाकौ स्यात् स्यमीका तु नीलिका ।।१०४।।

सरको मदिरापात्रे मदिरापानमद्ययोः ।

सस्यको नालिकेरान्तः सस्याकमणिखड्गयोः ।।१०५।।

सम्पर्कः सुरते पृक्तौ सायको बाणखड्गयोः ।

स्थासको हस्तबिम्बे स्यात्करकादेश्च बुद्बुदे ।।१०६।।

सूतकं जन्मनि रसे सूचकः शुनि दुर्ज्जने ।

कथके सीवनद्रव्ये मार्जारे वायसेऽपि च ।।१०७।।

सृदाकूर्वज्रे दावाग्नौ प्रतिसूर्ये समीरणे ।

सेवकोऽनुगे प्रसेवे सेचकः सेक्तृमेघयोः ।।१०८।।

हारको गद्यविज्ञानभिदोः कितवचौरयोः ।

हुडुक्को मदमत्ते स्याद्दात्यूहे वाद्यभिद्यपि ।।१०९।।

हेरुकस्तु महाकालगणबुद्धविशेषयोः ।

इति त्रिस्वरकान्ताः ।

गोमुखं वाद्यभाण्डे स्याल्लेपने कुटिलौकसि ।।११०।।

त्रिशिखो रक्ष, स्त्रिशिखं स्यात्किरीटत्रिशूलयोः ।

दुर्मुखो मुखरे नागराजे वाजिनि वानरे ।।१११।।

प्रमुखं प्रथमे मुख्ये मयूखा ज्वालरुक्त्विषः ।

विशिखा खनित्रिकायां रथ्यायां, विशिखः शरे ।।११२।।

विशाखो याचके स्कन्दे विशाख भे कठिल्लके ।

वैशाखः खजके मासे सुमुखो गरुडात्मजे ।।११३।।

पण्डिते फणिभेदे स्यात्

इति त्रिस्वरखान्ताः ।

अयोगः कठिनोद्यमे ।

विश्लेषे विधुरे कूटेऽपाङ्गो नेत्रान्तपुण्ड्रयोः ।।११४।।

अङ्गहीनेऽप्यनङ्गं खे चित्तेऽनङ्गस्तु मन्मथे ।

आभोगः परिपूर्मत्वे वरुमच्छत्रयत्नयोः ।।११५।।

आयोगो गन्धमाल्योपहारे व्यापृतिरोधयोः ।

आशुगोऽर्के शरे वायावुत्सर्गस्त्यागदानयोः ।।११६।।

वर्जने सामान्यविधावुद्वेगं पूगिकाफले ।

उद्वेगस्तूद्विजने स्यात्स्तिमिते शीघ्रगामिनि ।।११७।।

उद्वाहे च भयेऽपि स्यात् कलिङ्गो नीवृदन्तरे ।

पूतीकरञ्जे धूम्याटे स्यात्कलिङ्गा नितम्बिनी ।।११८।।

कलिङ्गं कौटजफले कालिङ्गस्तु भुजङ्गमे ।

द्विरदे भूमिकर्कारौ कालिङ्गी राजकर्कटी ।।११९।।

चक्राङ्गः श्वेतगरुति चक्राङ्गी कटुरोहिणी ।

जिह्मगो मन्दगे सर्पे तुरगो वाजिचित्तयोः ।।१२०।।

तुरगी त्वश्वगन्धायां धाराङ्गःखड्गतीर्थयोः ।

नरङ्गः शेफे वरण्डे नारङ्गं विटजन्मिनोः ।।१२१।।

कणारसे नागरङ्गे निषङ्गस्तूणखड्गगयोः ।

निसर्गः सृष्टौ स्वभावे नीलङ्गुः कृमिजातिके ।।१२२।।

भम्भराल्यां प्रसूने च प्लवगः कपिभेकयोः ।

अर्कसूते, पन्नगस्तु पद्मकाष्ठे भुजङ्गमे ।।१२३।।

परागश्चन्दने रेणौ गिरौ ख्यातिपरागयोः ।

स्नानीयपुष्परजसोः पतङ्गः सूर्यपक्षिणोः ।।१२४।।

परदे शलभे शालौ पत्राङ्गं रक्तचन्दने ।

भूर्जपद्मकयोश्चापि प्रयोगो वाजिशक्रयोः ।।१२५।।

यज्ञे तीर्थविशेषे च प्रयोगस्तु निदर्शने ।

कार्मणे च प्रयुक्तौ च प्रियङ्गू राजसर्षपे ।।१२६।।

पिपल्यां फलिनीकङ्ग्वोः पुन्नागः पादपान्तरे ।

जातीफले नरश्रेष्ठे भुजङ्गः सर्पषिङ्गयोः ।।१२७।।

मातङ्गः श्वपचो हस्ती मृदङ्गो घोषवाद्ययोः ।

रक्ताङ्गो भौमे, रक्ताङ्गं कम्पिल्ये विद्रुमेऽपि च ।।१२८।।

रक्ताङ्गा जीवन्तिकायां रथाङ्गः कोकपक्षिणि ।

रथाङ्गं चक्रे, वराङ्गं योनौ शीर्षे गुडत्वचि ।।१२९।।

कुञ्जरं च विडङ्गस्तु स्यादभिज्ञकृमिघ्नयोः ।

विसर्गो विसर्जनीये वर्चिसि त्यागदानयोः ।।१३०।।

सम्भोगो भोगरतयोः शुण्डायां, सर्वगं जले ।

सर्वगस्तु विभौ रुद्रे सारङ्गो विहगान्तरे ।।१३१।।

चातके चञ्जरीके च द्विपैणशबलेषु च ।

इति त्रिस्वरगान्ताः ।

अनघः स्याद्गतपापे मनोज्ञे निर्मलेऽपि च ।।१३२।।

अमोघः सफलेऽमोघा पुनः पथ्याविडङ्गयोः ।

उल्लाघो निपुणे हृष्टे शुचिनीरोगयोरपि ।।१३३।।

काचिघस्तु मूषिके स्याच्छातकुम्भे छमण्डके ।

परिघोऽस्त्रे योगभेदे परिघातेऽर्गलेऽपि च ।।१३४।।

पलघः काचकलशे घटे प्रकारघोपुरे ।

प्रतिघौ रुट्प्रतीघातौ महार्घो लावकाण्डजे ।।१३५।।

महामूल्येऽपि अवीचिस्तु तरङ्गे नरकान्तरे ।

कवचस्तु तनुत्राणे पटहे नन्दिपादपे ।।१३६।।

क्रकचः करपत्रे स्याद्ग्रन्थिलाख्यतरावपि ।

कणीचिः पुष्पितलतागुञ्जयोः शकटेऽपि च ।।१३७।।

नमुचिर्दितिजे कामे नाराचो लोहसायके ।

जलेभे, नाराच्येषम्यां प्रपञ्चो विप्रलम्भने ।।१३८।।

विस्तारे सञ्चये वापि मरीचिः कृपणे घृणौ ।

ऋषिभेदे मारीचः कल्लोले याज्ञिकद्विजे ।।१३९।।

रक्षोभेदेऽपि —

इति त्रिस्वरचान्ताः ।

अण्डजाः स्यात्कक्किडेऽहौ खगे झषे ।

अण्डजा मृगनाभ्यां स्यादङ्गजो मन्मथे सुते ।।१४०।।

मेदे केशे सुन्दरे च कम्बोजो नीवृदन्तरे ।

शङ्खहस्तिभेदयोश्च करजो नखवृक्षयोः।।१४१।।

काम्बोजः पुनरश्वानां भेदे पुन्नागपादपे ।

वलक्षखदिरे चापि काम्बोजी माषपर्णिका ।।१४२।।

कारुजः कलभे फेने वल्मीके नागकेसरे ।

गैरिके शिल्पिनां चित्रे स्वयं जाततिलेऽपि च ।।१४३।।

कुटजोऽगस्त्ये द्रुभेदे द्रोणे, गिरिजमभ्रके ।

शिलाजतुनि लोहे च गिरिजा मातुलुङ्ग्युमा ।।१४४।।

जलजं कमले शङ्के नीरजं पद्मकुष्ठयोः ।

परञ्जोऽसौ तैलयन्त्रेछुरिकाफलफेनयोः ।।१४५।।

बाहुजस्तु स्वयंजाते तिले क्षित्रियकीरयोः ।

भूमिजौ नरकाङ्गारौ भूमिजा जनकात्मजा ।।१४६।।

वलजं गोपुरे सस्ये क्षेत्रसङ्गरयोरपि ।

सदाकारे, वलजा तु पृथिव्यां वरयोषिति ।।१४७।।

वनजो मुस्तके स्तम्बे, वनजमम्बुजे ।

वनजा तु मुद्गपर्ण्यां सहजः सहसम्भवे ।।१४८।।

निसर्गे च सामजस्तु सामोत्थे कुञ्जरेऽपि च ।

हिमजो मेनकापुत्रे हिमजा पार्वती शची ।।१४९।।

इति त्रिस्वरजान्ताः ।

क्षेत्रज्ञावात्मनिपुणौ दोषज्ञः प्राज्ञवैद्ययोः ।

सर्वज्ञस्तु जिनेन्द्रे स्यात्सुगते शङ्करेऽपि च ।।१५०।।

इति त्रिस्वरदान्ताः ।

अवटः कूपखिलयोर्गर्ते कुहकजीविनि ।

अरिष्टो लशुने निम्बे फेनिले दैत्यकाकयोः ।।१५१।।

अरिष्टं सूत्यगारेऽन्तश्चिह्ने तक्रे शुभेऽशुभे ।

अवटुर्गर्तान्धुघाटासूत्कटस्तीव्रमत्तयोः ।।१५२।।

उच्चटा दम्भचर्यायां प्रभेदे लशुनस्य च ।

करटः करिगण्डे स्यात्कुसुम्भे निन्द्यजीवने ।।१५३।।

काके वाद्ये दुर्दुरूढे नवश्राद्धेऽथ कर्कटः ।

कुलीरे करणे स्त्रीणां राशौ खगेऽथ कर्कटी ।।१५४।।

शाल्मलीफलवालु ङ्क्योः कार्पटो जतुकाऽर्थिनोः ।

कीकटः कृपणे नीचे देशभेदे तुरङ्गमे ।।१५५।।

कुरण्टो झिटिकाभेदे कुरण्टी दारुपुत्रिका ।

कुक्कुटः कुक्कुभे ताम्रचूडे वह्निकणेऽपि च ।।१५६।।

निषादशूद्रयोः पुत्रे कृपीटं चोदरे जले ।

चक्राटो धूर्त्ते दीनारे विषवैद्येऽथ चर्पटः ।।१५७।।

चपेटे स्फारविपुले पर्पटे, चिपिटः पुनः ।

पृथुके पिच्चटे खाद्यभेदे स्याद्विस्तृतावपि ।।१५८।।

चिरण्टी तु सुवासिन्यां स्याद्द्वितीयवयःस्त्रियाम् ।

जकुटं वार्ताकपुष्पे जकुटो मलये शुनि ।।१५९।।

त्र्यङ्गटं शिक्यभेदे स्याद्धौताञ्जन्यामपि स्मृतम् ।

त्रिकूटं सिन्धुलक्षणे त्रिकूटः स्यात्सुवेलके ।।१६०।।

त्रिपुटौ तीरसतीनौ त्रिपुटा त्रिवृदौषधौ ।

सूक्ष्मैलायां मल्लिकायां द्रोहाटो मृगलुब्धके ।।१६१।।

चतुष्पदीप्रभेदे च बैडालव्रतिकेऽपि च ।

धाराटश्चातकेऽश्वे च निर्दटो निष्प्रयोजने ।।१६२।।

निर्दयेऽन्यदोषरते निष्कुटो गृहवाटिका ।

केदारकः, कपाटश्च पर्पटो भेषजान्तरे ।।१६३।।

पिष्टविकृतौ परीष्टिः परीक्षापरिचर्ययोः ।

स्यात्पर्क्कटी प्लक्षतरौ पूगादेर्नूतने फले ।।१६४।।

पिच्चटस्तु, नेत्ररोगे पिच्चटं त्रपुसीसयोः ।

बर्वटी व्रीहिभिद्वेश्या बार्वटः कान्तिपुज्जके ।।१६५।।

वारुण्डे मकरे पोके भाकूटः शैलमीनयोः ।

भार्याटः पटहाजीवे लोभात्स्वस्त्रीसमर्पके ।।१६६।।

भावटो भावके साधुनिवेशे कामुके नटे ।

मर्कटस्तु कपावूर्णनाभे स्त्रीकरमानतरे ।।१६७।।

मर्कटी करञ्जभेदः शूकशिम्बी च वानरी ।

बीजं च राजकर्कट्याः प्राचीनामलकस्य ।।१६८।।

गवेधुकाफलं चापि चक्राङ्गीकरजान्तरम् ।

मोरटं त्विक्षुमूले स्यादङ्कोटकुसुमेऽपि च ।।१६९।।

सप्तरात्रात्परं क्षीरे मोरटा मूर्विका मता ।

मोचाटः कदलीगर्भे चन्दने कृष्णजीरके ।।१७०।।

रेवटो दक्षिणावर्तशङ्खे जाङ्गुलिकेऽपि च ।

रेवटो (?) सोरटे वेणौ स्याद्वातूलवराहयोः ।।१७१।।

वर्णाटो गायने चित्रकारे स्त्रीकृतजीवने ।

वरटा हंसयोषायां गन्धोल्यां, विकटः पृथौ ।।१७२।।

कराले सुन्दरे वाटे वेकटो जातयौवने ।

वैकटिके मणिकारे वेरटो मिश्रनीचयोः ।।१७३।।

वेरटं बदरीफले शैलाटो मृगवैरिणि ।

शुक्लकाचे किरते च देवले गिरिचारिमि ।।१७४।।

संसृष्टं तु सङ्गते स्याच्छुद्धे च वसनादिना ।

हर्मटः कच्छपे प्रोक्तः सहस्रकिरणेऽपि च ।।१७५।।

इति त्रिस्वरटान्ताः ।

अम्बष्ठो विप्रतो वैश्यतनये नीवृदन्तरे ।

अम्बष्ठा स्यादम्ललोण्यां पाठयूथिकयोरपि ।।१७६।।

कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा त्वन्तिमाङ्गुलौ ।

कमठः कच्छपे दैत्यविशेषे मुनिभाजने ।।१७७।।

कमठः कठिने जीर्णे नर्मठौ षिङ्गचूचुकौ ।

प्रकोष्ठः कूर्पराधस्ताद्भूपक्षान्तरेऽपि च ।।१७८।।

हस्ते च विस्तृतकरे प्रतिष्ठा गौरवे स्थितौ ।

छन्दोजातौ यागसिद्धौ मकुष्ठौ धान्यमन्थरौ ।।१७९।।

लघिष्ठो भेलकेऽत्यल्पे स्याद्वरिष्ठस्तु तित्तिरौ ।

वरिष्ठं मरिचे ताम्रे वरोरुतमयोरपि ।।१८०।।

वैकुण्ठो वासवे विष्णौ श्रीकण्ठः कुरुजाङ्गले ।

शङ्करे चाऽथ साधिष्ठोऽत्यर्थे दृढतमेऽपि च ।।१८१।।

इति त्रिस्वरठान्ताः ।

कारण्डो मनुकोशेऽसौ कारण्डं वेदलाण्ढके ।

कूष्माण्डौ गणकर्कारू कूष्माण्डी त्वम्बिकौषधी ।।१८२।।

कोदण्डं कार्मुके देशभेदभ्रूलतयोरपि ।

गारुडं स्यान्मरकते विषशास्त्रे विषोद्भवे ।।१८३।।

तरण्डो बडिशीसूत्रद्धस्तुनि भेलके ।

तित्तिडो दैत्यभेदे स्याद्यमदासेऽथ तित्तडी ।।१८४।।

कालदासे पादपे च तिन्तिडी चुक्रचिञ्जयोः ।

द्राविडो वेधमुख्ये स्यान्नीवृदन्तरशङ्खयोः ।।१८५।।

निर्गुण्डी नीलशेफाली सिन्दुवारोऽब्जकन्दकः ।

प्रचण्डो दुर्वहे श्वेतकरवीरे प्रतापिनी ।।१८६।।

प्रकाण्डो विटपे शस्ते मूलस्कन्धान्तरे तरोः ।

पिचण्डो जठरे प्रोक्तः पशोरवयवेऽपि च ।।१८७।।

पूत्यण्डः स्याद्गन्धमृगे सर्पभिद्गन्धकीटयोः ।

भेरुण्डौ भीषमखगौ भेरुण्डा देवताभिदि ।।१८८।।

मारुण्डस्तु भुजङ्गाण्डे मार्गे गोमयमण्डले ।

मार्तण्डस्त्वरणौ क्रोडे वरण्डो वदनव्यथा ।।१८९।।

अन्तरावेदिसङ्घौ च वरण्डा शारिका छुरी ।

वर्त्ति,र्वारुण्डस्तु कर्णदृङ्मले सेकभाजने ।।१९०।।

फणिराजद्वारपिण्ड्योर्वारुण्डः खग उद्रिणि (?) ।

वितण्डा वातर्भेदे स्यात्कच्चीशाके शिलाह्वये ।।१९१।।

करवीर्यामपि प्रोक्तः शिखण्डो बर्हिचूडयोः ।

सरण्डः स्यात्कृकलासे भूषणान्तरधूर्त्तयोः ।।१९२।।

सपिण्डस्तनये प्रोक्तो दायादे सदृशेऽपि च ।

इति त्रिस्वरडान्ताः ।

अध्यूढ ईश्वरे,ऽध्यूढा कृतसापत्न्ययोषिति ।।१९३।।

आषाढो व्रतिनां दण्डे मासे च मलयाचले ।

उपोढ ऊढे निकटेऽप्युदूढः पीवरोढयोः ।।१९४।।

प्ररूढो जठरे वृद्धे प्रगाठो दृढकृच्छ्रयोः ।

वारूढः शम्बले वस्त्राञ्चलेऽग्नौ पञ्जरेऽररे ।।१९५।।

विरूढोऽङ्कुरिते जाते विगूढो गुह्यगुप्तयोः ।

समूढं पुञ्जिते भुग्ने सद्योजातेऽनुपप्लवे ।।१९६।।

संरूढोऽङ्कुरिते प्रौढे समीढो मूत्रिते घने ।

इति त्रिस्वरढान्तः ।

अभीक्ष्णं तु भृशे नित्येऽप्यरुणोऽनूरुसूर्ययोः ।।१९७।।

सन्ध्यारागे बुधे कुष्ठे निःशब्दाव्यक्तरागयोः ।

व्याकुले कपिले वर्णे रक्तवर्णेऽपि वाच्यवत् ।।१९८।।

अ◌ुरुणा त्रिवृताश्यामामञ्जिष्ठाऽतिविषासु च ।

अरणिस्तु भवेदग्निमन्थे निर्मन्थ्यदारुणि ।।१९९।।

इन्द्राणी तु शचीसिन्दुवारयोः करणे स्त्रियाः ।

इरिणं तूषरे शून्येऽपीक्षणं दर्शने दृशि ।।२००।।

उषणा तु कणायां स्यादूषणं मरिचे मतम् ।

एषणी व्रतमार्गानुसारिण्यां च तुलाभिदि ।।२०१।।

कङ्कणं करभूषायां हस्तसूत्रे च शेखरे ।

कत्तृणं रौहिषं फङ्गा कल्याणं हेम्नि मङ्गले ।।२०२।।

करणः शूद्र्यां विट्पुत्रे करणं क्षेत्रगात्रयोः ।

गीताङ्गहारसंवेशभिक्षुकायस्थसंहतौ ।।२०३।।

वर्णानां स्पष्टतादौ च योगिनामसानादिषु ।

हृषीके साधकतमे बवादौ च कृतावपि ।।२०४।।

करुणा तु कृपायां स्यात् करुणो रसवृक्षयोः ।

करेणुर्गजहस्तिन्योः कर्णिकारतरावपि ।।२०५।।

कारणं घातने हेतौ करणे, कारणा पुनः ।

यातना, कार्मणं मन्त्रादियोगे कर्मकारके ।।२०६।।

काकिणी मानदण्डे स्यात्तुरीयांशे पणस्य च ।

कृष्णलायां वराटे च कृपाणी कर्त्तरी छुरी ।।२०७।।

कृपाणोऽसौ, क्षेपणी तु नौदण्डजालभेदयोः ।

कोङ्कणः स्याज्जनपदे कोङ्कणं त्वयुधानतरे ।।२०९।।

ग्रहणं स्वीकृतौ वन्द्यां धीगुणे शब्द आदरे ।

ग्रहोपरागे प्रत्याये ग्रहणी तु रुगन्तरम् ।।२१०।।

ग्रामणीर्भोगिके पत्यौ प्रधाने क्षुरमर्दिनि ।

ग्रामिणीः पण्ययोषा स्याद्ग्रामेयीनीलिकाऽपि च ।।२११।।

गोकर्णोऽश्वतरे सर्पे मृगभेदे गणान्तरे ।

अङ्गुष्ठाऽनामिकोन्माने गोकर्णी मूर्विकौषधौ ।।२१२।।

चरणो बह्वृचादौ स्यात्पा ादे च मूलगोत्रयोः ।

चरमं भ्रमणे भक्षे रासभस्य ध्वनावपि ।।२१३।।

जारणो रुचके हिङ्गौ जीरके कृष्णजीरके ।

तरुणः कुब्जपुष्पे स्यादेरण्डे यूनि नूतने ।।२१४।।

तरणिस्तरणेऽर्केऽशौ कुमार्योषधिनौकयोः ।

यष्ठावद्धो,(?) दक्षिणस्तु परच्छन्दानुवर्तिनि ।।२१५षष

दक्षेऽपसव्ये सरलेऽप्राचीनेऽप्यथ दक्षिणा ।

दिक् प्रतिष्ठा यज्ञदानं द्रविणं काञ्चने धने ।।२१६।।

पराक्रमे बलेऽपि स्यात् द्रुघणः पर्शुवेधसोः ।

मुद्गरेऽप्यथ दुर्वर्णं कलधौतकुवर्णयोः ।।२१७।।

दौर्वीणं मृष्टपर्णे स्याद्धरितालीरसेऽपि च ।

धरणोऽहिपतौ लोके स्तने धान्ये दिवाकरे ।।२१८।।

धरणं धारणे मानविशेषे, धरणी भुवि ।

धारणः सलिले स्वर्गे परमेष्ठिनि, धर्मणः ।।२१९।।

सर्पभेदे वृक्षभेदे धर्षिणी त्वभिसारिका ।

धर्षणं स्यात्परिभवे धारिणी नाडिकादिभिः ।।२२०।।

धारणा स्यात्तु योगाङ्गे धारणं ग्रहणे मतम् ।

धिषणस्त्रिदशाचार्ये धिषणा तु मनीषिका ।।२२१।।

निर्याणं निर्गमे मोक्षगजापाङ्गप्रदेशयोः ।

निर्वाणं मोक्षनिवृत्त्योर्विघाते करिमज्जने ।।२२२।।

निर्माणं सारनिर्मित्योः कर्मभेदे समज्जसे ।

निःश्रेणिरधिरोहिण्यां खर्जूरीपादपेऽपि च ।।२२३।।

प्रघणोऽलिन्दके ताम्रकलशे लोहमुद्गरे ।

प्रवणस्तु क्षणे प्रह्वे क्रमनिम्ने चतुष्पथे ।।२२४।।

आयत्ते च प्रमाणं तु मर्यादासत्यवादिनोः ।

प्रमातर्येकतेयत्तानित्येषु हेतुशास्त्रयोः ।।२२५।।

पत्रोर्णं धौतकौशेयं पत्रोर्णः शोणकद्रुमे ।

पक्षिणी पूर्णिमाखग्योः शकिनीरात्रिभेदयोः ।।२२६।।

प्रवेणिर्वेणिकुथयोः पुराणं प्रत्नशास्त्रयोः ।

पुराणः षोजशपणे पुराणं वानतन्तुषु ।२२७।।

पूरके पिष्टभेदे च पूरणी शाल्मलिद्रुमे ।

प्रोक्षणं सेकवधयोर्भरणं वेतने भृतौ ।।२२८।।

भरणी शोणके भे च भ्रमणी स्यादधीशितुः ।

क्रीजादौ कारुण्डकायां भीषणं सल्लकीरसे ।।२२९।।

भीषणो दारुणे गाढे मत्कुणोऽश्मश्रुपूरुषे ।

उद्दंशे नालिकेरे च निर्विषाणगजेऽपि च ।।२३०।।

मसृणोऽकठिने स्निग्धे मसृणा स्यादतस्यपि ।

मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि ।।२३१।।

यन्त्रणं बन्धने त्राणे नियमे, रमणं पुनः ।

पटोलमूले जघने रमणो रासभे प्रिये ।।२३२।।

रोषणो रोषणे हेमघर्षे पारद ऊषरे ।

रोहिणी सोमवल्के भे कण्ठरोगोभयोर्गवि ।।२३३।।

लोहिताकटुरोहिण्योर्लवणो राक्षसे रसे ।

अस्थिभेदे, लवणा त्विड्, लक्षणं नामचिह्नियोः ।।२३४।।

लक्ष्मणं च लक्षणस्तु सौमित्नौ लक्ष्मणो यथा ।

लक्ष्मणः श्रीयुते, लक्ष्मणौषधौ सारसस्त्रियाम् ।।२३५।।

वरुणोऽर्केऽप्यतौ वृक्षे वरणे वरुणद्रुमे ।

प्राकारे, वरणं वृत्यां वारणः स्यान्मतङ्गजे ।।२३६।।

वारणं तु प्रतिषेधे ब्रह्मणं विप्रसंहतौ ।

वेदे च ब्राह्मणो विप्रो ब्रह्मणी वाडवस्त्रियाम् ।।२३७।।

स्पृक्कायां फञ्जिकायां च वारुणी पश्चिमा सुरा ।

गण्डदूर्वा, विषाणं तु श्रृङ्गे कोलेभदन्तयोः ।।२३८।।

विषाणी मेषश्रृङ्ग्यां स्याद्विपणिः पण्यहट्टयोः ।

पण्यवीथ्यां, श्रमणस्तु निर्गन्थे निन्द्यजीविनि ।।२३९।।

श्रणा सुलता मांसी मुण्डीरी च सुदर्शना ।

श्रवणो नक्षत्रभेदे श्रवणं श्रवसि श्रुतौ ।।२४०।।

शरणं रक्षणे गेहे वधरक्षकयोरपि ।

श्रावणो मासि पाखण्डे, दध्याल्यां श्रावणा मता ।।२४१।।

श्रीपर्णस्त्वग्निमन्थेऽब्जे श्रीपर्णी शाल्मलौ हठे ।

सङ्कीर्णो निचितेऽशुद्धौ सरणिः श्रेणिमार्गयोः ।।२४२।।

सारणः स्यादतीसारे दशकन्धरमन्त्रिणि ।

सारणी त्वल्पसरिति प्रसारण्योषधावपि ।।२४३।।

सिङ्खाणं तु घ्राणमलेऽयः किट्टे काचभाजने ।

सुषेणो विष्णुसुग्रीववैद्ययोः करमर्दके ।।२४४।।

सुवर्णं काञ्चने क्र्षे सुवर्णालो मखान्तरे ।

कृष्णागुरुणि बिस्ते च सुपर्णः कृतमालके ।।२४५।।

गरुडे स्पर्णचूडे च सुपर्णा विनताऽब्जिनी ।

हरणं यौतकद्रव्येऽप्यङ्गहारे भूजे हृतौ ।।२४६।।

हरिणौ पाण्डुसारङ्गौ हरिणी चारुयोषिति ।

सुवर्णप्रतिमायां च हरितावृत्तभेदयोः ।।२४७।।

हर्षणं श्राद्धदेवे च ह्नर्षके योगरुग्भिदोः ।

हरेणुः कुलयोषायां रेणुकायां सतीनके ।।२४८।।

हिरणं हिरण्यमिव वराटे हेम्नि रेतसि ।

इति त्रिस्वरणान्ताः ।

अमृतं यज्ञशेषाम्बुसुधामोक्षेष्वयाचिते ।।२४९।।

अन्नकाञ्चनयोर्जग्धौ खे स्वादुनि रसायने ।

घृते हृद्ये गोचरे चाऽमृतो धन्वन्तरौ सुरे ।।२५०।।

अमृताऽऽमलकापथ्यागूडूचीमाधवीषु च ।

अनृतं कर्षमेऽलीके चाऽक्षतः स्यादहिंसिते ।।२५१।।

षण्ढे लाजेष्वर्दितं तु वातव्याधौ हतेऽर्थिते ।

अजितस्तीर्थकृद्भेदे बुद्धे विष्णावनिर्जिते ।।२५२।।

अच्युतो द्वादशस्वर्गे केशवाऽभ्रष्टयोरपि ।

अव्यक्तं प्रकृतावात्मन्यव्यक्तोऽस्फुटमूर्खयोः ।।२५३।।

अनन्तं खे निरवधावनन्तस्तीर्थकृद्भिदि ।

विष्णौ शेषेऽप्यनन्ता तु गुडूची भूर्दुरालभा ।।२५४।।

विशल्या लाङ्गली दूर्वा शारिवा हैमवत्यपि ।

अश्मन्तमशुभे क्षेत्रे चुल्यामनवधौ मृतौ ।।२५५।।

अमतिः काले चन्द्रे स्यादङ्कतिश्चिन्हवेधसोः ।

अग्निहोत्रिण्यगस्तिर्दुमुन्योः, स्याददितिर्भुवि ।।२५६।।

देवमातरि पार्वत्यामंहतिस्त्यागरोगयोः ।

आपातः पाते तत्कालेऽप्यदृतः सादरेऽर्चिते ।।२५७।।

आख्यातं भाषिते त्यादावाघ्रातं ग्रस्तशिङ्घते ।

आप्लुतः स्नातके स्नाते।प्यावर्तः पयसां भ्रमे ।।२५८।।

आवर्तने चिन्तने चाऽनर्त्तो जनपदे जने ।

समरे नृत्यशालायामाहतं तु मृषार्थके ।।२५९।।

गुणिते ताडिते चाप्याध्मातः शब्दितदग्धयोः ।

वातरोगेऽप्यथाऽऽस्फोतः कोविदारार्कपर्णयोः ।।२६०।।

आस्फोता गिरिकर्ण्यां तु वनमाल्यामथाऽऽचितः ।

छादेते शकटोन्मेये पलानामयुतद्वये ।।२६१।।

सङ्गृहीतेऽप्यथाऽऽयस्तः क्लिशिते तेजिते हते ।

क्रुद्धे क्षिप्तेऽथाऽऽयतिः स्यात्प्रभावोत्तरकालयोः ।।२६२।।

दैर्ध्यसङ्गेऽप्याकृतिस्तु जातौ रूपे वपुष्यपि ।

आयत्तिर्वासरे स्नेहे वाशित्वे स्थाम्नि सीम्नि च ।।२६३।।

आसत्तिः सङ्गमे लाभेऽप्यापत्तिः प्राप्तिदोषयोः ।

आपद्यपीङ्गितं तु स्याच्चेष्टायां गमनेऽपि च ।।२६४।।

उत्तप्तं चञ्चले शुष्कमांससन्तप्तयोरपि ।

उचितं विदितेऽभ्यस्ते मिते युक्तेऽप्यथोत्थितम् ।।२६५।।

वृद्धिमत्प्रोद्यतोत्पन्नेषूदितं तूद्गतोक्तयोः ।

उद्धृतं स्यादतुलिते परिभूक्तोज्झितेऽपि च ।।२६६।।

उषितं व्युषिते प्लुष्टेऽप्युच्छ्रितं तूच्चजातयोः ।

प्रवृद्धे स्यादथोद्वान्त उद्गीर्णे निर्मदद्विपे ।।२६७।।

उदात्तो दातृमहतोर्हृद्ये च स्वरभिद्यपि ।

उन्मत्तो मुचुकुन्दे स्याद्धत्तूरोन्मादयुक्तयोः ।।२६८।।

उदन्तः साधौ वार्तायामुद्धातः समुपक्रमे ।

मुद्गरेऽभ्यासयोगाय कुम्भकादित्रयेऽपि च ।।२६९।।

पादस्खलन उत्तुङ्गेऽप्युन्नतिस्ताक्ष्र्यर्योषिति ।

उद्गग्रे च समृद्धौ चाप्येधतुर्नरि पावके ।।२७०।।

क्रन्दितो रुदिते हूतौ कलितं विदिताप्तयोः ।

कपोतः पारावते स्यात्कवकाख्यविहङ्गमे ।।२७१।।

कापोतं यामुने खर्ज्यां कपोतानाञ्च संहतौ ।

किरातः स्यादल्पतनौ भूनिम्बम्लेच्छयोरपि ।।२७२।।

किराती कुट्टिनी गङ्गा कृतान्तोऽक्षेमकर्मणि ।

सिद्धान्तयमदैवेषु गर्जितो मत्तकुञ्जरे ।।२७३।।

गर्जितं जलदध्वाने ग्रन्थितं हतदृब्धयोः ।

आक्रान्ते च गरुत्मांस्तु विहगे पन्नगाशने ।।२७४।।

गभस्तिः स्याद्दिनकरे स्वाहाकिरमयोरपि ।

गोदन्तो हरिताले स्यात्सन्नद्धे दिशितेऽपि च ।।२७५।।

गोपतिः शङ्करे षण्ढे नृपतौ त्रिदशाधिपे ।

सहस्त्रिकरणे चापि ज्वलितौ दग्धभास्करौ ।।२७६।।

जयन्तावैन्द्रिगिरिशौ जयन्त्युमापताकयोः ।

जीवन्त्यामिन्द्रपुत्र्यां च जगती छन्दसि क्षितौ ।।२७७।।

जम्बूवप्रे जने लोके जामाता दुहितुः पतौ ।

सूर्यावर्ते वल्लभे च जिमूतौ वासवेऽम्बूदे ।।२७८।।

घोषकेऽदौ भृतिकरे जीवन्ति शमिवन्दयोः ।

जीवन्यां च गुडूच्यां च जीवातुर्जीवनौषधे ।।२७९।।

जीविते च जृम्भितं तुप्रवृद्धे च विचेष्टिते ।

जृम्भायां स्फुटिते चापि त्वरितं वेगतद्वतोः ।।२८०।।

तालितं स्तनिते वस्त्रे वाद्यभाण्डे गुणे स्तृतौ ।

त्रिगर्तो गणिते देशे त्रिगर्ता कामुकश्रियाम् ।।२८१।।

घुर्घुयामथ तृणता तृणत्वे कार्मुकेऽपि च ।

दंशितो वर्मिते दष्टे स्रवन्ती च द्रवन्त्यपि ।।२८२।।

नद्यामोषधिभेदे च द्विजातिर्ब्रह्मणेऽण्डजे ।

दुर्जातं व्यसनासम्यग्जातयोरथ दुर्गतिः ।।२८३।।

दारिन्द्ये नरके चापि दृष्टान्तः स्यादुदाहृतौ ।

शास्त्रेऽथ निकृतं विप्रलब्धे विप्रकृतेऽधमे ।।२८४।।

निरस्तः प्रेरितशरे सन्त्यक्ते त्वरितोदिते ।

निष्ठ्यूते प्रतिहते च निमित्तं हेतुलक्ष्मणोः ।।२८५।।

निवातो वातरहिते दृढमन्नाह आश्रये ।

निर्मुक्तो मुक्तनिर्मोकभुजगे निष्परिग्रहे ।।२८६।।

निशान्तं सदने शान्ते प्रभातेऽप्यथ निर्वृतिः ।

मोक्षे मृत्यौ सुखे सौस्थे निकृतिः सटशाठ्ययोः ।।२८७।।

भर्त्सनेऽभिभवे क्षेपे निर्ऋतिर्निरुपद्रवे ।

अलक्ष्म्यां दिक्पतौ चापि नियती दैवसंयमौ ।।२८८।।

प्रभूतमुद्गते प्राज्ये प्रसूतं जातपुष्पयोः ।

प्रतीतः सादरे प्राज्ञे प्रथिते ज्ञातहृष्टयोः ।।२८९।।

प्रहतं विस्तृते क्षुण्णे पलितं पङ्कतापयोः ।

पक्वकेशे शैलजाते पण्डितः सिह्लधीमतोः ।।२९०।।

प्रणीत उपसम्पन्ने कृते श्रिप्ते प्रवेशिते ।

संस्कृताग्नौ च पर्याप्तं शक्ते तृप्तौ निवारणे ।।२९१।।

यथेष्टे दोषे कृच्छ्रे च पर्याप्तिः परिरक्षणे ।

प्राप्ते कामे, प्रसृतोऽद्र्धञ्जलौ वेगिविनीतयोः ।।२९२।।

तते च प्रसृता जङ्घा प्रमीतं प्रोक्षिते मृते ।

पर्यस्तं तु हते स्रस्ते प्रपातो निर्झरे भृगौ ।।२९३।।

अवटे पतने कच्छे पक्षतिः प्रतिपत्तिथौ ।

पक्षमूलि, पर्वतस्तु देवर्षौ धरणीधरे ।।२९४।।

प्रसूतिः प्रणवोत्पत्तिपुत्रेषु दुहितर्यपि ।

षद्धतिः पथि पङ्क्तौ च प्रकृतिर्योनिशिल्पिनोः ।।२९५।।

पौरामात्यादिलिङ्गेषु गुमसाम्यस्वभावयोः ।

प्रत्ययात्पूर्विकायां च प्रततिर्विस्तृतिर्लता ।।२९६।।

प्रवृत्तिर्वृत्तवृत्तान्तप्रवाहेषु प्रवर्तने ।

प्रचितः शकटोन्मेषे पलानामयुतद्वये ।।२९७।।

प्रकृतं तु प्रस्तुतेऽपि प्रकृतः प्रकृतिस्थिते ।

प्रार्थितं शत्रुसंरुद्धे याचिते निहतेष्टयोः ।।२९८।।

पार्वती शल्लकी गौरी जीवनी द्रुपदात्मजा ।

पिण्डितं गुणिते सान्द्रे षिशितं मांसवाचकम् ।।२९९।।

पिशिता मांसिकायां स्यात् पीडितं करणे स्त्रियाः ।

बाधिते यन्त्रसंमर्दे पुटितः स्यूतपाटिते ।।३००।।

हस्तिपुटे, पृषतस्तु मृगे बिन्दौ खरोहिते ।

श्वेतबिन्दुयुतेऽपि स्यात् प्रेषितं प्रेरिते गते ।।३०१।।

प्रोक्षितं सिक्तहतयोर्भरतः शबरे नटे ।

क्षेत्रे रामानुजे शास्त्रे दौष्यन्तावृषभात्मजे ।।३०२।।

तन्तुवाये, भारतं तु शास्त्रे द्वीपांशभिद्यपि ।

भारती यक्षिणीवृत्तिभिदोर्वाच्यथ भावितम् ।।३०३।।

वासिते प्राप्ते, भासन्तो भे सूर्ये रम्यभासयोः ।

मथितं निर्मलव्या ाजे व्यालोडितनिघृष्टयोः ।।३०४।।

महती तु बृहत्यां स्याद्वीणायां नारदस्य च ।

मालती युवतौ काकमाच्यां जातीविशल्ययोः ।।३०५।।

ज्योत्स्नायां निशि नद्यां च मुण्डितं खण्डिते हृते ।

मुहूर्तमल्पकाले स्याद्धटिकाद्वितयेऽपि च ।।३०६।।

मूर्छितं सोछ्रये मूढे रजतो दन्तिदन्तयोः ।

धवले शोणिते हारे दुर्वर्णे ह्रदशैलयोः ।।३०७।।

रसितं स्वर्णादिलिप्ते रुतस्तनितयोरपि ।

रमतिर्नायके स्वर्गे रमितं स्तनिते रुते ।।३०८।।

रेवती बलभार्यायां नक्षत्रभिदि मातृषि ।

रैवतः स्यादुज्जयन्ते सुवर्णालौ हरेऽसुरे ।।३०९।।

रोहितो लोहिते मीने मृगे रोहितकद्रुमे ।

रोहितं त्वृजुशक्रास्त्रे धीरे, ललितमीप्सते ।।३१०।।

तडिते हारभेदे च लोहितो मङ्गले नदे ।

वर्णभेदे, लोहितं तु कुङ्कुमे रक्तचन्दने ।।३११।।

गोशीर्षे रुधिरे युद्धे वर्धितं छिन्वद्र्धयोः ।

प्रसृते, वनिते तु स्यात्प्रर्थिते सेवितेऽपि च ।।३१२।।

वनितोत्पादितात्यर्थरागनार्यपि नार्यपि ।

वसतिः स्यादवस्थाने निशायां सदनेऽपि च ।।३१३।।

व्रततिस्तु प्रतानिन्यां विस्तारे, वहतुः पथि ।

वृषभे, वहतिर्धेन्वां सचिवेऽप्यथ वापितम् ।।३१४।।

बीजाकृते मुण्डिते च व्याघातो योगविघ्नयोः ।

धातेऽपि, व्यायतं दीर्घे व्यावृतेऽतिशये दृढे ।।३१५।।

वासन्तः परपुष्टे स्यात्करभेऽवहिते विटे ।

वासन्ती माधवीयूथीपाटलास्वथ वासितम् ।।३१६।।

वस्त्रच्छन्ने ज्ञातमात्रे भाविते विहगारवे ।

वासिता करिणीनार्योर्विहितं तु कृते श्रुते ।।३१७।।

विदितं स्वीकृते ज्ञाते विवस्वान् देवसूर्ययोः ।

विश्रुतं तु प्रतीते स्याज्जातहर्षितियोरपि ।।३१८।।

विगतो निःप्रभे वीते विविक्तो वसुनिहनुके ।

विविक्तं स्यादसम्पृक्ते रहःपूतविवेकिषु ।।३१९।।

विधुतं कम्पिते त्यक्ते विकृतो रोग्यसंस्कृतः ।

बीभत्सश्च विनीतस्तु निभृते निर्जितेन्द्रिये ।।३२०।।

वाणिज्ये साधुवाह्यश्वे विनयग्राहिते हृते ।

विनतः प्रणते भुग्ने विनता पिटिकाभिदि ।।३२१।।

सुपर्णायां, विहस्तस्तु विकले पण्डकेऽकरे ।

विश्वस्तः कृतविश्वासे विश्वस्ता विधवस्त्रियाम् ।।३२२।।

विजातो विकृते जाते विजाता तु प्रसूतिका ।

विवर्तो नर्त्तने सङ्घेऽपावृत्तौ, विकृती रुजि ।।३२३।।

डिम्बे विकारे मद्यादौ विपत्तिर्यातनापदोः ।

विच्छित्तिः स्यादङ्गरागे हारविच्छेदयोरपि ।।३२४।।

विधाता द्रुहिणे कामे विनेतादेशके नृपे ।

वृत्तान्तस्तु प्रकरणे कार्त्स्न्ये वार्ताप्रकारयोः ।।३२५।।

बृहती क्षुद्रवार्ताक्यां छन्दोवसनभेदयोः ।

महत्यां वाचि वद्र्धन्यां वेल्लितं कुटिले धुते ।।३२६।।

प्लुते, वेष्टितं लासके रुद्धे स्त्रीकरणानतरे ।

शकुन्तो विहगे भासे श्रीपतिर्विष्णुभूपयोः ।।३२७।।

शुद्धान्तः स्याद्रहःकक्षान्तरो राज्ञोऽवरोधने ।

संख्यावान् बुधमितयोः सरस्वानुदधौ नदे ।।३२८।।

संवर्तः प्रलयेऽक्षद्रौ संहतं मिलिते दृढे ।

स्खलितं छलिते भ्रेषे संस्कृतं लक्षमान्विते ।।३२९।।

भूषिते कृत्रिमे शस्ते शङ्घातो घातसङ्घयोः ।

नरके च समाप्तिः स्यादवसाने समर्थने ।।३३०।।

संहिता वर्मसंयोगे शास्त्रवेदैकदेशयोः ।

स्थपतिः सौविदेऽधीशे बृहस्पतीष्टियज्वनि ।।३३१।।

कारुके च सन्ततिस्तु तनये दुहितर्यपि ।

परम्पराभवे पङ्क्तौ गोत्रविस्तारयोरपि ।।३३२।।

सन्नतिः प्रणतिध्वन्योः सङ्गतिर्ज्ञानसङ्गयोः ।

संमतिर्वाञ्छाऽनुमत्योः समितिर्युधि सङ्गमे ।।३३३।।

साम्ये सभायां, संवित्तिः प्रतिपत्तिविवादोः ।

स्थापितं निश्चिते न्यस्ते स्तिमितौ क्लिन्ननिश्चलौ ।।३३४।।

सिकताः स्युर्वालुकायां सिकता सैकते रुजि ।

सुकृतं तु शुभे पुण्ये सुविधानेऽथ सुव्रता ।।३३५।।

सुखदोह्यसौरभ्य्यां सुव्रतोऽर्हति सद्व्रते ।

सुनीतिर्ध्रुवमाता स्यात्सुनया, सुरतं पुनः ।।३३६।।

मोहने, सुरता देवभावे च सुहितः पुनः ।

तृप्तावुक्ते सुष्ठुहिते सूनृतं प्रियसत्यवाक् ।।३३७।।

मङ्गले च हसन्ती तु मल्लिकाऽङ्गारधानिका ।

स्मिताङ्गाशाकिनाभेदे हर्मितं क्षिप्तदग्धयोः ।।३३८।।

हारीतो मुनिभेदे स्यात्कैतवे विहगान्तरे ।

हृषितं विस्मिते प्रीते प्रणते हृष्टरोमणि ।।३३९।।

इति त्रिस्वरतान्ताः ।

अश्वत्थो गर्दभाण्डे स्यात्पिप्पले संस्मृतौ जले ।

अश्वत्थेषापौर्णमास्यमतिथिः कुशनन्दने ।।३४०।।

क्रुध्यागन्ता, वव्यथस्तु व्यथाहीने च पन्नगे ।

अव्यथा तु हरीतक्यामुपस्थो योनिलिङ्गयोः ।।३४१।।

उत्सङ्गगुदयोश्चापि समीपस्थितवत्यपि ।

उन्माथो मारणे कूटयन्त्र्यातकयोरपि ।।३४२।।

उद्रथस्ताम्रचूडे स्यान्महेन्द्रमहकामुके ।

क्षवथुः कासे छिक्कायां कायस्थोऽक्षरजीवकः ।।३४३।।

परमात्मा च, कायस्था हरीतक्यामलक्यपि ।

गोग्रन्थिस्तु करीषे स्याद्गोष्ठे गोजिह्विकौषधौ ।।३४४।।

दमथो दमने दण्डे निर्ग्रन्थो भिक्षुमूर्खयोः ।

श्रमणे च निशीथस्तु रात्रिमात्राऽर्द्धरात्रयोः ।।३४५।।

प्रथमः शङ्करगणे प्रथमा तु हरीतकी ।

मन्मथः कामचिन्तायां पुष्पचापकपित्थयोः ।।३४६।।

रुदथः कुक्कुटशुनोर्वर्वथः पिककालयोः ।

वरूथं स्यात्तनुत्राणे रथगोपनवेश्मनोः ।।३४७।।

वयस्थो मध्यमवया वयस्था शाल्मलिद्रुमे ।

ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च ।।३४८।।

वमथुर्वमने कासे मातङ्गकरशीकरे ।

विदथो योगिनि प्राज्ञे शमथः सचिवे शमे ।।३४९।।

शपथः कार आक्रोशे शपने च सुतादिभिः ।

शमथुः स्यादजगरे निद्रालौ मरणेऽपि च ।।३५०।।

षड्ग्रन्थः करञ्जभेदे षड्ग्रन्था तु वचा शटी ।

समर्थः शक्तिसम्पन्ने सम्बद्धर्थे हितेऽपि च ।।३५१।।

सिद्धार्थः सर्षपे शाक्यसिंहेऽन्त्यजिनप्तरि

इति त्रिस्वरथान्ताः ।

अर्बुदः पर्वते मांसकीलके दशकोटिषु ।।३५२।।

अर्द्धेन्दुः स्यादतिप्रौढस्त्रीगुह्याङ्गुलियोजने ।

गलहस्ते नखाङ्केऽर्द्धचन्द्रेऽङ्गदस्तु वालिजे ।।३५३।।

अङ्गदं तु केयूरे स्यादङ्गदा याम्यदिग्गजी ।

आस्पदं कृत्यपदयोरामोदो गन्धहर्षयोः ।।३५४।।

आक्रन्दो दारुणरणे सारावरुदिते नृपे ।

क्षमदं तोये, क्षणदो गमके, क्षणदा निशि ।।३५५।।

कपर्दः पार्वतीभर्त्तुर्जटाजूटे वराटके ।

कर्णान्दः स्यात्कर्णपाल्युत्क्षिप्तिका, कुमुदः कषौ ।।३५६।।

दिङ्नागानागयोर्दैत्यविशेषे च सितोत्पले ।

कुमुदा कुम्भीगम्भार्योः कुसीदं वृद्धिजीवने ।।३४७।।

वृद्ध्याजीवे, कौमुदस्तु कार्तिके, कौमुदीन्दुभा ।

गोविन्दस्तु गवाध्यक्षे वासुदेवे बृहस्पतौ ।।३५८।।

गोष्पदं गोखुरे श्वभ्रे गवां च गतिगोचरे ।

जलदो मुस्तके मेघे जीवदो रिपुवैद्ययोः ।।३५९।।

ग्रन्थपर्णे, तमोभित्तु शशिमार्तण्डवन्हिषु ।

तोयदो मुस्तके मेघे तोयदं नवनीतजे ।।३६०।।

दारदो विषभेदे स्यात्पारदे हिङ्गुलेऽपि च ।

दायादौ सुतसपिण्डौ दोहदो गर्भलक्षणे ।।३६१।।

अभिलाषे तथा गर्भे धनदौ दातृगुह्यकौ ।

नलदा मांस्यां, नलदमुशीरमकरन्दयोः ।।३६२।।

नर्मदा रेवानर्माल्योर्निषादः श्वपचे स्वरे ।

निर्वादस्त्यक्तवादे च प्रमदो मुदि मत्तके ।।३६३।।

प्रमदा स्त्री प्रसादोऽनुग्रहस्वास्थ्यप्रसत्तिषु ।

काव्यगुणे, प्रह्लादस्तु निनादे दानवान्तरे ।।३६४।।

प्रतिपत्संविदि तिथौ प्रासादो राजमन्दिरे ।

देवतायतने चापि मर्यादा स्थितितसीमयोः ।।३६५।।

माकन्दः स्यात्सहकारे माकन्द्यामलकीफले ।

मुकुन्दः पारदे रत्नविशेषे गरुडध्वजे ।।३६६।।

मेनादः केकिनि च्छागे मार्जारे, वरदः पुनः ।

प्रसन्ने शान्तचिन्ते च वरदा तु कुमारिका ।।३६७।।

विशदः पाण्जुरे व्यक्ते शारदो वत्सरे नवे ।

शरद्भवे पतीमुद्रे शालीनेऽप्यथ शारदी ।।३६८।।

सप्तपर्णाम्बुपिप्पल्योः सम्भेदः सिन्धुसङ्गमे ।

पुष्पादीनां विकासेऽपि स्यात्सुनन्दा तु रोचना ।।३६९।।

जननी बाहुबलिनोऽपि -

इति त्रिस्वरदान्ताः ।

अगाधोऽस्ताघरन्ध्रयोः ।

अबधिः स्यादबधाने कालसीसबिलेष्वपि ।।३७०।।

आनद्धौ बद्धमुरजावाविद्धः क्षिप्तवक्रयोः ।

आबन्धो भूषणे प्रेम्णि बन्धेऽथोत्सेध उच्छ्रये ।।३७१।।

संहननेऽप्युपाधिस्तु धर्मध्याने विशेषणे ।

कुटुम्बव्यापृते छद्मन्युपधिर्व्याजचक्रयोः ।।३७२।।

कबन्धं सलिले रुण्डे कबन्धो राहुरक्षरोः ।

दुर्विघो दुर्जने निःस्वे न्यग्रोधो वटपादपे ।।३७३।।

शम्यां व्यामे, न्यग्रोधी तु मोहनाख्यौषधावपि ।

वृषपर्ण्यां, निषधस्तु कठिने पर्वते स्वरे ।।३७५।।

देशतद्राजयोश्चापि निरोधो नाशरोधयोः ।

प्रसिद्धो भूषिते ख्याते प्रणिधिर्याचने चरे ।।३७५।।

परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।

मागधो मगधोद्भूते शुक्लजीरकबन्दिनोः ।।३७६।।

वैश्यतः क्षत्रियापुत्रे मागधी स्यात्तु पिप्पली ।

यूथीभाषविशेषश्च विबुधः पिण्डिते सुरे ।।३७७।।

विश्रब्धोऽनुद्भटे शान्ते विश्वस्तात्यर्थयोरपि ।

विवधो वीवधो भारे पर्याहाराध्वनोरपि ।।३७८।।

सम्बाधः सङ्कटे योनौ संरोधः क्षेपरोधयोः ।

सन्नद्धो वर्मिते व्यूढे समाधिः स्यात्समर्थने ।।३७९।।

चित्तैकाग्रनियमयोर्मौने, सन्निधिरन्तिके ।

प्रत्यक्षे चाथ संसिद्धिः सम्यक्सिद्धिस्वभावयोः ।।३८०।।

इति त्रिस्वरधान्ताः ।

अयनं पथि गेहेऽर्कस्योदग्दक्षिमतो गतौ ।

अम्लानस्त्वमले झिण्टीभेदे,ऽर्जुनं तृणे सिते ।।३८१।।

नेत्ररोगे,ऽर्जुनः पार्थे हैहये ककुभद्रुमे ।

मातुरेकसुते चाऽर्जुन्यषा गौः कुट्टिनी सरित् ।।३८२।।

अङ्गनं प्राङ्कणे यानेऽप्यङ्गना तु नितम्बिनी ।

स्यादपानं गुदेऽपानस्तद्वायावञ्जनं मसौ ।।३८३।।

रसाञ्जनेऽक्तौ सौवीरेऽथाञ्जनो दिङ्मतङ्गजे ।

अञ्जना हनुमन्मातर्यञ्जनी लेप्ययोषिति ।।३८४।।

अवनं रक्षणप्रीत्योरर्यमा पितृदैवते ।

तरणौ सूर्य्यभक्तायामशनिर्वज्रविद्युतोः ।।३८५।।

अरत्निः कूर्परे पाणौ सप्रकोष्ठतताङ्गुलौ ।

आसनं विष्टरे हस्तिस्कन्धे यात्रानिवर्तने ।।३८६।।

आसनो जीवकतरावासनी पण्यवीथिका ।

आपन्नः सापदि प्राप्तेऽप्यादानं वाजिभूषणे ।।३८७।।

ग्रहणेऽथोत्थानं सैन्ये पौरुषे युधि पुस्तके ।

उद्यमोद्गमहर्षेषु वास्त्वन्तेऽङ्गनचैत्ययोः ।।३८८।।

मलोत्सर्गेऽप्यथोत्तानः सुप्तोन्मुखगभीरयोः ।

उद्यानं स्यान्निःसरणे वनभेदे प्रयोजने ।।३८९।।

उद्धानमुद्गमे चुल्यामुदानः पवनान्तरे ।

सर्पभिद्युदरावर्ते कमनोऽशोकपादपे ।।३९०।।

कामिकामाभिरूपेषु कठिनं निष्ठुरोषयोः ।

कठिनी तु खटिका स्यात्कठिना गुडशर्करा ।।३९१।।

कर्तनं योषितां तूलसेवने छेदनेऽपि च ।

क्रन्दनं रोदने ह्वेने कल्पनं क्लृप्तिकर्तने ।।३९२।।

कल्पनेभसर्ज्जनायां कलापी प्लक्षकेकिनोः ।

कञ्जुकी जाङ्गकतरौ महल्ले पन्नगे विटे ।।३९३।।

काञ्जनं हेम्नि किञ्जल्के काञ्चनो नागकेसरे ।

उदुम्बरे काञ्चनारे पुन्नागे चम्पकेऽपि च ।।३९४।।

काञ्चनी तु हरिद्रायां कानीनः कन्यकासुते ।

कर्णे व्यासे, काननं तु ब्रह्मास्ये विपिने गृहे ।।३९५।।

कुहनो मूषिके सेर्ष्ये कुहना दम्भकर्मणि ।

कुण्डली वरुणे सर्पे मयूरे कुण्डलान्विते ।।३९६।।

केतनं सदने चिन्हे कृत्ये चोपनिमन्त्रणे ।

केसर्यर्वणि पुन्नागे नागकेसरसिंहयोः ।।३९७।।

कौपीनं गुह्यदेशे स्यादकार्ये चीवरान्तरे ।

कौलीनं जनवादे हि पशुपक्षिशुनां युधि ।।३९८।।

कायगुह्ये कैलीन्ये च गहनं वनगुह्ययोः ।

गह्वरे कलिले चापि गन्धनं तु प्रकाशने ।।३९९।।

सूचनोत्साहहिसासु गर्जनं स्तनिते क्रुधि ।

गृञ्जनं विषदग्धस्य पशोर्मांसे सरोनके ।।४००।।

गोस्तनो हारभेदे स्याद्गोस्तनी हारहूरिका ।

घटना चलनावृत्योश्चलनः पादकम्प्रयोः ।।४०१।।

चलनं कम्पे, चलनी वारीभिद्वस्त्रघर्घरी ।

चन्द्नो वानरभिदि श्रीखण्डे, चन्दिनी नदी ।।४०२।।

चेतनः स्यात्सहृदयः प्राणिनोश्चेतना तु धीः ।

चोलकी तु नागरङ्गे किष्कुपर्वकरीरयोः ।।४०३।।

छर्दनोऽलम्बुषे निम्बे छर्दनं वमनेऽपि ।

छदनं पत्रगरुतोश्छेदनं कर्तने भिदि ।।४०४।।

जयनं विजये श्वादिसन्नाहे, जघनं कटौ ।

स्त्रियाः श्रोणिपुरोभागे जवनो वेगिवेगयोः ।।४०५।।

वेग्यश्वे नीवृति जवन्यपद्यामोषधीभिदि ।

जीवनस्तु पुत्रजीवे जीवनं वृत्तिवारिणोः ।।४०६।।

स्याज्जीवना तु मेदायां जीवनी तु मधुस्त्रवा ।

तलिनं विरले स्वच्छे स्तोकेऽथ तपनो रवौ ।।४०७।।

भल्लाते नरके ग्रीष्मे तलुनो यूनि मारुते ।

तमोघ्नो वह्निसूर्येन्दुबुद्धकेशवशम्भुषु ।।४०८।।

तपस्वी तापसे दीवे तरस्वी वेगिशूरयोः ।

तेमनं व्यज्जने क्लेदे तेमनी चुल्लिभिद्यपि ।।४०९।।

तोदनं व्यथने तोत्रे दहनो दुष्टचेष्टिते ।

भल्लाते चित्रकेऽग्नौ च दमनो द्वीपपुष्पयोः ।।४१०।।

दर्शनं दर्पणे धर्मोपलब्ध्योर्बुद्धिशास्त्रयोः ।

स्वप्नलोचनयोश्चापि दशनं वर्म्मदंशयोः ।।४१०।।

द्विजन्मा वौ रदे विप्रे दुर्नाम पुनरर्शसि ।

दुर्नामा दीर्घकोश्यां स्याद्देवनोऽक्षेऽथ देवनम् ।।४११।।

व्यवहारे जिगीषायां क्रडायां, धमनोऽनले ।

क्रूरे भस्त्राध्मायके च धमनी कन्धरा शिरा ।।४१२।।

हरिद्रा च धाववनं तु गतौ शौचेऽथ नन्दनम् ।

इन्द्रोद्याने, नन्दनस्तु तनये हर्षकारिणि ।।४१३।।

नलिनं नीलिकातोयाम्बुजेषु, नलिनी पुनः ।

पद्माकरे गङ्गाब्जिन्योर्निधनं कुलनाशयोः ।।४१४।।

निदानं कारणे शुद्धौ तपसः फलयाचने ।

वत्सदाम्न्यवसाने च प्रधनं युधि दारणे ।।४१५।।

प्रधानं प्रकृतौ वृद्धावुत्ताने परमात्मनि ।

महामात्रे, प्रसूनं तु प्रसूते फलपुष्पयोः ।।४१६।।

प्रज्ञानं बुद्धौ चिह्ने च स्यात् प्रसन्नं प्रसादवत् ।

प्रसन्ना तु मदिरायां पवनो वायुवल्लयोः ।।४१७।।

पवनं पुनरापाके पद्मिनी योषिदन्तरे ।

अब्जेऽब्जिन्यां सरस्यां च पावनं जलकृच्छ्रयोः ।।४१८।।

पावनः पावके सिह्लेऽध्यासे पावयितर्यपि ।

पावनी तु हरीतक्यां पाठीनो गुग्गुलुद्रुमे ।।४१९।।

पाठके मीनभेदे च प्रर्थना याचने स्मृता ।

अभियाने रोधने च षिशुनः शूचके खले ।।४२०।।

कप्यास्ये, पिशुना स्पृक्का स्यात् पिशुनं तु कुङ्कुमम् ।

पीतनं तु हरिताले पीतदारुणि कुङ्कुमे ।।४२१।।

पीतनः पुनराम्राते पूतना तु हरीतकी ।

वध्या च वासुदेवस्य पृतनाऽनीकिनी चमूः ।।४२२।।

सेना सैन्यविशेषश्च फाल्गुनो मासपार्थयोः ।

नदीजेऽर्जने वृक्षे च फाल्गुनी पूर्णिमाभिदि ।।४२३।।

भवनं सदने भावे भण्डनं कवचे युधि ।

खलीकारे, भट्टिनी तु ब्राह्मण्यां नृपयोषिति ।।४२४।।

भावना वासना ध्यानं भुवनं लोकखाम्बुषु ।

भूतात्मा द्रुहिणे देहे मदनः सिक्थके स्मरे ।।४२५।।

जले वसन्ते धत्तूरे मलिनं कृष्णदोषयोः ।

मलिनी रजस्वलायां मण्डनं तु प्रसाधने ।।४२६।।

मण्डनोऽलङ्करिष्णौ स्यान्मार्जनो लोध्रशाखिनि ।

मार्जनं शुद्धिकरणे मार्जना मुरजध्वनौ ।।४२७।।

मालिन्युमायां गङ्गायां चम्पावृत्तप्रभेदयोः ।

मालिक्यां, मिथुनो राशौ मिथुनं पुंस्त्रियोर्युगे ।।४२८।।

मुण्डनं रक्षणे क्षौरे मेहनं मूत्रशिश्नयोः ।

मैथुनं रतसङ्गत्योर्यमनं दमबन्धयोः ४२९।।

यावनं कालविक्षेपे निराशे वर्तनेऽपि च ।

योजनं तु चतुःक्रोश्यां स्याद्योगपरमात्मनोः ।।४३०।।

रसनं ध्वनिते स्वादे रसज्ञारास्नयोरपि ।

रज्जनं रजके रक्तचन्दनेऽप्यथ रञ्जनी ।।४३१।।

मञ्जिष्ठारोचनान लीगुहासु, रजनी निशि ।

लाक्षानीलीहरिद्रासु राधनं प्राप्तितोषयोः ।।४३२।।

साधने, रेचनी गुन्द्रा दन्ती रोचनिका त्रिवृत् ।

रोदनं त्वश्रुणि क्रन्दे रोचनः कूटशाल्मलौ ।।४३३।।

रोचना रक्तकह्लारे गोपित्ते वरयोषिति ।

लङ्घनं भोजनत्यागे लवने क्रमणेऽपि च ।।४३४।।

ललामवल्ललामाऽश्वे श्रृङ्गे चिह्नपताकयोः ।

रम्ये प्रधाने भूषायां पुण्ड्रे पुच्छप्रभावयोः ।।४३५।।

ललना स्त्री नाडिजिह्वा लाञ्छनं लक्ष्मसंज्ञयोः ।

लाङ्गली स्याद्बलभद्रे नालिकेरेऽथ लेखनम् ।।४३६।।

भूर्जे छेदे लिपिन्यासे व्यसनं निष्फलोद्यमे ।

दैवानिष्टफले सक्तौ स्त्रीपानमृगयादिषु ।।४३७।।

पापे विपत्तावशुभे व्यञ्जनं श्मश्रुचिह्नयोः ।

तेमनेऽवयवे कादौ वमनं छर्दनेऽर्दने ।।४३८।।

वसनं छादने वस्त्रे वर्जनं त्यागहिंसयोः ।

वद्र्धनं छेदने वृद्धौ वद्र्धनी तु गलन्तिका ।।४३९।।

वपनं मुण्डने बीजाधानेऽथ वर्तनी पथि ।

वर्तने तर्कुपिण्डे वा वनश्वाऽभिप्रतारके ।।४४०।।

शार्दूले गन्धमार्जारे वमनो दिग्गजेऽच्युते ।

खर्वेऽङ्कोठे, वाहिनी तु सेनातद्भेदसिन्धुषु ।।४४१।।

स्याद्वाणिनी तु नर्तक्यां छेकमत्तस्त्रियोरपि ।

वितानं कदके यज्ञे विस्तारे क्रतुकर्मणि ।।४४२।।

तुच्छे मन्दे वृत्तशून्ये शून्यावसथयोरपि ।

विज्ञानं कार्मणे ज्ञाने विलग्नं मध्यलग्नयोः ।।४४३।।

विक्लिन्नो जीर्णशीर्णार्द्रे विलीनौ लीनविद्रुतौ ।

विषघ्नः शिरीषतरौ विषघ्ना त्रिवृता मृता ।।४४४।।

विच्छिन्नं तु कुटिले स्यात् समालब्धविभक्तयोः ।

विमानं देवतायाने सप्तभूमिगृहेऽपि च ।।४४५।।

विधानं हस्तिकवले प्रेरमेऽभ्यर्चने धने ।

चेतनोपायविधिषु प्रकारे वैरकर्मणि ।।४४६।।

विपन्नो भूजगे नष्टे विश्वप्सा वह्निचन्द्रयोः ।

समीरणे कृतान्ते च विलाशी भोगिसर्पयोः ।।४४७।।

विषयी विषयासक्ते वैषयिकजने नृपे ।

कामे विषयिहृषीके व्युत्थानं प्रतिरोधने ।।४४८।।

विरोधाचरणे स्वैरवृत्तौ समाधि-पारणे ।

वृजिनः केशे, वृजिनं भुग्नेऽघे रक्तचर्मणि ।।४४९।।

वेष्टनं मुकुटे कर्णशष्कुल्युष्णीषयोर्वृतौ ।

वेदना ज्ञाने पीडायां शयनं स्वापशय्ययोः ।।४५०।।

रते, शमनस्तु यमे शमनं शान्तिर्हिंसयोः ।

श्वसनं श्वासे, श्वसनः पवने मदनद्रुते ।।४५१।।

शकुनं स्याद्दैवशंसिनिमित्ते, शकुनः खगे ।

शकुनिः खगे करणभेदे कौरवमातुले ।।४५२।।

शतघ्नी तु वृश्चिकाल्यां शस्त्रभेदकरञ्जयोः ।

शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु ।।४५३।।

शिखरी कोठकोयष्ट्योर्द्रुमेऽपामार्गशैलयोः ।

शिखण्डी कुक्कुटे चित्रमेखले बर्हिबर्हयोः ।।४५४।।

भीष्मारौ बाणे, श्रृङ्गारी सुवेषे क्रमुके द्विपे ।

श्लेष्मघ्नी स्यान्मल्लिकायां कम्पिल्लकफणिज्जयोः ।।४५५।।

शोभनः सुन्दरे योगे सवनं स्नानयोगयोः ।

सोमनिर्दलने चापि सदनं जलसद्मनोः ।।४५६।।

स्तननं क्रन्दने मेघगर्जितध्वनिमात्रयोः ।

स्पर्शनं हृषीके दाने स्पर्शे च स्पर्शनोऽनिले ।।४५७।।

स्यन्दनं स्रवणे तोये स्यन्द्नस्तिनिशे रथे ।

संव्यानं छादने वस्त्रे समानो देहमारुते ।।४५८।।

वर्णभित्सत्समैकेषु सन्तानोऽपत्यगोत्रयोः ।

सन्ततौ देववृक्षे च संस्थानं त्वाकृतौ मृतौ ।।४५९।।

चतुष्पथे सन्निवेशे सञ्जनं घट्टगुल्मके ।

सज्जनस्तु कुलीने स्यात्सज्जनाऽपिच कल्पना ।।४६०।।

सन्धानं तु सङ्घटनेऽभिषवे, सन्धिनी तु गौः ।

वृषाक्रान्ता कालदुग्धा स्थापनं तु निवेशने ।।४६१।।

पुंसवने समाधौ च साधनं सिद्धिसैन्ययोः ।

उपायेऽपगमे मेढे निवृत्तौ कारके वधे ।४६२।।

दीपने मृतसंस्कारे प्रमाणे गमने धने ।

सुकर्मा योगभेदे स्यात्सत्क्रिये देवशिल्पिनि ।।४६३।।

सुदामा पर्वते मेधे सुधन्वा त्वष्ट्रधन्विनोः ।

सुपर्वा पर्वणि शरे त्रिदशे वंशधूमयोः ।।४६४।।

सूचना स्यादभिनये गन्धने व्यधने दृशि ।

सेवनं सीवोपास्त्योः सेनानीः सैन्यपे गुहे ।।४६५।।

हसन्यङ्गरधान्यां स्याद्धसनं हसिते मतम् ।

हस्तिनी नायिकाभेदे मातङ्गस्य् स्त्रियामपि ।।४६६।।

हायनोऽर्चिर्व्रीहिर्वर्षं ह्वादिनी वज्रविद्युतोः ।

ह्विण्डनं क्रीडारतयोर्याने -

इति त्रिस्वरनान्ताः ।

अनूपस्तु सैरिभे ।।४६७।।

जलप्रयेऽप्यथाऽऽवापः पानभेदालवालयोः ।

प्रक्षेपे भाण्डपवनेऽप्याक्षेपः परिभर्त्सने ।।४६८।।

काव्यालङ्करणाकृष्ट्योः स्यादाकल्पः प्रसाधने ।

कल्पने वाप्युलपस्तु गुल्मिनीतृणभेदयोः ।।४६९।।

उडुपः प्लवशीतांश्वोः कलापो बर्हितूणयोः ।

संहतौ भूषणे काञ्च्यां कच्छपो मल्लबन्धने ।।४७०।।

कमठे, कच्छपी वीणाकशिपुर्भोज्यवस्त्रयोः ।

एकैकस्मिन्द्वयोश्चचापि कश्यपो मुनिमीनयोः ।।४७१।।

काश्यप्युर्व्यां, कुतपस्तु छागकम्बलदर्भयोः ।

वैश्वानरे दिनकरे द्विजन्मन्यतिथौ गवि ।।४७२।।

भागिनेयेऽष्टमांशेऽह्नो वाद्येऽथ कुटपो मुनौ ।

निष्कुटे मानभेदे च कुणपः पूतिगन्धिनि ।।४७३।।

शवे, जिह्वापस्तु शुनि व्याघ्रे द्वीपिबिडालयोः ।

प्रतापस्तेजसि स्वेदे पादपो वृक्षपीठयोः ।।४७४।।

रक्तपो रक्षो, रक्तपा जलौका, विटपः पुनः ।

पल्लवेऽपि च वृक्षेषु विस्तारे षिड्गशाखयोः ।।४७५।।

सुरूपस्तु बुधे रम्ये प्राप्तरूपाभिरूपवत् ।

इति त्रिस्वरपान्ताः ।

कदम्बः सर्षपे नीपे कदम्बं निकुरम्बके ।।४७६।।

कलम्बो नालिकाशाके पृषत्के नीपपादपे ।

कादम्बः कलहंसेष्वोः नितम्बः कटिरोधसोः ।।४७७।।

स्त्रियाः पश्चात्कटौ सानौ प्रलम्बस्तु प्रलम्बनम् ।

दैत्यस्तालाङ्कुरः शाखा प्रालम्बस्तु पयोधरे ।।४७८।।

त्रपुषे हारभेदे च भूजम्बूस्तु विकङ्कते ।

गोधूमाह्वयधान्ये च हेरम्बः शौर्यगर्विते ।।४७९।।

महिषे विघ्नराजे वा -

इति त्रिस्वरबान्ताः ।

आरम्भस्तु वधदर्पयोः ।

त्वरायामुद्यमे वाऽप्यात्मभूर्ब्रह्माणि मन्मथे ।।४८०।।

ऋषभः स्यादादिजिने वृषभे भेषजे स्वरे ।

कर्णरन्ध्रे कोलपुच्छे श्रेष्ठे चाप्युत्तरस्थितः ।।४८१।।

ऋषभी तु शूकशिम्ब्यां पुरुषाकारयोषिति ।

विधवायां शिरालायां करभो मृग उष्ट्रके ।।४८२।।

अङ्गुलेश्च कनिष्ठायां मणिबन्धस्य चान्तरे ।

ककुभो वीणाप्रसेवे रागभेदेऽर्जुनद्रुमे ।।४८३।।

कुसुम्भं तु शीतकुम्भे स्याल्लट्वायां कमण्डलौ ।

गर्दभो रासभे गन्धे गर्द्भी जन्तुरुग्भिदोः ।।४८४।।

गर्दभं कुमुदश्वेते दुर्लभः कच्छुरे प्रिये ।

दुष्प्रापे, दुन्दुभिस्तु स्याद्भेर्यां दितिसुते विषे ।।४८५।।

अक्षबिन्दुत्रिकद्वन्द्वे निकुम्भः कुम्भकर्णजे ।

दन्त्यां च वल्लभोऽध्यक्षे कुलीनाश्वे प्रियेऽपि च ।।४८३।।

वर्षाभूः पुनर्नवायां स्याद्गण्डूपदभेकयोः ।

विष्कम्भो विस्तृतौ योगविशेषप्रतिबन्धयोः ।।४८७।।

योगिनां च बन्धभेदे रूपकावयवेऽपि च ।

विस्त्रम्भः केलिकलहे विश्वासे प्रमये वधे ।।४८८।।

वृषभः स्यादादिजिने वृषपुङ्गवयोरपि ।

सनाभिर्ज्ञातिसदृशोः सुरभिर्हेम्नि चम्पके ।।४८९।।

जातीफले मातृभेदे रम्ये चेत्रवसन्तयोः ।

सुगन्धौ गवि शल्लक्याम्

इति त्रिस्वरभान्ताः ।

अधमो न्यूनगर्ह्ययोः ।।४९०।।

आगमं त्वागतौ शास्त्रे आश्रमो व्रतिनां मठे ।

ब्रह्मचर्यादिचतुष्केऽप्यत्तमा दुग्धिकौषधौ ।।४९१।।

उत्तमं तु प्रथाने स्यात् कलमः शालिचौरयोः ।

कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः ।।४९२।।

कृत्रिमं लवणभेदे कृत्रिमः कृतसिह्लयोः ।

गोधूमो भेषजे नागरङ्गव्रीहिविशेषयोः ।।४९३।।

गोलोमी वारयोषायां षड्ग्रन्थासितदूर्वयोः ।

गौतमो गणभृद्भेदे शाक्यसिंहर्षिभेदयोः ४९४।।

गौतम्युमायां रोचन्यां तलिमं तल्पखड्गयोः ।

विताने कुट्टिमे चापि दाडिमः करकैलयोः ।।४९५।।

निष्क्रमो निर्गमे बुद्धिसम्पत्तौ दुःकुलेऽपि च ।

नियमः स्यात्प्रतिज्ञायां निश्चये यन्त्रणे व्रते ।।४९६।।

निगमाः पूर्वणिग्भेदनिश्चयाध्ववणिक्पथाः ।

नैगमो नयपौरोपनिषदृतिषु वाणिजे ।।४९७।।

प्रथमः स्यात्प्रधानाद्योः प्रक्रमोऽवसरे क्रमे ।

पञ्चमः पूरणे दक्षे पञ्जानामपि पूरणे ।।४९८।।

रागभेदे, पञ्जमी तु द्रौपद्यां, परमः परे ।

अग्रेसरप्रधानयोरोङ्कारे, परमं पुनः ।।४९९।।

स्यादव्ययमनुज्ञायां प्रतिमा प्रतिरूपके ।

गजस्य दन्तबन्धे च मध्यमो मध्यजे स्वरे ।।५००।।

देहमध्ये मध्यदेशे मध्यमा कर्णिकाङ्गुलिः ।

राका रजस्वला चापि व्यायामः पौरुषे श्रमे ।।४०१।।

वियामे दुर्गसञ्चारे विलोममरघट्टके ।

विलोमी वरुणे सर्पे प्रतीपे कुक्कुरेऽपि च ।।५०२।।

वलोमी स्यादामलक्यां विक्रमः शक्तिसम्पदि ।

क्रान्तौ च विद्रुमो वृक्षे प्रवालेऽप्यथ विभ्रमः ।।५०३।।

शोभायां संशये हावे सत्तमः श्रेष्ठपूज्ययोः ।

साधिष्ठे, संभ्रमो भीतौ संवेगादरयोरपि ।।५०४।।

सुषीमः शिशिरे रम्ये सुपमं रुचिरे समे ।

सुषमा तु स्यात्परमशोभायां कालभिद्यपि ।।५०५।।

इति त्रिस्वरमान्ताः ।

अत्ययोऽतिक्रमे दोषे विनाशे दण्डकृच्छ्रयोः ।

अवध्यमवधार्हे स्यादनर्थकवचस्यपि ।।५०६।।

अवध्यमुशीराभीत्योरभाया तु हरीतकी ।

अनयोऽशुभदैदे स्याद्विपव्द्यसनयोरपि ।।५०७।।

अश्वीयमश्वसङ्घेऽश्वहितेऽधृष्यः प्रगल्भके ।

अधृष्या निम्नगाभेदेऽहल्या गौतमयोषिति ।।५०८।।

सरोभेदेऽप्यभिख्या तु शोभायां कीर्तिसंज्ञयोः ।

अहार्या हर्तुमशक्ये शैलेऽथाशय आश्रये ।।५०९।।

अभिप्रायपनसयोरादित्यस्त्रिदशार्कयोः ।

आत्रेयो मुनिरात्रेयी पुष्पवत्यां सरिद्भिदि ।।५१०।।

आतिथ्योऽतिथौ तद्योगेऽप्याम्नायः कुल आगमे ।

उपदेशे, चेन्द्रियं तु चक्षुरादिषु रेतसि ।।५११।।

उदयः पर्वतोन्नत्योरूर्णायुरविकम्बले ।

ऊर्णानाभे च मेषे चैणेयमेणीत्वगादिके ।।५१२।।

रतबन्धादिषु स्त्रीणां कषायः सुरभौ रसे ।

रागवस्तुनि निर्यासे क्रोधादिषु विलेपने ।।५१३।।

वर्णे, कालेयस्तु दैत्ये कालेयं कुङ्कुमं यकृत् ।

कुकृत्यमनुतापे स्यादयुक्तकरणेऽपि च ।।५१४।।

कुलायः पक्षिि◌णां स्थानगेहयोः क्षेत्रियास्त्रयः ।

अन्यदेहचिकित्सार्हाऽसाध्यरुक्पारदारिकाः ।।५१५।।

क्षेत्रियं क्षेत्रजतृणे गाङ्गेयं स्वर्णमुस्तयोः ।

कशेरुण्यथ गाङ्गेयो गाङ्गवत्स्कन्दभीष्मयोः ।।५१६।।

चक्षुष्यः सुभगे पुण्डरीकवृक्षे रसाञ्जने ।

केतकेऽक्षिहिते चापि चक्षुष्या तु कुलत्थिका ।।५१७।।

चाम्पेयो हेम्नि किञ्जल्के चम्पके नागकेसरे ।

जघन्यं शिश्ने गर्ह्येऽन्त्ये जययुर्गुग्गुलौ खगे ।।५१८।।

तपस्यः फाल्गुने मासे तपस्या नियमस्थितौ ।

द्वितीया तिथिगेहिन्योर्द्वितीयः पूरणे द्वयोः ।।५१९।।

नादेयी भूमिजम्ब्वां स्यान्नारङ्गे जलवेतसे ।

काङ्गुष्ठे च जपायां च निकायः सद्मसङ्घयोः ।।५२०।।

परमात्मनि लक्ष्ये च निलयोऽस्तमये गृहे ।

गोपनस्य प्रदेशेऽपि नेपथ्यं तु प्रसाधने ।।५२१।।

रङ्गभूमौ वेषभेदे प्रणयः प्रेमयाच्ञयोः ।

विस्रम्भे प्रसरे चापि प्रत्ययो ज्ञानरन्ध्रयोः ।।५२२।।

विश्वासे शपथे हेतावाचारप्रथितत्वयोः ।

अधीने निश्चये स्यादौ प्रणाय्यः कामवर्जिते ।।५२३।।

असंमते, प्रसव्यस्तु प्रतिकूलानुकूलयोः ।

प्रतीक्ष्यः प्रतिपाळ्ये स्यात्पूज्ये च प्रलयो मृतौ ।।५२४।।

संहारे नष्टचेष्टत्वे पर्यायोऽवसरे क्रमे ।

निर्माणे द्रव्यधर्मे च पर्जन्यो गर्जदम्बुदे ।।५२५।।

वासवे मेघशब्दे च पयस्यं तु पयोभवे ।

पयोहिते, पयस्या तु काकोली दुग्धकाऽपि च ।।५२६।।

प्रक्रया तूत्पादने स्यादधिकारप्रकारयोः ।

पानीयं पेयजलयोः पारुष्यस्तु बृहस्पतौ ।।५२७।।

पारुष्यं परुषभावे सङ्क्रन्दनवनेऽपि च ।

पौलस्त्यो रावणे श्रीदे भ्रातृव्यो भ्रातृजे रिपौ ।।५२८।।

भुजिष्या गणिकादास्योर्भुवन्युर्वह्निसूर्ययोः ।।५२९।।

मलयो देश आरामे शैलांशे पर्वतान्तरे ।

मलया त्रिवृत् मङ्गल्यस्त्रायमाणे मसूरके ।।५३०।।

बिल्वे, मङ्गल्यं तु दध्नि मङ्गल्या रोचना शमी ।

शतपुष्पा शुक्लवचा प्रियङ्गुः शङ्खपुष्प्यपि ।।५३१।।

अधःपुष्पी, मृगयुस्तु फेरौ ब्रह्मणि लुब्धके ।

रहस्यं गोपनीये च रहस्या सरिदन्तरे ।।५३२।।

लौहित्योऽब्धौ नदे व्रीहौ ब्रह्मण्यो ब्रह्मणो हिते ।

शनैश्चरे, व्यवायस्तु ममैथुनव्यवधानयोः ।।५३३।।

वदान्यः प्रियवाग्दानशीलयोरुभयोरपि ।

वक्तव्यो वाच्यवद्गर्ह्ये वचोर्हहीनयोरपि ।।५३४।।

वलयः कङ्कणं कम्ठरुग्, वालेयस्तु गर्दभे ।

वल्यर्थे कोमलेऽङ्गारवल्लर्यां, विजयो जये ।।५३५।।

पार्थे विमाने विजयोमातत्सख्योस्तिथावपि ।

विषयो यस्य यो ज्ञातस्तत्र गोचरदेशयोः ।।५३६।।

शब्दादौ जनपदे च विस्मयोऽद्भुतदर्पयोः ।

विनयः शिक्षाप्रमत्योर्विनया तु बलौषधौ ।।५३७।।

विशल्या लाङ्गलीदन्तीगुडूचीत्रिपुटासु च ।

शल्येन रहितायां च प्रियायां लक्ष्मणस्य च ।।५३८।।

श्वशुर्यो देवरे श्याले शाण्डिल्यः पावकान्तरे ।

बिल्वे मुनौ च शालेयं शतपुष्पह्वयौषधे ।।५३९।।

क्षेत्रे च शालिधान्यस्य शीर्षण्यं शीर्षरक्षमे ।

शीर्षण्यो विशदकचे शैलेयं शैलसम्भवे ।।५४०।।

सिन्धूत्थे, तालपर्ण्यां च शैलेयस्तु मधुव्रते ।

समयः शपथे भाषासम्पदोः कालसंविदोः ।।५४१।।

सिद्धान्ताचारसङ्केतनियमावसरेषु च ।

क्रियाकारे च निर्देशे संस्त्यायो विस्तृतौ गृहे ।।५४२।।

सन्निवेशे, संन्नयस्तु समवायानुसैत्ययोः ।

सामर्थ्ययोग्यताशक्त्योः सौकर्यं तु विना श्रमे ।।५४३।।

सूकरस्य क्रियायां च सौरभ्यं गुमगौरवे ।

सौगन्ध्ये चारुतायां च हिरण्यं पुनरक्षये ।।५४४।।

प्रधानधातौ कनके मानभेदे कपर्दके ।

द्रविणाकुप्ययोश्चापि हृच्छयो मन्मथात्मनोः ।।५४५।।

हृदयं वक्षसि स्वान्ते बुक्कायम् -

इति त्रिस्वरयान्ताः ।

अमरः सुरे ।

स्नुहीवृक्षेऽस्थिसंहारेऽप्यमरा त्वमरावती ।।५४६।।

स्थूणा दुर्वा गुडूची वाऽन्तरं रन्ध्रावकाशयोः ।

मध्ये विनार्थे तादर्थ्ये विशेषेऽवसरेऽवधौ ।।५४७।।

आत्मीयात्मपरिधानान्तर्धिबाह्येष्वथाऽवरम् ।

चरमेऽवरा तु गौरीगजजङ्घा न्त्यदेशयोः ।।५४८।।

अक्षरं स्यादपामार्गे परमब्रह्मवर्णयोः ।

गगने धर्मतपसोरध्वरे मूलकारमे ।।५४९।।

अधरोऽनूर्ध्वहीनोष्ठे अध्वरः सावधानके ।

वसुभेदे क्रतौ चाप्यथाऽम्बरं व्योमवस्त्रयोः ।।५५०।।

कार्पासे सुरभिद्रव्येऽररं छदकपटयोः ।

अङ्कुरो रोम्णि सलिले रुधिरेऽभिनवोद्गमे ।।५५१।।

अजिरं दर्दुरे कार्ये विषये प्राङ्गणेऽनिले ।

अशिरोऽर्के राक्षसेऽग्नवङ्गारोऽलातभौमयोः ।।५५२।।

अण्डीरः सक्तनरयोरसुरः सूर्यदैत्ययोः ।

असुरा रजनीराश्योरगुरुर्जोङ्गके लघौ ।।५५३।।

शिशपाया, मवीरा तु नारी पतिसुतोज्झिता ।

रजसा संयुताऽप्युक्ताहार आवरणेऽशने ।।५५४।।

आसारो वेगवद्वर्षे सुहृद्बलप्रसारयोः ।

आकार इङ्गिताकृत्योराधारो जलधारणे ।।५५५।।

आलवालेऽधिकरणेऽप्याकरो निकरे खनौ ।

इतरः पामरेऽन्यस्मिन्नित्वरः क्रूरकर्मणि ।।५५६।।

पथिके दुर्विधे नीचे स्यादित्वर्यभिसारिका ।

ईश्वरः स्वामिनि शिवे मन्मथेऽपीश्वराऽद्रिजा ।।५५७।।

उदरं तुन्दरणयोरुत्तरं प्रवरोर्ध्वयोः ।

उदीच्यप्रतिवचसोरुत्तरस्तु विराटजे ।।५५८।।

उत्तरा दिगुदीच्यां स्यात्स्नुषायामर्जुनस्य च ।

उद्धारः स्यादृणोद्धृत्योरुदारो दक्षिणो महान् ।।५५९।।

दातोर्वरा तु भूमात्रे सर्वसस्याढ्यभुव्यपि ।

ऋक्षरं वारिधारायामृक्षरः पुन ऋत्विजि ।।५६०।।

एकाग्रौ तद्गताव्यग्रावौशीरं शयनासने ।

उशीरजे चामरे च दण्डे च, कररः खगे ।।५६१।।

करीरे क्रकचे दीने कर्बुरं काञ्चने जले ।

कर्बुरो राक्षसे पापे शबले, कदरोऽङ्कुशे ।।५६२।।

विवरे च गुहायां च कर्करो मुकुरे दृढे ।

कदरः श्वेतखदिरे क्रकचक्षुद्ररोगयोः ।।५६३।।

कर्परस्तु कटाहे स्याच्छस्त्रभेदकपालयोः ।

कच्चरं कुत्सिते तक्रे कडारो दासपिङ्गयोः ।।५६४।

कञ्जारः कुञ्जरे सूर्ये जठरे द्रुहिणे मुनौ ।

करीरः कलशे संशाङ्कुरवृक्षविषयोः ।।५६५।।

कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभूजाम् ।

कटित्रं तु कटीवस्त्रे रशनाचर्मभेदयोः ।।५६६।।

कच्छुरः पुश्चले पामासहिते, कच्छुरा सटी ।

दुस्पर्शा शूकशिम्बी च कबरं लवणाम्लयोः ।।५६७।।

कबरी केशविन्यासशाकयोः, कन्धरोऽम्बुदे ।

कन्धरा तु शिरोधौ स्यात् कसेरुः पृष्ठकीकसे ।।५६८।।

तृमजातौ कन्दभेदे कमेरुस्तु गमेरुवत् ।

वेश्येभीकर्णकारेषु कटप्रूरक्षदेवने ।।५६९।।

विद्याधरेऽस्त्रपे रुद्रे कर्चूरं शटितालयोः ।

कठोरौ पूर्णकठिनौ कान्तारं दुर्गवर्त्मनि ।।५७०।।

महारण्योपसर्गाढ्योः काननेक्षुविशेषयोः ।

काश्मीरं पुष्करमूले टङ्ककुङ्कुमयोरपि ।।५७१।।

कावेरी तु हरिद्रायां वेश्यायां सरिदन्तरे ।

किर्मीरः शबले दैत्ये किशोरी हयशावके ।।५७२।।

सूर्ये यून्यथ किंशारुर्धान्यशूके शरेऽपि च ।

कुहरं गह्वरे छिद्रे कुक्कुरं ग्रन्थपर्णके ।।५७३।।

कुक्कुरः श्वा, कुबेरस्तु धनदे नन्दिपादपे ।

कूर्परौ जातुकफोणी कुमारौऽश्वानुवारके ।।५७४।।

युवराजे शिशौ स्कन्दे शुके वरुमपादपे ।

कुमारं जात्यकनके कुमारी त्वपराजिता ।।५७५।।

नदीभिद्रामतरयणी कन्यका नवलाल्युमा ।

जम्बूद्वीपविभागश्च कुठारं केवले रते ।।५७६।।

कुञ्जरोऽनेकपे कोशे कुञ्जरा धातकीद्रुमे ।

पाटलायां, कुठारुर्द्रुकीशयोः कूवरः पुनः ।।५७७।।

कुब्जे युगन्धरे रम्ये केसरो नागकेसरे ।

तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे ।।५७८।।

पुन्नागवृक्षे किञ्जल्के स्यात् केसरं तु हिङ्गुनि ।

केदारः क्षेत्रभिद्यालवाले, शङ्करशैलयोः ।।५७९।।

केनारः कुम्भिनरके शिरःकपालसन्धिषु ।

कैटिरः शक्रगोपे स्यान्कुले पाकशासने ।।५८०।।

कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके ।

खर्परं तस्करे भिक्षापात्रे धूर्त्तकपालयोः ।।५८१।।

खपुरो मुस्तके पूगेऽलसके, खपुरं घटे ।

खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोः ।।५८२।।

खण्डाभ्रमभ्रावयवे स्त्रीणां दन्तक्षताक्षरे ।

खजिरी शाके, खदिरो दन्तधावनचन्द्रयोः ।।५८३।।

खिङ्खिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके ।

खिखीरावद् बहुत्वे च गह्वरं बिलदम्भयोः ।।५८४।।

कुञ्जेऽथ गर्ग्रो मीने स्याद् गर्गरी तु मन्धनी ।

गान्धारो रागसिन्दूरस्वरेषु नीवृदन्तरे ।।५८५।।

गायत्री खदिरे छन्दविशेषे, गोपुरं पुनः ।

मुस्तके द्वारि पूर्द्वरे घर्घरस्तु नदान्तरे ।।५८६।।

चलद्वारिध्वनौ घूके चन्दिरश्चन्द्रहस्तिनोः ।

चत्वरं स्यात्पथां श्लेषे स्थण्डिलाजिरयोरपि ।।५८७।।

चङ्कुरः स्यन्दने वृक्षे चतुरो नेत्रगोचरे ।

चाटुकारे बुधे चक्रगण्डे चातुरको यथा ।।५८८।।

चमरश्चामरे दैत्ये चमरी तु मृगान्तरे ।

चिकुरोऽहौ गृहबभ्रौ केशे चञ्चलशैलयोः ।।५८९।।

पक्षिवृक्षभिदोश्चापि छिदिरोऽग्नौ परश्वधे ।

करवाले च रज्जौ च छित्वरो दैत्यधूर्त्तयोः ।।५९०।।

छित्वरं छेदने द्रव्ये जठरः कुक्षिवृद्धयोः ।

कठिने च जर्जरं तु वासवध्वजजीर्णयोः ।।५९१।।

जम्बीरः प्रस्थपुष्पाख्यशाके दन्तशठद्रुमे ।

जलेन्द्रो जम्भकेऽम्भोजौ वरुणेऽप्यथ झर्झरः ।।५९२।।

वाद्ये नदे कलियुगे झल्लरीवत्तु झर्झरी ।

वाद्यभेदे केशचक्रे टङ्कारो ज्यारवेऽद्भुते ।।५९३।।

प्रसिद्धौ चाथ टगरष्टङ्कणे केकराक्षके ।

टट्टरी त्वनृताख्याने लम्पापटहवाद्ययोः ।।५९४।।

तमिस्त्रं तिमिरे कोपे तमिस्त्रा दर्शयामिनी ।

तमस्तति, स्तिमिरं तु दृष्टिरोगान्धकारयोः ।।५९५।।

तित्तिरिः पक्षिणि मुनौ तुषारो हिमदेशयोः ।

शीकरे हिमभेदे च तुम्बुरी धन्याकं शुनी ।।५९६।।

तूवरोऽश्मश्रुपुरुषेऽप्रौढाश्रृङ्गानडुह्यपि ।

रहरो मूषिको ह्यल्पो भ्राता डिम्होऽथ दन्तुरः ।।५९७।।

उन्नतदन्ते विषमे दर्दुरो भेकमेघयोः ।

वाद्यभेदे शैलभेदे दर्दुरं ग्रामजालके ।।५९८।।

दर्दुरोमा, दर्दरः स्यादीषद्भग्ने गिरावपि ।

दण्डारो वहने मत्तवारणे शरयन्त्रके ।।५९९।।

कुम्भकारस्य यंत्रे च द्वापरं संशये युगे ।

दासेर उष्ट्रे चेटे च दुद्र्धरस्त्वृषभौषधौ ।।६००।।

दुःखधार्य्ये, धूसरस्तु रासभे स्तोकपाण्डुरे ।

नरेन्द्रो वार्त्तिके राज्ञि विषवैद्येऽथ नागरम् ।।६०१।।

शुण्ठीमुस्तकपौरेषु निर्जरस्त्वसुरे सुरे ।

निर्जरा तु तालपत्र्यां गुडुच्यां तत्त्वभिद्यपि ।।६०२।।

निर्झरोऽर्काश्वे तुषाग्नौ निकरः सारसङ्घयोः ।

न्यायदातव्यवित्ते च निर्वरं तु गतत्रपे ।।६०३।।

कठिने निर्भये सारे निकारस्तु पराभवे ।

धान्योत्क्षेपे, नीवरस्तु वास्तव्येऽपि वणिज्यपि ।।६०४।।

प्रवरं सन्ततौ गोत्रे श्रेष्ठे च प्रखरः पुनः ।

वेसरे हयसन्नाहे कुक्कुरेऽतिभृशं खरे ।।६०५।।

प्रकरः कीर्णपुष्पादौ संहतौ, प्रकरं पुनः ।

जोङ्गके, प्रकरी त्वर्थप्रकृतौ चत्वराऽवनौ ।।६०६।।

प्रस्तरः प्रस्तारे ग्राव्णि मणौ च प्रदरः शरे ।

भङ्गे रोगे, प्रसरस्तु सङ्गरे प्रणये जवे ।।६०७।।

प्रकारः सदृशे भेदे पङ्कारो जलकुब्जके ।

सोपाने शैवले सेतौ पदारः पादधूलिषु ।।६०८।।

पादालिन्दे, पवित्रं तु मेध्ये ताम्रे कुशे जले ।

अर्घोपकरणे चापि पवित्रा तु नदीभिदि ।।६०९।।

प्रान्त्रं कोटरेऽरण्ये दूरशून्यपथेऽपि च ।

पार्परो भस्मनि यमे जराटे नीपकेसरे ।।६१०।।

क्षयरोगे भक्तसिक्थे पामरो मूर्खनीचयोः ।

पाटीरो मूलके वङ्गे तितऔ वान्तिकेऽम्बुदे ।।६११।।

केदारे वेणुसारे च पाम्डुरो वर्णतद्वतोः ।

पाण्डुरं तु वरुबके पिण्डारो भिक्षुके द्रुमे ।।६१२।।

महिषीपालके क्षेपे पिठरं मथि मुस्तके ।

उखायां च पिञ्जरस्तु पीते रक्तेऽश्वभिद्यपि ।।६१३।।

पिञ्जरं शातकुम्भे स्यात् पीवरः स्थूलकूर्मयोः ।

पुष्करं द्वीपतीर्थाहिखगराजौषधान्तरे ।।६१४।।

तूर्यास्येऽसिफले काण्डे शुण्डाग्रे खे जलेऽम्बुजे ।

वठरो मूर्खशठयोः बन्धूरो रम्यनम्रयोः ।।६१५।।

बन्धुरस्तु तयोर्हंसे बन्धुजीवविडङ्गयोः ।

बन्धुरा पण्ययोषायां बर्बरी नीवृदन्तरे ।।६१६।।

बर्बरस्तु हञ्जिकायां पामरे केशचक्रले ।

पुष्पे च बर्बरा शाके वर्करः पशुनर्मणोः ।।६१७।।

वदरा स्यादेलापर्ण्यां विष्णुक्नान्तौषधावपि ।

बदरी कोलिकार्पास्योर्बादरं तु तयोः फले ।।६१८।।

बदरस्तु कार्पासास्थ्नि भङ्गुरौ बक्रनश्वरौ ।

भ्रामरं मधुदृषदोर्भास्करो वह्निसूर्ययौः ।।६१९।।

भार्योरुरन्यस्त्रीपुत्रोत्पादके मृगशैलयोः ।

भृङ्गारी तु चीरिकायां भृङ्गारः कनकालुका ।।६२०।।

मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि ।

कृपणे, मत्सरा तु स्यान्मक्षिका, मकरो निधौ ।।६२१।।

नक्रे राशिविशेषे च मन्दरो मन्थपर्वते ।

स्वर्गमन्दारयोर्मन्दे वहले, मधुरं विषम् ।।६२२।।

मधरस्तु प्रिये स्वादौ रसे च रसवत्यपि ।

मधुरा मथुरापुर्यां यष्टीमोदामधूलिषु ।।६२३।।

मधुकर्क टिकायां च मिश्रेयाशतपुष्पयोः ।

मन्दिरो मकरावासे मन्दिरं नगरे गृहे ।।६२४।।

मन्थरः सूचके कोशे वक्रे मन्दे पृथौ मथि ।

मन्थरं तु कुशुम्भ्यां स्यान्मन्दारस्त्रिदशद्रुमे ।।६२५।।

पारिभद्रेऽर्कपर्णे च मसूरो मसुरोऽपि च ।

मसुरा च मसूरा च चत्वारः पण्ययोषिति ।।६२६।।

तथा व्रीहिविशेषे च मर्मरो वसनान्तरे ।

शुष्कपत्रध्वनौ चापि मर्मरी पीतदारुणि ।।६२७।।

मयूरः केकिचूडाख्योषध्यपामार्गकेकिषु ।

महेन्द्रो वासवे शैले मज्जरी तिलकद्रुमे ।।६२८।।

वल्लर्य्यां स्थूलमुक्तायां माठरो व्यासविप्रयोः ।

शूर्यानुगेऽथ मार्जारः स्यात्खट्वा ङ्गबिडालयोः ।।६२९।।

मिहिरोऽर्केऽम्बुदे बुद्धे मुद्गरः कोरकास्त्रयोः ।

लोष्ठादिभेदने वापि मुहिरो मूर्खकामयोः ।।६३०।।

मुदिरः कामुके मेघे मुकुरो मकुरो यथा ।

कुलालदण्डे बकुले कोरकादर्शयोरपि ।।६३१।।

मुर्मुरो मन्मथे सूयतुरगे तुषपावके ।

रुधिरं घुसृणे रक्ते रुधिरो धरणीसूते ।।६३२।।

वल्लुरं कुञ्जमञ्जर्योः क्षेत्रेऽनम्भसि शाद्वले ।

वल्लूरं तु वनक्षेत्रे वाहनोषरयोरपि ।।६३३।।

शुष्कमांसे कोलमांसे वरत्रा विर्त्रिकक्षयोः ।

वशिरं किणिही सिन्धुलवणे कुम्भकेषु च ।।६३४।।

वागरो वारके शाणे निर्णये वाडवे वृके ।

मुमुक्षौ पण्डिते चापि परित्त्यक्तभयेऽपि व ।।६३५।।

वासरो रागभेदेऽह्नि वादरं कृमिजे जले ।

काकविञ्च्याश्च बीजे वाग्दक्षिणावर्तशङ्खयोः ।।६३६।।

वासुरा वासितारात्र्योर्भुवि, विष्टर आसने ।

पादपे कुशमुष्टौ च विस्तरौ स्तम्बविस्तृती ।।६३७।।

विदुरो नागरे धीरे धृतराष्ट्रानुजेऽपि च ।

विकारो विकृतौ रोगे विहारस्तु जिनालये ।।६३८।।

लीलायां भ्रमणे स्कन्धे विदारो युधि दारणे ।

विदारी रोगभेदे स्याच्छालपर्णीक्षुगन्धयोः ।।६३९।।

विधुरं स्यात्प्रविश्लेषे विकले, विधुरा पुनः ।

रसलायां, विसरस्तु समूहे प्रसरेऽपि च ।।६४०।।

शबरो म्लेच्छभेदेऽप्सु हरेऽथो शम्बरं जले ।

चित्रे बौद्धव्रते भेदे शम्बरो दानवान्तरे ।।६४१।।

मत्स्यैरागिरिभेदेषु शबरी पुनरौषधौ ।

शर्करा खण्डविकृतौ कर्परांशे रुगन्तरे ।।६४२।।

उपलायां शर्करायुग्देशे च शकलेऽपि च ।

शणीरं शोणमध्यस्थपुलिने दर्दरीतटे ।।६४३।।

शर्वरी निशि नार्यां च शक्वरी सरिदन्तरे ।

छन्दोजातौ मेखलायां शारीरं देहजे वृषे ।।६४४।।

शार्वरं धातुके ध्वान्ते शावरो रोध्रपापयोः ।

अपराधे, शाबरी तु शूकशिम्ब्यथ शाक्करम् ।।६४५।।

छन्दोभिच्छाक्वरस्तूक्षा शालारं पक्षिपञ्जरे ।

सोपानहस्तिनखयोः शिखरं पुलकाग्रयोः ।।६४६।।

पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च ।

गिरिवृक्षाग्रकक्षासु शिशिरः शीतले हिमे ।।६४७।।

ॠतुभेदे, शिलीन्ध्रस्तु तरुमीनप्रभेदयोः ।

शिलीन्ध्रं कदलीपुष्पे कवकत्रिपुटाख्ययोः ।।६४८।।

शिलीन्ध्री विहगी गण्डूपदी मृदथ शीकरः ।

वातास्तजलेऽम्बुकणे सुषिरं वाद्यगर्तयोः ।।६४९।।

सुषिरोऽग्नौ सरन्ध्रे च श्रृङ्गारो गजमण्डने ।

सुरते रसभेदे च श्रृङ्गारं नागसम्भवे ।।६५०।।

चूर्णे लवङ्गपुष्पे च संस्तरः स्त्रस्तरे मखे ।

सङ्गरोऽङ्गीकृतौ युद्धे क्रियाकारे विषापदोः ।।६५१।।

सङ्गरं तु फले शम्याः सम्भारः सम्भृतौ गणे ।

संस्कारः प्रतियत्नेऽनुभवे मानसकर्मणि ।।६५२।।

गुणभेदेऽथ सङ्कारोऽवकरेऽग्निचटत्कृतौ ।

शङ्कारी भुक्तकन्यायां सामुद्रं लवणान्तरे ।।६५३।।

लक्षणे च शरीरस्य् सावित्रस्तु महेश्वरे ।

सावित्री देवताभेदे सिन्दूरं नागसम्भवे ।।६५४।।

सिन्दूरस्तु वृक्षभेदे सिन्दूरी रक्तचेलिका ।

रोचनी धातकी सुन्दर्यङ्गनायां द्रुमान्तरे ।।६५५।।

सुनारस्तु शुनीस्तन्ये सर्पाण्डे चटकेकऽपि च ।

सैरन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम् ।।६५६।।

वर्णसङ्करसम्भूतस्त्रीमहल्लिकयोरपि ।

सैवीरं काञ्जिकस्त्रोतोञ्जनयोर्बदरीफले ।।६५७।।

इति त्रिस्वरान्ताः ।

स्यादर्गलं तु दण्डोर्मिपारिघेष्वनलोऽनिले ।

वसुदेवे वसौ वन्हावरालः समदद्विपे ।।६५८।।

वक्रे सर्जरसे चाप्यऽवेलस्तु स्याद्रुपद्रवे ।

अवेला तु पूगचूर्णेऽचलस्तु गिरिकीलयोः ।।६५९।।

वचला भूव्यज्जलिस्तु कुडवे करसम्पुटे ।

अङ्गुलिः करशाखायां कर्णिकायां गजस्य च ।।६६०।।

अमला कमलायां स्यादमलं विशदेऽभ्रके ।

आभीलं भीषणे कृच्छ्रेऽपील्वलो मत्स्यदैत्ययोः ।।६६१।।

इल्वलास्ताकारभेदेऽप्युपलो ग्रावरत्नयोः ।

उपला तु शर्करायामुत्पलं कुष्टभूरुहे ।।६६२।।

इन्दीवरे मांसशून्येऽप्युज्वलस्तु विकासिनि ।

श्रृङ्गारे विशदे दीप्तेऽप्युत्तालस्त्वरिते कपौ ।।६६३।।

श्रेष्ठोत्कटकरालेषूत्फुल्लं स्त्रीकरणान्तरे ।

विकस्वरोत्तालयोश्च कमलं क्लोम्नि भेषजे ।।६६४।।

पङ्कजे सलिले ताम्रे कमलस्तु मृगान्तरे ।

कमला श्रीवरनार्योः कपिलो वह्निपङ्गयोः ।।६६५।।

कुक्कुरे मुनिभेदे च कपिला शिंशपातरौ ।

पुण्डरीककरिण्यां च रेणुकागोविशेषयोः ।।६६६।।

कपालं कुष्ठरुग्भेदे घटादिशकले गणे ।

शिरोश्थनि, कन्दले तु नवाङ्कुरे कलध्वनौ ।।६६७।।

उपरागे मृगभेदे कपाले कदलीद्रुमे ।

करालो रौद्रतुङ्गोरुधूणतैलेषु दन्तुरे ।।६६८।।

करालं तु कुठेरे स्यात् कम्बलः कृमिसास्नयोः ।

नागप्रभेदे प्रावारवैकक्ष्ये, कम्बलं जले ।।६६९।।

कल्लोलोऽरो हर्षवीच्योः कदली हरिणान्तरे ।

रम्भायां वैजयन्त्यां च कामलः कामिरोगयोः ।।६७०।।

मरुदेशे वसन्ते च काकोलो मौष्कुलौ विषे ।

कुलाले, काहले तु स्याद् भृशे सन्त्यक्तवाचि च ।।६७१।।

शुष्के च वाद्यभेदे च काहली तरुणस्त्रियाम् ।

किट्टालस्तु लोहगूथे ताम्रस्य कलशेऽपि च ।।६७२।।

कीलालं रुधिरे नीरे कुशलं क्षेमपुण्ययोः ।

पर्याप्तौ, कुशलोऽभिज्ञे कुवलं बदरीफले ।।६७३।।

मुक्ताफलोत्पलयोश्च कुम्बिलो मीनमूषयोः ।

श्लोकच्छायाहरे श्याले कुद्दालो भूमिदारुणे ।।६७४।।

युगपत्रेऽथ कुटिलं भङ्गुरे, कुटिला नदी ।

कुण्डलं लये पाशे ताटङ्के कुण्डली पुनः ।।६७५।।

काञ्चनादौ गूडूच्यां च कुन्तलो यवकेशयोः ।

कुन्तलाः स्युर्जनपदे कुकूलं तु तुषानले ।।६७६।।

शङ्कुसंयुक्तगर्ते च कुलालो घूकपक्षियणि ।

कुक्कुभे कुम्भकारे च कुचेलः स्यात्कुवाससि ।।६७७।।

कुचेला स्याद्विद्धकर्ण्यां केवलं त्वेककृत्स्नयोः ।

निर्णीते कुहने ज्ञाने केवली ग्रन्थभिद्यपि ।।६७८।।

कोमलं मृदुले तोये कोहलो मुनिमद्ययोः ।

ग्रन्थिलो ग्रन्थिसहिते विकङ्कतकरीरयोः ।।६७९।।

गरलं पन्नगविषे तृणपूलकमानयोः ।

गन्धोली वरटाशण्ठ्योर्मद्रायामथ गोकिलः ।।६८०।।

मुसले लाङ्गले चापि गोपालो नृपगोपयोः ।

स्याद्गौरिलस्तु सिद्धार्थे लोहचूर्णेऽथ चन्द्रिलः ।।६८१।।

नापिते वस्तुके रुद्रे चञ्चलोऽनिलकामिनोः ।

चञ्चला तु तडिल्लक्ष्म्योश्चपलश्चोरके चले ।।६८२।।

क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरान्तरे ।

मीनेऽपि चपला तु स्यात्पिप्पल्यां विद्युति श्रियाम् ।।६८३।।

पुंश्चल्यामथ चात्वालो यज्ञकुण्डकगर्भयोः ।

चूडालश्चूडया युक्ते चूडालापि च वक्रला ।।६८४।।

छगलश्छागे, छगली वृद्धदारकभेषजे ।

छगलं तु नीलवस्त्रे जगलो मदनद्रुमे ।।६८५।।

मेदके कितवे पिष्टमद्येऽथ जटिलो जटी ।

जटिला तु मांसिकायां जम्बूलः क्रकचच्छदे ।।६८६।।

जम्बूद्रुमेऽथ जम्बालं कर्दमे शैवलेऽपि च ।

जङ्गलो निर्जले देशे पिशितेऽप्यथ जम्भलः ।।६८७।।

जम्बीरे देवताभेदे जाङ्गलः स्यात्कपिञ्जले ।

जाङ्गली तु शूकशिम्ब्यां जाङ्गुलं जालिनीफले ।।६८८।।

जाङ्गुली विषविद्यायां तरलो भास्वरे चले ।

हारमध्यमणौ पिङ्गे तरले मद्यमुष्णिका ।।६८९।।

तमालो वरुणे पुण्ड्रेऽसौ तापिच्छेऽथ तण्डुला ।

विडङ्गे धान्यसारे च ताम्बूलं क्रमुके फले ।।६९०।।

ताम्बूली नागवल्यां स्यात्तुमुलं रणसङ्कुले ।

तुमुलो विभीतकद्रौ तैतिलं करणान्तरे ।।६९१।।

तैतिलो गण्डकपशौ दुकूलं सूक्ष्मवाससि ।

क्षौमवस्त्रेऽथ धवलो महोक्षे सुन्दरे सिते ।।६९२।।

धवली गौर्नकुलस्तु पाण्डवप्राणिभेदयोः ।

नकुली कुक्कुटीमांस्योर्नाभीलं तूत्तमस्त्रियाः ।।६९३।।

वंक्षणे नाभिगर्भाण्डे नाकुली चव्यरास्नयोः ।

कुक्कुटीकन्दे, निचुलस्त्विज्जलद्रौ निचोलके ।।६९४।।

निस्तलं चले वृत्ते स्यान्निर्मले विमलेऽभ्रके ।

निर्माल्ये च निष्कलस्तु नष्टबीजे कलोज्झिते ।।६९५।।

नेपाली मनःशिला स्यात्सुवरा नवमाल्यपि ।

पटोलस्तु समाख्यातः फलवस्त्रविशेषयोः ।।६९६।।

प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे ।

प्रतलः पातालभेदे तलाङ्गुलिकरेऽपि च ।।६९७।।

पटलं तिलके नेत्ररोगे छदिषि सञ्चये ।

पिटके परिवारे च पञ्चाला निवृतन्तरे ।।६९८।।

पाञ्चाली पुत्रिकागीत्योः पललं पङ्कमांसयोः ।

तिलचूर्णे पललस्तु राक्षसे, पाचलोऽनले ।।६९९।।

अनिले राधनद्रव्ये पाकलो द्विरदज्वले ।

पाकलं कुष्ठभैषज्ये पातालं वडवानले ।।७००।।

रसातले, पाटलं तु कुसुमश्वेतरक्तयोः ।

पाटलः स्यादाशुव्रीहौ पाटला पाटलिद्रुमे ।।७०१।।

पांशुलो हरखट्वाङ्गे पुंश्चले, पांशुला भूवि ।

पाटली मृत्तिकापात्रे नारीवागुरयोरपि ।।७०२।।

पिप्पलं सलिले वस्त्रच्छेदभेदेऽथ पिप्पलः ।

निरंसुले वृक्षपक्षिभेदयोः, पिप्पली कणा ।।७०३।।

पिङ्गलः कपिले वन्हौ रुद्रेऽर्कपरिपार्श्वके ।

कपौ मुनौ निर्धर्भेदे पिङ्गला कुमुदस्त्रियाम् ।।७०४।।

कारायिकायां वेश्यायां नाडीवेदेऽथ पित्तलम् ।

पित्तवत्यारकूटे च पित्तला तोयपिप्पली ।।७०५।।

पिचुलो निचुले तोयवायसे कामुक्द्रुमे ।

पिञ्जले स्यात्कुशपत्रे हरिद्राभेऽथ पिच्छिलः ।।७०६।।

विजिले पिच्छिला पीतकिकायां सरिदन्तरे ।

शाल्मलौ शिंशपायां च पिण्डिलो गणनागदे ।।७०७।।

स्थूलजङ्घे, पुष्कलस्तु पूर्णे श्रेष्ठेऽथ पुद्गलः ।

काये रूपादिमद्द्रव्ये सुन्दराकार आत्मनि ।।७०८।।

पेशलः कुशले रम्ये फेनिलोऽरिष्टपादपे ।

फेनिलं पदनफले बदरे फेनवत्यपि ।।७०९।।

बहुलं भूरिवियतोर्बहुलः पावके शितौ ।

कृष्णपक्षे, बहुला तु सुरभ्यां नीलिकैलयोः ।।७१०।।

बहुलास्तु कृत्तिकासु बिडालो वृषदंशके ।

पक्षिभेदेऽक्षिगोले च मण्डलो विम्बदशयोः ।।७११।।

भुगङ्गभेदे परिधौ शुनि द्वादशराजके ।

सङ्घाते कुष्ठभेदे च मञ्जुलं तु जलाञ्जले ।।७१२।।

रम्ये कुञ्जे, मञ्जुलस्तु दात्यूहे, मङ्गलं पुनः ।

कल्याणे, मङ्गलो भौमे मङ्गला श्वेतदूर्विका ।।७१३।।

महिलाऽङ्गनायां गुण्ड्राया मातुलो मदनद्रुमे ।

धत्तूरेऽहिव्रीहिभिदोः पितुः श्यालेऽथ माचलः ।।७१४।।

ब्दिचौरे रुजि ग्राहे मुसलं स्यादयोग्रके ।

मुशली तालमूल्याखुपर्णिका गृहगोधिका ।।७१५।।

मेखलाऽद्रनितम्बे स्याद्रसनाखड्गबन्धोः ।

रसाल इक्षौ चूते च रसालं चोलसिह्लयोः ।।७१६।।

रसाला दूर्वाविदार्योर्जिह्वामार्जितयोरपि ।

रमिलो रमणे कामे लाङ्गूलं शिश्नपुच्छयोः ।।७१७।।

लाङ्गलं तालहलयोः षुष्पभिद्गृहदारुणोः ।

लाङ्गली जलपिप्पल्यां लोहलोऽस्फुटवादिनि ।।७१८।।

श्रृङ्खलाधार्ये वञ्जुलस्त्वशोके तिनिशद्रुमे ।

वीनीरे चाथ वण्टालः शूरयुन्नौखनित्रयोः ।।७१९।।

वातूलो वातले वातसमूहे मारुतासहे ।

वामिलो दाम्भिके वामे विपुलः पृथ्वगाधयोः ।।७२०।।

विपुलाऽऽर्याभिदि क्षोण्यां विमलोऽर्हति निर्मले ।

वृषलस्तुरगे शूद्रे शकलं रागवस्तुनि ।।७२१।।

वल्कले त्वचि खण्डे च शवलं मत्सरे तटे ।

पाथेये च शयालुस्तु निद्रालौ वाहसे शुनि ।।७२२।।

श्यामलः पिप्पले श्यामे शार्दूलो राक्षसान्तरे ।

व्याघ्रे च पशुभेदे च सत्तमे तूत्तरश्तितः ।।७२३।।

शाल्मलिः पादपे द्वीपे शीतलः शीतलेऽर्हति ।

श्रीखण्डे पुष्पकासीसासनपर्ण्योः शिलोद्भवे ।।७२४।।

श्रृगालो दानवे फेरौ शृगाली स्यादुपप्लवे ।

श्रृङ्खलं पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने ।।७२५।।

शौष्कलः शुष्कमांसस्यपणिके पिशिताशिनी ।

षण्डाली सरसीतैलमानयोः कामुकस्त्रियाम् ।।७२६।।

सङ्कुलोऽस्पष्टवचने व्याप्ते च सरलस्त्वृजौ ।

उदारे पूतिकाष्ठे च सप्तला नवमालिका ।।७२७।।

सातला पाटला गुञ्जा सन्धिलौकःसुरुङ्गयोः ।

नद्यां, सिध्मलः किलासी सिध्मला मत्सचूर्णके ।।७२८।।

सुतलोऽट्टालिकाबन्धे पातालभुवनान्तरे ।

सुवेलप्रणते शान्ते गिरिभेदेऽथ हमलः ।।७२९।।

कलादे सरटे ग्रावभिदि

इतित्रिस्वरलान्ताः ।

अभावः पुनर्मृतौ ।

असत्तायामथाक्षीबं वशिरे मदवर्जिते ।।७३०।।

आवहः समरे यज्ञेऽप्याश्रवो वचनस्थिते ।

प्रतिज्ञायां च क्लेशे च स्यादार्तवमृतूद्भवे ।।७३१।।

नारीरजसि पुष्पे चोद्धवः केशवमातुले ।

उत्सवे क्रतुवह्नौ चोत्सवोऽमर्षे महेऽपि च ।।७३२।।

इच्छाप्रसर उत्सेके कारवी कृष्णजीरके ।

दीप्ये मधुरात्वक्पत्र्योः कितवः कनकाह्वये ।।७३३।।

मत्ते च वञ्चके चापि केशवः केशसंयुते ।

पुन्नागे वासुदेवे च कैतवं द्यूतदम्भयोः ।।७३४।।

कैरवः कितवे शत्रौ कैरवं सितपङ्कजे ।

कैरवी तु चन्द्रिकायां गन्धर्वस्तु नभश्चरे ।।७३५।।

पुंस्कोकिले गायने च मृगभेदे तुरङ्गमे ।

अन्तराभवदेहे च गालवो मुनिलोध्रयोः ।।७३६।।

गाण्डीवगाण्डिवौ चापमात्रे पार्थधनुष्य पि ।

ताण्डवं तृणभिन्नाट्यभेदयोस्त्रिदिवं तु खे ।।७३७।।

स्वर्गे च त्रिदिवा नद्यां द्विजिह्वः खलसर्पयोः ।

निह्नवः स्यादविश्वासे प्रलोपे निकृतावपि ।।७३८।।

निष्पावः पवने सूर्पपवने निर्विकल्पके ।

वल्ले कडङ्गरे शिम्ब्यां प्रभबो जन्मकारणे ।।७३९।।

आद्योपलम्भनस्थानेऽपां मूले मुनिभिद्यपि ।

प्रसवः पुष्पफलयोरपत्ये गर्भमोचने ।।७४०।।

उत्पादे च प्रसेवस्तु वीणाङ्गस्यूतयोर्दृतौ ।

प्रभावस्तेजसि शक्तौ पल्लवः कियले वटे ।।७४१।।

विटपे विस्तरेऽलक्तरागे श्रृङ्गारषिङ्गयोः ।

पञ्चत्वं भावे पञ्चानां प्राणानामत्ययेऽपि च ।।७४२।।

पार्थिवो नृपतौ भूमिविकारे, पार्थिवी तु का ।

पुङ्गवो गवि भैषज्ये प्रधाने चोत्तरस्थितः ।।७४३।।

फेरवो राक्षसे फेरौ बान्धवो बन्धुमित्रयोः ।

भार्गवः परशुरामे सुधन्वनि मतङ्गजे ।।७४४।।

दैत्याचार्ये, भार्गवी तु कृष्णदूर्वोमयोः श्रियाम् ।

भैरवो भीषणे रुद्रे रागभेदेऽथ माधवः ।।७४५।।

विष्णो वसन्ते वेशाखे माधवी मधुशर्करा ।

वासन्ती कुट्टिनी हाला राघवोऽब्धेर्झषान्तरे ।।७४६।।

रघुजेऽप्यथ राजीवो मीनसारङ्गभेदयोः ।

राजीवमब्जे रौरवो भीषणे नरकान्तरे ।।७४७।।

बल्लवः स्यात्सूपकारे गौदोग्धरि वृकोदरे ।

वडवाऽश्वायां स्त्रीभेदे कुम्भदास्यां द्विजस्त्रियाम् ।।७४८।।

वाडवं करणे स्त्रीणां वाडवौघे रसातले ।

वाडवो विप्र और्वे च विद्रवो धीः पलायनम् ।।७४९।।

विभावः स्यात्परिचये रत्यादीनां च कारणे ।

विभवा धननिर्वृत्योः शात्रवं शत्रुसम्भवे ।।७५०।।

शत्रुत्वे, शात्रवः शत्रौ षाण्डवो रसभावयोः ।

सम्भवो जनने हेतौ मेलके चारुजन्मनि ।।७५१।।

आधेयस्याधारानतिरिक्तत्वे समयेऽपि च ।

सचिवो भृत्यकेऽमात्ये सुखवी कृष्णजीरके ।।७५२।।

कारवेल्ले च जीरे च सुग्रीवो वानराधिपे ।

चारुग्रीवे, वैन्धवस्तु सिन्धुदेशोद्भवे हये ।।७५३।।

मणिमन्थेऽपि -

इति त्रिस्वरवान्ताः ।

अथादर्शष्टीकायां प्रतिपुस्तके ।

दर्पणे, चाप्यथोड्डीशश्चण्डीशे शास्त्रभिद्यपि ।।७५४।।

उपांशुर्जपभेदे स्यादुपांशुर्विजनेऽव्ययम् ।

कर्कशो निर्दये क्रूरे कम्पिल्लककृपामयोः ।।७५५।।

इक्षौ साहसिके कासमर्दके परुषे दृढे ।

कपिशौ सिह्लकश्यावौ कपिशा माधवी सुरा ।।७५६।।

कीनाशः क्षुद्रयमयोः कर्षकोपांशुघातिनोः ।

कुलिशो मत्स्यभिद्वज्रो गिरीशो वाक्पतौ हरे ।।७५७।।

अद्रिराजेऽथ तुङ्गीशः शशाङ्गे शशिशेखरे ।

दुःस्पर्शस्तु स्वरस्पर्शे कण्टकार्यां यवासके ।।७५८।।

निस्त्रिंशो निर्घृणे खड्गे निर्देशः कथनाज्ञयोः ।

निर्वेशः स्यादुपभोगे मूर्छने वेतनेऽपि च ।।७५९।।

निवेशः सैन्यविन्यासे न्यासे द्रङ्गविवाहयोः ।

निदेशः स्यादुपकण्ठ शासने परिभाषणे ।।७६०।।

नीकाशो निश्चये तुल्ये प्रकाशः स्फुटहासयोः ।

उद्योतेऽतिप्रसिद्धे च प्रदेशो देशमात्रके ।।७६१।।

भित्तौ मानविशेषे च पलाशः किंशुकः शठी ।

हरिद्वर्णे राक्षसे च पलाशं छेदने स्मृतम् ।।७६२।।

पक्षीशो गरुडे विष्णौ पिङ्गाशं जात्यकाञ्जने ।

षिङ्गाशौ मत्स्यपल्लीशौ पिङ्गाशी नीलिका मता ।।७६३।।

बालिशस्तु शिसौ मूर्खे भूकेशः शैवले नटे ।

भूकेशी वल्वजेषु स्यात् लोमशो लोमसंयुते ।।७६४।।

मुनिभेदे च मेषे च लोमशा शाकिनीभिदि ।

महामेदाकाकजङ्घाश्रृगालीजटिलासु च ।।७६५।।

काशीशेऽतिवलाशूकशिम्बीमर्कटिकासु च ।

विवशः स्यादवश्यात्मानिष्टदुष्टमतिस्तथा ।।७६६।।

विकाशो रहसि व्यक्ते विपाशः पाशवर्जिते ।

विपाशा तु सरिद्भेदे सदेशोऽन्तिकदेशयोः ।।७६७।।

सदृशं तूचिते तुल्ये सङ्कोचे सदृशेऽन्तिके ।

संवेशः शयने पीठे सुखाशस्तु प्रचेतसि ।।७६९।।

शुभासे राजतिनिशे हताशो हताशो निष्कृपे खले ।

नष्टवाञ्छे, हुताशस्तु पावके बहुभोजिनि ।।७६९।।

इति त्रिस्वरशान्ताः ।

अध्यक्षोऽधिकृतेऽन्वक्षेऽभीषुः प्रग्ररोचिषोः ।

आरक्षो रक्षके हस्तिकुम्भाधश्तामिषं पले ।।७७०।।

सुन्दराकाररूपादौ सम्भोगे लोभलञ्चयोः ।

आकर्षः पाशके धन्वाभ्यासाङ्गे द्यूत इन्द्रिये ।।७७१।।

आतृष्टे शारिफलकेऽप्युष्णीषं लक्षणान्तरे ।

शिरोवेष्ट किरीटे स्यादुत्प्रेक्षाऽनवधानके ।।७७२।।

काव्यालङ्करणे वापि कलुषं त्वाविलांऽहसोः ।

कल्माषो राक्षसे कृष्ण शबलेऽप्यथ किल्विषम् ।।७७३।।

पापे रोगऽपराधे च कुल्माषं स्यात्तु काञ्जिके ।

कुल्माषोऽद्‌र्धस्विन्नधान्ये यावके चणकेऽपि च ।।७७४।।

गवाक्षी त्विन्द्रवारुण्या गवाक्षो जालके कपौ ।

गण्डूषो मुखपूर्त्तौ स्याद् गजहस्ताङ्‌गुलावपि ।।७७५।।

प्रसूत्या प्रमितेऽपि स्याद् गोरक्षा धेनुगोप्तरि ।

नारङ्‌गे च, जिगीषा तु विजयेच्छाप्रकर्षयोः ।।७७६।।

व्यवसायो, तरीषस्तु शोभनाकारभेलयोः ।

समुद्रे व्यवसाये च तारिषोऽब्धिसुवर्णयोः ।।७७७।।

स्वर्गे च नहुषो राजविशेषु नागभिद्यपि ।

प्रत्यूषः स्याद्वसौ प्रातः प्रदोषः कालदोषयोः ।।७७९।।

परुषं कर्बुरे रूक्षे स्यान्निष्ठुरवचस्यपि ।

पीयूषममृते नव्यसूतधेनुपयस्यपि ।।७८०।।

पुरुषस्त्वात्मनि नरे पुन्नागे चाथ पौरुषम् ।

ऊद्‌र्ध्वविस्तृतदोः पाणिपुरुषोन्मानतेजसोः ।।७८१।।

पुंसः कर्मणि भावे च महिषी नृपयोषिति ।

सैरभ्यामौषधीभेदे मारिषस्त्वार्यशाकयोः ७८२।।

मारिषा दक्षजननी मृगाक्षी मृगलोचना ।

त्रियामेन्द्रवारुणी च रक्ताक्षी रक्तलोचने ।।७८३।।

चकोरे महिषे क्रूरे पारावतेऽथ रोहिषः ।

मृगकत्तृणमत्स्येषु विश्लेषस्तु वियोजने ।।७८४।।

विधुरे च विशेषस्तु व्यक्तावयवेऽपि च ।

आधिक्ये चाथ शुश्रूषोपासनाश्रवणेद्धयोः ।।७८५।।

शैलूषः स्यान्नटे बिल्वे संहर्षः पवने मुदि ।

स्पद्र्धायां च समीक्षा तु ग्रन्थभेधे समीक्षणे ।।७८६।।

इति त्रिस्वरषान्ताः ।

अलसो द्रुमभेदे स्यात्पदरोगे क्रियाजडे ।

अलसा तु हेसपद्यां नगौकोवदगौकसः ।।७८७।।

विहङ्गसिंहसरभा आश्वासः स्यात्तु निर्वृतौ ।

आख्यायिका परिच्छेदेऽपीष्वासो धन्वधन्विनोः ।।७८८।।

उद्वासः प्राणने श्वासे गद्यबन्धान्तरेऽपि च ।

उत्तंसः शेखरे कर्णपूरे चाप्यवतंसवत् ।।७८९।।

उदर्चिरुत्प्रभे वह्नौ कनीयाननुजेऽल्पके ।

अतियूनि, कीकसस्तु कृमौ, कीकसमस्थिनि ।।७९०।।

तामसः सर्पखलयोस्तामसी स्यान्निशोमयोः ।

त्रिस्त्रोता जान्हवीसिन्धुभिदोरथ दिवौकसौ ।।७९१।।

चातकस्त्रिदशश्चापि दीर्घायुर्जीवके द्विके ।

मार्गयण्डे शाल्मलितरौ नभसस्तु नदीपतौ ।।७९२।।

गगने ॠतुभेदे च पनसः कपिरुग्भिदोः ।

कण्टके कण्टकिफले प्रचेता वरुणे मुनौ ।।७९३।।

हृष्टे, पायसः श्रीवासे पायसं परमान्नके ।

बीभत्से विकृते क्रूरे रसे पार्थे घृणात्मनि ।।७९४।।

पुक्कसी कालिकानील्योः पुक्कसः श्वपचेऽधमे ।

मानसं स्वान्तसरसोः रभसो वेगहर्षयोः ।।७९५।।

राक्षसी कोणपी दंष्ट्रा रोद इव तु रोदसी ।

दिवि भुव्युभयोश्चापि लालसो लोलयाञ्चयोः ।।७९६।।

तृष्णातिरेक औत्सुक्ये वरीयान् श्रेष्ठयोगयोः ।

अतियूनि च विस्तीर्णे वायसस्त्वगुरौ द्विके ।।७९७।।

श्रीवासे वायसी काकोदुम्बरी काकमाच्यपि ।

वाहसः स्यादजगरेऽम्बुनिर्याणनिषण्णयोः ।।७९८।।

विलासो हावे लीलायां विहायो व्योमपक्षिणोः ।

श्रीवासो वृकधूपे स्यात्कमले मधुसूदने ।।७९९।।

श्रेयसी गजपिप्पल्यामभयारास्नयोरपि ।

समासः स्यादेकपद्ये संक्षेपे च समर्थने ।।८००।।

सप्तार्चिः क्रूरनेत्रेऽग्नौ साधीयानतिशोभने ।

अतिबाढे, साहसं तु दमे दुष्करकर्मणि ।।८०१।।

अविमृश्य कृतौ धाष्ट्र्ये सारसं सरसीरुहे ।

सारसः पुष्कराख्येन्द्वोः सुमनाः प्राज्ञदेवयोः ।।८०२।।

जात्यां पुष्पे सुमेधास्तु ज्योतिष्मत्यां विदुष्यपि ।

सुरसः स्यात् सुमधुरे सुरसा त्वौषधीभिदि ।।८०३।।

इति त्रिस्वरसान्ताः ।

अत्यूहस्तु मयूरे स्यादत्यूहा नीलिकौषधौ ।

आग्रहोऽनुग्रहासक्तिग्रहेष्वाक्रमणेऽपि च ।।८०४।।

आरोहो दैर्घ्य उच्छ्राये स्त्रीकट्यां मानभिद्यपि ।

आरोहणे गजारोहेऽप्युत्साहः सूत्र उद्यमे ।।८०५।।

कलहो मण्डले खड्‌गकोशे युद्‌धवराटयोः ।

कटाहः स्यात्कूर्मपृष्टे कर्परे महिषीशिशौ ।।८०६।।

तैलादिपाकपात्रे च दात्यूहः कालकण्टके ।

वातकेऽपि नवाहस्तु प्रतिपत्तिथिघस्त्रयोः ।।८०७।।

निर्यूहो द्वारि निर्यासे शिखरे नागदन्तके ।

निरूहो निश्चिते तर्के वस्तिभेदेऽथ निग्रहः ।।८०८।।

बन्धके भर्त्सने सीम्नि प्रग्रहः किरमे भुजे ।

तुलासूत्रेऽश्वादिरश्मौ सुवर्णे हरिपादपे ।।८०९।।

बन्धे वन्द्यां, प्रवाहस्तु व्यवहाराम्बुवेगयोः ।

प्रवहो वायुभेदे स्याद्वायुमात्रे बहिर्गतौ ।।८१०।।

प्रग्राहः स्तत्तुलासूत्रे वृषादीनां च बन्धने ।

पटहो वाद्य आरम्भे वाराहो नामके किटौ ।।८११।।

मेघे मुस्तौ गिरौ विष्णौ वारही गृष्टिभेषजे ।

मातर्यपि, विदेहस्तु निर्देहे मैथिलेऽपि च ।।८१२।।

विग्रहो युधि विस्तारे प्रविभागशरीरयोः ।

वैदेही पिप्पलीसीतारोचनासु वणिक्स्त्रियाम् ।।८१३।।

सङ्ग्रहो बृहदुद्रङ्गे मुष्टिसंक्षेपयोरपि ।

सुवहस्तु सम्यग्वहे सुवहा सल्लकीद्रुमे ।।८१४।।

रास्नारोफालिकागोधापद्यैलापर्णिकासु च ।

इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे

त्रिस्वरकाण्डः समाप्तः ।

चतुर्थः काण्डः

अङ्गारकस्तूल्मुकांशे महीपुत्रे कुरुण्टके ।

अङ्गारिका त्विक्षुकाण्डे किंशुकस्य च कोरके ।।१।।

अलिपिकः पिके भृङ्गेऽलिमकः पद्मकेसरे ।

मधूके कोकिले भेकेऽश्मन्तकं मल्लिकाच्छदे ।।२।।

चुल्यां चाऽऽक्षेपको व्याधे निन्दके वातरुज्यपि ।

आकल्पकस्तमोमोहग्रन्थावुत्कलिकामुदोः ।।३।।

आखनिकस्त्वाखुरिव किरावुन्दुरुचौरयोः ।

उत्कलिक तु हेलायां तरङ्गोत्कण्ठयोरपि ।।४।।

एडमूकोऽनेडमूक इवावाकश्रुतिके शठे ।

कठिल्लकस्तु वर्षाभ्यां पर्णासे कारवेल्लके ।।५।।

कक्कोंटकोऽहौ बिल्वे च कनीनिकाऽक्षितारके ।

स्यात्कनिष्ठाङ्गुलिरपि काकरूको दिगम्बरे ।।६।।

उलूके स्त्रीजिते दम्भे भीरुके निद्र्धनेऽपि च ।

कुरुबकः शोणाम्लानेऽरुणा पीता च झिण्टिका ।।७।।

कुकवाकुस्ताम्रचूडे मयूरकृकलासयोः ।

कोशातकः कचे, कोशातकी च्योत्स्नी पटोलिका ।।८।।

घाषकेऽथ कौलेयकः सारमेयकुलीनयोः ।

कौक्कुटिको दाम्भिके स्याद्दूरेरितलोचने ।।९।।

गुमनिका तु शून्याङ्के नर्तने पाठनिश्चये ।

गोमेदकं पीतरत्ने काकोले पत्रकेऽपि च ।।१०।।

गोककण्टको गोक्षुरके गोखुरे स्थपुटीकृते ।

गोकुलिकः केकरे स्यात्पङ्कस्थगव्युपेक्षके ।।११।।

घर्घरिका भ्रष्टधान्ये किङ्किण्यां सरिदन्तरे ष

वादित्रस्य च दण्डेऽपि चाण्डालिकौषधीभिदि ।।१२।।

किन्नरायामुमायां च जर्जरीकं जरातुरे ।

बहुच्छिद्रेऽप्यथ जैवातृकः स्याद्रजनीकरे ।।१३।।

कृशायुष्मद्भेषजेषु तर्तरीकं वहित्रके ।

पारगे, त्रिवर्णकस्तु गोक्षुरेऽथ त्रिवर्णकम् ।।१४।।

त्र्यूषणं त्रफला, तिक्तशाकस्तु पथि सुन्दरे ।

वरुणे खदिरे, दन्दशूकस्तु फणिरक्षसोः ।।१५।।

दलाढकोऽरण्यतिले गैरिके नागकेसरे ।

कुन्दे महत्त्रे फेने करिकर्णशिरीषयोः ।।१६।।

वात्यायां खातके पृश्न्यां दासेरकस्तु धीवरे ।

दासीपुत्रे च करभे नियामको नियन्तरि ।।१७।।

पोतवाहे कर्मधारे निश्चारकः समीरणे ।

पुरीषस्य क्षये स्वैरे प्रचलाको भुजङ्गमे ।।१८।।

शराघाते शिखण्डे च प्रकीर्णकं तुरङ्गमे ।

चामरे विस्तरे ग्रन्थभेदे पिप्पलकं पुनः ।।१९।।

चूचुके सीवनसूत्रे पिण्डीतकः फणिज्जके ।

तगरे मदनेऽद्रौ च पुण्डरीकं सिताम्बुजे ।।२०। ।

सितच्छत्रे भेषजे च पुण्डरीकोऽग्निदिग्गजे ।

सहकारे गमधरे राजिलाहौ गजज्वरे ।।२१।।

कोषकारान्तरे व्याघ्रे पुष्कलकस्तु कीलके ।

क्षपणे गन्धहरिणे स्यात्पूर्णानकमानके ।।२२।।

पात्रे च पूर्णपात्रे च फर्फरीकं तु मार्दवे ।

फर्फरीकश्चपेटायां बलाहकोऽम्बुदे गिरौ ।।२३।।

दैत्ये नागे, बर्बरीकः केशविन्यासकर्मणि ।

शाकभेदे महाकाले वकेरुका बलाकिका ।।२४।।

वातावर्जितशाखा च भ्रमरको मधुव्रते ।

गिरिके चूर्णकेशे च भयानकः सभीषणे ।।२५।।

व्याघ्रे राहौ रसे, भट्टारको राज्ञि मुनौ सुरे ।

भार्याटिको मृगभेदे भार्यया च विनिर्जिते ।।२६।।

मरुबकः पुष्पभेदे मदनद्रौ फणिज्जके ।

मयूरकस्त्वपामार्गे मयूरकं तु तुत्थके ।।२७।।

मण्डोदकं तु चित्तस्य राग आतर्पणेऽपि च ।

माणवकः कुपुंसि स्याद्बालहारभिदोरपि ।।२८।।

मृष्टेरुकः स्यान्मिष्टाशे दानशौण्डेऽतिथिद्विषि ।

रतद्र्धिकं तु दिवसे सुखस्नानेऽष्टमङ्गले ।।२९।।

राधरङ्कुः सुनासीरे शीकरे जलदोपले ।

लालाटिकः स्यादाश्लेषभेदे कार्याक्षमेऽपि च ।।३०।।

प्रभोर्भालदर्शिनि च लेखनिकस्तु तत्र यः ।

स्वहस्तपरहस्तेन लिखितेषु विलेखयेत् ।।३१।।

लेखहारे, वर्त्तरूकः काकनीडे जलावटे ।

वराटकः पद्मबीजकोशे रज्जौ कपर्दके ।।३२।।

वरण्डकस्तु मातङ्गवेद्यां यौवनकण्टके ।

संवर्दुले कचे भित्तौ विनायके गणाधिपे ।।३३।।

बुद्धे तार्क्ष्ये गुरौ विघ्ने वितुन्नकं तु धान्यके ।

झाटामलौषधौ चापि विदूषकेऽन्यनिन्दके ।।३४।।

क्रीडानायकपात्रे च विशेषकस्तु पुण्ड्रके ।

विशेषाधायके वापि वृन्दारको मनोरमे ।।३५।।

सुरे श्रेष्ठे, बृहतिका स्यादूरुवस्त्रभेदयोः ।

वैतानिकः खड्गताले मङ्गलपाठकेऽपि च ।।३६।।

वैनाशिकः स्यात्क्षणिके परायत्तोर्मनाभयोः ।

वैदेहको वणिजके वैश्यापुत्रे च शूद्रतः ।।३७।।

शतानीको मुनौ वृद्धे शालावृको वलीमुखे ।

सारमेये श्रृङ्गाले च शिलाटकः शिलाट्टयोः ।।३८।।

श्रृङ्गाटकं पथां श्लेषे पानीयकण्टकेऽपि च ।

श्रृगालिका शिवायां स्यात्रासादपि पलायने ।।३९।।

सङ्घाटिका तु कुट्टिन्यां घ्राणे युग्मेऽम्बुकण्टके ।

सन्तानिका क्षीरसारे मर्कटस्य च जालके ।।४०।।

सुप्रतीकः स्यादीशानदीग्गजे शोभनाङ्गके ।

सैकतिकं पुनर्मातृयात्रामङ्गलसूत्रयोः ।।४१।।

सैकतिकः क्षपमके संन्यस्ते भ्रान्तिजीविनि ।

सोमवल्कः कट्फले स्याद्वलक्षखदिरद्रुमे ।।४२।।

सौगन्धिको गन्धवणिक् सौगन्धिकं तु कत्तृणे ।

गन्धोपले पद्मरागे कह्लारे -

इति चतुःस्वरकान्ताः ।

अग्निमुखो द्विजे ।।४३।।

भल्लाते चित्रके देवेऽप्यग्निशिखं तु कुङ्कुमे ।

अग्निशिखा लाङ्गलिक्यामिन्दुलेखेन्दुखण्डके ।।४४।।

गुडूचीसोमलतयोः पञ्चनखस्तु कच्छपे ।

गजे, बद्धशिखो बाले बद्धशिखोश्चटौषधौ ।।४५।।

महाशङ्खो निधिभेदे संख्याभेदे नरास्थिनि ।

व्याघ्रनखस्तु कन्दे स्याद्गन्धद्रव्यान्तरेऽपि च ।।४६।।

शिलीमुखो वृत्तभेदे वाकूचीन्द्रलेखयोः ।

शिलीमुखोऽलौ बाणे च -

इति चतुःस्वरखान्ताः ।

अपवर्गस्त्यागमोक्षयोः ।।४७।।

क्रियावसानसाफल्येऽप्यभिषङ्गः पराभवे ।

आक्रोशे शपथे चेहामृगः स्याद्रूपकान्तरे ।।४८।।

वृके जन्तौ, चोपरागौ राहुग्रस्तार्कचन्द्रयोः ।

विगाने दुर्नये राहावुपसर्ग उपद्रवे ।।४९।।

प्रादौ रोगप्रभेदे च कटभङ्गो नृपात्यये ।

हस्तच्छेदे चसस्यानां छत्रभङ्गो नृपक्षये ।।५०।।

स्वातन्त्र्ये विधवत्त्वे च दीर्घाध्वगः क्रमेलके ।

लेखहोरे, मल्लनागो वात्स्यायनसुरेभयोः ।।५१।।

समायोगस्तु संयोगे समवाये प्रयोजने ।

सम्प्रयोगो निधुवने सम्बन्धे कार्ममेऽपि च ।।५२।।

इति चतुःस्वरगान्ताः ।

जलसूचिः शिशुमारे त्रोटिमत्स्ये जलौकसि ।

कङ्कश्रृङ्गाटयोश्चापि मलिम्लुचस्तु कस्करे ।।५३।।

वाते -

इति चतुःस्वरचान्ताः ।

काश्मीरजं कुष्टे कुङ्कुमे पुष्करेऽपि च ।

काश्मीरजाऽतिविषायां क्षीराब्धिजं तु मौक्तिके ।।५४।।

वशिरे, क्षीराब्धिजस्तु चन्द्रे, क्षीराब्धिजा श्रयाम् ।

ग्रहराजः शशिन्यर्के जघन्यजोऽनुजन्मनि ।।५५।।

शूद्रे च द्विजराजस्तु शेषे तार्क्ष्य निशाकरे ।

धर्मराजस्तु सुगते श्राद्धदेवे युधिष्ठिरे ।।५६।।

भरद्वाजः पक्षिभेदे बृहस्पतिसुतेऽपि च ।

भारद्वाजो मुनौ, भारद्वाजी वनपिचुद्रुमे ।।५७।।

भृङ्गराजो मधुकरे मार्कवे विहगान्तरे ।

राजराजो नृपेशेन्द्वोः कुबेरेऽथ सकृत्प्रजः ।।५८।।

द्विके सिंहे -

इति चतुःस्वरजान्ताः ।

अथोश्चिङ्गटः कोपने मीनभिद्यपि ।

करहाटः पद्मकन्दे पुष्पद्रुमविशेषयोः ।।५९।।

कार्यपुटोऽनर्थकरे कृपमोन्मत्तयोरपि ।

कामकूटौ वेश्याविभ्रमेष्ठावथ कुटन्नटः ।।६०।।

शोणके कैवर्तीमुस्ते कुण्डकीटस्तु जारतः ।

विप्रापुत्रेऽघवे(?) दास्याश्चार्वाकोक्तिविशारदे ।।६१।।

खञ्जरीटस्तु फलकेऽसिधाराव्रतचारिणि ।

गन्धकुटी मदिरायां बुद्धाद्यायतनेऽपि च ।।६२।।

गाढमुष्टिस्तु कृपणे कृपाणप्रभृतावपि ।

चक्रवाटस्तु पर्यन्ते क्रियारोहे शिखातरौ ।।६३।।

चतुःषष्टिश्चतुःषष्टिकलासु च हवेऽपि च ।।६४।।

नारकीटः स्वदत्ताशाविहन्तर्यस्मकीटके ।

प्रतिकृष्टं पुनः प्रत्याख्याते च प्रेषितेऽपि च ।।६५।।

प्रतिसृष्टः पुनः प्रत्याख्याते च प्रेषितेऽपि च ।

परपुष्टः कलकण्ठे परपुष्टा पणाङ्गना ।।६६।।

वर्कराटस्तु तरुणादित्यरोचिःकटाक्षयोः ।

स्त्रीणां पयोधरोत्सेधकान्तदत्तनखेऽपि च ।।६७।।

शिपिविष्टस्तु खल्वाटे दुश्चर्मणि पिनाकिनि ।

श्रुतिकटः प्राञ्चलोहे प्रायश्चित्तभुजङ्गयोः ।।६८।।

इति चतुःस्वरटान्ताः ।

कलकण्ठः पिके पारावते हंसे कलध्वनौ ।

कालकण्ठनीलकण्ठौ पीतसारे महेश्वरे ।।६९।।

दात्यूहे ग्रामचटके खञ्जरीटे शिखावले ।

खालपृष्ठं तु कोदण्डमात्रके कर्णधन्वनि ।।७०।।

कालपृष्ठो मृगभेदे कङ्के, दन्तशठः पुनः ।

जम्बीरे नागारङ्गे च कर्मकारकपित्थयोः ।।७१।।

पूतिकाष्ठं तु सरले देवदारुद्रुमेऽपि च ।

सूत्रकण्ठश्च खञ्जरीटे द्विजन्मनि कपोतके ।।७२।।

हारिकण्ठो हारयुक्तकण्ठे परभृतेऽपि च ।

इति चतुःस्वरठान्ताः ।

अपोगण्डोऽतिभीरौ स्याच्छिशुके विकलाङ्गके ।।७३।।

चक्रवाडं गणे, चक्रवाडोऽद्रौ चक्रवालवत् ।

जलरुण्डः पयोरेणौ जलावर्त्ते भुजङ्गमे ।।७४।।

देवताडो घोषकेऽग्नौ राहौ, वातखुडा पुनः ।

वात्यायां पिच्छिले स्फोटे वामायां वातशोणिते ।।७५।।

इति चतुःस्वरान्ताः।

अध्यारूढश्च समारूढेऽप्यधिकेऽप्यभिधेयवत् ।

इति चतुःस्वरढान्ताः ।

अङ्गारिणी हसन्त्यां स्याद्भास्करत्यक्तदिश्यपि ।।७६।।

आथर्वणोऽथर्वविदि ब्रह्मणे च पुरोधसि ।

आरोहणं समारोहे सोपा े च प्ररोहणे ।।७७।।

आतर्पणं तु सौहित्ये विद्यादालिम्पनेऽपि च ।

उत्क्षेपणा तु व्यजने धान्यमर्दनवस्तुनि ।।७८।।

उदञ्चने चोद्धरणं स्यादुन्मूलन उन्नये ।

वान्तान्ने च कामगुणो विषयाभोगयो रतौ ।।७९।।

कार्षापणः कार्षिके स्यात् पणे षोडशकेऽपि च ।

चीर्णपर्णस्तु निम्बे स्यात् खर्जूरीभूरुहेऽपि च ।।८०।।

चूडामणिः काकचिञ्चाफले मूर्द्धमणावपि ।

जुहुवाणोऽध्वर्युवह्न्योस्तण्डुरीणस्तु बर्बरे ।।८१।।

तण्डुलाम्बुनि कीटे च तैलपर्णी तु सिह्लके ।

श्रीवासे चन्दने दाक्षायम्युमायां च भेषु च ।।८२।।

रोहिण्यां च देवमणिर्विष्णुवक्षोमणौ हरौ ।

अश्वस्य कण्ठावर्त्ते च नारायणस्चु केशवे ।।८३।।

नारायणी शतावर्युमा श्रीर्निःसरणं मृतौ ।

उपाये गेहादिमुखे निर्वाणे निर्गमेऽपि च ।।८४।।

निस्तरणं तु निस्तारे तरमोपाययोरपि ।

निरूपणं विचारे स्यादालोके च निदर्शने ।।८५।।

निगरणं भोजने स्यात् निगरणः पुनर्गले ।

प्रवारणं काभ्यदाने निषेधेऽथ परीरणः ।।८६।।

दण्डे कूर्मे पट्टशाटे पर्परीणं तचु पर्वणि ।

पर्णवृन्तरसे पर्णशिरायां द्यूतकम्बले ।।८७।।

परायणं स्यादभीष्टे तत्पराश्रययोरपि ।

परवाणिर्धर्माध्यक्षे वर्षे, पारायणं पुनः ।।८८।।

कार्त्स्न्ये पारगतौ सङ्गे पीलुपर्णौषधीभिदि ।

मूर्वायां बिम्बिकायां च पुष्करिणी जलाश्रये ।।८९।।

हस्तिन्यां कमलिन्यां च मीनाम्रीणस्तु खञ्जने ।

दर्दुराम्रे रक्तरेणुः पलाशकलिकोद्गमे ।।९०।।

सिन्दूरे, रागचूर्णस्तु खदिरे मकरध्वजे ।

रेरिहाणोऽम्बरे रुद्रे लम्बकर्णः पुनश्छगे ।।९१।।

अङ्कोटे, वारबामस्तु कूर्पासे कवचेऽपि च ।

बिदारणं भेदने स्यात्सम्परायविडम्बने ।।९२।।

वैतरणी प्रेतनद्यां जनन्याममपि रक्षसाम् ।

शरवाणिः शरमुखे पदातौ शरजीविनि ।।९३।।

शिखरिणी वृत्तभेदे रोमालीपेयभेदयोः ।

स्त्रीरत्ने मल्लिकायां च समीरमः फणिञ्जके ।।९४।।

पान्थे वायौ, संसरमं त्वसम्बाधचमूगतौ ।

संसारे समरारम्भे नगरस्योपनिर्गमे ।।९५।।

हस्तिकर्णः स्यादेरण्डे पलाशगणभेदयोः ।

इति चतुःस्वरणान्ताः ।

अवदातं तु विमलं मनोज्ञे सितपीतयोः ।।९६।।

अपवृतोऽपरायत्ते पिहिते, ऽवसितं गतौ ।

बद्धे ज्ञातेऽवसाने चाप्यऽवगीतं विगर्हिते ।।९७।।

मुहुर्दृष्टेऽपवादे वाऽत्याहितं तु महाभये ।

जीवनिरपक्षकर्मण्यभिजातः कुलोद्भवे ।।९८।।

न्याये प्राज्ञेऽभिनितस्तु न्यायेऽमर्षिणि संश्कृते ।

अभियुक्तः परिरुद्धे तत्परेऽन्तर्गतं पुनः ।।९९।।

मध्यप्राप्तविस्मृतयोरङ्गारितं तु भस्मिते ।

पलाशकलिकोद्भेदे चातिमुक्तः सुनिष्कले ।।१००।।

वासन्तिकायां तिनिशेऽप्यवध्वस्तोऽवचूर्णिते ।

त्यक्तनिद्रितयोश्चाऽधक्षिप्तौ निहितभर्त्सितौ ।।१०१।।

अपचितिर्व्यये हानौ पूजायां निष्कृतावपि ।

अनुमतिः स्यादनुज्ञापूर्णमासीविशेषयोः ।।१०२।।

अभिशस्तिः पुनर्लोकापवादे प्रार्थितेऽपि च ।

उदास्थितश्चरे द्वाःस्थेऽध्यक्षे चोपाहितः पुनः ।।१०३।।

आरोपितेऽनलोत्पातेऽप्युपाकृत उपद्रुते ।

मंत्रेण प्रोक्षतपशावुल्लिखितं तनूकृते ।।१०४।।

उत्कीर्णे, चोपरक्तस्तु स्वर्भानौ व्यसनातुरे ।

राहुग्रस्तार्कशशिनोरुपचितः समाहिते ।।१०५।।

ऋद्‌धे दिग्धेऽथोज्जृम्भितमुत्फुल्ले चेष्टितेऽपि च ।

उद्‌ग्राहितमुपन्यस्ते बद्‌धग्राहितयोरपि ।।१०६।।

उपसत्तिः सङ्‌गमात्रे प्रतिपादनसेवयोः ।

ऋष्यप्रोक्ता शूकशिम्ब्यां शतावर्यां बलाभिदि ।।१०७।।

ऐरावतोऽहौ नारङ्‌गे लकुचे त्रिदशद्विपे ।

ऐरावतं तु शक्रस्य ऋजुदीर्घशरासने ।।१०८।।

ऐरावती सरिद्विग्युद्‌भिदोः शतह्वदा यथा ।

कलधौतं रूप्यहेमनोः कलधौतः कलध्वनौ ।।१०९।।

कुहरितं तु रटिते पिकालापे रतस्वने ।

कुमुद्वती कैरविष्यां दयितायां कुशस्य च ।।११०।।

कृष्णवृन्ता माषपर्ण्यां पाटलाख्यद्रुमेऽपि च ।

गन्धवती मुरापुर्योः पृथ्वीयोजनगन्धयोः ।।१११।।

गृहपतिर्गृही सत्री चन्द्रकान्तं तु कैरवे ।

चन्द्रकान्तो रत्नभेदे चर्मण्वती नदीभिदि ।।११२।।

कदल्यां, चित्रगुप्तस्तु कृतान्ते तस्य लेखके ।

दिवाभितः काकरिपौ कुम्भिले कुमुदाकरे ।।११३।।

दिवाकीर्तिर्नापिते स्यादुलूकेऽन्तयावसायिनि ।

धूमकेतू वह्न्युत्पातौ नन्द्यावर्तो गृहान्तरे ।।११४।।

तगरेऽथ नदीकान्तो निर्गुण्डीनिचुलाब्धिषु ।

नदीकान्ता लताजम्ब्वोः काकजङ्घौषधेऽपि च ।।११५।।

नागदन्तो हस्तिदन्ते गृहान्निःसृतदारुणि ।

नागदन्ती श्रीहस्तिन्यां कुम्भख्यभेषजेऽपि च ।।११६।।

निस्तुषितं वर्जिते स्याद्गतत्वचि लघूकृते ।

निराकृतिरस्वाध्याये निराकारनिषेधयोः।।११७।।

प्रतिहतस्तु विद्विष्टे प्रतिस्खलितरुद्धयोः ।

प्रणिहितं तु सम्प्राप्तनिहितयोः समाहिते ।।११८।।

प्रतिक्षिप्तं प्रतिहते निषिद्धे प्रेषितेऽपि च ।

प्रधूमिता क्लेशितायां रविगन्तव्यदिश्यपि ।।११९।।

प्रव्रजिता तु मुण्डीर्यां तापस्यां मासिकौषधौ ।

प्ररजापतिर्ब्रह्मराज्ञोर्जामातरि दिवाकरे ।।१२०।।

वह्नौ त्वष्टरि दक्षादौ प्रतिकृतिस्तु पूजने ।

प्रतिमायां प्रतीकारे प्रतिपत्तिस्तु गौरवे ।।१२१।।

प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे, परिगतं गते ।

प्राप्तवेष्टितयोर्ज्ञाते पल्लवितं सपल्लवे ।।१२२।।

लाक्षारक्ते तते पञ्चगुप्तश्चार्वाकदर्शने ।

कमठे, परिवर्तस्तु कूर्मराजे पलायने ।।१२३।।

युगान्ते विनिमये च परिघातस्तु घातने ।

अस्त्रान्तरे, पशुपतिः पिनाकिनि हुताशने ।।१२४।।

पाशुपतः शिवमल्ल्यां पशुपत्यभिदैवते ।

पारिजातस्तु मन्दरे पारिभद्रे सुरद्रुमे ।।१२५।।

पारावतः कलरवे गिरौ मर्कटतिन्दुके ।

पारावती तु लवलीफलगोपालगीतयोः ।।१२६।।

पुष्पदन्तस्तु दिङ्नागे जिनभेदे गणान्तरे ।

पुष्पवन्दौ च चन्द्रार्कावेकोक्त्याऽथ पुरस्कृतम् ।।१२७।।

पूजिते स्वीकृते सिक्तेऽभिशस्तेऽप्रकृतेऽपि च ।

भोगवती च सर्पाणां नगरे सरिदन्तरे ।।१२८।।

रङ्गमाता जतुचे द्योर्लक्ष्मीपतिर्जनार्दने ।

पूगे लवङ्गवृक्षे च व्यतीपात उपद्रवे ।।१२९।।

योगभेदेऽपयाने च वनस्पतिर्द्रुमात्रके ।

विनापुष्पफलिद्रौ च विनिपातस्तु दैवतः ।।१३०।।

व्यसनं चावपाते च वैजयन्ती गुहे ध्वजे ।

इन्द्रालये, वैजयन्ती त्वग्निमन्थपताकयोः ।।१३१।।

जयन्त्यां च शुभ्रदन्ती पुष्पदन्तगजस्त्रियाम् ।

सुदत्यां च समाघातस्त्वाहवे घातनेऽपि च ।।१३२।।

समाहितः समाधिस्थे संश्रुतेऽथ समुद्धतः ।

अविनीते समुद्गीर्णे समुद्रान्ता दुरालभा ।।१३३।।

कर्पासिका च सृक्का च सदागतिः सदीश्वरे ।

निर्वाणे पवमाने चसरस्वती सरिद्भिदि ।।१३४।।

वाच्यापगायां स्त्रीरत्ने गोवाग्देवतयोरपि ।

सूर्यभक्तो बन्धुजीवे भास्क्रस्य च पूजके ।।१३५।।

सेनापतिर्गुहेऽध्यक्षे हिमारातिः खगेऽनले ।

हैमवत्यद्रिजा स्वर्णक्षीरी शुक्लवचाऽभाया ।।१३६।।

इति चतुःस्वरतान्ताः ।

अनीकस्थो रक्षिवर्गे युत्खले वीरमर्दले ।

चिन्हे गजशिक्षके चेतिकथा व्यर्थभाषणे ।।१३७।।

अश्रद्धेये नष्टधर्मेऽप्युदरथिर्वियन्मणौ ।

अब्धौ, चित्ररथौ विद्याधरे गन्धर्वसूर्ययोः ।।१३८।।

चतुष्पथश्चतुर्मार्गसङ्गमे ब्राह्मणेऽपि च ।

दशमीस्थोऽतिवृद्धे स्यात्क्षीणरागे मृताशने ।।१३९।।

वानप्रस्थो मधूकद्रौ किंशुकाश्रमभेदयोः ।

इति चतुःस्वरथान्ताः ।

अष्टापदश्चन्द्रमाल्यां लूतायां शरभे गिरौ ।।१४०।।

कनके शारिफलकेऽभिमर्दो मन्थयुद्धयोः ।

स्तादभिष्यन्द आश्रावनेत्ररोगातिवृद्धिषु ।।१४१।।

अपवादस्तु निर्देशे निन्दाविस्रम्भयोरपि ।

ुपनिषत्तु वेदान्ते रहस्यधर्मयोरपि ।।१४२।।

एकपदं तु तत्काले स्यादेकपदी तु वर्त्मनि ।

कटुकन्दः श्रृङ्गवेरे शोभाञ्जनरसोनयोः ।।१४३।।

कुरुविन्दः पद्मरागे मुकुरव्रीहिभेदयोः ।

कुल्माषे हिङ्गुले मुस्ते कोकनदं तु रक्तयोः ।।१४४।।

अम्भोजन्मकुमुदयोश्चतुष्पदं गवादिषु ।

स्त्रीणां करमभेदे च रक्तपादो (?) मतङ्गजे ।।१४५।।

स्यन्दने च जनपदः स्यात्पुनर्जनदेशयोः ।

परिवादस्तु निन्दायां वीणावादनवस्तुनि ।।१४६।।

प्रियंवदः प्रियवादिनभश्चरविशेषयोः ।

पीठमर्दोऽतिधृष्टे स्यान्नाट्योक्त्या नायप्रिये ।।१४७।।

पुटभेदस्तु नगरातोद्ययोस्तटिनीमुखे ।

महानादो वर्षुकाब्दे महाध्वाने शयानके ।।१४८।।

गजे च मुचुकुन्दस्तु द्रुभेदे मुनिदैत्ययोः ।

मेघनादोऽम्बुदध्वाने वरुणे रावमात्मजे ।।१४९।।

विशारदो बुधे धृष्टे विष्णुपदं नभोब्जयोः ।

विष्णुपदस्तु क्षीरोदे विष्णुपदी सुरापगा ।।१५०।।

सङ्क्रान्तिर्द्वारका चापि शतह्वदा तु विद्युति ।

वज्रेऽपि च समर्यादा मर्यादासहितेऽन्तिके ।।१५१।।

इति चतुःस्वरदान्ताः ।

अनुबन्धौऽप्रयोगे स्याच्छिशौ मुख्यानुयायिनि ।

प्रकृतस्यानुवर्ते च दोषस्यापादनेऽपि च ।।१५२।।

अनुबन्धा तृषा हिक्काऽवरोधस्तु नृपौकसि ।

शुद्धान्ते च तिरोधाने गर्तादौ राधनेऽपि च ।।१५३।।

अवष्टब्धमदूरे स्यात्समाक्रान्तेऽवलम्बिनि ।

अनिरुद्धश्चरे पुष्पायुधसूनावनर्गले ।।१५४।।

आशाबन्धः समाश्वासे मर्कटस्य च जालके ।

इष्टगन्धः सुगन्धि स्यादिष्टगन्धं तु वालुके ।।१५५।।

इक्षुगन्धा काशक्रोष्ट्रीकोकिलाक्षेषु गोक्षुरे ।

उग्रगन्धा वचाक्षेत्रयवान्योश्छिक्किकौषधौ ।।१५६।।

उपलब्धिर्मतौ प्राप्तौ कालस्कन्धस्तु तिन्दुके ।

तमाले जीवकद्रौ च तीक्ष्मगन्धा वचौषधे ।।१५७।।

शौभाञ्जने राजिकायां परिव्याधो द्रुमोत्पले ।

वेतसे, महौषधं तु विषाशुण्ठ्योः रसोनके ।।१५८।।

ब्रह्मबन्धुर्निन्द्यविप्रे ब्राह्मणस्य च बान्धवे ।

समुन्नद्धस्तूद्धूर्वबद्धे पण्डितंमन्यदृप्तयोः ।।१५९।।

इति चतुःस्वरधान्ताः ।

अपाचीनं विपर्यस्ते पामर्थेऽभिजनः कुले ।

कुलध्वजे जन्मभूम्यामभिमानस्त्वहङ्कृतौ ।।१६०।।

हिंसायां प्रणये ज्ञानेऽवलग्नो मध्यलग्नयोः ।

अवदानमतिवृत्ते खण्डने शुद्धकर्मणि ।।१६१।।

अधिष्ठानं प्रभावेऽध्यासने नगरचक्रयोः ।

अनूचानः साङ्गवेदकोविदे विनयान्विते ।।१६२।।

अन्वासनं स्नेहवस्तौ सेवायामनुशोचने ।

अग्रजन्माऽग्रजे विप्रेऽन्तेवासी पुनरन्त्यजे ।।१६३।।

शिष्यप्रान्तगयोश्चाप्यायोधनं समरे वधे ।

आराधनं पाकप्राप्त्योः साधने तोषणेऽपि च ।।१६४।।

आच्छादनं तु वासेन संपिधानेऽपवरणे ।

आकालनं परिसंख्याकांक्षयोर्बन्धनेऽपि च ।१६५।।

आतञ्जनं स्याज्जवेन प्रीणनप्रतिवापयोः ।

आवेशनं भूतावेशे प्रवेशे शिल्पवेश्मनि ।।१६६।।

आस्कन्दनं तिरस्कारे संशोषणसमीकयोः ।

आत्माधीनः सुते प्रामाधारे श्याले विदूषके ।।१६७।।

आत्मयोनिः स्मरे वेधस्युद्वर्तनं विलेपने ।

अपावृत्तावुत्पतने स्यादुपासनमासने ।।१६८।।

शुश्रूषायां शराभ्यासेऽप्युषधानं तु गेन्दुके ।

व्रते विशेषे प्रणये स्यादुत्पतनमुत्प्लुतौ ।।१६९।।

उत्पत्तावुदयनस्तु वत्सराजे घटोद्भवे ।

उत्सादनं समुल्लेखोद्वर्तनोद्वाहनेषु च ।।१७०।।

उद्वाहनं द्विसीत्ये स्यादुद्वाहनी वराटके ।

कपीतना गर्दभाण्डशिरीषाम्रातपिप्पलाः ।।१७१।।

कलध्वनिः परभृते पारावतकलापिनोः ।

कात्यायनो वररुचौ कात्यायनी तु पार्वती ।।१७२।।

काषायवस्त्रविधवाऽद्र्धवृद्धा महिलाऽपि च ।

कालचारी कलविङ्के स्वेच्छाजारिणि कामुके ।।१७३।।

कारन्धमी धातुवादनिरते कांस्यकारिणि।

किष्कुपर्वा पोटगले स्यादिक्षुत्वचिसारयोः ।।१७४।।

कुचन्दनं वृक्षभेदे पत्राङ्गे रक्तचन्दने ।

कुम्भयोनिर्द्रोणेऽगस्त्ये कृष्णवर्त्मा विधुन्तुदे ।।१७५।।

दुराचारे हुताशे च गवादनीन्द्रवारुणी ।

घासस्थानं गवादीनां गदयित्नुः शरासने ।।१७६।।

जल्पाके पुष्पचापे च घानाघनो निरन्तरे ।

वासवे घातुके मत्तगजे वर्षुकवारिदे ।।१७७।।

घोषयित्नुः पिके विप्रे चिरजीवी तु वायसे ।

अजे च चित्रभानुस्तु हुताशनदिनेशयोः ।।१७८।।

जलाटनः कङ्कखगे जलाटनी जलौकसि ।

तपोधना तु मुण्डीर्यां तपोधनस्तपस्विनि ।।१७९।।

तपस्विनी पुनर्मांसी कटुरोहिणिकापि च ।

तिक्तपर्वा हिलमोची गुडूची मधुयष्टिका ।।१८०।।

देवसेनेन्द्रकन्यायां सैन्ये दिविषदामपि ।

नागाङ्गना नागयष्टौ द्विरदस्य च मुद्गरे ।।१८१।।

निर्यातनं वैरशुद्धौ दाने न्याससमर्पणे ।

निधुवनं रते कम्पे निर्वासनं तु मारणे ।।१८२।।

पुरादेश्च बहिष्कारे निरसनं निषूदने ।

निष्ठीवने निरासे च निशमनं निशामनम् ।।१८३।।

निरीक्षणश्रवमयोर्निर्भरत्सनमलक्तके ।

खलीकारे, प्रजननं प्रगमे योनिजन्मनोः ।।१८४।।

प्रणिधानमभियोगे समाधानप्रवेशयोः ।

प्रयोजनं कार्यहेत्वोः स्यात् प्रवचनमागमे ।।१८५।।

प्रकृष्टवचने, प्रस्फोटनं शूर्पे प्रकाशने ।

ताडने, प्रतिपन्नस्तु विज्ञातेऽङ्गीकृतेऽपि च ।।१८६।।

प्रतियत्नः संस्कारे स्यादुपग्रहमलिप्स्योः ।

प्रहसनं च प्रहसाक्षेपयोः रूपकान्तरे ।।१८७।।

प्रतिमानं प्रतिबम्बे गजदन्तद्वयान्तरे ।

प्रसाधनी कङ्कतिकासिद्ध्योः प्रसाधनं पुनः ।।१८८।।

वेषे, प्रचलाकी सर्पे मयूरेऽथ पयस्विनी ।

विभावर्यां गोधेन्वां च पुण्यजनस्तु सज्जने ।।१८९।।

गुह्यके यातुधाने च पृथग्जनोऽधमे जडे ।

पृष्ठश्रृङ्गी भीमसेने षण्डसेरिभयोरपि ।।१९०।।

महाधनं महामूल्ये सिह्लके चारुवाससि ।

महासेनो महासैन्ये स्कन्देऽप्यथ महामुनिः ।।१९१।।

अगस्तिकुस्तुम्बुरुणोर्मालुधानी लताभिदि ।

मातुधानौ मातुलाहौ मातुलानी पुनः शणे ।।१९२।।

कलापे मातुलपत्न्यां रसायनो विहङ्गमे ।

पक्षीन्द्रे, रसायनं तु जराव्याधिजिदौषधे ।।१९३।।

राजादनः पियालद्रौ क्षीरिकायां त्रिपत्रके ।

रोजमानो दीप्ययाने कण्ठावर्त्ते च वाजिनः ।।१९४।।

वर्द्धमानो वीरजिने स्वस्तिकैरण्डविष्णुषु ।

प्रश्नभेदे शरावे चविरोचनेऽग्निसूर्ययोः ।।१९५।।

प्रल्हादानन्दने चन्द्रे विहेठनं विडम्बने ।

हिसायां मर्दने विस्मापना स्यात्कुहके स्मरे ।।१९६।।

गन्धर्वनगरे चापि विष्पक्सेनो जनार्दने ।

विष्वक्सेना तु फलिनी विश्राणनं विहापिते ।।१९७।।

संप्रेषणो परित्यागे विहननं तु पिञ्जने ।

वधेऽथ विश्वकर्मार्के मुनिभिद्देवशिल्पिनोः ।।१९८।।

विघ्नकारी विघातस्य कारके घोरदर्शने ।

विलेपनी स्याद्यवाग्वां चारुवेषस्त्रियामपि ।।१९९।।

वृक्षादनो मधुच्छत्रे चलपत्रकुठारयोः ।

वृक्षादनी तु वन्दायां विदारी गन्धिकौषधे ।।२००।।

वृषपर्वा तु श्रृङ्गारिहरदैत्यकसेरुषु ।

वैरोचनो रविसुते सुगते बलिदानवे ।।२०१।।

श्वेतधामा घनसारे कलानाथाब्धिफेनयोः ।

श्लेष्मघना तु केतक्यां मल्यामथ समापनम् ।।२०२।।

परिच्छेदे समाधाने समाप्तिवधयोरपि ।

संमूर्छनमभिव्याप्तौ मोहे, सनातनोऽच्युते ।।२०३।।

पितृणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे ।

सदादानो गन्धगजे हेरम्बेऽभ्रमतङ्गजे ।।२०४।।

संयमनं व्रते बन्धे संयमनी यमस्य पूः ।

समापन्नं समीचीनग्रहणे नित्यकर्मणि ।।२०५।।

समापन्नं वधे क्लिष्टे समाप्तप्राप्तयोरपि ।

संवदनं च संवादे समालोचे वशीकृतौ ।।२०६।।

समुत्थानं निदानेऽभियोगे, संवाहनं पुनः ।

वाहनेऽङ्गमर्दने च संप्रयोगी तु कामुके ।।२०७।।

कलाकेलौ सुप्रयोगे सरोजिनी सरोरुहे ।

सरोरुहिम्यां कासारे स्तनयित्नुः पयोमुचि ।।२०८।।

मृत्यौ स्तनिते रोगे च सारसनमुरश्छदे ।

काञ्च्यां च सामयोनिस्तु सामोत्थे द्रुहिणे गजे ।।२०९।।

सामिधेनी समिदृचोः सुधामुनो जनार्दने ।

प्रासादे वत्सराजेऽद्रिभेदे वाऽथ सुदर्शनम् ।।२१०।।

विष्णोश्चक्रे, सुदर्शन्यमारवत्यां, सुदर्शना ।

आज्ञायामौषधीभेदे मरुजन्ध्यां(?) पुरीभिदि ।।२११।।

सौदामिनी तडिद्भेदतडितोरप्सरोभिदि ।

हर्षहित्नुः सुते स्वर्णे -

इति चतुःस्वरनान्ताः ।

अवलेपो गर्वलेपयोः ।।२१२।।

दूषणेऽप्यपलापस्तु प्रेमापन्हवयोरपि ।

उपतापो गदे तापे जलकूप्यन्धुगर्भके ।।२१३।।

सरस्यां, जीवपुष्पं तु दमनके फणिज्जके ।

नागपुष्पस्तु पुन्नागे चम्पके नागकेसरे ।।२१४।।

परिवापो जलस्थाने पर्युप्तिपरिवारयोः ।

परिकम्पो भये कम्पे प्राप्तरूपोऽज्ञरम्ययोः ।।२१५।।

पिण्डपुष्पं जवायां स्यादशोके सरसीरुहे ।

बहुरूपः स्मरे विष्णौ सरटे धूणके शिवे ।।२१६।।

मेघपुष्पं तु नादेये पिण्डाभ्रे सलिलेऽपि च ।

विप्रलापो विरुद्धोक्तावनर्थकवचस्यपि ।।२१७।।

वृगधूयो वृक्षधूपे सिह्लकेऽथ वृषाकपिः ।

वासुदेवे शिवेऽग्नौ च हेमपुष्पं तु चम्पके ।।२१८।।

अशोकद्रौ जपापुष्पे -

इति चतुःस्वरपान्ताः ।

राजजम्बूस्तु जम्बभित् ।

पिण्डखर्जूरवृक्षश्चाऽपि -

इति चतुःस्वरबान्ताः ।

अवष्टम्भस्तु काञ्चने ।।२१९।।

सरम्भारम्भयोः स्तम्भे शातकुम्भोऽश्वमारके ।

शातकुम्भं तु कनके -

इति चतुःस्वरभान्ता ।

अभ्यागमः समरेऽन्तिके ।।२२०।।

घाते रोधेऽभ्युपगमेऽनुपमस्तु मनोरमे ।

अनुपमा सुप्रतीकस्त्रियामुपगमः पुनः ।।२२१।।

अङ्गीकारेऽन्तिकगतावुपक्रमस्तु विक्रमे ।

उपधायां तदाद्याचिख्यासाचिकित्सयोरपि ।।२२२।।

आरम्भेऽथ जलगुल्मो जलावर्तेऽम्बुचत्वरे ।

कमठे, दण्डयामस्तु दिवसे कुम्भजे यमे ।।२२३।।

प्लवङ्गमः कपौ भेके पराक्रमस्तु विक्रमे ।

सामर्थ्ये चाऽभियोगे च महापद्मः पुनर्निधौ ।।२२४।।

नागसंख्याभिदोर्यातयामो भुक्तसमुज्झिते ।

जीर्णे च सार्वभौमस्तु दिग्गजे चक्रवर्तिनि ।।२२५।।

इति चतुःस्वरमान्ताः ।

अनुशयः पश्चात्तापे दीर्घद्वेषानुबन्धयोः ।

अन्वाह्वार्यममावास्याश्रद्धमिष्टेश्च दक्षिणा ।।२२६।।

अवसायोपयुक्तान्ये (?) समाप्तौ निश्चयेऽपि च ।

अवश्यायो हिमे दर्पेऽप्यपसव्यं तु दक्षिणे ।।२२७।।

प्रतिकूलेऽन्तशय्या भूशय्या पितृवनं मृतिः ।

उपकार्या राजगेहमुपकारोचितापि च ।।२२८।।

चन्द्रोदयौ शश्युदयोल्लोचौ चन्द्रोदयौषधौ ।

जलाशयमुशीरे स्याज्जलाशयो जलाश्रये ।।२२९।।

तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययोः ।

तृणशून्यं मल्लिकायां केतकीशाखिनः फले ।।२३०।।

धनञ्जयो नागभेदे ककुभे देहमारुते ।

पार्थेऽग्नौ, निरामयस्तु स्यादिडिक्के गतामये ।।२३१।।

प्रतिभयं भये भीष्मे प्रतिश्रयः सभौकसोः ।

परिधायः परिकरे जलस्थाननितम्बयोः ।।२३२।।

पाञ्चजन्यः पोटगले शङ्खे दामोदरस्य च ।

पौरुषेयं पुरुषेण कृतेऽप्यवहिते वधे ।।२३३।

समूहे च विकारे च फलोदयो द्युलाभयोः ।

बिलेशयो मूषिकेऽहौ भागधेयः पुनः करे ।।२३४।।

दायादे, भागधेयं तु भाग्ये, महालयः पुनः ।

तीर्थे विहारपरमात्मनो,रमहोदयं पुरे ।।२३५।।

महोदयः स्वाम्यमुक्त्योर्महामूल्यं महार्घके ।

पद्मरागमणौ, मार्जालीयः शूद्रबिडालयोः ।।२३६।।

शरीरशोधने, रौहिणेयो वत्से बुधे बले ।

वैनतेयस्तु गरुडे स्याच्चण्डांशोश्च सारथौ ।।२३७।।

समुच्छ्रयो वैरोन्नत्योः समुदायो गमे रणे ।

समुदयस्तुद्गमेऽपि सम्परायस्तु संयुगे ।।२३८।।

आपद्युत्तरकाले च स्यात्समाह्वय आहवे ।

पशुभिः पक्षिभिर्द्यूते स्थूलोच्चयो वरण्डके ।।२३९।।

गजानां मध्यमगते गण्डाश्माकार्त्स्न्ययोरपि ।

हिरण्मयो लोकधातौ सौवर्णे-

इति चतुःस्वरयान्ताः ।

अभिमरो वधे ।।२४०।।

स्वबलात्साध्वसे युद्धेऽवसरो वत्सरे क्षणे ।

अरुष्करं व्रणकरे भल्लातकफलेऽपि च ।।२४१।।

अश्वतरो नागभेदे वेसरेऽनुत्तरः पुनः ।

निरुत्तरे च श्रेष्ठे चाऽवस्करो गूथगुह्ययोः ।।२४२।।

अभिहारः संनहने चौरिकोद्यमयोरपि ।

अवहारस्तु युद्धादिविश्रान्तौ ग्राहचौरयोः ।।२४३।।

निमन्त्रणोपनेतव्येऽलङ्कारः कङ्कणादिषु ।

उपमादावकूपारः कूर्मराजसमुद्रयोः ।।२४४।।

अवतारस्तु नद्यादितीर्थेऽवतरमेऽपि च ।

अग्निहोत्रोऽनले हव्येऽसिपत्रो नरकान्तरे ।।२४५।।

कोशकारेऽर्धचन्द्रस्तु गलहस्तेन्दुखण्डयोः ।

चन्द्रके बाणभेदे चाऽर्धचन्द्रा त्रिवृताभिदि ।।२४६।।

आत्मवीरो बलवति श्यालपुत्रे विदूषके ।

आडम्बरः क्षमारम्भे बृंहिते तूर्य्यनिस्वने ।।२४७।।

इन्दीवरं नीलोत्पलमिन्दीवरी शतावरि ।

उपकारस्तूपकृतौ विकीर्णकुसुमादिषु ।।२४८।।

उपचारस्तु लञ्चायां व्यवहारोपचर्ययोः ।

उदुम्बरः कुष्ठभेदे देहल्यां व्यवहारोपचर्ययोः ।।२४९।।

उदुम्बरं ताम्र, उपह्वरं रहसि सन्निधौ ।

उद्दन्तुरः कराले स्यादुत्तुङ्गोत्कटदन्तयोः ।।२५०।।

औदुम्बरो यमे रोगभेदे, कर्मकरोऽन्तके ।

भृतिजीविनि भृत्ये च कर्मकरी तु बिम्बिका ।।२५१।।

मूर्वा च कर्णिकारस्तु कृतमाले द्रुमोत्पले ।

करवीरो हयमारे कृपाणे दैत्यभिद्यपि ।।२५२।।

करवीरी पुत्रवत्यां सद्गव्यामदितावपि ।

कलिकारस्तु धूम्याटे पीतमुण्डकरञ्जयोः ।।२५३।।

कर्णपूरः स्याच्छिरीषे नीलोत्पलवतंसयोः ।

कटम्भरा प्रसारण्यां गोलायां गजयोषिति ।।२५४।।

कलम्बिकायां रोहिण्यां वर्षाभूमूर्वयोरपि ।

कालञ्जरो भैरवाद्योर्योगिचक्रस्य मेलके ।।२५५।।

कादम्बरं दधिसारे सीधुमद्यप्रभेदयोः ।

कादम्बरी कोकिलायां वाणीशरिकयारपि ।।२५६।।

कुम्भकारः कुलाले स्यात्कुम्भकारी कुलत्थिका ।

कृष्णसारः शिंशापायां मृगभेदे स्नुहीतरौ ।।२५७।।

गिरिसारः पुनर्लोहे लिङ्गे मलयपर्वते ।

घनसारस्तु कर्पूरे धक्षिणावर्तपारदे ।।२५८।।

चर्मकारः पादूकृति चर्मकार्योषधीभिदि ।

चक्रधरो विष्णुसर्पचक्रिषु ग्रामजालिनि ।।२५९।।

चराचरं जङ्गमे स्यादिङ्गविष्टपयोरपि ।

चित्राटीरो घण्टाकर्णबलिच्छागास्त्रबिन्दुभिः ।।२६०।।

अङ्कितभाले चनद्रे च तालपत्रं तु कुण्डले ।

स्यात्तालपत्री रण्डायां तुङ्गभद्रो मदोत्क्टे ।।३६१।।

तुङ्गभद्रा नदीभेदे तुलाधारस्तुलागुणे ।

वाणिजे, तुण्डिकेरी तु कार्पासी बिम्बिकाऽपि च ।।२६२।।

तोयधारो जलधरे सुनिषण्णाख्यभेषजे ।

दशपुरं पत्तने स्यान्मुस्तायां नीवृदन्तरे ।।२६३।।

दण्डधारो यमे राज्ञि दम्डयात्रा तु दिग्जये ।

संयाने वरयात्रायां दिगम्बरस्तु शङ्करे ।।२६४।।

अन्धकारे क्षपमके स्याद्वस्त्ररहितेऽपि च ।

दुरोदरः पुनर्द्यूते द्यूतकारे पणेऽपि च ।।२६५।।

देहयात्रा यमपुरीगमने भोजनेऽपि च ।

द्वैमातुरो जरासन्धे हेरम्बेऽथ धराधरः ।।२६६।।

कृष्णेऽद्रौ, धाराधरस्तु पयोदकरबालयोः ।

धाराङ्कुरः शीकरे स्यान्नासीरे जलदोपले ।।२६७।।

धार्तराष्ट्रः कौरवेऽहौ कृष्णास्याङ्घ्रिसितच्छदे ।

धुन्धुमारो गृहधूमे नृपभेदेन्द्रगोपयोः ।।२६८।।

पदालिकोऽप्यथ धूरन्धरो धूर्ये धवद्रुमे ।

धृतराष्ट्रः खगे सर्पे सुराज्ञि क्षत्रियान्तरे ।।२६९।।

धृतराष्ट्री हंसपद्यां नभश्चरः खगेऽम्बुदे ।

विद्याधरे समीरे च निशाचरस्तु राक्षसे ।।२७०।।

सर्पे घूके श्रृगाले च निशाचरी तु पांसुला ।

निषद्वरः स्मरे पङ्के निषद्वरी पुनर्निशि ।।२७१।।

नीलाम्बरो बलभद्रे राक्षसे क्रूरलोचने ।

प्रतीहारो द्वारि द्वास्थे प्रतिकारः समे भटे ।।२७२।।

प्रतिसरश्चमूपृष्ठे नियोज्यकरसूत्रयोः ।

मन्त्रभेदे व्रणशुद्धावारक्षे मण्डने स्रजि ।।२७३।।

कङ्कमेऽथ परिकरः पर्यङ्कपरिवारयोः ।

प्रगाढगात्रिकाबन्धे विवेकारम्भयोर्गणे ।।२७४।।

परिवारः परिजनेऽसिकोशेऽथ परम्परः ।

मृगभेदे प्रपौत्रादौ परम्पराऽन्वये वधे ।।२७५।।

परिपाट्यां, परिसरः प्रान्तभूदेवयोर्मृतौ ।

पक्षचरो यूथभ्रष्टपृथक्चरिगजे विधौ ।।२७६।।

पयोधरः कुचे मेघे कोशकारे कशेरुणि ।

नालिकेरे, पात्रटीरस्त्वपव्यापारमन्त्रिणि ।।२७७।।

लोहकांस्ये जरत्पात्रे पिङ्गाणकहुताशयोः ।

पारावारः पयोराशौ पारावारं तटद्वये ।।२७८।।

पारिभद्रस्तु मन्दारे निम्बे, पीताम्बरोऽच्युते ।

नटे च पूर्णपात्रं तु गोमेदकमणौ स्मृतः ।।२७९।।

मलयजे, पूर्णपात्रं जलादिपूर्णभाजने ।

वर्धापके, बलभद्रस्त्वनन्ते बलशालिनि ।।२८०।।

बलभद्रा कुमार्यां स्यात्त्रायमाणौषधावपि ।

ब्रह्मपुत्रो नदभिदि क्षेत्रसङ्गरयोरपि ।।२८१।।

वार्वटीरस्त्रपुम्याम्रास्थ्न्यङ्कुरे गणिकासुते ।

वारकीरो भारग्राहिण्याराधिततुरङ्गमे ।।२८२।।

यूकायां वेणिवेधिन्यां भूत्रयीमुखयोरपि ।

बिन्दुतन्त्रं पुनः शारिफलके च तुरङ्गके ।।२८३।।

महावीरोऽन्तिमजिने परपुष्टे जराटके ।

ताक्ष्र्ये कर्के पवौ शूरे सिंहे मखहुताशने ।।२८४।।

महामात्रः प्रधाने स्यादारोहकसमृद्धयोः ।

मणिच्छिद्रा तु मेदायामृषभाख्यौषधावपि ।।२८५।।

रथकारस्तक्षिमि स्यान्महिष्यात्करणीसुते ।

रागसूत्रं पट्टसूत्रे तुलासूत्रेऽपि च क्वचित् ।।२८६।।

लम्बोदरः स्यादुद्धमाने प्रमथानां च नायके ।

लक्ष्मीपुत्रो हये कामे व्यवहारः स्थितौ पणे ।।२८७।।

द्रुभेदेऽथ व्यतिकरो व्यसनव्यतिषङ्गयोः ।

वक्रनक्रौ खलशुकौ विश्वम्भरोऽच्युतेन्द्रयोः ।।२८८।।

विश्वम्भरा तु मेदिन्यां विभाकरोऽग्निसूर्ययोः ।

विश्वकद्रुस्तु मृगयाकुक्कुरे पिशुने ध्वनौ ।।२८९।।

वीरभद्रो वीरणेऽश्वमेधाश्वे वीरसत्तमे ।

वीरतरो वीरश्रेष्ठे शरे, वीरतरं पुनः ।।२९०।।

वीरणे, वीतिहोत्रस्तु दिवाकरहुताशयोः ।

शतपत्रो दार्वाघाटे राजकीरमयूरयोः ।।२९१।।

शतपत्रं तु राजीवे सम्प्रहारो गतौ रणे ।

सहचरः पुनर्झिण्ट्यां वयस्ये प्रतिबन्धके ।।२९२।।

समाहारस्तु संक्षेप एकत्रकरणेऽपि च ।

समुद्रारुर्ग्राहभेदे सेतुबन्धे तिमिङ्गिले ।।२९३।।

सालसारस्तरौ हिङ्गौ सुकुमारस्तु कोमले ।

पुण्ड्रेक्षौ, सूत्रधारस्तु शिल्पिभेदे नटेन्द्रयोः ।।२९४।।

स्थिरद्रंष्ट्रो भुजङ्गे च वराहाकृतिशार्ङ्गिणि ।

इति चतुःस्वररान्ताः ।

अतिबलः स्यात्प्रबलेऽतिबला तु बलाभिदि ।।२९५।।

अक्षमाला त्वक्षसूत्रे वसिष्ठस्य च योषिति ।

अङ्गपाली परीरम्भे स्यात्कोट्यामुपमातरि ।।२९६।।

उलूखलं गुग्गुलुद्रौ सन्धिभेदे च कण्डने ।

उलूखली दन्तच्छिद्रमेकाष्ठीलोऽम्बुकौषधे ।।२९७।।

एकाष्ठीला तु पाठायां भवेत् कलकलः पुनः ।

कोलाहले सर्जरसे कन्दरालो जटिद्रमे ।।२९८।।

गर्दभाम्डेऽप्यथ कमण्डलू पर्कटिकुण्डिके ।

कूतूहलं शस्तेऽद्भूते खतमालो बलाहके ।।२९९।।

धूमेऽथ गण्डशैलोऽद्रिच्युतस्थूलाश्मभालयोः ।

गन्धफली प्रियङ्गौ स्यात् चम्पकस्य च कोरके ।।३००।।

जलाञ्चलं तु शैवाले स्वतश्च जलनिर्गमे ।

चक्रवालेऽद्रिभेदे स्याच्चक्रवालं तु मण्डले ।।३०१।।

दलामलं दमनके तथा मरुबकेऽपि च ।

ध्वनिलाला तु बल्लक्यां वेणुकाहलयोरपि ।।३०२।।

परिमलो विमर्दोत्थहृद्यगन्धे विमर्दने ।

पुष्पफलः पुनग्राम्यकर्कट्यां च कपित्थके ।।३०३।।

पोटगलो नले काशे झषे, बहुफलः पुनः ।

नीपे, बहुफला फल्गौ भस्मतूलं पुनर्हिमे ।।३०४।।

ग्रामकूटे पांशुवर्षे भद्रकाल्योषधीभिदि ।

गन्धोल्यां हरपत्न्यां च महाकालो महेश्वे ।।३०५।।

किम्पाके गणभेदे च मदकलो मदद्विपे ।

मदेनाऽव्यक्तवचने महानीलो मणेर्भिदि ।।३०६।।

नागभेदे भृङ्गराजे महाबलो बलीयसि ।

वायौ, महाबलं सीसे महाबला बलाभिदि ।।३०७।।

मणिमाला स्त्रिया हारे दशनक्षतभिद्यपि ।

मुक्ताफलं घनसारे मौक्तिके लवलीफले ।।३०८।।

मृत्युफला महाकाले मृत्युफली कदल्यपि ।

यवफलो मांसिकायां कुटजत्वचिसारयोः ।।३०९।।

रजस्वला पुष्पवत्यां रजस्वलस्तु सैरिभे ।

वायुफलं तु जलदोपले शक्रशरासने ।।३१०।।

वातकेलिः कलालापे षिड्गानां दन्तलेखने ।

विचकिलो दमनके मल्यामथ बृहन्नलः ।।३११।।

महापोटगले पार्थे सदाफल उदुम्बरे ।

नालिकेरे स्कन्धफले सौवर्चलं सुवर्चिके ।।३१२।।

शूलरुङ्नाशके चाथ हस्तिमल्लः सुरद्विपे ।

विग्नेशे, हलाहलस्तु हयलालोरगे विषे ।।३१३।।

जेष्ट्यां च हरिताली तु दूर्वागगनरेखयोः ।

कृपाणलतिकायां च हरितालं तु तालके ।।३१४।।

इति चतुःस्वरलान्ताः ।

अनुभावः प्रभावे स्यान्निश्चये भावसूचने ।

अपह्नवः पुनः स्नेहेऽपलापे चौरकर्मणि ।।३१५।।

अभिषवः क्रतौ मद्यसन्धानस्नानयोरपि ।

अदीनवः पुनर्दोषे परिक्लिष्टदुरन्तयोः ।।३१६।।

उपप्लवौ राहूत्पातौ कुशीलवस्तु चारणे ।

प्राचेतसे याचके च जलबिल्वस्तु कर्कटे ।।३१७।।

जलचत्वरे पञ्चाङ्गे जीवञ्जीवः खगान्तरे ।

द्रुमभेदे चकोरे च धामार्गवस्तु घोषके ।।३१८।।

अपामार्गेऽप्यथपरिप्लवावाकुलचञ्चलौ ।

पराभवस्तिरस्कारे नाशे, पराशवोऽपसि ।।३१९।।

शूद्रायां विप्रतनये तनये च परस्त्रियाः ।

पुटग्रीवस्तु गर्गर्यां ताम्रस्य कलशेऽपि च ।।३२०।।

बलदेवस्तु कालिन्दीकर्षणे मातरिश्वनि ।

बलदेवा त्रायमाणा रोहिताश्वो हुताशने ।।३२१।।

हरिश्चन्द्रनृपसुते सहदेवस्तु पाण्डवे ।

सहदेवा बलादण्डोत्पलयोः शारिवौषधे ।।३२२।।

सहदेवी तु सर्पाक्ष्याम् -

इति चतुःस्वरवान्ताः ।

अपदेशस्तु कारणे ।

व्याजे लक्ष्येऽप्यपभ्रंशो भाषाभेदाऽपशब्दयोः ।।३२३।।

पतने चाश्रयाशस्तु वह्नावाश्रयनाशके ।

उपदंशो विदंशे स्यान्मेढरोगेऽपि कीर्तितः ।।३२४।।

उपस्पर्शस्त्वाचमनस्नानयोः स्पर्शमात्रके ।

खण्डपर्शुः शिवे राहौ भार्गवे चूर्णलेपिनि ।।३२५।।

खण्डामलकभैषज्ये जीवितेशः प्रिये यमे ।

जीवितस्वामिजीवात्वोर्नागपाशस्तु योषिताम् ।।३२६।।

करणे वरुणास्त्रे च पारिवेशस्तु बेष्टने ।

भानोः सविधबिम्बे च प्रतिष्कशः पुरोगमे ।। ३२७ ।।

वार्ताहरे सहाये च पञ्चदशी तु पूर्णिमा ।

दर्शश्र्च पादपाशी तु खाट्टिकायामुदाह्यता ।। ३२८ ।।

भृङ्खलाकटके वापि पुरोडाशो हविर्भिदि ।

हुतशेषे सोमरसे चमस्यां पिष्टकश्य च ।। ३२९ ।।

इति चतुःस्वरशालन्ताः ।

अम्बरीषो नृपे सूर्य युधि भ्राष्टकिशोरयोः ।

आम्राते खण्डपरशावनुकर्षोऽनुकर्षणे ।। ३३० ।।

रथस्याधोदारुणि चाऽनिमिषः सुरमत्स्ययोः ।

अनुतर्षोऽअभिलाषे स्यात्तृष्णाचषकयोरपि ।। ३३१ ।।

अलम्बुषश्छर्दनेऽलम्बुषा स्वःपण्ययोरपि ।

गण्डीर्यां, किम्पुरुषस्तु किंनरे लोकभिद्यपि ।।३३२।।

देववृक्षो मन्दारादौ गुग्गुलौ विषमच्छदे ।

निन्दिघोषो वन्दिघोषे स्यन्दने च किरीटिनः ।।३३३।।

पारिवेषः परिवृत्तौ परिधौ परिवेषणे ।

पारिवेषः स्यादवाच्ये निनादे जलदध्वनौ ।।३३४।।

पलङ्कषो यातुधाने पलङ्गषा तु किंशुके ।

गोक्षुरे गुग्गुलौ लाक्षारास्नामुण्डीरिकासु च ।।३३५।।

भूतवृक्षस्तु शाखोटे स्योनाककलिवृक्षयोः ।

महाघोषो महाशब्दे स्यान्महाघोषमापणे ।।३३६।।

पहाघोषा श्रृङ्ग्योषध्यां राजवृक्षः पियालके ।

सुवर्णालुतरौ, वातरुषः शक्रशरासने ।।३३७।।

वातूलोत्कोचयोश्चापि विशालाक्षो महेश्वरे ।

ताक्ष्र्य विशालनेत्रे च वीरवृक्षोऽर्जुनद्रुमे ।।३३८।।

भल्लाते, सकटाक्षस्तु कटाक्षिणि धवद्रुमे ।

इति चतुःस्वरषान्ताः ।

अधिवासः स्यान्निवासे संस्कारे धूपनादिभिः ।।३३९।।

अवध्वंसस्तु निन्दायां पारित्यागेऽवचूर्णने ।

कलहंसो राजहंसे कादम्बे नृपसत्तमे ।।३४०।।

कुम्भीनसस्त्वहौ, कुम्भीनसी लवममातरि ।

घनरसोऽप्सु कर्पूरे सान्द्रे सिद्धरसे द्रवे ।।३४१।।

मोरटे पीलुपर्ण्यां च चन्द्रहासोऽसिमात्रके ।

दशग्रीवकृपाणे च तामरसं तु पङ्कजे ।।३४२।।

ताम्राकाञ्जनयोर्दिव्यचक्षुस्त्वन्धे सुलोचने ।

सुगन्धभेदे च निःश्रेयसं कल्याणमोक्षयोः ।।३४३।।

नीलञ्जसा नदीभेदेऽप्सरोभेदे तडित्यपि ।

पुनर्वसुः स्यान्नक्षत्रे कात्यायनमुनावपि ।।३४४।।

पौर्णमासो यागभेदे पौर्णमासी तु पूर्णिमा ।

मलीमसं पुनः पुष्पकासीसे मलिनायसोः ।।३४५।।

महारसः पुनरिक्षौ खर्जूरद्रौ कशेरुणि ।

मधरसा तु मूर्वायां द्राक्षादुग्धिकयोरपि ।।३४६।।

यमस्वसा तु कालिन्द्यां कपर्दिनः स्त्रियामपि ।

राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे ।।३४७।।

रासेरसो रससिद्धिवलौ श्रृङ्गारहासयोः ।

षष्ठीजागरके रासे गोष्ठ्यां, विश्वावसुः पुनः ।।३४८।।

निशि गन्धर्वभेदे च विभावसुस्तु भास्करे ।

हुताशने हारभेदे चन्दे, श्वःश्रेयसं सुखे ।।३४९।।

परानन्दे च भद्रे च सर्वरसस्तु धूमके ।

परानन्दे च देशे च षड्रसान्वितवस्तुनि ।।४५०।।

इति चतुःस्वरसान्ताः ।

अवग्रहो ज्ञानभेदे ह्यस्वातन्त्र्ये गजालिके ।

प्रतिबन्धे वृष्टिरोधेऽप्यभिग्रहस्तु गौरवे ।।३५१।।

अभियोगेऽभिग्रहमेऽवरोहस्तु लतोद्गमे ।

तरोरङ्गेऽवतरणेऽप्यश्वारोहोऽश्ववारके ।।३५२।।

अश्वारोहाऽश्वगन्धायामुपग्रहोऽनुकूलने ।

बन्द्युपयोगयोश्चोपनाहो वीणानिबन्धने ।।३५३।।

व्रणालेपनपिण्डे च ग्धवहो मृगेऽनिले ।

गन्धवहा तु नासायां तमोपहो जिने रवौ ।।३५४।।

चन्द्रेऽग्नौ, तनूरुहस्तु पुत्रे गरुति लोम्नि च ।

प्रतिग्रहः सैन्यपृष्ठे ग्रहभेदे पतद्ग्रहे ।।३५५।।

क्रियाकारे दानद्रव्ये तद्ग्रहे स्वीकृतावपि ।

परिग्रहः परिजने पत्न्यां स्वकारमूलयोः ।।३५६।।

शापेऽथ परिवाहोऽम्बूच्छ्वासे राजार्हवस्तुनि ।

परिबर्हः परीवारे पार्थिवोचतवस्तुनि ।।३५७।।

पितामहः पद्मयोनौ जनके जनकस्य च ।

महासहा स्यादम्लानकुसुमं माषपर्णयपि ।।३६८।।

वरारोहो गजारोहे वरारोहा कटावपि ।

सर्वंसहः सहिष्णौ स्यात्सर्वंसहा पुनः क्षितौ ।।३५९।।

इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे

चतुःस्वरकाण्डश्चतुर्थः ।

पञ्चमः काण्डः

स्यादाच्छुरितकं हासनखघातविशेषयोः ।

उपकारिका पिष्टभेदोपकारेशवेश्मसु ।।१।।

कक्षावेक्षकः शुद्धान्तपालकोद्यानपालयोः ।

द्वाःस्थे षिड्गे कवौ रङ्गाजीवेऽथ कटखादकः ।।२।।

खादके काचकलशे श्रृगालबलिपुष्टयोः ।

कृमिकण्टकं चित्रायामुदुम्बरविडङ्गयोः ।।३।।

स्याद्गोजागरिकं भक्ष्यकारके मङ्गलेऽपि च ।

चिलमीलिका खद्योते कण्ठीभेदे तडित्यपि ।।४।।

जलकरङ्कः स्यान्मेघे नालिकेरतरोः फले ।

शङ्खे जललतायाञ्च जलनायको मत्स्यके ।।५।।

काकोच्यां राजशफरे नवफलिका नूतने ।

नवजातरजोनार्यामप्यथो नागवारिकः ।।६।।

गणिस्थराजे गरुडे राजकुञ्जरहस्तिपे ।

चित्रमेखलके प्रोक्तः स्यादथो व्यवहारिका ।।७।।

लोकयात्रेङ्गुदीवर्धनीष्वथ व्रीहिराजिकः ।

चीनान्ने कामलिकायामप्यथो शतपर्विका ।।८।।

स्याद्वचादूर्वयोः शीतचम्पकौ दीपतर्पणे ।

सुवसन्तक इत्येष वासन्त्यां मदनोत्सवे ।।९।।

हेमपुष्पकश्चम्पके हेमपुष्पिका यूथिका ।

इति पञ्चस्वरकान्ताः ।

मलिनमुखस्तु गोलाङ्गले प्रेतेऽनले खले ।।१०।।

शीतमयूखः कर्पूरे चन्द्रेऽथ सर्वतोमुखः ।

विधावत्मनि रुद्रे च सर्वतोमुखमम्बु खम् ।।११।।

इति पञ्चस्वरखान्ताः ।

कथाप्रसङ्गो वातूले विषस्य च चिकित्सके ।

नाडीतरङ्गः काकोले हिण्डके रतहिण्डके ।।१२।।

इति पञ्चस्वरगान्ताः ।

रतनारीचो मन्मथे शुनि स्त्रीणां च सीत्कृतौ ।

इति पञ्चस्वरचान्ताः ।

ऋषभध्वजः प्रथमजिनेन्द्रे शशिशेखरे ।।१३।।

मुनिभेषजं त्वगस्तिपथ्यायां लङ्घनेऽपि च ।

इति पञ्चस्वरजान्ताः ।

दशनोच्छिष्टो निःश्वासे चुम्बने दन्तवाससि ।।१४।।

इति पञ्चस्वरटान्ताः ।

अवग्रहणं रीढायां रोधनेऽथाऽवतारणम् ।

वस्त्राञ्चलार्चने भूतावेशेऽथ प्रविदारणम् ।।१५।।

दारणे युधि च परिभाषणं तु प्रजल्पने ।

नियमे निन्दोपालम्भोक्तौ चाथो मत्तवारणः ।।१६।।

प्रासादवीथीवरण्डे मत्तहस्तिन्यपाश्रये ।

मण्डूकपर्णो रलुकशोणकयोः कपीतने ।।१७।।

मण्डूकपर्णी मञ्जिष्ठाह्वीह्योर्गोजिह्विकौषधौ ।

स्याद्रोमहर्षणाख्या तु रोमोद्गमे बिभीतके ।।१८।।

वातरायण उन्मत्ते निष्प्रयोजनपूरुषे ।

काण्डे च करपत्रे च कूटे च शरसङ्क्रमे ।।१९।।

समुद्धरणं वान्तान्ने जलस्योद्धरणे प्रहे ।

इति पञ्जस्वरणान्ताः ।

अवलोकितस्तु बुद्धेऽप्यवलोकितमीक्षिते ।।२०।।

स्यादपराजितो विष्णौ श्रीकण्ठे निष्पराजये ।

अपराजिता तु दुर्गाश्वेतावपि जयन्तिका ।।२१।।

उपधूपित आसन्नमरणे धूपितेऽपि च ।

स्याद्गणाधिपतिर्विघ्ननायके पार्वतीपतौ ।।२२।।

पृथवीपतिस्तु भूपे कृतान्त ऋषभौषधौ ।

मूर्घाभिषिक्तो भूपाले प्रधाने क्षत्रियेऽपि च ।।२३।।

यादसांपतिरम्भोधौ प्रतीचीदिक्पतावपि ।

वसन्तदूतश्चूते स्यात्पिकपञ्चमरागयोः ।।२४।।

वसन्तदूती पाटल्यामतिमुक्तकभूरुहि ।

इति पञ्चस्वरतान्ताः ।

सहस्त्रपादः कारण्डे भास्करे यज्ञपूरुषे ।।२५।।

इचि रञ्चस्वरदान्ताः ।

योजनगन्धा कस्तूर्यां सीतायां व्यासमातरि ।

इति पञ्चस्वरधान्ताः ।

अपवर्जनं निर्वाणे परित्यागे विहायिते ।।२६।।

अभिनिष्ठानस्तु वर्णेविसर्गेऽथोऽनुवासनम् ।

स्नेहने धूपने चाऽन्तावसायी श्वपचे मुनौ ।।२७।।

अपसर्जनं तु दाने परित्यागेऽतिसर्जनम् ।

विश्राणने च हिंसायामादेशे सेवकस्य च ।।२८।।

स्यादुपस्पर्शनं स्नाने स्पर्शाचमनयोरपि ।

उपसंपन्नं पर्य्याप्ते संस्कृतप्राप्तयोर्मृते ।।२९।।

कलानुनादी चटके चञ्चरीके कपिञ्जले ।

गन्धमादनः कप्यद्रिभिदोरलिनि गन्धके ।।३०।।

गन्धमादनी सुरायामथ जायानुजीविनः ।

नटाश्विनबकदुःस्थाः स्याद् धूमकेतनोऽनले ।।३१।।

ग्रहभेदे च प्रतिपादने बोधनदानयोः ।

पद्मलाञ्छनो धनदे लोकेशे रविवेधसोः ।।३२।।

पद्मलाञ्छना तारायां सरस्वत्यां श्रियामपि ।

पीतचन्दनं स्याद्धरिद्रायां काश्मरिजन्मनि ।।३३।।

महारजनं कुसुम्भे स्वर्णेऽथ मधुसूदनः ।

भ्रमरे केशवे, मृत्युवञ्चनः श्रीफले हरे ।।३४।।

द्रोणकाकेऽप्यथ वरचन्दनं देवदारुणि ।

कालेये, वरवर्णिन्यङ्गनालाक्षाप्रियङ्गुषु ।।३५।।

रोचनायां हरिद्रायामथ स्याच्छकुलादनी ।

कट्वां, मांसीपिचुलिकाजलपिप्पलिकासु च ।।३६।।

शलङ्कायनशब्दः स्यादृषिभेदेऽपि नन्दिनि ।

शिवकीर्तिनशब्दस्तु भृङ्गिरीटेऽसुरद्विषि ।।३७।।

श्वेतवाहन इत्याख्या शशाङ्गे च धनञ्जये ।

स्यात्षष्टिहायानो धान्यविशेषे च मतङ्गजे ।।३८।।

सहस्रवेधी चुक्रे स्यात् हसस्रवेधि रामठे ।

हरिचन्दनमाख्यातं गोशीर्षे देवपादपे ।।३९।।

हरिवाहन इत्युक्तो भास्करामरनाथयोः ।

इति पञ्चस्वरनान्ताः ।

भवेच्चामरपुष्पस्तु केतके चूतकाशयोः ।।४०।।

इति पञ्चस्वरनान्ताः ।

गोरक्षजम्बूर्गोधूमधान्ये गोरक्षतण्डुले ।

धूलीकदम्बस्तिनिमे नीपे वरुणपादपे ।।४१।।

श्रृगालजम्बूर्गोडुम्बे फले च बदरीतरोः ।

इति पञ्चस्वरबान्ताः ।

अभ्युपगमः समीपागमने स्वीकृतावपि ।।४२।।

नक्षत्रनेमिः शीतांशुरेवत्यौत्तानपादिषु ।

इति पञ्चस्वरमान्ताः ।

कालानुसार्यं शैलेये कालीये शिंशपातरौ ।।४३।।

अथ स्वाद् दुग्धतालीयं दुग्धाफेनयोः ।

भवेत्प्रवचनीयाख्या प्रवाच्ये च प्रवक्तरि ।।४४।।

वृषाकपायी जीवन्त्यां शतावर्युमयोः श्रियाम् ।

इति पञ्चस्वरयान्ताः ।

उत्पलपत्रमुत्पलदले स्त्रीणां नखक्षते ।।४५।।

कपिलधारा त्रिदशापगायां तीर्थभिद्यपि।

तमालपत्रं तिलके तापिच्छे पत्रकेऽपि च ।।४६।।

तालीसपत्रं तु तामलक्यां तालीसके क्वचित् ।

पादचत्वरः करके परदोषैकभाषिणि ।।४७।।

सैकते छगलेऽश्वत्थद्रुमेऽथ पांशुचामरः ।

वर्धापके प्रशंसायां दूर्वाञ्चिततटीभुवि ।।४८।।

पुरोटोधूलिगुच्छे पीतकावेरं तु कुङ्कुमे ।

पित्तले, वस्वौकसारा त्विन्द्रस्य धनदस्य च ।।४९।।

पुरीनलिन्यौ विप्रतिसारस्त्वनुशये क्रुधि ।

कौकृत्ये, सर्वतोभद्रस्त्वोकोभित्काव्यचित्रयोः ।।५०।।

निम्बेऽथ सर्वतोभद्रा गम्भार्यां नटयोषिति ।

समभिहारो भृशार्थे पौनःपुन्येऽपि कथ्यते ।।५१।।

इति पञ्चस्वररान्ताः ।

आसुतीवलशब्दस्तु जज्ञकर्तरि शौण्डिके ।

भवेदुद्दण्डपालस्तु मत्स्यसर्पप्रभेदयोः ।।५२।।

एककुण्डल इत्येष बलभद्रे धनाधिपे ।

कृपीटपालशब्दस्तु केनिपाते पयोनिधौ ।।५३।।

कूटपले गजपित्तज्वरे कुलालमारुते (?) ।

स्यात्पाण्डुकम्बलः श्वेतकम्बलग्रावभेदयोः ।।५४।।

मन्त्रचूर्णलमिच्छन्ति वशीकरणवादिनि ।

डाकिनीदोषमन्त्रज्ञे कुशाम्बुप्रीणनेऽपि च ।।५५।।

भवेत्सुरततालो तु दूतिकायां शिरःस्रजि ।

इति पञ्चस्वरलान्ताः ।

आशितम्भवमन्नादावाशितम्भवस्तु तर्पणे ।।५५।।

स्यादाषाढभवो भौमे नवीनजलदेऽपि च ।

इति पञ्चस्वरवान्ताः ।

स्यान्नभश्चमसश्चन्द्रे चित्रयूपेन्द्रजालयोः ।।५६।।

हिङ्गुनिर्यास इत्येष निम्बे हिङ्गुरसेऽपि च ।

हिरण्येरेता ज्वलने सहस्रकिरणेऽपि च ।।५७।।

इत्याचार्यहेमचनच्दरविरचितेऽनेकार्थसङ्ग्रहे

पञ्चस्वरकाण्डः पञ्चमः ।

षष्ठः काण्डः

ग्राममद्गुरिका श्रृङ्ग्यां ग्रामयुद्धेऽपि कीर्त्यते ।

स्यान्मदनशलाका तु सार्यां कामोदयौषधौ ।।१।।

मातुलपुत्रको धत्तूरफले मातुलात्मजे ।

लूतामर्कटकः पुत्रीनवमालिकयोः कपौ ।।२।।

वर्णबिलोडकः काव्यच्छायाहृत्सन्धिचौरयोः ।

स्नानाचिकित्सकश्चातुर्मास्यव्रतकरे नरे ।।३।।

स्नानाचिकित्सकं प्रोक्तं नारीपुष्पतपस्ययोः ।

सिन्दूरतिलको हस्ती सिन्दूरतिलकाऽङ्गना ।।४।।

इति षट्स्वरकान्ताः ।

दोहदलक्षणं गर्भे स्यात्सन्धौ योवनस्य च ।

यौवनलक्षणं वक्षोरुहे च लवणिम्नि च ।।५।।

इति षट्स्वरणान्ताः ।

अर्धपारावतश्चित्रकण्ठे स्यात्तित्तिरावपि ।

इति ष्ट्स्वरतान्ताः ।

प्रत्युद्गमनीयमुपस्थेये धौतांशुकद्वये ।।६।।

विष्वक्सेनप्रिया लक्ष्म्यां त्रायमाणौषधावपि ।

समुद्रनवनिते स्यात्पीयूषे च सुधाकरे ।।७।।

इत्याचार्यहेमचन्दरविरचितेऽनेकार्थसङ्ग्रहे

षट्स्वरादिकाण्डः षष्ठः ।

परिशिष्टः काण्डः

अथाऽव्ययानि वक्ष्यानि वक्ष्यन्ते प्राग्वदेव स्वरक्रमात् ।

अ स्यादभावे स्वल्पार्थे विष्णावेष त्वनव्ययम् ।।१।।

आङीषदर्थेऽभिव्याप्तौ क्रियायोगेऽवधावपि ।

आं स्याद्वाक्येऽवस्मरणे स्यादा वेधस्यनव्ययम् ।।२।।

आ स्यादवधृतिस्मृत्योराः सन्तापप्रकोपयोः ।

इ स्यात्खेदे प्रकोपोोक्तौ कामदेवे त्वनव्ययम् ।।३।।

ई दुःखभावने क्रोध ईर्लक्ष्म्यां तु च नाव्ययम् ।

उ सम्बुद्धौ रुषोक्तौ च शिववााची त्वनव्ययम् ।।४।।

उत् प्राधान्ये प्रकाशे च प्रबल्यास्वस्थ्यक्तिषु ।

विभागे बन्धने मोक्षे भावे लाभोर्ध्वकर्म्मणोः ।।५।।

उं प्रश्नेऽङ्गीकृतौ रोषेऽप्यूं प्रश्वे रोषवाचि च ।

ऊ रक्षणे रक्षके च सूच्यां स्यूतावनव्ययम् ।।६।।

ऋकुत्सायां च वाक्ये च देवमातर्यनव्ययम् ।

ॠ वाक्यकुत्सयोर्दैत्यजनन्यामप्यनव्ययम् ।।७।।

ॡ कुत्सायां विस्मये च ॡशब्दोऽपि तदर्थकः ।

देवमातरि वाराह्यां क्रमात्तावप्यनव्ययोः।। ८।।

एऐशब्दौ तु हेहैव स्मृत्यामन्त्रणहूतिषु ।

क्रमाच्चतुर्भुजे शम्भावेऐेशब्दावनव्ययौ ।।९।।

ओमित्यनुमतौ प्रोक्तं प्रणवे चाप्युपक्रमे ।

ओऔशब्दौ तु होहौव सम्बुद्ध्याह्वानयोर्मतौ ।।१०।।

विधातरि क्रमाद्विष्णवोऔशब्दावनव्ययौ ।

कु पापीयसि निन्दायामीषदर्थे निवारणे ।।११।।

कं सुखे वारिशिरसोः किं प्रश्रे कुत्सनेऽपि च ।

चाऽन्योन्यार्थसमाहारान्वाचयेषु समुच्चये ।।१२।।

हेतौ पक्षान्तरे तुल्ययोगिताविनियोगयोः ।

पादपूरणेऽवधृतौ तु विशेषेऽवधारणे ।।१३।।

समुच्चये पादपूर्तौ धिक् निर्भर्त्सनन्दियोः ।

नि स्यात्क्षेपे भृशार्थे च नित्यार्थे दानकर्मणि ।।१४।।

संनिधानोपरमयोः संशयाश्रयराशिषु ।

मोक्षेऽन्तभावेऽधोभावे बन्धने कौशलेऽपि च ।।१५।।

नु प्रश्नेऽनुनयेऽतीतार्थे विकल्पवितर्कयोः ।

निञीषदर्थे सादृश्ये तद्विरुद्धतदन्ययोः ।।१६।।

व्यतिक्रमे स्वरूपार्थे निषेधाभावयोरपि ।

निर्निश्चये क्रान्ताद्यर्थे निःशेषप्रतिषेधयोः ।।१७।।

प्राक् पूर्वस्मिन् प्रभाते दिग्देशकालेष्वनन्तरे ।

अतीतेऽग्रेऽप्यथ प्र स्याद्गताद्यर्थप्रर्षयोः ।।१८।।

वा समुच्चय एवार्थ उपमानविकल्पयोः ।

वितर्के पादपूर्तौ च विश्रम्भातीतयोरपि ।।१९।।

वि श्रेष्ठेऽतीते नानार्थे पक्षिवाचि त्वनव्ययम् ।

वै पादपूरणे हैतौ सम्बुद्ध्यनुनयेऽपि च ।।२०।।

शं कल्याणे सुखेऽथ स्वित्पारप्रश्नवितर्कयोः ।

सं सङ्गार्थे प्रकृष्टार्थे शोभनार्थसमार्थयोः ।।२१।।

सु पूजायां भृशार्थानुमतिकृच्छ्रसमृद्धिषु ।

स्माऽतीते पादपूर्थौ, ह सम्बुद्धौ पादपूरणे ।।२२।।

हा शुग्दुःखविषादेषु हि हेताववधारणे ।

विशेषे पादपूर्तौ च ही विस्मयविषादयोः ।।२३।।

दुःखहेतौ च हं रोषभाषमेऽनुनयेऽपि च।

हुं वितर्के परिप्रश्ने हुं लज्जायां निवारणे ।।२४।।

भयादौ भर्त्सने कोपेऽप्यनिच्छचायां च कुस्सने ।

इत्येकस्वराऽव्ययानि ।

मनागल्पे च मन्दे चाऽङ्ग सम्बोधनहर्षयोः ।।२५।।

पुनरर्थे चाऽथ किञ्च साकल्यारम्भयोर्मतम् ।

तिर्यक् तिरोऽर्थे वक्रे च विहगादौ त्वनव्ययम् ।।२६।।

हिरुक् मध्ये विनार्थेऽति प्रकर्षे लङ्घने भृशे ।

स्तुतावसम्प्रति क्षेपेऽप्यस्तु पीडानिषेधयोः ।।२७।।

असूयायामनुज्ञायामाराद् दूरसमीपयोः ।

इति स्वरूपे सांनिध्ये विवक्षानियमेऽपि च ।।२८।।

हेतौ प्रकारप्रत्यक्षप्रकाशेष्ववधारणे ।

एवमर्थे समाप्तौ स्यादुत प्रश्नवितर्कयोः ।।२९।।

समुच्चये विकल्पे च तावद्यावदिवाऽवधौ ।

कार्त्स्न्येऽवधारणे माने प्रतीत्थंभूतभागयोः ।।३०।।

प्रतिदाने प्रतिनिधौ वीप्सालक्षमयोरपि ।

पश्चात्प्रतीच्यां चरमे बताऽऽमन्त्रणखेदयोः ।।३१।।

धृत्याश्चर्यानुकम्पासु यद्वत् प्रश्नवितर्कयोः ।

शश्वत् सह पुनर्नित्ये सकृत्सहैकवारयोः ।।३२।।

स्वस्त्याशीःक्षेमपुण्यादौ साक्षात् प्रत्यक्षतुल्ययोः ।

हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः ।।३३।।

निश्चये च प्रमोदे चाप्यथो अथ समुच्चये ।

मङ्गले संशयारम्भाधिकारानन्तरेषु च ।।३४।।

अन्वादेशे प्रतिज्ञायां प्रश्नसाकल्ययोरपि ।

तथा स्यान्निश्चये पृष्टप्रतिवाक्ये समुच्चये ।।३५।।

यथा निदर्शने द्वौ तूद्देशे निर्देशसाम्ययोः ।

हेतूपपत्तौ च वृथा त्वपिधौ स्यादनर्थके ।।३६।।

अनु लक्षणवीप्सेत्थम्भूतभागेषु संनिधौ ।

सादृश्यायामहीनेषु पश्चादर्थसहर्थयोः ।।३७।।

नन्वाक्षेपे परिप्रश्ने प्रत्युक्ताववधारणे ।

वाक्यारम्भेऽप्यनुनायामन्त्रणानुज्ञयोरपि ।।३८।।

नाना विनोभयानेकार्थेषु स्थाने तु कारणे ।

युक्ते साम्येऽप्यवस्तेयेऽप कृष्टे वर्जने मुदि ।।३९।।

विपर्यये वियोगे च निर्देशे विकृतावपि ।

अप संभावनाशङ्कागर्हणासु समुच्चये ।।४०।।

प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च ।

उपाऽऽसन्नेऽधिके हीने सादृश्यप्रतियत्नयोः ।।४१।।

उद्योगव्याप्तिपूजासु शक्तावारम्भदानयोः ।

दाक्षिण्याचार्यकरणदोषाख्यानात्ययेषु च ।।४२।।

अभि वीप्सालक्षणयोरित्थम्भूताभिमुख्ययोः ।

स्यादमा संनिधानार्थे सहार्थेऽलं निरर्थके ।।४३।।

अलङ्करणसामर्थ्यपर्याप्तिषु च वारणे ।

एवं प्रकारोमपयोरङ्गीकारेऽवधारणे ।।४४।।

कथं प्रश्ने प्रकारार्थे सम्भ्रमे सम्भवेऽपि च ।

कामं प्रकामेऽनुमतावशूयानुगमेऽपि च ।।४५।।

किमु संभावनायां च मर्शे, जोषं सुखे स्तुतौ ।

मौनलङ्घनयोश्चापि नाम प्राकाश्यकुत्सयोः ।।४६।।

सम्भाव्याभ्युपगमयोरलीके विस्मये क्रुधि ।

नूनं तर्के निश्चिते च प्राध्वं नर्मानुकूलयोः ।।४७।।

भृशं प्रकर्षेऽत्यर्थे च सामि त्वर्धे जुगुप्सिते ।

अयि प्रश्नानुनययोरये क्रोधविषादयोः ।।४८।।

सम्भ्रमे स्मरणे चान्तरन्ते स्वीकारमध्ययोः ।

ऊरर्यूरी चोररी च विस्तारेऽङ्गीकृतावपि ।।४९।।

पराभिमुख्ये प्राधान्ये विमोक्षप्रतिलोम्ययोः ।

गतिहर्षमहिंसासु भृशार्थे विक्रमेऽपि च ।।५०।।

परिव्याधानुपरमे वर्जने लक्षणादिषु ।

आलिङ्गने च शोके च पूजायां दोषकीर्तने ।।५१।।

भूषणे सर्वतोभावे व्याप्तौ निवसनेऽपि च ।

पुरा भविष्वदासन्ने चिरातीतप्रबन्धयोः ।।५२।।

पुनरप्रथमे भेदे किल सम्भाव्यवार्तयोः ।

हेत्वरुच्योरलीके च खलु वीप्सानिषेधयोः ।।५३।।

जिज्ञासायामनुनये वाक्यालङ्करणेऽपि च ।

अवाऽऽलम्बनविज्ञानवियोगव्याप्तिशुद्धिषु ।।५४।।

एवौपम्ये परिभव ईषदर्थेऽवधारणे ।

उषा रात्रौ तदन्ते च दोषा निशि निशामुखे ।।५५।।

मङ्क्षु शीघ्रे भृषे तत्त्वे ऽतो हेतोरपदेशवत् ।

निर्देशे पञ्चर्थे चेतो यतश्च विभागवत् ।।५६।।

पञ्चम्य्थे नियमे च तत आदौ कथान्तरे ।

पञ्चम्यर्थे परिप्रश्ने तिरोऽन्तर्धौ तिरश्चि च ।।५७।।

नीचैः स्वैराल्पनीचेषु प्रादुर्नामप्रकाशयोः ।

पुरोऽग्रे प्रथमे च स्यात् मिथोऽन्योन्यं रहस्यपि ।।५८।।

शनैः शनैश्चरे स्वैरे सहस्साहसतेजसोः ।

अहो धिगर्थे शोके च करुणार्थविषादयोः ।।५९।।

अह क्षेपे नियोगे चाप्याहो प्रश्नविचारयोः ।

सह सम्बन्धसादृश्ययौगपद्यसमृद्धिषु ।।६०।।

साकल्ये विद्यमाने च हीही विस्मयहास्ययोः ।

इति द्विस्वराव्ययानि ।

ननु च प्रश्ने दुष्टोक्तौ सम्यग्वादे स्तुतावपि ।।६१।।

अपष्ठु चारौ निर्दोषे किमुत प्रश्नवादयोः ।

विकल्पेऽतिशये चापि पुरस्तात्प्रथमेऽग्रतः ।।६२।।

पूर्वस्यां च पुरार्थे चाऽभीक्ष्णं शीघ्रप्रकर्षयोः ।

पौनःपुन्ये सन्तते चाऽवश्यं निश्चयनित्ययोः ।।६३।।

इदानीं साम्प्रतं वाक्याल ङ्कारे, तद्दिनं पुनः ।

दिनमध्ये प्रतिदिने साम्प्रतं तूचितेऽधुना ।।६४।।

समयानिकषे चान्तर्निकटे चान्तरा पुनः ।

विनार्थे संनिधौ मध्येऽभितोऽभिमुखकात्स्न्र्ययोः ।।६५।।

सभीपोभयतःशीघ्रेष्वग्रतः प्रथमाग्रयोः ।

अन्ततोऽवयवोत्प्रेक्षापञ्चम्यर्थेषु शासने ।।६६।।

पुरतोऽग्राद्ययोः पूर्वेद्युः पूर्वाह्णप्रभातयोः ।

अहहेत्यदूभुते खेदे -

इति त्रिस्वराव्ययानि ।

अन्तरेणाऽन्तर्विनार्थयोः ।।६७।।

अहोबताऽनुकम्पायां खेदामन्त्रणयोरपि ।

इति चतुःस्वराव्ययानि ।

अनपयति प्रभाते क्षणं क्षणं क्षणार्थके ।।६८।।

इति पञ्चस्वराव्ययानि ।

इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे

एकादिपञ्चास्वराव्ययाऽभिष्टः परिषिष्टः काण्डः ।

समाप्तश्चाऽयं ग्रन्थः ।

परमानन्दीयनाममाला

प्रथमः परिच्छेदः परमानन्दीयनाममाला

मकरन्ददासः

यद्ध्यानात्पाणिनां सद्यो भवन्ति विपुलाः श्रियः।

चिदानन्दखरूपाय तस्मै गोस्वामिने नमः ।। १ ।।

यत्स्वरूपेण संव्याप्तं समस्तं वाङ्मयं परम् ।

विष्णुनेव जगत्तस्यै नमस्कुर्मे गिरे सदा ।। २ ।।

अन्येषामुपकाराय निजबोधाय च स्फुटम् ।

नामपारायणं वक्ष्ये नानावर्गैरहं मुदा ।। ३ ।।

अः कृष्णे गरुडेऽथाश्र्च द्रुहिणे पुष्पकेतने ।

आनिपातः स्मृतौ वाक्ये कोपसंतापयोस्तथा ।। ४ ।।

ईषदर्थक्रियायोगसीमाभिव्याप्तिषूक्त आङ् ।

इः कामे कल्मषे चापि निपातः खेदकुब्वचोः ।। ५ ।।

ईर्लक्ष्मीधरयोरुश्र्च शम्भौ मौक्षोर्ध्वशक्तिषु ।

भावे स्यादुत्प्रकाशे च निपातः क्रोधलोभयोः ।। ६ ।।

विभागे बन्धने चापि ऊर्गुरौ पालनेऽवने ।

ॠर्देवमातीर क्ष्मायामृकारो दैत्यमातीर ।। ७ ।।

लृर्देव्यां लृस्तु वाराह्यां लताभेदेऽपि कीर्तितः ।

एर्विष्णुशैलयोरैश्च श म्भावोर्धातरी स्मृतः ।। ८ ।।

अं वेधसि तथा रुद्रेऽप्यंकारः कथितो बुधैः ।

कं जले मस्तके सौख्ये कः स्वर्गे स्मरसूर्ययोः ।। ९ ।।

ब्रह्मवायुसुह्यत्केकिवह्नयुद्योतमात्मसु ।

कुः पापीयसि मह्यां च निवारणकुशब्दयोः ।। १० ।।

किमाश्चर्ये वितर्के च प्रश्ने क्षेपजुगुप्सयोः ।

कियत्यथ खमित्युक्तमिन्द्रियाकाशयोनये ।। ११ ।।

चन्द्रबिम्बे वर्णखण्डसंवित्स्वर्गसुखेषु च ।

खो खौ कथितं गीते गं गस्तु गणनायके ।। १२ ।।

गीतगात्रोस्थाख्यातो गौर्जले वज्रबाणयोः ।

वृषधेन्वोर्गिरौ वाचि नेत्रदिग्भूमुखेषु च ।। १३ ।।

रशिमवह्नयोश्च सत्याक्षिस्वर्गमातृषु भाषितः ।

गीश्च वाण्यां दिशाब्राह्मयोर्दुर्गायामथ घो घटे ।। १४ ।।

रुद्रे च हनने घा तु क्षुद्रघण्टौ घनध्वने ।

ङकारो विषये भीमे चस्तरौ चन्द्रचोरयोः ।। १५ ।।

चाव्ययं च समाहारे पक्षान्तरसमानयोः ।

कारणे पादपूर्तौ च विनियोगसमस्तयोः ।। १६ ।।

चुः कोकेऽप्यथ संस्थाने छश्चारे छेदके रवौ ।

छं वृत्ते निर्मले प्रोक्तं जो ऽथ केशवजीवयोः ।। १७ ।।

जूर्व्योमवाचि जवनपिशाच्योः कीटकेऽपि च ।

झो मञ्जुलसमीरे स्यात्रष्टेऽपि परिकीर्तितः ।। १८ ।।

ज्ञो मुनौ चतुरे चन्द्रपुत्रे ब्रह्मणि ञः पुनः ।

गायने घर्घरध्वानगूढरूपकयोस्तथा ।। १९ ।।

टो भूमिवायुशब्देषु शरीरास्थनि टं पुनः ।

गवि ठः सुस्तने रुद्रे चन्द्रमण्डलशून्ययोः ।। २० ।।

डः शब्दभर्गयोर्ध्याने ढो ढक्काध्वविशेषयोः ।

णस्तु निःश्रेयसे स्पष्टे निष्कलेऽपि समर्थितः ।। २१ ।।

तशब्दस्तस्करे पुच्छे क्रोडे युद्धेऽपि ता श्रियाम् ।

धरण्यामपि ताशब्दः त्वक्च वल्कलचर्मणोः ।। २२ ।।

त्विट् च वाण्यां प्रभायां च जिगीषाव्यवसाययोः ।

रुचौ तृट् च मता लोभतृष्णयोस्तः स्मृतौ पुनः ।। २३ ।।

अव्ययं तु समाहारसाकल्यकरणेष्वपि ।

थो भयाद्रक्षणे भूध्रे दम्पत्यां दा प्रदेशने ।। २४ ।।

दाष्णुबन्धनयोर्दृक्स्यात्रेत्रदर्शनयोरपि ।

द्योः स्वर्गनभसोर्द्युस्तु ह्निवासरयोरथ ।। २५ ।।

धं पुनर्धनदे धीरेऽश्ववारकसुचित्रयोः ।

धं पृक्ते धीस्तु बुद्धौ स्यात्रिषङ्गे धा तु धातरि ।।२६ ।।

गुह्यकेशेऽथ धूर्धूते भरे कम्परथास्ययोः ।

नो ज्ञानस्थानयोर्बुद्धे निर्बन्धेऽस्माकमप्यतः ।। २७ ।।

अस्मानस्मभ्यमप्येवं नुः स्ततवे न्वव्ययं पुनः ।

विि‍कल्पप्रश्नयोस्तर्के निर्भरेऽनुशये नये ।। २८ ।।

निः क्रीते निश्चये व्यूहे निषेधे नोननाः पुनः ।

निपाताः प्रतिषेधार्थ४ नीर्धून्यां नौस्तरी मता ।। २९ ।।

न्यग्नीचकात्सर्न्ययोर्निम्ने पोऽम्भःपाने च पातरि ।

समीरमार्गयोः प्रौढे पूस्त देहपुरोरपि ।। ३० ।।

फो झंझापवने फेने फूर्वातूलककुब्वचोः ।

विण्नरेऽवस्करे वैश्ये बः पद्मघटयोरपि ।। ३१ ।।

विः पक्षिनभसोर्वस्तु प्रचेतसि च शंकरे ।

वाग्वचःश्रुतदेव्योः स्याद्वौपम्येऽव्ययमीरितम् ।। ३२ ।।

भः काव्ये भ्रमर भं तु धिष्ण्यराश्योश्च भाः करे ।

प्रभावे साध्वसे भीः स्यात्स्थित्युत्पत्तिमहीषु भूः ।। ३३ ।।

मः शिवे चन्द्रविध्योश्च मा लक्ष्म्यां मातृमानयोः ।

निषेधे माव्ययं ख्यातं मा निशाकरमासयोः ।। ३४ ।।

भूर्बन्धवेश्मनोर्योऽथ ब्रह्मवातयमेषु च ।

यं जले या रमायात्रोः खट्वाङ्गरथयोरपि ।। ३५ ।।

रः कामवह्निशब्देषु तीव्रे रामे नरे पवौ ।

राः स्वर्णधनयोर्मेघ स्थानके रुर्भये ध्वनौव।। ३६ ।।

रक्षणादित्ययो रीस्तु भ्रमे रूग् रुचिवाञ्छयोः ।

घृणिरुग्व्यथयोश्र्चपि रे हूतावव्ययं स्मृतम् ।। ३७ ।।

लोऽमृते चलने शत्रे ल४ दाने लीस्तु कङ्कणे ।

श्र्लेषबन्धनयोः श्रीश्र्च सरलद्रवसम्पदोः ।। ३८ ।।

लक्ष्मीप्रभाभारतीषु शं सुखश्रंयसोरपि ।

शीः स्वापे शुर्निशानाथे षूः प्रसूतौ च षो वरे ।। ३९ ।।

सा लक्ष्म्यां सः परोक्षे स्वो ज्ञातमात्मनि च स्मृतः ।

स्वरव्ययं स्वर्गभद्रपरलोकगतिष्वथ ।। ४० ।।

सच्छब्दः पूजिते सत्ये साधूशोभियोः सति ।

स्वं निजे द्रविणे होऽथ वीरे रुद्रेभयंकरे ।। ४१ ।।

ह संबूद्धौ पादपूर्तौ हा दुः ख् शुग्विषादयोः ।

ही विस्मये विषादे हुं स्वापे प्रश्र्नवितर्कयोः ।। ४२ ।।

हे संबुद्धौ हं च खेदे क्रोधोक्तो संस्मृतावपि ।

हि हेतौ पादपूर्तौ च क्षः क्षेत्रे रक्षसि क्षये ।। ४३ ।।

विश्र्वप्रकाशामरहेममुख्यनामाकरान्भूरितरान्निरीक्ष्य ।

शिशुप्रबोधाय कृतो विचारः श्रीमज्जगन्नाथपदप्रसक्त्या ।। ४४ ।।

इति श्रीकायस्थचिरवारीयमाथुखंशभूषणमणिश्रीगढमलपुत्रश्रीमत्परमानन्दनन्दनविरचितायां परमानंदीयनाममालायां प्रथमः काण्डः समाप्तः ।।

।। द्वितीयः परिच्छेदः ।।

कृष्णो नारायणो विष्णुजिष्णुश्रीपतिकेशवाः ।

नरायणाजपुरुषताक्ष्र्यध्वजसनातनाः ।। १ ।।

जनार्दनो जलशायो वाशुदेवो ऽप्यधोक्षजः ।

दामोदरः शौरिविधुपीताम्बरजिना हरिः ।। २ ।।

मुकुन्दाच्युतदाशार्हगोविन्दपुरुषोत्तमाः ।

इन्द्रानुजो जह्नुविष्वक्सेनश्रीधरवेधसः ।। ३ ।।

देवकीनन्दनः सोमसिन्धुश्रीवत्समाधवाः ।

पद्मनाभः पद्मशयो वनमाल पुनर्वसुः ।।४ ।।

मूञ्जकेशी ह्यषीकेशवृषाकपिगदाग्रजाः ।

त्रिविक्रमः शतावर्तयदुनाथचतुर्भजाः ।। ५ ।।

मार्जविश्र्वम्भरी विश्र्वरूपः पृष्णिधरो हि यः ।

कुमोदकजलेशायिशङ्खभृद्धरणीधराः ।। ६ ।।

जगन्नाथश्र्च गोपेन्द्रविषृरश्रवसौ स्वभूः ।

वध्याद्धेनुकचाणूरकालनेमिमुरादितः ।। ७ ।।

वधकस्य च नामानि भवन्ति विपुलान्यपि ।

इति श्रीपरमानन्दः कृष्णन४मान्यदर्शयत् ।। ८ ।।

लक्ष्मीः क्षीरोदधिसुता श्रीः पद्मा कमला रमा ।

पद्मवासा हरेः कान्ता ता सा या मेन्दिरापि च ।। ९ ।।

कामः कन्तुः खरुर्मारः श्रीसुतो विषमायुधः ।

कन्दर्पह्यच्छयइनङ्गजराभीरुरतिप्रियाः ।। १० ।।

प्रद्युम्नः कमनः पुष्पकेतनो मकरध्वजः ।

शम्बरारिः स्मरः पुष्पधन्वा दर्पकमन्मथौ ।। ११ ।।

मधुदीपमनोजन्मानन्यजा मधुसारथिः ।

तिथाङ्गजौ प्रिया चास्य रतिः पुत्रोऽनिरुद्धकः ।। १२ ।।

ब्रह्मसूषेशऋष्याङ्का शृङ्गारात्ममनोमुखा ।

योनिरस्याहितौ प्रोक्तौ शम्बरः शूर्पकोऽपि च ।। १३ ।।

अस्त्रचापेषवश्चास्य पुष्पाणि जगदुर्बुधाः ।

इति श्रीपरमानन्दः कामवर्गमभाषत ।। १४ ।।

सुदर्शनो विष्णुचक्रं वाहनं वज्रजित्पुनः ।

पाञ्चजन्योऽस्य कम्बुः स्यादङ्कः श्रीवत्स एव हि ।।१५ ।।

नन्दकोऽसिर्गदा कौमोदकी कौपोदकी च सा ।

शाङ्र्ग धनुर्मणिः स्यमन्तको हस्तेऽथ कौस्तुभः ।। १६ ।।

भुजमध्ये पिता वास्य दुन्दुर्भूकश्यपोऽपि च ।

वसुदेवस्तथा पूर्वानको दुन्दुभिरेव सः ।। १७ ।।

रौहिणेयो बलो रामो रेवतीरमणो हली ।

मुशली सात्वतः कामपालः प्रियमधुश्च सः ।। १८ ।।

रुक्मिभिद्यमुनाभिच्च प्रलम्बभिदपि स्मृतः ।

संकर्षणो नीलवस्त्रो बलभद्रोऽच्युताग्रजः ।। १९ ।।

काललक्ष्मानन्तलक्ष्मा बलदेवः सितासितः ।

मृशलं त्वस्य सौनन्दं हलं संवर्तकाभिधम् ।। २० ।।

गरुडः काश्यपिस्ताक्ष्यः स्वर्णकायश्च शाल्मली ।

सौपर्णेयः सुपर्णोऽपि कामायुर्विष्णुवाहनम् ।। २१ ।।

वज्रतुण्डः सर्पशत्रुररुणावरजो विराट् ।

वज्रजिह्वैनतेयौ च गरुत्मांश्च सुधाहरः ।। २२ ।।

ब्रह्मा प्रजापतिर्धाता विधाता विधिवेधसौ ।

द्रुघणाजौ शतानन्दस्थविरौ कमनः कविः ।। २३ ।।

परमेष्टी जगत्कर्ता पद्मभूरात्मभूरपि ।

नाभिभूरष्टकर्णोऽपि पद्मासनचतुर्मुखौ ।। २४ ।।

स्वयंभूर्द्रुहिणो विश्र्वरेता हंसगसात्त्विकौ ।

ध्रुवः पुराणगः शंभुर्वेदगर्भः पितामहः ।। २५ ।।

सुरज्येष्टो विरञ्चश्र्च भवान्तकृत् ।

हिरण्यगर्भलोकेशौ विरञ्चिश्र्च शतधृतिः ।। २६ ।।

सरस्वती श्रुतदेवी ब्राह्मी गौर्गाश्र्च भारती ।

भाषा वाणी तु वाग्वाक्यं व्याहारवचने वचः ।। २७ ।।

ईश्र्वरः शंभुरीशानो महादेवो महानटः ।

महेश्र्वरमृडौ शर्वः स्थाणुः शंकरधूर्जटी ।। २८ ।।

गिरीशो मृत्युंजयः षण्ढोग्रभैरवाः ।

एकद्दग्भालद्दग्नीललोहिताः शूलभृद्धरः ।। २९ ।।

अहिर्बुध्नो विरूपाक्षो नीलकण्ठोऽषृमूर्तिरुः ।

भर्गो भीमो वृषाङ्कोऽपि कपर्दी घनवाहनः ।।३० ।।

भूतपतिः पशुपतिः खण्डपर्शुः पिनाकभृत् ।

अट्टहासी त्रिनेत्रोऽपि श्रीकण्ठेशौ पुरासुह्यत् ।। ३१ ।।

गंगाधरो व्योमकेशो महाव्रतिकपालिनौ ।

कृत्तिवासा दिशावासाश्र्चन्द्रमौलिर्विषान्तकः ।। ३२ ।।

नाट्यप्रियोऽस्थिधन्वापि हर्ता पिङ्गेक्षणः शिवः ।

शिपिविष्टो।ऽपि सर्वज्ञभवौ पञ्चमुखोऽपि च ।। ३३ ।।

काला सुह्यन्मखानङ्गगजपूषान्धकासुह्यत् ।

उमापतिस्तथा पिङ्गजटः प्रमथनायकः ।। ३४ ।।

जटाजूटः कपर्दोऽस्य पिनाकः शांकरं धनुः ।

अजगावमजगवमजकावमपि क्कचित् ।। ३५ ।।

ब्राह्मीप्रभृतयः सप्त मातरः प्रमथा गणाः ।

सुखंसुणस्तु खट्वाङ्गो अथाष्टैश्र्वर्यमेव हि ।। ३६ ।।

गरिमा महिमा चैव अणिमा लघिमा तथा ।

ईशित्वं च वशित्वं च प्राप्तीः प्राकाम्यमित्यपि ।। ३७ ।।

गौरी दुर्गा महादेवी भवानी सर्वमङ्गला ।

मातृमाता शिवा रुद्राण्यपर्णा त्र्यम्बिका सती ।। ३८ ।।

दक्षजार्या मृडानी च सिंहयानाद्रिजेश्वरा ।

कष्णस्वसा कुमारी च शर्वाणी भूतनायिका ।। ३९ ।।

मेनाकभगिनी शुम्भमथनी पार्वतीश्वरी ।

कात्यायनी कुमारी चसचण्डी काल तथोच्यते ।। ४० ।।

उमा निशुम्भमथनी महिषासुरनाशिनी ।

सिंहस्तस्या मनस्तालः सख्यौ च विजया जया ।। ४१ ।।

चामुण्डा कर्णमोटी च चर्चिका च कपालिनी ।

मार्जारकर्णिका चैव महागन्धा च भैरवी ।। ४२ ।।

भृङ्गरीटिर्भृङ्गरिटिर्भृङ्गी नाड्यस्थिविग्रहः ।

कूष्माण्डके केलिकिलो नन्दीशे तण्डुनन्दिनौ ।। ४३ ।।

विनायकः पर्शुपाणिद्वैमातुरगजाननाः ।

लम्बोदरैकदन्तौ च हैरम्बगणनायकौ ।। ४४ ।।

आखुगो विघ्नराजश्च कार्तिकेयोऽथ षण्मुखः ।

षाण्मातुरो महासेनः ब्रह्मचारी च शक्तिभृत् ।। ४५ ।।

गंगासुतो महातेजाः कुमारोमासुतौ गुहः ।

स्कन्दः स्वामी विशाखश्च सेनानीस्तारकान्तकृत् ।। ४६ ।।

क्रोञ्चारिश्च महातेजा द्वादशाशक्षः शराग्नीभूः ।

इत्थं माहेश्वरो वर्गः सविस्तरमुदाह्यतः ।। ४७ ।।

स्वर्गः फलोदयो मेरुपृष्टं तविषताविष ।

त्रिविष्टपं भुविर्गौः स्वः द्योदिवौ त्रिदिवं मतम् ।।४८ ।।

नाकोर्ध्वलोकौ दिदिविर्दिदिविश्च सुरालयः ।

देवा लेखाः सुपर्वाणः सुरनिर्जरनाकिनः ।। ४९ ।।

अमर्त्यत्रिदशास्वप्ना दैवतर्भुसुधाभुजः ।

बहिर्मुखामरस्वाहभुग्गीर्वाणस्वधाभुजः ।। ५० ।।

वृन्दारका निलिम्पाश्च आदितेयाश्च पूजिलाः ।

वीबुधा मरुतो दानव४रयोऽनिमिषा अपि ।। ५१ ।।

तेषामन्धोऽमृतं पेयूषं पीयूषमपि स्मृतम् ।

समुद्रनवनीतं च सुधा यानमथोच्यते ।। ५२ ।।

व्योमयानमपि प्रोक्तं विमानं बुधसत्तमैः ।

स्वर्गिवध्वोऽप्,रोरमेभाः स्वःकन्ताश्चोर्वशीमुखाः ।। ५३ ।।

हूहूहाहामुखा देवगायनाः कथिता बूधैः ।

इन्द्रोऽच्युताग्रजो वज्रो विडौजा मधवान् हरिः ।। ५४।।

सूत्राम३ वासवो मेघवाहनोऽपि शतक्रतुः ।

वास्तोष्पतिर्वृषा दाल्मिजिष्णू वरक्रतूः पुनः ।।५५ ।।

कौशिकः शक्रपर्जन्यहर्यश्ववकसुरर्षभाः ।

शचीपतिः स्वर्गपतिपुरुहूतपुरंदराः ।। ५६ ।।

आखण्डलः सहस्त्राक्षस्तुराषाण्मघवा पुनः ।

शुनासीरोग्रधन्वानौ सुत्रामा पूर्वदिक्पतिः ।। ५७ ।।

संक्रन्दनस्तपस्तक्षो ऋभुक्षो देवनायकः ।

वृत्रहा बाहुदन्तेयो द्विषः पाकादयः पुनः ।। ५८ ।।

तेभ्यो जिद्धोदिकौः शब्दैः नामानि स्युः शचीपतेः ।

जम्भपाकपुलोमाद्रिवृत्राश्र्च नमुचिर्बलः ।। ५९ ।।

एते शक्रद्विषोऽथ स्यादिन्द्राणी जयवाहिनी ।

पौलोमी च शची सुनुर्जयदत्तो जयः पुनः ।। ६० ।।

जयन्तोऽथ सुता तस्य जयन्ती ताविषी च सा ।

हयश्र्चोच्चैःश्रवा द्वाः स्थो नन्दी सारथिरप्यथ ।। ६१ ।।

मातलिः सामजश्र्चास्य हस्तिमल्लोऽभ्रवारण ।

ऐरावतश्र्चतुर्दन्तः श्र्वेतहस्यर्कसोदरः ।। ६२ ।।

ऐरावणोऽभ्रमोः कान्तः पुरी तस्यामरावती ।

सुधर्मा शक्रसदसि नन्दनं वनमीक्ष्यते ।। ६३ ।।

नन्दीसरः सरश्र्चापमृजु रोहितनामकम् ।

कल्पवृक्षश्र्च संतानः पारिजातः सुरद्रुमः ।। ६४ ।।

हरिचन्दनमन्दारौ देववृक्षा भवन्त्यमी ।

वज्रं स्वरुः पविः शम्बः शतधारानी भिदुः ।। ६५ ।।

शतारः कुलिशो दीर्घज्वैरावतमपीरितम् ।

शतकोटिश्च दम्भोलिर्व्यधामो ह्मादिनी स्त्रियाम् ।। ६६ ।।

शम्बार्चिरतिभीरुक्तःसस्फर्जथुर्वज्रनिःस्वेनः ।

विश्वकृद्विश्वककर्मापि त्वष्टा स्याद्देववर्धकिः ।। ६७ ।।

अश्विनौ देववैद्यौ च नासिक्यौ वडवासुतौ ।

नासत्यावश्विनीपुत्रावर्कजावब्धिजौ यमौ ।। ६८ ।।

दस्त्रौ चैतावता साङ्ग इन्द्रवर्गः समर्थितः ।

वरुणो जलपतिः पाशी प्रचेताश्चार्णवगृहः ।। ६९ ।।

यादः पतिस्तथा मेघनादः पश्चिमदिक्पतिः ।

परञ्जनोऽथ धनदः कुबेरो नरवाहनः ।। ७० ।।

श्रीदः शितोदरो रत्नाकरः किंपुरुषेश्वरः ।

एकपिङ्गश्चैलविलः कुहेश्वरसखौ पुनः ।। ७१ ।।

पौलस्त्येच्छावसू यक्षः कैलासौका निधीश्वरः ।

पिशाचकी च त्रिशिरा हर्यक्षोऽपि धनाधिपः ।। ७२ ।।

विमानं पुष्पकं चास्य वनं चैत्ररथं पुनः ।

प्रभा वस्वोकसारा च अलका च पुरी तथा ।। ७३ ।।

नलकूबरः स्मृतः पुंसि धनदस्य सुतोऽत्र तु ।

धनं वित्तं पृक्थमृक्णं स्वं द्रव्यं द्रविणं वसु ।। ७४ ।।

स्वापतेयं हिरण्यार्थौ रा निधाने तु शेवधिः ।

निधिः कुनाभिरप्येवं नवसंख्या भवन्त्यमी ।। ७५ ।।

महापद्मः पद्मनामा शङ्खो मकरकच्छपौ ।

मुकुन्दो नीलकुन्दौ च चर्चाश्च नवमो मतः ।। ७६ ।।

यक्षस्तु गुह्यकः पुण्यजनो राजा वटालयः ।

किंनरोऽश्वमुखश्चैव किंपुरुषमयू समौ ।। ७७ ।।

असुराश्च शुक्रशिष्या दैत्या दनुसुता अपि ।

सुरारयः पूर्वदेवाः पातापनिलया अपि ।। ७८ ।।

रोहिणीप्रमुखाः सन्ति विद्यादेव्यस्तु षोडश ।

यमः प्रेतपतिर्दण्डधरः कालोऽन्तकोऽर्कजः ।। ७९ ।।

दक्षिणाशापतिः पितृपतिर्मृत्युहरी पुनः ।

यमराजः कृतान्तश्च शीर्णाङ्घ्रिमहिषध्वजौ ।। ८० ।।

समवर्त्धर्मराजौ कालिन्दीसोदरोऽपि च ।

श्राद्धदेवश्च शमनो धर्मोर्णा त्वन्तकप्रिया ।। ८१ ।।

वैध्यतस्तु प्रतीहारो लेखकश्चित्रगुप्तकः ।

महाचण्डश्व चण्डश्च भूजिष्यौ द्वौ पुरी पुनः ।। ८२ ।।

संयमन्यन्तकस्य स्यादेष वर्ग उदाहृतः ।

राक्षसः कौणपो रक्षो यातुधानः पलादनः ।। ८३ ।।

नैर्ऋतः कर्बुरः क्रव्यात्कीनाशनिकसात्मजाः ।

रात्रिंचरः पुण्यजनो नृचक्षाश्च निशाचरः ।। ८४ ।।

यात्वाशरस्तथासृक्पः कटप्रूश्चोच्यते बुधैः ।

सूर्योऽर्कः किरणः पूषा सवूता तरणिः खगः ।। ८५ ।।

मार्तण्डौऽहर्पतिर्भानुः पतंगश्र्चक्रबान्धवः ।अर्यमा तपनः सूरो भास्वान्खरकरोऽपि च ।। ८६ ।।

द्वादशात्मा चित्रभानुर्ब्रध्नहंसविवस्वतः ।

प्रज्ञोतनो ग्रहपुषः सहस्त्रांशू रवूर्भगः ।। ८७ ।।

कृतान्तजनको मित्रसप्तसप्ततिहेलयः ।

ध्वान्तारातिर्जगत्कर्मसाक्षी ग्रहपतिर्हरि ः ।। ८८ ।।

हरिदश्र्वो जगच्चक्षुःप्रभाकरदिवाकराः ।

विभावसुर्शुचीनौ च नभोमणिरहर्मणिः ।। ८९ ।।

तीक्ष्णांशुररूणस्त्वष्टा विकर्तननभोऽध्वगौ ।

पीथस्त्रयीतनबश्र्चैव विरोचनविभाकरौ ।। ९० ।।

भास्करो मिहिरोष्णांशू आदित्यो यमुनापिता ।

द्युपतिर्गोपतिश्र्चण्डभाः स्यादरुणसारथिः ।। ९१ ।।

किरणःप्रग्रहो ज्योतिरर्चिर्धाम घृणिः करः ।

पृश्निरशिमहःपाददीधितित्विषिदीप्तयः ।। ९२ ।।

द्योतिरंशुः छविः केतुमरीचिरुचिरोचिषः ।

अर्चिविरोकरुक्शोचिमयूखोस्त्रगभस्तयः ।। ९३ ।।

अभीशुः शुचिभाभानुवसूपधृतयो विभा ।

प्रकाशो वर्च आलोकोद्योतावातपतेजसी ।। ९४ ।।

परिवेषस्तु परिधिरुपसूर्यकमण्डले ।

मरीचिका मृगतृष्णा काश्यपिः सूर्यसारथिः ।। ९५ ।।

विनतासूनुररुणोऽप्यनूरुर्गरुडाग्रजः ।

प्लवगस्त्वर्करेतोजो रेवन्तो हयवाहनः ।। ९६ ।।

माठराद्यास्तथा भानोः पारिपार्श्विकनामकाः ।

चन्द्रो निशापती राजा निशारत्नकलाभृतौ ।। ९७ ।।

जर्णो जैवातृकः सोमः श्वेतवाजी हिमद्युतिः ।

विधुरिन्दुः सुधासूश्च चन्द्रमा रोहिणीपतिः ।। ९८ ।।

अत्रिदृग्जौषधीनाथदशवाजिनिशाकराः ।

अब्जोडुपतिकुमुदबान्धवाश्च तिथिप्रणीः ।। ९९ ।।

ग्लौर्मृगैङ्को द्विजपत्तिः शशभृत्कौमुदीपतिः ।

छायाभृत्तारकानाथो निशानाथोऽपि कथ्यते ।। १०० ।।

अभिज्ञानकलङ्काङ्काः लक्षणं लक्ष्म लाञ्छनम् ।

चन्द्रिका कौमुदी चन्द्रगोलिका ज्योत्स्नया सह ।। १०१ ।।

चन्द्रातपोऽथ तद्बिम्बं मण्डलं परिकीर्तितम् ।

स्त्रियां प्रसन्नता सादः प्रपूर्वो नरि दृश्यते ।। १०२ ।।

कला च षोडशो भागस्तारकाभोडवः पुनः ।

नक्षत्रज्योतिषी धिष्ण्यं ग्रहऋक्षेऽप्यथाश्विनी ।। १०३ ।।

बालिनी चाश्वयुग्दरत्रदेवताश्विकिनी तथा ।

यमदेवा तु भरणी कृत्तिका चाथेल्वाः पुनः ।। १०५ ।।

इन्वकाश्च मृगशिरः शिरः स्थाः पञ्च तारकाः ।

आर्द्रा च कालिनी रौद्री यामकौ च पुनर्वसू ।। १०६ ।।

आदित्यावथ पुष्यः स्यात्तिष्यः सिध्यस्तथा मतः ।

अश्लेषाप्यथ सार्पी स्यात्पित्र्याश्चैव तथा मघाः ।।१०७ ।।

योनिभं फाल्गुनी पूर्वा अर्यम्णश्च तथोत्तरा ।

हस्तः सवितृदेवस्तु चित्रा स्यात्त्वष्ट्‌भं स्मृतम् ।। १०८ ।।

स्वातिस्तु वायुभं ख्यातं विशाखेन्द्राग्निभं मतम् ।

अनुराधाप्यनुराधा राधा ज्येष्टा च मित्रभम् ।। १०९ ।।

मूलः स्यादाश्रवः पूर्वाषाढापी सोत्तरा पुनः ।

वैश्र्वी श्रवणनामाथ हरिदेवोऽपि कथ्यते ।। ११० ।।

श्रविष्टा तु धनिष्टा स्याद्वसुभं चाथ वरुणी ।

शतभिषक्च तथा पूर्वोत्तरा भद्रपदा अपि ।। १११ ।।

द्वय्यः प्रोष्टपदाःसपौष्णयं रेवती (च) विधुप्रियाः ।

मङ्‌गलो लोहिताङ्‌गारावाषाढाभूकुजावपि ।। ११२ ।।

अङ्‌गारको नवार्चिश्च वक्रोऽपि कथितो बुधौः ।

बुधः प्रहर्षुलः सौम्यो रोहिणीतनयोऽपि च ।। ११३ ।।

ज्ञः श्यामाङ्‌गः श्रविष्टाभूः पञ्चार्चिः स्यादिलाप्रियः ।

बृहस्पतिर्गुरुर्जीवो धिषणद्वादशार्चिषौ ।। ११४ ।।

सप्तर्षिजः सुराचार्यो गीष्पतिः फल्गुनिभवः ।

वाचस्पतिरुतथ्यानुजोऽङ्गिरा बृहतीपतिः ।। ११५ ।।

शुक्रो दैत्यगुरुः काव्यः षोडशार्चिर्मघाभवः ।

भार्गवश्च कविर्ज्ञेय उशानाश्च शनैश्चरे ।। ११६ ।।

धिष्ण्यश्छायासुतः सौरिरसितो रेवतीभवः ।

नीलवासाः शनिर्मन्दः क्रोडसप्तार्चिषौ तथा ।। ११७ ।।

राहुर्विधुन्तुदः सैंहिकेयः स्वर्भानुरेव सः ।

तथैवाभ्रपिशाचोऽपि ग्रहकल्लोल इत्यपि ।। ११८ ।।

भरणीभूस्तमोऽथ स्याच्छिखी केतुस्तथाहिकः ।

अश्ले षाभूरथोत्तानपादाजो ध्रुव इत्यपि ।। ११९ ।।

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।

अगस्तिः पतिसिन्धुः स्यादगस्त्यः कुम्भसम्भवः ।। १२० ।।

वातापिद्विट् तथाग्नेयो मैत्रावरुणिरप्यथ ।

लोपामुद्रा च सा कौषीतकी चापि वरप्रदा ।। १२१ ।।

पुष्पदन्तौ पुष्पवन्तौ चन्द्रसूर्यौ समोक्तितः ।

कालोऽनेहा दिष्टसर्वमूषकौ समयोऽपि च ।। १२२ ।।

राहुग्रासोपरागौ च बसूर्याचन्द्रमसोर्ग्रहः ।

उपप्लवस्त्वथारिष्टमुपलिङ्गमुपद्रवः ।। १२३ ।।

उत्पातेती अजन्यं च बृहद्भानोरुपाहितः ।

अष्टादशनिमेषैः स्यात्काष्टा ते द्वे लवो मतः ।। १२४ ।।

लवैश्च पञ्चदशभिः कलैका परिकीर्तिता ।

कलाद्वयं तथा लेशो लेशपञ्चदश क्षणः ।। १२५ ।।

क्षणषट्केन घटिका नाडिका धारिकापि च ।

घटिके द्वे मुहूर्तः स्यात्त्रिंशता तैरहर्निशम् ।। १२६ ।।

दिवसो वासरो घस्त्रोऽहर्दिनं द्युर्दिवं च तत् ।

प्रभातं च विभातं स्यात्प्रत्यूषाहर्मुखे पुनः ।। १२७ ।।

व्युष्टं कल्योषसी गोसः प्रत्युषोऽथ निशा क्षपा ।

निशीथिनी तमी रात्रिस्तमा तुङ्गी विभावरी ।। १२८ ।।

शर्वरी वसतिः श्यामा त्रियामोषा तमस्विनी ।

भौती दोषेन्दुकान्ता च वासतेयी च यामिनी ।। १२९ ।।

मध्याह्नस्तु दिवामध्यं मध्यन्दिनमपीष्यते ।

सन्ध्या सायं च पितृसूर्विकालः सबलिस्तथा ।। १३० ।।

उत्सूरोऽथ दिनान्ते स्यात्त्रिकालं चोवैणवम् ।

कुतपः श्राद्धकाले चाष्टमोंऽशो वासरस्य सः ।। १३१ ।।

दर्शरात्रिस्तमिरत्राथ ज्योत्स्नी स्यात्पूर्णिमानिशा ।

निशागणो गणरात्रो गर्भकं यामिनीद्वयम् ।। १३२ ।।

प्रदोषः शर्वरीचक्रमर्धरात्रो महनिशा ।

निशीथोऽप्यथ यामः स्यत्प्रहरोऽपि निशम्यते ।। १३३ ।।

अन्धकारस्तमो ध्वान्तं भूच्छाया तिमिरं त्वथ ।

तमिरत्र मन्धतमसं तथा संतमसं स्मृतम् ।। १३४।।

तिथिः स्यात्कर्मवाटी च पक्षान्तौ पर्वणी तथा ।

विषुवं विषुवत्तुल्यदिनरात्रावनेहसि ।। १३५ ।।

पक्षतिः प्रतिपत्पर्वसन्धिमानमुदाह्यतम् ।

प्रतिपत्पञ्चदश्योश्चान्तरं स्यादथ पूर्णिमा ।। १३६ ।।

राका सा पौर्णमासी तु पूरेणचन्द्रमसि स्मृता ।

पौर्णमास्यथ दर्शश्च संगमः सूर्यचन्द्रयोः ।। १३७ ।।

अमावस्यामावसी च अमावास्याप्यमा मता ।

द्दष्टेन्दुः सा सिनीवाली नष्टेन्दुश्च कुहुः कुहूः ।। १३८ ।।

अथ मासः पक्षयुग्ममाग्रहायणिकः सहा ः ।

मार्गशीर्षः सहश्चाथ पौषतैषौ सहस्यवत् ।। १३९ ।।

तपा माघस्त्वथ फाल्गुनिकः फाल्गुन इत्यपि ।

तपस्योऽथ मधुश्चैत्रचैत्रिकौऽप्यथ माधवः ।। १४० ।।

वैशाखे राध इत्येवं ज्येष्टे शक्रोऽपि कथ्यते ।

आषाढे च शुचिः श्रावणिकस्तु श्रावणो नभाः ।। १४१ ।।

भाद्रपदो नभस्यैव भाद्रप्रौष्टपदावपि ।

अश्र्वयुक् चाश्र्विनेषौ तु कार्तिको बाहुलः समौ ।। १४२ ।।

ऊर्जकार्तिकिकौ मासौ द्वावृतुः परिकीर्तितः ।

रौद्रः प्रशलहेमन्तौ शौषस्तु शिशिरोऽपि च ।। १४३ ।।

वसन्तः पुष्पकालेष्यौ सुरभिश्च बलाङ्गकः ।

उष्णागमो निदाघोष्णौ तपो ग्रीष्मोष्मकावपि ।। १४४ ।।

प्रावृड्वर्षाः क्षरी मेघकालो मेघागमस्तथा ।

तपात्ययऽथ मुदिरात्ययः शरदपि स्मृतः ।। १४५ ।।

ऋतुभिश्च त्रिभिश्चैकमयनं परिकीर्तितम् ।

अयने द्वे भवेद्वर्ष वत्सरो हायनः समाः ।।१४६ ।।

संवत्संवत्सरौ तुल्यौ भूम्न्येव समाः स्त्रियाम् ।

अब्दं शरद्भवेत्पैत्रमहोरात्रं तु मासतः ।। १४७ ।।

वर्षेण दैवतं तच्च प्राहुः पूर्वमुनीश्र्वराः ।

दैवे युगसहस्त्रे द्वे ब्राह्मयं कल्पा तु ते नृणाम् ।। १४८ ।।

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

कल्पान्तस्त युगान्तः स्यात्संवर्तप्रलयक्षयाः ।। १४९ ।।

कल्पोऽपि परिवर्तश्च समसुप्तिजिहानकौ ।

तत्काले च तदात्वं स्यात्फलं सान्दृष्टिकं मतम् ।। १५० ।।

आगामिसमये विद्यादायतिं तत्फलं पुनः ।

उदर्क इति संपूर्णः कालवर्गः क्रमोक्तितः ।। १५१ ।।

आकाशोऽस्त्री नभो व्योमान्तरीक्षं खं मरुत्पथः ।

पुष्कराभ्रे तथा विष्णुपदं मेघाश्रयोऽपि च ।। १५२ ।।

स्त्रीलिङ्गे द्योदिवौ देववर्त्मानन्ते विहायसि ।

अम्बरं तारकामार्गोऽभ्रमार्गोऽपि निरीक्ष्यते ।। १५३ ।।

मेघस्तु जलमुग्नभ्राड् घनाघनघनौ पुनः ।

तडित्वान्मुदिरो धूमयोनिजीमूतशद्रयः ।। १५४ ।।

जलदो जरवाहोऽभ्रं स्तनयित्नुर्बलाहकः ।

धाराधरो जलधरापर्जन्यगडयेरकाः ।। १५५ ।।

विद्युदैरावती सौदामिनी च जलवालिका ।

शम्पाचिरप्रभा तुल्ये चपला चञ्चला तथा ।। १५६ ।।

मेघानां तु या राजी कादम्बिन्यपि दृश्यते ।

दुर्दिनं वार्दलं वृष्टौ वर्षया सह ।। १५७ ।।

वृष्टिविघ्नेऽवग्रहः स्यादवग्राहो मतो नरि ।

आसारस्तु घनावेगवर्षणं (च) दिशा हरित् ।। १५८ ।।

दिक्काष्टाशा ककुप्पूर्वा प्रैच्यपाची तु दक्षिणा ।

पश्चिमा च प्रतीची स्यादुत्तरा त्वपरा स्मृता ।। १५९ ।।

प्रदिग्विदिक्त्वपदिशं दिग्भवे दिश्यमिष्यते ।

तिर्यग्दिगीश्वरा इन्द्रवह्निकीनाशनैर्ऋताः ।। १६० ।।

वरुणः पवनश्रीदावीशानोऽथ दिशां गजाः ।

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्ज (नः) ।। १६१ ।।

सार्वभौमः सुप्रतीकः पुष्पदन्तोऽष्टमस्तथा ।

हस्तिन्योऽष्टौ तु तेषां स्युरभ्रमुप्रमुखाः स्त्रियः ।। १६२ ।।

बुद्धः शास्ता महाबोधिर्धर्मधातुस्त्रिकालवित् ।

बोधिसत्त्वो जिनार्यौ च सुगतः श्रीघनाद्वयौ ।। १६३ ।।

तथागतश्चतुस्त्रिंशज्जातकज्ञो विनायकः ।

द्वादशाक्षस्त्रिकायश्च दयाकूर्चो मुनिश्वरः ।। १६४ ।।

बौद्धाप्तास्तु विपस्यी च शिखी स्याद्विश्वभूस्तथा ।

क्रकुच्छन्दः काञ्चनश्च काश्यपः शाक्यकेसरी ।। १६५ ।।

सौगताः सकलाः श्न्यवादिनोऽथार्हता अपि ।

स्याद्वादवादिनो यौगाक्षपादौ न्यायवेदिनि ।। १६६ ।।

लोकायतो दुर्दुरूटो बार्हस्पत्योऽपि नास्तिके ।

चार्वाकः स्यादथौलूक्यो वैशोषुककणाशनौ ।। १६७ ।।

आन्वीक्षिकी न्यायवीद्या मिमांसा च विचारणा ।

ओंकारः प्रणवो वदान्तः स्यादुपनिषत्तथा ।। १६८ ।।

धर्मशास्त्रं स्मृतिः शिक्षा कल्पो व्याकरणं तथा ।

ज्योतिश्छन्दो निरुक्तिश्च षडङ्गानिि यथाक्रमम् ।। १६९ ।।

अङ्गषट्कं तथा वेदा मीमांसान्वीक्षिकी तथा ।

पुराणं धर्मशास्त्रं च विद्याश्चतुर्दश ।।१७०।।

वाक्यं पदसमूहः स्यात्सुप्तिङन्तं पदं मतम् ।

आगमाप्तोक्तिराद्धन्ताः सिद्धान्तसमयावपि ।। १७१ ।।

कृतान्तश्चाथ सूत्रं स्यात्सुचकं प्रस्तुतार्थतः ।

तद्भाष्यमुच्यते यत्तु सूत्रमात्रार्थबोधकम् ।। १७२ ।।

प्रस्तावः स्यात्प्रकरणं वार्त्तिकं तत्प्रकीर्तितम् ।

उक्तानुक्तद्विरुक्तार्थचिन्तां यत्प्रकरोति हि ।। १७३ ।।

पदभावसमासार्थनिरन्तरसुबोधिका ।

टीकाथ पञ्चिका सा स्यात्पदमात्रविभञ्जिका ।। १७४ ।।

कारिका च स्वल्पवृत्तिः प्रचुरार्थविधायिनी ।

निघण्टुश्चापि निर्घण्टुः कथितौ नामसंग्रहे ।। १७५ ।।

इतिहासः पुरावृत्तं सर्वविद्या कलन्दिका ।

संबोधनं तथाह्वानमामन्त्रणहवावपि ।। १७६ ।।

हूतिराकारणं चैवाभिमन्त्रणमपि स्मृतम् ।

बहुकृताथ संहूतिः शपनं शपः ।। १७७ ।।

व्यवहारो विवादः स्यात्पृच्छा प्रश्नोऽनुयोजनम् ।

कथंकथिकता देवप्रश्ने तूपश्रुतिस्तथा ।। १७८ ।।

उपन्यास उपोद्घात उदाहारश्च वाङ्गुखम् ।

वार्तोदन्तौ प्रवृत्तिश्च वृत्तान्तः सा पुरातनी ।। १७९ ।।

एतिह्मं तु किंवदन्ती जनश्रुतिरुदाह्यता ।

नामाभिधा गोत्रसंज्ञाख्याह्वया अपि ।। १८० ।।

नामधेयं प्रिये वाक्ये चटु चाटु यथाक्रमम् ।

सत्यं यथातथं तथ्यं सद्भूतं च यथास्थितम् ।। १८१ ।।

समीचीनमृतं सम्यक् प्रियतथ्यं च सूनृतम् ।

क्लिष्टं तु संकुलं वाक्यं यदन्योन्यपराहतम् ।। १८२ ।।

सान्त्वं सुमधुरं ग्राम्यमश्लीलं म्लिष्टमस्फुटम् ।

अनक्षरमवाच्यं स्याद् ग्रस्तं लूप्ताक्षरं पदम् ।। १८३ ।।

अम्बूकृतं सथूत्कारं निरर्थकमबद्धकम् ।

मिथ्याभियोगोऽभ्याख्यानं ह्यदयंगमसंगते ।। १८४ ।।

ह्यद्यं श्रव्यं मनोहारि सुस्पष्टं प्रकटोक्तिकम् ।

अनृतं वितथालीके परुषे रूक्षनिष्ठुरे ।। १८५ ।।

पुष्टमांसादनं पृष्टे परदोषविभाषणम् ।

स्तेत्रमीडा स्तवः श्लाघा प्रशंसा वर्णना नृतिः ।। १८६ ।।

अर्थवादः स्तुति स्तवेऽपि स्याद्विकत्थनम् ।

वचचनीयताविगाने निन्दाक्षेपौ जुगुप्सनम् ।। १८७ ।।

परिवादापवादौ च निर्वादावर्णधिक्क्रियाः ।

कुत्साक्रोशौ तथा गालिं विरुद्धवचनं विदुः ।। १८८ ।।

क्षारणा रतशापे स्यादाशीः परसुभाषणम्व।

कीर्तिर्यशः समाज्ञा चाभिख्याम्रेडितमेव तत् ।। १८९ ।।

यद् द्विस्त्रिरुक्तमुल्लापः काकुवागपि कथ्यते ।

संलप्तिः संकथापि स्यादन्योन्योक्तिरुदीरिता ।।१९०।।

परिदेवनं विलापो विप्रलापो विरुद्धवाक् ।

रुशति त्वशुभा वाणी शुभा कल्याथ चर्चरी ।। १९१ ।।

चर्भटी चापलापः स्यात्रिह्नवोऽथ मुहुर्वचः ।

संभाषणं वाचिकं च संदेशवचनं विदुः ।। १९२ ।।

उपालम्भः सनिन्दो यस्तच्च स्यात्परिभाषणम् ।

आज्ञादेशौ नियोगश्च निर्दिष्टिः शासनं तथा ।। १९३ ।।

अङ्गीकाराभ्युपायास्थाः संधा संविच्च संश्रवः ।

प्रतिश्रवाभ्युपगमौ प्रतिज्ञासंगराश्रवाः ।। १९४ ।।

गीतं वाद्यं तथा नृत्तं तौर्यं नाट्यं प्रकीर्तितम् ।

संगीतमथ गीतं तु गेयं गान्धर्वमेव तत् ।। १९५ ।।

नृत्तं लास्यं तथा नृत्यं ताण्डवं नाट्यनर्तने ।

नटनं चोच्चतीले स्यात्पानगोष्टचामपि स्मृतम् ।। १९६ ।।

यत्रृत्तं मण्डलेन स्यात्स्त्रीणां हल्लीसकं च तत् ।

नृत्तस्थानं तथा रङ्गो नान्दी द्वादशतौर्यकम् ।। १९७ ।।

वाद्यं वादित्रमातोद्यं तूरतूर्ये स्मरध्वजः ।

वीणा च वल्लकी कण्ठकूणिका घोषवत्यपि ।। १९८ ।।

विपञ्ची सप्ततन्तीका कथिता परिवादिनी ।

नारदस्य च या वीणा महती परिगीयते ।। १९९ ।।

भारत्याः कच्छपी वीणानालम्बी शंकरस्य च ।

प्रभावती गणानं स्यात्तुम्बरोश्च कलावती ।। २०० ।।

कोलम्बो वल्लकीदेहः प्रवालो दण्ड इष्यते ।

निबन्धनं तूपनाहः ककुभश्च प्रसेवकः ।। २०१ ।।

ततं वीणादिकं वाद्यं वंशादि शुषिरं विदुः ।

घनं तालादिकं चाथानद्धं मुरजमुख्यकम् ।। २०२।।

लयः साम्यं पुमस्तालः क्रियया कालसंमितिः ।

मुरजस्तु मृदङ्गोऽथ समावानकदुन्दुभी ।। २०३ ।।

भेरी ढक्का यशःपुत्रपटहः परिकीर्त्यते ।

वल्लकीवादनं कोणः शारिकापि तथोच्यते ।। २०४ ।।

बुद्धिः प्रज्ञा मतिर्मेधा मनीषा धिषणा च धीः ।

चेतना प्रतिभा ज्ञप्तिशेमुषीदृष्टयस्तथा ।। २०५ ।।

पण्डा तत्त्वानुगा बुद्धिर्धारणं ग्रहणं तथा ।

अर्थविज्ञानमूहादि तत्त्वज्ञानं च धीगुणाः ।।२०६ ।।

मोक्षबूद्धिर्मता ज्ञानं विज्ञप्तिः शास्त्रशिल्पयोः ।

लज्जा व्रीडा त्रपा ह्रीश्च मन्दाक्षं चाथ संलयः ।। २०७ ।।

निद्रासंवेशशयनप्रमीलाः श्र्वाससंहतिः ।

तन्द्रानन्दीमुखीस्वापाः सुप्तं निद्राधिका पुनः ।। २०८ ।।

उत्कण्ठारतिरौत्सुक्यं ह्यल्लेखायल्लके अपि ।

तन्द्रा कौसीद्यमालस्यं जाड्ये मौर्ख्यं च म्ढता ।। २०९ ।।

विषादस्त्ववसादः स्यात्सादोऽपि च विषण्णता ।

शोकः शोचनखेदौ शुक् क्रोधः कोपक्रुधारुषाः ।। २१० ।।

मन्युः प्रतिधरोषौ रुड् उद्योगः प्रौढिरुद्यमः ।

प्रगल्भताभियोगौ चोत्साहश्च कियदेति का ।। २११ ।।

भयं दरः साध्वसं भीराशङ्कातङ्कभीतयः ।

भीषणं दारुणं रौद्रं भीष्मं तथा ।। २१२ ।।

भीमं भयानकं घोरं भैरवं च भयावहम् ।

करवीरं प्रतवनं स्मशानं प्रेतधाम च ।। २१३ ।।

आश्चुर्यमद्भतं चित्रं विस्मयश्चद्यमेव च ।

शमश्चोपशमः शान्तिः शमथोऽपि निगद्यते ।। २१४ ।।

हासस्तु घर्घरो हास्यं हासिका हसनं हसः ।

अदृष्टरदहास्यं तु स्मितं वक्रोष्टिका पुनः ।। २१५ ।।

अट्टहासो महाहासोऽपहासोऽकारणोद्भवे ।

रोमाञ्चः पुलको रोमविकारो रोमहर्षणम् ।। २१६ ।।

रोमौदमस्तूद्धुषणं कथितः कण्टकोऽपि च ।

आनन्दः प्रमदो हर्षानन्दथू प्रतिसंमदौ ।। २१७ ।।

मुदैमोदप्रमोदाश्च ह्लादश्चित्तप्रसन्नता ।

गर्वश्चित्तोन्नतिर्दर्पोऽभिमानश्चावलिप्ता ।। २१८ ।।

अहंकारः स्मयो मानो मरदेऽपि विभाव्यते ।

परिश्रमःश्रमः क्लेशः क्लमो व्यायाम इत्यपि ।।२१९।।

आयासश्च प्रयासोऽपि दैन्यं कार्पण्यमुच्यते ।

नटो भरतपुत्रः स्याच्छैलाली भरतोऽपि च ।। २२० ।।

शैलूषो नर्तको रङ्गाजीवो रङ्गावतारकः ।

कुशाश्वी सर्वकेशी च धर्मीपुत्रोऽपि दृश्यते ।। २२१ ।।

सूचकः सूत्रधारः स्यान्नन्दी नान्द्याः प्रपाठकः ।

वेश्यासूरिः पीठमर्दश्चारणश्च कुशीलवः ।। २२२ ।।

भ्रूकुंशश्च भ्रकुंशश्च भृकुंशो भीरुवेषभृत् ।

विद्षकः केलिकिलः प्रहासिप्रीतिदौ पुनः ।। २२३ ।।

वासन्तिको विटश्चाथ षिङ्गपल्लवकौ समौ ।

पूज्यो भट्टारको भट्टो देवस्तत्रभवानपि ।। २२४ ।।

भगवद्भट्टारकौ पादात्रभवन्तौ विभाविभौ ।

भूमिर्भूर्वसुधा विश्वा धरोर्वी जगती रसा ।। २२५ ।।

पृथ्वीी क्षोणी क्षमा गन्धमाता गोत्रा वसुंधरा ।

रत्नगर्भा स्थिरा भूतधात्रीला कुर्मही क्षितिः ।। २२६ ।।

विश्वंभरा रत्नगर्भा मेदिनी सागराम्बरा ।

विपुला काश्यपी रत्नबीजसूरचलावनिः ।। २२७ ।।

पृथ्वी पर्वताधारा गौर्या सागरमेखला ।

सर्वंसहा धरित्री च क्ष्मानन्ता धरणी तथा ।। २२८ ।।

धरित्री वार्धिनेमी च द्यावाभूमी तु रोदसी ।

तथा द्यावापृथिव्यौ च ज्ञेये द्यावाक्षमे अपि ।। २२९ ।।

सर्वसस्या मही च स्यादुर्वरा मृत्तु मृत्तिका ।

इरिणं तूषरं धन्वा स्थलं प्रोक्ता स्थली पुनः ।। २३० ।।

मृत्सा मृत्स्ना च रम्या मृत्खिलं क्षेत्राहतं पदम् ।

लवणं वशिरोऽक्षीवं यत्समुद्रसमुद्भवम् ।। २३१ ।।

सैन्धवं माणिमन्थं च नदीभवमपि स्मृतम् ।

रोमकं तु रुमाजातं वसूकं वसुकं तथा ।। २३२ ।।

रुमा लवणखानिस्तु विडं पाक्यं च कृत्रिमे ।

सौवर्चलं शूलहरं दुर्गन्धरुचके पुनः ।। २३३ ।।

श्यामे च तिलकं तस्मिन् टङ्कणो रसशोधनः ।

मालतीतीरजोऽथ स्याद्यवक्षारश्च पाचनः ।। २३४ ।।

यवनालजस्तथा पाक्यो यवाग्रज इतीष्यते ।

स्वर्जिः सुवर्चिका योगवाही स्त्रुघ्नी निगद्यते ।। २३५ ।।

क्षेत्रं वर्षधराद्यङ्कं वर्षं देशोऽथ मण्डलम् ।

राष्ट्रं जनपदो निर्गो विषयो नीवृदीरितः ।। २३६ ।।

उपवर्तमथार्योऽसावुत्तमोत्पत्तिविश्रुतः ।

अन्तर्वेदिस्तथा गङ्गाकालिन्द्योर्मध्यमुच्यते ।। २३७ ।।

सरस्वतीदृषद्वत्योर्ब्रह्मावर्तोऽन्तरः स्मृतः ।

मध्यं विन्ध्यहिमाद्योश्चाचारवेदी तु पुण्यभूः ।।२३८ ।।

अन्तरं च कुरुक्षेत्रपञ्चरामनदाह्वयोः ।

ब्रह्मवेदिः कुरुक्षेत्रं धर्मक्षेत्रं च कथ्यते ।। २३९ ।।

मध्यं यद्धिमवद्विन्ध्यगिर्योः प्रत्यग्प्रयागतः ।

देशो विनशनात्प्राक्तु मध्यदेशोऽपि मध्यमः ।। २४० ।।

प्राग्दक्षिणस्तथा प्राच्यो नदीं यावच्छरावतीम् ।

प्रत्यन्तो म्लेच्छदेशोऽथोदीच्यः स्यात्पश्चमोत्तरः ।। २४१ ।।

निर्जलो जङ्गलो देशः कचछोऽनूपोऽम्बुमान्स्मृतः ।

कृष्णमृ त्कृष्णभूमः स्यात्कुमुद्वान्कुमुदालयः ।। २४२ ।।

नड्वलश्च नडप्रायो नडकीयोऽपि कथ्यते ।

सपङ्कः पङ्किलो देशः शर्करावांश्च शार्करः ।। २४३ ।।

नद्यम्बुजीवनो देशः स्यान्नदीमातृकः पुनः ।

शाड्वलः शादहरितो वेतस्वान्बहुवेतसः ।। २४४ ।।

वृष्टिजीवन आख्यातो मण्डलं देवमातृकः ।

डाहलास्त्रैपुरा देशा मालवाश्चाप्यवन्तयः ।। २४५ ।।

माधुमताश्च काश्मीरास्तर्जिकास्तायिका मताः ।

दशेरकाश्च मरवो वाहीकाष्टक्किसंज्ञीताः ।। २४६ ।।

अङ्गाश्चम्पोपलक्ष्याः स्युर्मगधाः कीकटाः स्मृताः।

कुमालकाश्च सौवीराश्चैदयश्चैद्यसंज्ञकाः ।। २४७ ।।

केरला औड्रनामानो वाह्लीका वह्लिका मताः ।

मुरण्डाश्चापि लम्पाकाः शाखयश्च तुरुष्ककाः ।। २४८ ।।

ग्रामो निवसथश्चापि तथा संवसथः स्मृतः ।

तदर्धे पाटकः प्रोक्तः सीमाघाटो घटोऽवधिः ।। २४९ ।।

मर्यादान्तोऽवसानं चोपशल्यं ग्रामसीमनि ।

ग्रामन्तराटवी मालं कर्मान्तोऽपि च कर्मभूः ।। २५० ।।

पर्यन्तभूः परिसरो गोस्थानं गोष्टमेव च ।

गोष्ठीनं भूतपूर्वं च गवीनं चाशितं हि तत् ।।२५१ ।।

यत्राशिताः पुरा गावः क्षेत्रं वप्रस्तथोच्यते ।

केदारः सेतुपाल्यालिसंवराः सङ्करणी ाः स्तथा ।। २५२ ।।

धूली रेणू रजः पांशुश्चूर्णं क्षोदः खलं पुनः ।

खलधानं दलिर्लोष्टे लेष्टुलोष्टू तु कुत्रचित् ।। २५३ ।।

मेधिर्मेथिः खले काष्टं पशुबन्धाय निर्मितम् ।

वल्मीको वामलूरश्च नाकुः कृमिगिरिस्तथा ।। २५४ ।।

वम्रीकूटं शक्रमूर्धा पुः पुरी नगरी पुनः ।

द्रङ्गोद्रङ्गौ समौ तत्र पत्तनं पुटभेदनम ।। २५५ ।।

निगमो निवेशनं च स्थानीयं च निगद्यते ।

दुर्गकोट्टं स्कन्धावारराजधान्यौ महीयसि ।। २५६ ।।

पुरार्धवीस्तरः खेटः तथा शाखापुरे पुनः ।

उपपूर्वपुरे चाथ कन्याकुब्जं महोदयम् ।। २५७ ।।

कान्यकुब्जं गाधिपुरं काश्यां वाराणसीत्यपि ।

वराणसी शिवपुरी विदेहा मिथिलापि च ।। २५८ ।।

अ योध्याध्यां च साकेतं कोशलापि च दृश्यते ।

उज्जयिन्यामवन्ती च तथा पुष्पकरण्डिनी।। २५९ ।।

चम्पा च मालिनी चेदिपुरी तु त्रिपुरी स्मृता ।

मथुरायां मधूपध्नं मधुराथ तमालिनी ।। २६० ।।

तामलिप्तं दामलिप्तं तामलिप्तीत्यपीक्ष्यते ।

गजनामपुरं हस्तिनापुरं हस्तिनीपुरम् ।। २६१ ।।

कुण्डिनं च विदर्भायां नलस्य निषधा पुरी ।

तथा पाटलिपुत्रं च कुसुमाख्यपुरं तथा ।। २६२ ।।

वत्सपत्तनकौशाम्ब्यौ द्वारका द्वारवत्यपि ।

वप्रोऽथ वरणः साले चयः प्राकार एव च ।। २६३ ।।

कपिशीर्षं तु वप्राग्रं क्षोमाट्टाट्टालकाः समाः ।

प्रतोल्यां गोपुरं रथ्या विशिखापि तथोच्यते ।। २६४ ।।

आवेष्टको वृतिर्वटो मार्गोऽध्वा सरणिः- सृतिः ।

निगमः पद्धतिः पद्या पन्था एकपदी पुनः ।। २६५ ।।

पदवी वर्त्म मञ्जुः स्यात्सुपन्थाश्चातिपूर्वकः ।

अपन्था अपथं चैव उन्मार्गो मार्गवर्जिते ।। २६६ ।।

दुरध्वः कापथो व्यध्वा कदध्वा विपथं तथा ।

प्रान्तरं दूरशून्योऽसो कान्तारो दुर्गमो मतः ।। २६७ ।।

भुवोऽन्तरं गूढमार्गः सुरुङ्गा सन्धिलापि सा ।

चतुष्पथं चतुष्कं च संस्थानं च निगद्यते ।। २६८ ।।

त्रिपथे तु त्रिकं घन्टापथः संसरणं च तत् ।

राजमार्गश्रीपथौ च महामार्गोपनिष्करे ।। २६९ ।।

मार्गत्रयं च शृङ्गाटं चत्वरं बहुपथं स्मृतम् ।

मन्दिरं सदनं गेहं गृहं सद्म निकेतनम् ।। २७० ।।

निकाय्यो नीलयो वेश्मालयो भवनमुच्यते ।

धामावासो निवासोऽपि निशान्तं धिष्ण्यमाश्रयः ।। २७१ ।।

अगारं शरणं पस्त्यं संस्त्यायावसथावपि ।

स्थानौकसी गृहा भूम्नि क्षयकूटौ तथा कुलमे ।। २७२ ।।

मण्यादिर्भिबद्धभूमिः कुट्टिमं कथितं च तत् ।

हर्म्यं धनीगृहं प्रासादो देवानां च भूपतेः ।। २७३ ।।

शिरोगृहं चन्द्रशाला कोषः स्याद्भाण्डधामनि ।

सौधं राजगृहं छात्रावासेऽप्यावस थ स्मृतः ।। २७४ ।।

मठावसथ्यौ व४सौकः स्वापगृहमुदीरितम् ।

उटजः पर्णशाला स्याच्चैत्यं बौद्धजिनालये ।।२७५ ।।

विहारोऽपि च तत्रैव कायमानं तृणगृहम् ।

संधानी कुप्यशाला स्यान्मन्दुरा वाजिनं गृहम् ।। २७६ ।।

गर्भधामापवरके पाकधाम मगानसम् ।

यन्त्रगृहं तैलशाला गर्तिका तन्तुधामनि ।। २७७ ।।

चतुरं करिणां शाला होत्रीयं हविषो गृहम् ।

जालिनी चित्रशाला च तथा संदानिनी गवाम् ।। २७८ ।।

वपनी नापितानां च शिल्पा खरकुटीत्यपि ।

प्रतिश्रयः सत्रशाला नीरशाला प्रपा पुनः ।। २७९ ।।

आथर्वणं शान्तिधामारिष्टं स्यात्सूतिकागृहम् ।

सुरागृहं च गञ्जाथैवेशनं शिल्पिनां गृहम् ।। २८० ।।

उपघ्नश्चान्तिकागारं मुनिस्थाने तथाश्रमः ।

पक्वणो वरटावासो घोषश्चाभीरपल्लिका ।। २८१ ।।

पुरं वेश्योऽपि वेश्यानामाश्रयः परिकीर्तनः ।

जनाश्रयो मण्डपोऽथ पण्यशालापणौ तथा ।। २८२ ।।

हट्टाट्टौ विपणिर्भित्तिः कुड्यं वेदी वितर्दिका ।

एडूकं क्लीबलिङ्गे स्याद्यदन्तर्न्यस्तकीकसम् ।। २८३ ।।

अङ्गणं चत्वरं तुल्ये अजिरं प्राङ्गणं तथा ।

अर्गला परिघः साल्पा सूचिरर्गलिका पुनः ।। २८४ ।।

कुञ्चिकायां च साधारण्यङ्कुटः कूचिका च सा ।

तालकं द्वारयन्त्रं च तस्योद्घाटनकं यथा ।। २८५ ।।

प्रतिताली च ताली सा कपाटस्त्वररिः पुमान् ।

अररं च कुवाटोऽपि बाह्यद्वारं च तोरणम् ।। २८६ ।।

गोपानसी च वलभी वक्रकाष्ठावृते तदे ।

उम्बरो देहली चापि गृहावगृहणी स्त्रियाम् ।। २८७ ।।

उदम्बरोऽम्बरोऽलिन्दे प्रघाणः प्रघणोऽपि च ।

बहिर्द्वारप्रकोष्ठे स्याद्विशिष्यैव विभाव्यताम् ।। २८८ ।।

छदिस्तु पटलं तुल्ये वलीकं नीव्रमुच्यते ।

इन्द्रकोशस्तमङ्गोऽपि नीव्रप्रान्त उभौ समौ ।। २८९ ।।

गवाक्षजालकौ तुल्यौ वातायनमपीक्ष्यते ।

द्वार्द्वारं च प्रतीहारः कोणोऽणिः कोटिरित्यपि ।। २९० ।।

सोपानारोहणे तुल्ये निःश्रेणिश्चाधिरोहिणी ।

सर्वतोभद्रविच्छनदनन्द्यावर्तादयोऽपि च ।। २९१ ।।

स्वस्तिकश्चेभ्यसदनभेदाः सन्त्येव भूरयः ।

संक्षिप्यान्योपकाराय परमानन्द उक्तवान् ।। २९२ ।।

पाञ्चालिका शालभञ्जी पुत्रिका काष्टनिर्मिता ।

लेप्योद्भवा त्वञ्जलिकारिका सा परिकथ्यते ।। २९३ ।।

मञ्जूषा संपुटः पेटा समुद्गः शोधनी त्वथ ।

समूहनी वर्धनी च तथा संमार्जनीत्यपि ।। २९४ ।।

उलूखलोदूखले च कलिञ्चमुशलौ पुनः ।

कण्डोलकपिटेऽयोग्रं संकरावकरौ समौ ।। २९५ ।।

तितउश्र्चालनी चाथ शूर्पप्रस्फोटने समे ।

प्रस्फोटनं तु पवनेऽवघातः कण्डनं पुनः ।। २९६ ।।

चुल्यधिश्रयिणी स्थाली पिठरोखे चरुस्तथा ।

कुटो निपो कटः कुम्भः करीरकलसौ समौ ।। २९७ ।।

कलशौऽलिञ्जरेऽथ स्यान्महाघटमणीवकौ ।

दर्विस्तु कम्बिखजकौ हसन्यङ्गारपात्रिका ।। २९८ ।।

अङ्गारशकटी चैव हसन्त्यङ्गारधान्यपि ।

कलशी गर्गरी तुल्ये मन्थनी मथनोचिता ।। २९९ ।।

कटाहकर्परौ तुल्यौ करङ्को नालिकेरजः ।

मन्थानः खजको मन्थो वैशाखो मन्थदण्डकः ।। ३०० ।।

मन्था मन्थस्य विष्कम्भे मञ्जीरकुटरावपि ।

शरावे वर्धमानोऽपि तथा शालाजिरोऽप्यसौ ।। ३०१ ।।

कौशिका मल्लिका तुल्ये चषकः कंससंज्ञकः ।

पारी तु स्यात्पानपात्रं स्नेहपात्रं कुतूः स्त्रियाम् ।। ३०२ ।।

तदल्पं कुतपः पात्रममत्रं भाजनं समे ।

स्थालं तत्र विशालं स्यात्पिधानं स्यादुदञ्चनम् ।। ३०३ ।।

दृतिश्र्चर्ममयी खल्लस्त्वालूः करकपात्रिका ।

पर्वतः शिखरी भूध्रो गोत्राद्री भूधराचलौ ।। ३०४ ।।

नगोऽहार्यः सानुमांश्र्च शौलो ग्रावा शिलोच्चयः ।

धरो गिरिः पूर्वशैलेऽथोदयः परिकीर्तितः ।।३०५।।

अस्ताचलः प्रान्तभूध्ने मेरुः स्यात्काञ्चनाचलः ।

सुमेरुः स्वर्गिरी रत्नसानुः स्वर्गगिरिस्तथा ।। ३०६ ।।

हिमालयो हिमप्रस्थो मेनकाप्राणवल्लभः ।

भवानीजनकश्चापि हिमवानपि कथ्यते ।। ३०७ ।।

मैनाको हिमवत्पुत्रे सुनाभोऽष्टापदे त्वथ ।

स्फटिकाद्रिरथ कैलासे रजतोऽद्रिर्मलये त्वथ।। ३०८ ।।

आषाढो दक्षिणाद्रिः स्यात्क्रौञ्चक्रञ्चौ समावुभौ ।

इन्द्रकीले मन्दरोऽपि सुवेलस्त्रिककुत्तथा ।। ३०९ ।।

त्रिकूटोऽपि त्रिमुकुटः सुदारुः पारियात्रिकः ।

शत्रुंजयो विमलाद्रिर्वीन्ध्ये च जलवालकः ।। ३१० ।।

रैवते तूज्जयन्तः स्यादुहायां गह्वरं मतम् ।

देवखतबिले च स्याद्दरी स्त्री कन्दरोऽस्त्रियाम् ।। ३११ ।।

तटे भृगुः प्रपातोऽथ शिखरे शृङ्गकुटके ।

नितम्बमेखले भूध्ननध्ये च कटकस्तथा ।। ३१२ ।।

पर्यन्तपर्वताः पादा द्रोणी सन्धिस्तु शैलयोः ।

तिर्यग्बहिःप्रदेशाः स्युः दन्तका निर्गता गिरेः ।। ३१३ ।।

प्रस्थे स्नुः सानुरस्त्री स्यादधोभूमिरुपत्यका ।

अधित्यका तूर्ध्वभूमिः पाषाणाश्मदृषच्छिलाः ।। ३१४ ।।

ग्रावोपलौ प्रस्तरश्च गण्डशौलाश्चुताः शिलाः ।

खटी तु कठिनी शुक्लधातुः स्यात्खटिनीत्यपि ।। ३१५ ।।

गिरेर्मनः शिलादिः स्याद्धातुः स्यादैरिकादिकम् ।

अथाकरे खनिः खानिर्लोहं कालायसं घनम् ।। ३१६ ।।

सास्त्रं पिणडं शिलासारं गिरिसारमयोऽपि च ।

तीक्ष्णकृष्णामिषे पारशवं तत्किट्टके पुनः ।। ३१७ ।।

मण्डूरसरणे धूर्तसिंहाने विकृतिः कुशी ।

ताम्रं शुल्वं मर्कटास्यं रक्तं म्लेच्छनुखं तथा ।। ३१८ ।।

उदुम्बरं ह्यष्टब्रह्मवर्धने च कनीयसम् ।

सीसं नागं सीसपत्रं वध्रं सिन्दूरकार णम् ।। ३१९ ।।

गण्डूपदभवं वप्रं योगेष्टं च सुवर्णकम् ।

कस्तीरं त्रपु वङ्गं च नागजं नागजीवनम् ।। ३२० ।।

मृद्वङ्गं स्वर्णजं रङ्गं सिहलालीनके अपि ।

गुरुपत्रं चक्रसंज्ञं पिच्चटं तमरं तथा ।। ३२१ ।।

रूप्यं च रजतं तारं श्र्वेतं दुर्वर्णकं पुनः ।

हिमांशुहंसकुमुदाभिख्य खर्जूरमप्यथ ।। ३२२ ।।

सुवर्णं काञ्चनं रुक्मं कल्याणं कनकं वुसु ।

हिरण्यं हाटकं वह्निबीजं चामीकरार्जुने ।। ३२३ ।।

कार्तस्वरं जातरूपं गाङ्गेयं भूरिभर्मणी ।

स्वर्णं चन्द्रो हेमशातकुम्भे रजतभूत्तमे ।। ३२४ ।।

लोहोत्तमं गारुडं च महारजतकर्बुरे ।

जाम्बूनदं गैरिकं च निष्कं चाष्टापदं तथा ।। ३२५ ।।

रूप्यस्वर्णद्वयं श्र्लेषः कथ्यते घनगोलकः ।

अथालङ्कारपीते स्याच्छ्टङ्गीकनकमायुधम् ।। ३२६ ।।

कुप्यं तु तद्द्वयादन्यद्रूप्यं तु द्वयमाहतम् ।

आरं तु पित्तलेऽथारकूटो रीरी सुलोहकम् ।। ३२७ ।।

पीतलोहं रिरी रीतिः कपिलोहं सुवर्णकम् ।

कपिला तु ब्रह्मरीतिर्ब्राह्मी सा च महेश्र्वरी ।। ३२८ ।।

रङ्गताम्रोद्भवं कांस्यं घोषं सौदामिनीप्रियम् ।

असुराह्वं प्रकाशं च पारदे सूतपारतौ ।। ३२९ ।।

हरबीजं रसो लोलो गन्धिको गन्धकोऽपि च ।

शुकपुच्छस्ताम्रशुत्रुः पामारिः कुष्टनाशनः ।। ३३० ।।

हरितालं विस्त्रगन्धि गोदन्तं नटमण्डपम् ।

बिडालं पिञ्जरं वङ्गशत्रुर्लोमहरं तथा ।। ३३१ ।।

खर्जूरं पीतनं वंशपत्रकं चालपीतके ।

अभ्रकं गगनं स्वच्छपत्रं च गिरिजामले ।। ३३२ ।।

मेघाख्यमथ तुत्थं च शिखिग्रीवमयूरके ।

तुत्थाञ्जनं कांश्यनीलं मूषातुत्थं वितुन्नकम् ।। ३३३ ।।

स्रोतोञ्जनं च कापोतं सौवीरं कृष्णयामुने ।

सौराष्ट्री पार्वती काक्षी कालिका पर्पटी सती ।। ३३४ ।।

मनःशिला नागमाता मनोगुप्ता च गोचनी ।

मनोह्वा कुनटी गोला नेपाली रसनेत्रिका ।। ३३५ ।।

करवीरा नागजिह्वा सिन्दूरं नागजं पुनः ।

शृङ्गारभूषणं नागरक्तं वोले शशः पुनः ।। ३३६ ।।

प्राणो गोपरसः पिण्डस्तथा गन्धरसः स्मृतः ।

कुरुविन्दो हंसपादो हिङ्गुलोऽथ शुलाजतु।। ३३७ ।।

अश्मजं गिरिजमर्थ्यं गैरेयेऽथ कुलात्थिका ।

चक्षुष्या च कुलाली स्यात्काचे क्षारोऽपि कथ्यते ।। ३३८ ।।

वसुरत्ने मणिर्भेदा इन्द्रनीलादयो मताः ।

वालालायजवैडूर्ये गारुमत्मतहरिन्मणी ।। ३३९ ।।

लक्ष्मीपुष्पः पझरागो हीरको वज्रनामभृत् ।

सूचीमुखं रत्नमुख्यं वरारकमपीक्ष्यते ।। ३४० ।।

राजावर्तो राजपट्टो विराटज इतीरितः ।

विद्रुमो रक्तकन्दः स्याद्रक्ताङ्को हेमकन्दलः ।। ३४१ ।।

प्रवालं सूर्यकान्ते तु सूर्याश्मा दहनदृषत् ।

चन्द्रकान्तश्चन्द्रमणिश्चान्द्रोपलौ समौ ।। ३४२ ।।

रसोद्भवं शुक्तिजं च मुक्ता मुक्ताफलं स्मृतम् ।

मौक्तिकं भूमिवर्गोऽयमुक्तः कायस्थभानुना ।। ३४३ ।।

पानीयं जीवनं तोयं शंवरं नीरवारिणी ।

पुष्करं कं जलं पाथः सलिलं सर्वतोमुखम् ।। ३४४ ।।

कीलालं यादसां वासः कुशं क्लीबे पयः पुनः ।

दकोदके वनं क्षीरं भवनं कमलं समे ।। ३४५ ।।

आपः स्त्रियां बहुत्वे च मेघपुष्पार्णसी मते ।

अमृतं प्राणदं नारं जीवनीयाम्बुनी अपि ।। ३४६ ।।

अम्भो घनरसः पुंसि वाः क्लीबे रत्नमुच्यते ।

अगाधमतलस्पृक् चास्थागमस्ताघमेव च ।। ३४७ ।।

अस्थाघं च तथा प्रोक्तं निम्रे गम्भीरमुच्यते ।

गभीरं शब्दभेदेनोत्तानं स्यात्तद्विलक्षणम् ।। ३४८ ।।

प्रसन्नाच्छेऽप्यथानच्छमावीलं कलुषं समे ।

प्रालेयतुहिने तुल्ये अवश्यायो नरि स्मृतः ।। ३४९ ।।

नीहारश्च तुषारश्च हिमं च मिहिका स्त्रियाम् ।

घनोपलस्तु करको हिमानी तु हिमोच्चयः ।। ३५० ।।

समुद्रः सागरः सिन्धु र्वीचिमाली नदीपतिः ।

पारावारो जलनिधिर्मितद्रुश्चार्णवोदधी ।। ३५१ ।।

अवारपाराकूपारौ उदन्वान्मकराकरः ।

रत्नाकरः सरस्वांश्च यादः पतिजलाशयौ ।। ३५२ ।।

तरङ्गो वीचिभङ्गोर्मिकलिका महति त्विह ।

कल्लोलोल्लोललहारिभेदाश्चाब्धिकफे पुनः ।। ३५३ ।।

डिण्डीरः फेनकश्चापि बुद्बुदे स्थासकः पुमान् ।

जलवृद्धिः स्त्रियां वेलावर्तस्तु पयसां भ्रमः ।। ३५४ ।।

तालूखोलकौ तुल्यौ कूलभूः कच्छरोधसी ।

कूले प्रापातमर्यादे प्रतीरं तीरमेव च ।। ३५५ ।।

पुलिनं जलहीनं तत्सैकतं सिकतामये ।

अन्तर्जले चान्तरीपं द्वीपं चाथं नदी पुनः ।। ३५६ ।।

स्त्रोतस्विनी द्वीपवती तटिनी वाहिनी सरित् ।

धुनी तरङ्गिणी कुल्या स्त्रोतो निर्झरिणी तथा ।। ३५७ ।।

जम्बालिनी पर्वतजा रोधोवक्रा स्त्रवन्त्यपि ।

शैवलिनी जलधिगा कर्षूः कूलंकषापगा ।। ३५८ ।।

वहा च ह्वदिनी सिन्धु गा सागराङ्गना ।

हिरण्यवर्णा सा प्रोक्ता सरस्वत्यपि कथ्यते ।। ३५९ ।।

गङ्गा मन्दाकिनी भागीरथी त्रिपथगा च सा ।

त्रिस्त्रोता जाह्नवी विष्णुपदी च हरशेखरा ।। ३६० ।।

सिद्धापगा खापगा च ऋषिकुल्या सरिद्वरा ।

स्वर्णदीहैमवत्यौ च स्ववापी स्वर्गता नदी ।। ३६१ ।।

कालिन्दी यमुना सूर्यजा यमी च यमस्वसा ।

नर्मदा स्यात्पूर्वगङ्गा इन्दुजा मेकलाद्रिजा ।। ३६२ ।।

रेवा गोदावरी गोदा तापी स्यात्तपनात्मजा ।

गौमती चापि वाशिष्टी विशिष्यैवं निरीक्ष्यताम् ।। ३६३ ।।

शतद्रुः स्याच्छुतुद्रुस्तु चन्द्रभागा तु चन्द्रिका ।

सरस्वती ब्रह्मपुत्री विपाशा च विपाष्ट् स्त्रियाम् ।। ३६४ ।।

अर्जुनी बाहुदा सैतावाहिनी चापि कथ्यते ।

वैतरणी नरकस्था कावेरी त्वर्धजाह्नवी ।। ३६५ ।।

स्वतोऽम्भःसरणं स्त्रोतःप्र वाहौ तावुभौ समौ ।

वेणी धारा रयोऽथ स्यादुत्तराख्या विशेषत- ।। ३६६ ।।

घट्टस्तीर्थोऽवतारोऽम्बुवृद्धौ पूरः प्लवोऽपि च ।

वक्राणि पुटभेदाः स्युर्भ्रमास्तु जलनिर्गमाः ।। ३६७ ।।

जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।

प्रणाली जलमार्गश्च पानं कुल्या च सारणिः ।। ३६८ ।।

वालुकाः प्रोक्ता बिन्दवः पृषतः प्रषत् ।

विप्रुषोऽप्यथ जम्बालचिकिलौ कर्दमः पुमान् ।। ३६९ ।।

पङ्को निषद्वरः शादो मृच्चते स्वल्पवारितः ।

हुरण्यबाहुरुक्तास्तु शोणे नदे वहोऽपीरितः ।। ३७० ।।

सरस्वांश्चोध्यभिद्यौ च ह्नदोऽगाधजलो द्रहः ।

कूपोऽन्धुरुदपानोऽथ नेमी स्यात्तन्त्रिका स्त्रियाम् ।। ३७१ ।।

नान्दीपुटो नान्दीमुखो वीनाहो मुखबन्धनम् ।

निपानं त्वाहवः पुंस्युपकूपोऽपि च दृश्यते ।। ३७२ ।।

वापी स्याद्दीर्घीका क्षुद्रकूपे चूरी च चूतकः ।

अरघट्टो घटीयन्त्रे पादावर्तोऽपि कथ्यते ।। ३७३ ।।

देवखाते त्वखातं स्यात्खातकं पुष्करिण्यपि ।

तडागः सरसी पद्माकरः कासार एव च ।। ३७४ ।।

वेशन्तश्च सरः स्तोकं पल्वलः परिकीर्तितः ।

खातिका परिखा खेयाथावालः स्थानकं पुनः ।। ३७५ ।।

आवापश्चालवालोऽपि वृक्षस्थानकमुच्यते ।

निर्झरस्तु झरश्चोत्सः स्त्रवः प्रस्त्रवणं सरिः ।।

जलाशया जलाधारा वारिवर्गो विवेचितः ।। ३७६ ।।

इति श्रीकायस्थचिरवारीयमाथुखंशभूषणमणिश्रीगढमलपुत्रश्रीमत्परमानन्दनन्दनविरचितायां परमानंदीयनाममालायां द्वितीयः परिच्छेदः समाप्तः ।।

अथ तृतीयः परिच्छेदः

प्रणौमि परया भक्त्या प्रकृष्टविभुतां विभुम् ।

नाशोत्पादस्थितिप्रष्टं परब्रह्म निरञ्जनम् ।। १ ।।

मदीयमानसाम्भोजराजहंससमप्रभम् ।

सदा प्रमोदपीयूषसिन्धुकेलिकलाकुलम् ।। २ ।।

अग्निश्छागरथो वह्निः कृशानुः पावकः शिखी ।

चित्रभानुश्च दमुना धनंजयहुताशनौ ।। ३ ।।

धूमध्वजो बृहद्भानुर्ज्वलाजिह्वस्तनूनपात् ।

वैश्वानरः सप्तमन्त्रो जातवेदास्तरीरपि ।। ४ ।।

ज्वलनो जागृविर्बर्हिः कृष्णवर्त्मानलौ शुचिः ।

शुष्मदस्मौ तथा वीतिहोत्रानिलसखौ वसु ः ।। ५ ।।

शुक्रो विभावसुः केशश्चित्रभानुरुषर्बुधः ।

वृषाकपिः शमीगर्भो रोहिताश्वो विरोचनः ।। ६ ।।

अर्चिष्मानाश्रयाशोऽपि विश्वप्सा बहुलो हरिः ।

तिथः कृपीटयोनिश्च तुत्थो हव्यवहः स्मृतः ।। ७ ।।

सप्तोदर्चिरत्पित्तं च हव्यवाहाशुशुक्षणी ।

पचनो हिरण्यरेता बर्हिज्योतिस्तमोहरः ।।८ ।।

अग्निप्रिया स्मृताग्नायी स्वाहापि कथिता स्मृतौ ।

संवर्तकः समुद्राग्निर्वडवामुखवाडवौ ।। ९ ।।

वडवानल और्वोऽपि दवदाववनाग्नयः

इरंमदो मेघवह्निः करीषानलछागणौ ।। १० ।।

तुषवह्नौ कुकूलः स्यात्तुल्यौ संतापसंज्वरौ ।

बाष्पे ऊष्माप्यथो वाह्निजिह्वा कीला शिखार्चिषः ।। ११ ।।

ज्वाला हेतिः शिखा वृद्धा झलक्का परिकीर्तिता ।

स्फुलिङ्गोल्कालातवह्निकणा ज्वलोल्मुके अपि ।। १२ ।।

धूमोम्भःसूवायुवाहौ करमालोऽग्निकेतनम् ।

अग्निवाहस्तरीः प्रोक्तस्तथा जीमूतवाह्यपि ।। १३ ।।

श्रीमदढमलाङ्गोद्भस्तेजोवर्गमरूपयत् ।

वायुःसमीरणो वातो मातरिश्वा प्रभञ्जनः ।। १४ ।।

समीरः पवनो नित्यगतिः कम्पाकमारुतौ ।

पुषदश्वो जगत्प्राणो नभस्वान निलो मरुत् ।। १५ ।।

प्रकम्पनाशुगौ गन्धवहः समुर इत्यपि ।

नभःश्वासोऽहिकान्तोऽपि दैत्यदेवो महाबलः ।। १६ ।।

स्पर्शनश्च हरिः प्रोक्तः पवमानसदागति ।

स झञ्झा वृष्टियुक् प्रोक्तः व्यानस्त्वङ्नात्रसंस्थितः ।। १७ ।।

अपानः पृष्टपार्ष्णिस्थ उदानो हच्छिरोऽन्तरे ।

प्राणो ह्यन्नाभिनक्रस्थः समानो नाभिह्यद्गतः ।। १८ ।।

वायुवर्गोऽयमाख्यातो विद्वदम्बुजभानुना ।

वनं वार्क्षं झषः कक्षः कान्तारोऽरण्यकानने ।। १९ ।।

प्रस्तारो गहनं षण्डं दवदावावपीरितौ ।

सत्रं क्लीबेऽटवी स्त्री स्याद् झषः स्यात्तृणयुग्वने ।। २० ।।

अथोपवनमाख्यातमपपूर्व वनं स्मृतम् ।

आरामः कृत्रिमारण्ये गृहारामस्तु निष्कुटः ।। २१ ।।

पौरकस्तु वहिःसत्रमाक्रीडोद्यान इत्यपि ।

क्षुद्रारामः पुष्पवाटी वृक्षवाटी प्रसीदिका ।। २२ ।।

अमात्यादेर्गृहोद्यान वनं प्रमदपूर्वकम् ।

तरुः शाखी नगो वृक्षः पर्णी कारस्करोऽह्निपः ।। २३ ।.

विटपी पादपश्चाद्रिर्द्रद्रुमौ विष्टरः कुठः ।

वसुर्जर्णहरी सालोऽनोकहोऽगोऽपि पुष्पदः ।। २४ ।।

रूक्षागमौ पुलाकी च फलदो गच्छ इत्यपि ।

करालिकः क्षितिरुहो नन्द्यावर्तोपि कुत्रचित् ।। २५ ।।

वृक्षावृतान्तरे कुञ्जो निकुञ्जकुडङ्गावपि ।

वृक्षस्तु फलवान्पुष्पैर्वानस्पत्यो विना फलैः ।। २६ ।।

वनस्पतिः फलवांस्तु विशेषः फलजन्मतः ।

फलेग्रहिः फलवान्ध्यः फलिनः फलवान्फली ।। २७ ।।

अवकेशी फलैर्वन्ध्य ओषधिश्चौषधिः समे ।

फलपाकावसानाथ शाखो ह्रस्वशिफः क्षुपः ।। २८ ।।

व्रततिः प्रततिस्तुल्ये लता वल्ली स्त्रियामुभे ।

लतायां तु प्रतानिन्यां गुल्मिन्युलपवीरुधः ।। २९ ।।

प्ररोहोऽङ्कुराङ्कूरावृक्तो रोहस्तु पर्वणः ।

शिखाशाखालतास्तुल्याः साला स्कन्धस्य शाखिका ।। ३० ।।

शालापि कथिता तत्र प्रकाण्डं स्कन्धमस्तके ।

गण्डिःशाखावधिर्मूलात्प्रकाण्डोऽथ शिफाजटे ।। ३१ ।।

गुल्मस्तु विटपः स्तम्बः प्रकाण्डग्हितो मतः ।

छल्ली वल्कं वल्कलं च त्वचि चोचमपि स्मृतम् ।। ३२ ।।

सारो मज्जा पुमान्स्थाणुः शङ्कर्ध्रुवक इत्यपि ।

अंह्रिर्बुध्नः पुमान्मूले शिखरेऽग्रं शिरोऽपि च ।। ३३ ।।

काष्टं तु दलिकं दारु मञ्जरिर्वल्लरिः समे ।

पर्णं बर्हं पलाशं च दलं पत्रं छदं पुनः ।। ३४ ।।

छदनं च नवे तस्मिन्कशलं पल्लवोऽपि च ।

तथा किसलयं तत्रं प्रवालः कोशिकास्य तु ।। ३५ ।।

माढिर्दलस्था शुङ्गा विस्तारे विटपः पुमान् ।

पुष्पं मणीवकं सूनं प्रसवः कुसुमं समम् ।। ३६ ।।

प्रसूनं सुमनः शब्दो भूम्नि चैव मतः स्त्रियाम् ।

जालकक्षारकौ पुंसिः कोरकः कलिका स्त्रियाम् ।। ३-३७ ।।

मुकुलं कुड्मलं ज्ञेयं गुलुञ्छो गुच्छगुत्सकौ ।

स्तबकोऽथ रजः पौष्पं परागोऽप्यथ तद्रसः ।। ३८ ।।

मरन्दमकरन्दौ तु मधु प्रसवबन्धने ।

वृन्तं च विकचं फुल्लं स्मितं व्याकोशमित्यपि ।।३९।।

प्रबुद्धं दलितोज्जृम्भे प्रफुल्लोन्मिषिते पुनः ।

स्फटं चोच्छ्वासितं स्मेरं विनिद्रहसिते अपि ।।४०।।

मुद्रितं मीलितं सङ्कुचितं निद्राणमिष्यते ।

फलं सस्यं तत्रं शुष्के वानशब्दो विभाव्यते ।। ४१ ।।

आमं शलाट्वथ ग्रन्थिः शिम्बिः शिम्बा शमिः परुः ।

बीजकोशीपर्वणी च पिप्पलो बोधिपादपः ।। ४२ ।।

कृष्णवासस्तथाश्र्वत्थः श्रीवृक्षः कुञ्जराशनः ।

जटी प्लक्षः पर्कटी च न्यग्रोधो बहुपात्पुनः ।। ४३ ।।

वटश्र्चाथोम्बरो जन्तुफलश्र्चाम्रे रसालकः ।

चूतातिसौ रभौ तुल्यौ कामाङ्गः कोकिलप्रियः ।। ४४ ।।

सहकारोऽपि माकन्द पलाशः किंशुकः पुनः ।

त्रिपत्रो ब्रह्मवृक्षोऽसौ मोचा रभ्भा कदल्यथ ।। ४५ ।।

सप्तपर्णस्त्वयुक्पत्रे गुडूच्यमृतवल्लिका ।

छिन्ना छिन्नोद्भवा छिन्नरूहा वत्सादनीत्यपि ।। ४६ ।।

पटोलः पाण्डुरः पाण्डुफलो राजीफलश्र्च सः ।

हरिद्रा रजनी पीता पीतिका रञ्जनी च सा ।। ४७ ।।

हलिनी च जयन्ती तु तथा वर्णविलासिनो ।

शुष्ठी विश्र्वा नागरं तु विश्र्वभेषजनामकम् ।। ४८ ।।

मञ्जिष्टा तु जिगी वर्णदा शोषघ्नी प्रता परा ।

मासकस्ताम्रमूली च दुरालम्भा च कच्छुरी ।। ४९ ।।

खदुरो रक्तसारः स्यात्सोमवल्कस्तु कामुकः ।

अथ दारुहरिद्रा च हेमकान्ता निगद्यते ।। ५० ।।

करवीरो हयमारो बदर्यां कुवली स्मृता ।

कर्कन्धुः कोलिरप्यत्र वेतसो वञ्जुलो रथः ।। ५१ ।।

वानीरः शीतविदुलौ पिचुलो झाबकः समौ ।

नीपः कदम्ब आ ककुभे त्वर्जुनो मतः ।। ५२ ।।

कङ्केल्लिस्तु तथाशोकः केसरो बकुलः समौ ।

दाडिमे करकः पुंसि ———————— ।। ५३ ।।

किंपाकस्तु महाकालो मधुष्टीलो मधूलकः ।

पियालस्तु प्रियालः स्यात्तथा राजादानोऽपि सः ।। ५४ ।।

नागरङ्गे तु नारङ्गस्तिन्तिडी चाम्लिका मता ।

अरिष्टः फेनिलस्तुल्यौ तिनिशे च रथद्रुमः ।। ५५ ।।

निम्बो नेता तथारिष्टः सर्वतोभद्रतिक्तकौ ।

प्रभद्रः पिचुमन्दोऽपि कथितः प्रियभद्रकः ।। ५६ ।।

यासो यवासकः प्रोक्तो बालपत्रो मरुद्भवः ।

वृषाटरूपकौ वासा वासकः सिंहपर्ण्यपि ।। ५७ ।।

किराते चाथ भूनिम्बो रामसेनक तिक्तकौ ।

कटुकी रोहिणी तिक्ता चक्राङ्गी कटुरोहिणी ।। ५८ ।।

मुस्तं मेघो वराहोऽब्दो नादेयो नागरः पृथक् ।

पर्पटस्तु रजो रेणुः कवचो ब्रह्मसण्टकः ।। ५९ ।।

ह्रीवेरं वालकं तोयं सटी प्रोक्ता पलाशिनी ।

पुष्कराह्वं पुष्करं तु काश्मीरं पद्मपत्रकम् ।। ६० ।।

देवकाष्टं देवदारु शक्रदारु सुदारु च ।

कण्टालिका तु दुःस्पर्शा व्याघ्री निर्दग्धिका च सा ।। ६१ ।।

क्षुद्रा तथा कण्टकिनी कण्टकारीत्यपि स्मृता ।

श्र्वदंष्ट्रो व्यालदंष्ट्रोऽपि गोक्षुरश्र्च त्रिकण्टकः ।। ६२ ।।

बिल्वो लक्ष्मीफलो गन्धागर्भः स्याद्भूतमारुतः ।

अग्निमन्थोऽरणिर्ज्ञेयः शिलाभेदोऽश्मभेदेकः ।। ६३ ।।

भूतघ्नी राक्षसी गौरी सुरसा देवदुन्दुभिः ।

वाकुची सोमवल्ली तु मदनः करघाटकः ।। ६४ ।।

कपिकच्छूर्लाङ्गली तु स्वयंगुप्ता जहर्षभी ।

आत्मगुप्ता मर्कटी च तुम्ब्यलाबूश्र्च कथ्यते ।। ६५ ।।

जीमूतको देवदाली पीतपुष्पा निगद्यते ।

आवर्तकी चर्मरङ्गा मेषशृङ्गी तु वर्तिका ।। ६६ ।।

पीलुपर्णी रक्तफला गोल्ही बिम्बी च कथ्यते ।

हरीतक्यभया पथ्या कायस्था पूतनामृता ।। ६७ ।।

वयःस्थामलकी धात्रीफलं श्रीफलसंज्ञकम् ।

हार्यः कलिद्रुमो भूतत्रासोऽक्षश्र्च बिभीतकः ।। ६८ ।।

कृतमालो दीर्घफलः स्मृत आरग्वधोऽपि सः ।

चम्पकस्तु हेमपुष्पो जपा जाता समे उभे ।। ६९ ।।

सिन्दुवारे च निर्गुण्डी वासन्ती माधवी लता ।

मल्लिका मालती तुल्ये यूथिका मागधी स्मृता ।।७० ।।

यूथिका पीतपुष्पा तु कथिता हेमपुष्पिका ।

प्रियङ्गुः फलिनी श्यामा ———————।। ७१ ।।

निबूकं निबुकं चान्यद्राजशब्दादिपूर्वकम् ।

जम्भीरो जम्भलो जम्भो जम्बीरो देश्यसंग्रहे ।। ७२ ।।

मातुलिङ्गो मातुलुङ्गो बीजपूरे तु कथ्यते ।

—————— करीरे क्रकरो मतः ।। ७३ ।।

बन्धुजीवकबन्धूकौ एरण्डे तु तथक्ष्यताम् ।

पञ्चाङ्गुलो धातकी तु धीतुपुष्पी निगद्यते ।। ७४ ।।

धत्तूरः कनकः प्रोक्तः केतकः क्रकचच्छदः ।

कपित्थस्तु दधिफलो वेणुर्वंशस्तुणध्वजः ।। ७५ ।।

त्वचिसारो यवफलः शतपर्वा तु मस्करः ।

सच्छिद्रः कीचकः प्रोक्तो लाङ्गली नालिकेरकः ।। ७६ ।।

गूवाकमुक्रकौ पूग उद्वेगं तत्फलं स्मृतम् ।

वंशक्षीरी तुकाक्षीरी त्वक्क्षीरी वंशरोचना ।। ७७ ।।

यावन्ति नागनामानि ततो वल्ली नियोज्यते ।

ताम्बूली च तथा प्रोक्ता स्मृता ताम्बूलवल्यसौ ।। ७८ ।।

गुञ्जा तु कृष्णला तुल्ये विशाला चेन्द्रवारुणी ।

हारहूरा तु मृद्वीका गोस्तनी द्राक्षया सह ।। ७९ ।।

उशीरं वीरुणीमूले कमलं नलिनं कजम् ।

पुण्डरीकं च ———पुष्करं पङ्कजं समे ।। ८० ।।

राजीवमरविन्दं तु पुण्डरीकं सिताम्बुजम् ।

रक्तोत्फलं तु रक्ताब्जं तत्स्यात्कोकनदं पुनः ।। ८१ ।।

उत्पलं च कुवलयं कुवेलं कुवलं कुवम् ।

कमलिन्यां तु नलिनी पङ्कजिन्यपि दृश्यते ।। ८२ ।।

मृणालिनी कुमुद्वत्यामथ कैरविणी स्मृता ।

इन्दिवरं नीलपद्मे श्र्वेते च कुमुदं समम् ।। ८३ ।।

कैरवं गर्दभाख्यं च पद्मनाले च कर्णिका ।

वराटको बी जकोशो मृणाले बिसतन्तुले ।। ८४ ।।

केसरे त्वथ किञ्जल्के करहाटः शिफा मता ।

उत्पलानां तु कन्दे स्याच्छालूकं चाथ शेवले ।। ८५ ।।

शेपालं तु शेवालं शैवालं जलनीलिका ।

सस्यसीत्ये समे धान्यं व्रीहिस्तम्बकरी समे ।। ८६ ।।

षष्टिको गर्भपाकी च पाचलस्त्वाशुरुच्यते ।

कलामकस्तु कलमो रक्तशालिस्तु लोहिते ।। ८७ ।।

सैगन्धिको महाशालिर्भेदाः शालेस्तु भूरयः ।

हयप्रियस्तीक्ष्णशूको यवस्तोक्मो हरिन्मतः ।। ८८ ।।

मङ्गल्यको मसूरस्तु मयुष्टकमकुष्टकौ ।

वनव्रीहौ तु नीवारः श्यामाकः श्यामकोऽपि च ।। ८९ ।।

सतीनककलायौ तु चणको हरिमन्थकः ।

बलाटः प्रथनो लोभ्यो मुद्गस्तु हरितो हरिः ।। ९० ।।

बली बीजवरो माषः गोधूमसुमनौ ।

शितिशिम्बिकवल्लौ तु कालवृन्तं कुलत्थकः ।।९१ ।।

कङ्गुक्कङ्गू कङ्गुनी च सर्षपस्तन्तुभो मतः ।

कदम्बकेः स च श्र्वेतः सिद्धार्थः कथितो बुधैः ।। ९२ ।.

सस्यशूकं तु किंशारुः कणिशं धान्यमस्तके ।

स्नुहिर्वज्री महावृक्षो कम्पिल्लो रक्तचूर्णकः ।। ९३ ।।

भिण्डी रक्ता त्रिभण्डी च त्रायमाणकम् ।

गन्धपुष्पस्ताम्रफलोऽप्यङ्कोठो दीर्घकीलकः ।। ९४ ।।

तुरगी वराहकर्णी च बल्या स्यादश्र्वगन्धिका ।

पुनर्नवा कटिल्लः स्यात्सैरेयकसहाचरौ ।। ९५ ।।

सोफका सितिपुष्पाची अहिच्छिन्ना शिका मिसिः ।

नालपत्री तालपर्णी मिश्रे या च मिसिस्तथा ।। ९६ ।।

उग्रगन्धा वचा प्रोक्ता जटिलोग्रा च लोमशा ।

जन्तुहन्त्री वि डङ्गः स्यात्कुटजो गिरिमल्लिका ।। ९७ ।।

शुक्राह्वेन्द्रयवा प्रोक्ता वराङ्गं त्वचमुच्यते ।

तमालपत्रकं पत्रं वाह्लीकं हिङ्गु रामठम् ।। ९८ ।।

सूक्ष्मैला बहुला तुत्था द्रविडी त्रुटिरित्यपि ।

चाम्पेयं नागपुष्पं तु क्सरं नागकेसरम् ।। ९९ ।।

कुस्तुम्बरु तु धान्याकं धन्याकं धन्यया सह ।

क्षवः क्षुताभिजननो राजसर्षपराजिके ।। १०० ।।

कृष्णा सा चासुरी प्रोक्ता मरिचं कोल्लकोषणे ।

वेल्लजं यवनेष्टं च कृष्णं स्याद्धार्मपत्तनम् ।। १०१ ।।

मागधी पिप्पली कृष्णा कणा स्यादुपकुल्यया ।

वैदेही पिप्पलीमूले ग्रन्थिकं कथितं बुधैः ।। १०२ ।।

कणाजाजी जीरकश्च चविका कोलवल्ल्यपि ।

चव्यं च चविकं प्रोक्तं श्रेयसी गजपिप्पली ।। १०३ ।।

रसाम्लः शीतभेदी च भीमश्चाप्याम्लवेतसः ।

अजमोदा खराह्वा च कारवी लोमकर्कटी ।। १०४ ।।

मातुलानी शणं भङ्गा उमा स्यादतसी क्षुमा ।

गवेधुकागवेधू च जर्तीकोऽरण्यजे तिले ।। १०५ ।।

अरिष्टो लसुनो म्लेच्छकन्दो दीर्घपत्रः रसोनकः ।

महौषधं महाकन्दो दीर्घपत्रः पृथक्पुनः ।। १०६ ।।

गृञ्जनश्चाप्याथ भृङ्गराजः स्यात्केशरञ्जनः ।

मार्कवश्च भृङ्गरजो वायसी काकमाच्यपि ।। १०७ ।।

कूष्माण्डककर्कारू कारवेल्लकटिल्लकौ ।

सूरणः कथितोऽर्शोघ्न आर्द्रकं शृङ्गबेरके ।। १०८ ।।

कर्कटी चिर्भटी तुल्ये वालुङ्की तु तथा स्मृता ।

सुगन्धकः किलासघ्नः कर्कोटस्तिक्तपत्रकः ।।१०९ ।।

सेकिमं हरिपर्णं तु मूलकं हस्तिदन्तकम् ।

कुशो बर्हिः पवित्रं च कुथदर्भावुभौ समौ ।। ११० ।।

तेजनो मुञ्जगुन्द्रौ च दूर्वा सेयाच्छतपर्विका ।

हरिताली रुहान्ता नडपोटगलौ समौ ।। १११ ।।

धमनः कुरुविन्दोऽपि मुद्रा गुद्रा तथोच्यते ।

असिपत्रस्तथेक्षुः स्याद्रसालस्तद्भिदा यथा ।। ११२ ।।

पुण्ड्रकान्तारमुख्याः स्युस्तन्मूलं मोरटं स्मृतम् ।

इषीकाकाश इत्येवमर्जुनं यवसं तृणम् ।। ११३ ।।

घासोऽथ ———विषः क्ष्वेडो हलाहलः ।

कालकूटं वत्सनागो ब्रह्मपुत्रोऽपि दारदः ।। ११४ ।।

प्रदीपनश्च काकोलः सौल्किकेयस्तथापरः ।

सौराष्ट्रिकोऽप्यहिच्छत्रो मर्कटो मेषशृङ्गकः ।। ११५ ।।

तथा हैमवतेन्द्रौ च सर्षपो मूलकोऽपरः ।

कालिङ्गो विस्फुलिङ्गोऽपि गौतमोऽप्येष विश्रुतः ।। ११६ ।।

सक्तुकः कर्दमोऽङ्कोल्लसारोऽपि मधुसिक्थकः ।

अग्रबीजास्तत्र केचिन्मूलबीजास्तथापरे ।। ११७ ।।

सल्लकीप्रमुखाः स्कन्धजास्तु बीजरुहा मताः ।

संमूर्च्छजास्तथा केचित्पर्वयोनय इत्यपि ।। ११८ ।।

एवं षड्भिदः सर्वस्तरुवर्गो निवेदितः ।

कृमिरन्तर्जनिर्जनिर्जीवो नीलङ्गुस्तु बहिर्भवः ।। ११९ ।।

क्षुद्रकीटस्तथा तुल्यः पुलकास्तूभये मताः ।

काष्टकीटघुणौ तुल्यौ कुसूकिंचुलकौ समौ ।। १२० ।।

अस्रपा तु जलौका स्याज्जलालोका जलौकसः ।

जलौकास्तु तथा तुल्या कथिता जलसर्पिणी ।। १२१ ।।

शुक्तिः स्यादब्धिमण्डूकी मुक्तास्फोटोऽपि कथ्यते ।

वारिजः कम्बुशङ्खौ तु त्रिरेखः षोडशभ्रमः ।। १२२ ।।

क्षुद्रशङ्खाः शङ्खनकाः शम्बीका जलमाद्जाः ।

कपर्दस्तु वराटः स्यात्पणास्थिकवराटकाः ।। १२३ ।।

दीर्घकोशा तु दुर्नामा पीलकोऽपि पिपीलकः ।

हीनाङ्गा ब्राह्मणी स्थूलशीर्षिकाथ पिपीलका ।। १२४ ।।

घृ तेली पिङ्गकपिशा उपजिह्वापदेहिका ।

रिक्षा लिक्षा समे यूका महाभीरुस्तु षट्पदी ।। १२५ ।।

गोपालिकापि कथिता गर्दभी गोमयोद्भवा ।

कोलकुणमत्कुणौ तु वैराटस्ततिभाग्निकौ ।। १२६ ।।

अग्निरजश्चेन्द्रगोपस्तन्तुवायोर्णनाभकौ ।

लूता कृमिर्मर्कटको लालास्त्रावोऽपि कथ्यते ।। १२७ ।।

अष्टपाच्च तथा प्रोक्तो जालकारकजालिकौ ।

कर्णकीटा शतपदी तथा कर्णजलौलीका ।। १२८ ।।

वृश्चिकाली द्रुणोऽपिस्यादलं तत्पुच्छकण्टकः ।

भ्रमरश्चञ्चरीकोऽली रोलम्बो मधुकृत्पुनः ।। १२९ ।।

शिलीमुखद्विरेफौ तु षडङ्‍घ्रिःभृङ्‍ग इत्यपि ।

इन्दिन्दिरोऽस्य भोज्यं तु मधुपुष्पे स्मृते पुनः ।। १३० ।।

पतंगः शलभो द्योतिरिङ्‍गणश्च निगद्यते ।

खद्योतोऽथ स्मृता क्षुद्रा सरघा मधुमक्षिका ।। १३१ ।।

नीला तु वर्वणा पुत्तिकाथवा तु पतङ्‍गका ।

तैलाटी वरटी दंशी चीरी तु चीरिका ।। १३२ ।।

झिल्लीका झिल्लिका भृङ्‍गारिका वर्षकरी पुनः ।

हस्ती मतङ्‍गजो नागो मातङ्‍गो नारणः करी ।। १३३ ।।

गजो द्विपस्तथेभोऽसौ कुम्भिकुञ्जरपीलवः ।

करटी सिन्धुरो दन्ती दन्तावलमहामृगौ ।। १३४ ।।

द्विरदोऽनेकपाः स्तम्बेरमः सामज इत्यपि ।

करेणुर्हस्तिनी धेनुका वशापि निगद्यते ।। १३५ ।।

मिश्रो मन्दो मृगो भद्रश्चतुर्धा गज उच्यते ।

बालः स्यात्पञ्चवर्षोऽसौ स्यात्पोतो दशाहायनः ।। १३६ ।।

विंशत्यब्दगजो विक्कः कलभस्त्रिशदब्दकः ।

प्रभिन्नो गर्जितो मत्तो यूथनाथोऽथ यूथपः ।। १३७ ।।

उद्वान्तनिर्मदौ तुल्यौ कल्पितः सज्जितः समौ ।

व्यालो दुष्टगजः प्रोक्तः संनाह्यो रणसज्जितः ।। १३८ ।।

घटा स्याद्धस्तिनां श्रेणी मदो दानं निगद्यते ।

प्रवृत्तिरथ शुण्डायाः शीकरो वमथुर्मतः ।। १३९ ।।

शुण्डा हस्तः करो हस्तिनासा स्यादथ पुष्करम् ।

शुण्डाग्रं चाथ दन्तौ तु विषाणो स्कन्ध आसने ।। १४० ।।

चूलिका कर्णमूलं स्यादक्षिकूटमथेषिका ।

करटोऽथ गजगल्लोऽवग्रस्त्वलिकं मतम् ।। १४१ ।।

समानौ शिरसः पिण्डौ कुम्भौ तत्रान्तरं विदुः ।

वातकुम्भः पुच्छमूले पेचकः कथितो बुधैः ।। १४२ ।।

शृङ्खलः पादपास्तु हिञ्जीरनिगडान्दुकाः ।

वारिस्तु गजबन्धस्य भूमिः स्यात्त्रिपदी त्वथ ।। १४३ ।।

गात्रयोर्बन्ध इत्येवं वैणुकं तोत्रमुच्यते ।

बन्धस्तम्भस्तथालानमङ्कुशः सृणिरित्यपि ।। १४४ ।।

अङ्कुशाग्रमपष्टं स्यात्यातमङ्कुशवारणम् ।

दूष्या कक्ष्या वरत्रा स्यात्कण्ठबन्धः कलापकः ।। १४५ ।।

तुरगो घोटको वाजी तुरंगोऽर्वा तुरंगमः ।

हयस्ताक्ष्यो हरिः सप्तिवीती गन्धर्वनामकः ।। १४६ ।।

वामी तु वडवा त्वश्र्वा किशोरो बालको हयः ।

जवनस्तु जवोत्कृष्टो रथ्योऽश्र्वो रथवाहकः ।। १४७ ।।

आजानेयः कुलीनस्त सैन्धवः सिन्धुदेशजः ।

पारसाकास्तु वानायुजाः काम्बोजा अथ वाह्लिकाः ।। १४८ ।।

साधुवाहि विनीतोऽश्र्वः शूकलो विनयोज्झितः ।

कशार्हः कश्य इत्युक्तं कोकाहः सितवाजिनी ।। १४९ ।।

अनीलो नीलवर्णोऽर्वा त्रियूहः कपिलो हयः ।

पीतस्तु हरियो वाजी कियाहो लोहितो हयः ।। १५० ।।

पाण्डुकेशरपुच्छस्तु वोल्लाहः कथितो बुधैः ।

मनाक्पाण्डुरुहाऽश्र्वः कृष्णजङ्घो यदा भवेत् ।। १५१ ।।

पीतः स्यात्तु कुलाहोऽर्वा कृष्णजानुर्यदा हयः ।

उकनाहस्तथा पीतरक्तच्छायो यदा भवेत् ।। १५२ ।।

ह्यत्पृष्टखुरपुच्छेषु पुष्पितः पञ्चभद्रकः ।

कृष्णरक्तच्छविः शोणः स च कोकनदच्छविः ।। १५३ ।।

खुरोरःकेशपुच्छास्यैर्वलक्षैरष्टमङ्गलः ।

सितकाचरुचिर्वाजी पङ्गुलः कथितस्तथा ।। १५४ ।।

चित्रितस्तु हलाहोऽश्र्वो हरिको हालकः पुनः ।

अश्र्वः स्यात्पीतहरितच्छायो ययुरथा परः ।। १५५ ।।

अश्वमेधीय इत्येवं विशेषास्तुरगस्य हि ।

अश्वस्य नासिका प्रोथं मध्यं कश्यं निगद्यते ।। १५६ ।।

गलोद्देशो निगालः स्यात्खुरा अश्वशफा मताः ।

लाङ्गूलमथ पुच्छं स्याद्वालहस्तोऽपि वालधिः ।। १५७ ।।

अपावृत्तपरावृत्तलुठितानि तु वेल्लिते ।

धोरितं वल्गितं प्लुत्पुत्तेजितोत्तरितानि च ।। १५८ ।।

गतयः पञ्च धाराख्या वाजिनं कथिता इमाः ।

दिनेनौकेन यो गम्यते ऽध्वाश्वीनो ऽ श्वेन कथ्यते ।। १५९ ।।

मुख्यन्त्रणमश्वस्य कवियं कविका कवी ।

खलीनं पादपाशेऽथ दामाञ्जनमितीक्षितम् ।। १६० ।।

प्रखरःप्रक्षरं चर्मदण्डे चाथ कशा स्मृता ।

कुशावक्षेपणी वल्गा पर्याणं पल्ययन्यपि ।।१६१।।

अथ वेगसरो वेसरस्तथाश्वतरः स्मृतः ।

क्र मेलकः कुलनाशः सलो भोलिर्महाङ्गकः ।। १६२ ।।

वासन्तो द्विककुद्दुर्गलङ्घनो मय इत्यपि ।

दासेरोष्ट्रौ केलिकीर्णो खणो दीर्घकन्धरः ।। १६३ ।।

मरुतत्प्रियः कण्टकाशी त्रिवर्षः करभस्त्वसौ ।

स तु शृङ्खलकः काष्टमयैः स्यात्पादबन्धनैः ।। १६४ ।।

गर्दभः शङ्कुकर्णश्च चक्रीवान् चिमेह्यपि ।

खररासभवालेया वृषे तु वृषभर्षभौ ।। १६५ ।।

अनड्वान्वाडवेयोऽपि उक्षा शाक्करशाक्करौ ।

सौरभेयः ककुद्मांश्च भद्रो गौः शाङ्करस्तथा ।। १६६ ।।

बलीवर्दोऽथ जातोक्षे उक्षा स्यात्स्कन्धिकस्तथा ।

अथोक्षतरमहोक्षौ वृद्धोक्षतु जरद्गवे ।। १६७ ।।

नस्योतो नस्तितस्तुल्यौ कूटो भग्नविषाणकः ।

इड्वरो गोपतिः षण्डो मदकोहलगोवृषौ ।। १६८ ।।

आर्षभ्यः षण्ढतायोग्यस्तर्णो वत्सः शकृत्करिः ।

दम्यवत्सतरौ पुंसि पृष्टवाड् युगपार्श्वगः ।। १६९ ।।

युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।

स तउ सर्वधुरीणः स्यात्सर्वां वहति यो धुरम् ।। १७० ।।

एकधुरीणैकधुरावुभावेकधुरावहे ।

धुरीणधुर्यधौरेयकधुरंधराः ।। १७१ ।।

धूर्वहे वृषभे चैते शब्दा उक्ता यथार्थतः ।

गलिर्दुष्टो वृषः प्रोक्तो द्विदन्षोडन्द्विषड्रदौ ।। १७२ ।।

स्कन्धो वहास्तस्य कूटं नैचिकं ककुदं शिरः ।

गलकम्बलसास्ने तु विषाणं शृङ्गकूणिके ।। १७३ ।।

सुरभिः सौरभेयी तु माहेयी गौस्तथार्जुनी ।

निलिम्पा शृङ्गिणी चोषानड्वाह्यनडुही समा ।। १७४ ।।

तम्बा तम्पा रोहिणी च वर्णैर्भेदा ह्यनेकशः ।

प्रष्टौही गर्भिणी वन्ध्या वशा वेहद्वृषोपगा ।। १७५ ।।

स्रवद्‌गर्भावतोका स्यात्सन्धिनी तु वृषावृता ।

नवप्रसूतिका धेनुः परेष्टुः स्याद्बहुप्रसूः ।। १७६ ।।

सकृत्प्रसूतिका गृष्टी सुव्रता सुखदोह्यया ।

करटा दुःखदोह्या च वञ्जुला बहुदुग्धदा ।। १७७ ।।

द्रोणदुग्धा द्रोणदुघा पीनोघ्नी पीवरस्तनी ।

धेनुष्या पीतदुग्धाथ वत्सला वत्सकामिका ।। १७८ ।।

————————आपीनं तूधसा सह ।

गोमयं भूमिलेपोऽथ गोग्रन्थिः शुष्कगोमये ।। १७९ ।।

करीषच्छगणे तुल्ये व्रजो गोकुलगोधने ।

छगच्छागावजो बस्तश्छगलश्च स्तभः पशुः ।। १८० ।।

छागिका सर्वभक्ष्या सायादजा गलस्तनी ।

वर्करस्तरुणश्छागो हुडावी मेषस्तूरणः ।। १८१ ।।

ऊर्णायुरुरभ्रश्च वृष्णिरेडकरोमशौ ।

मेण्ढकः शृङ्‌गिणो भेडो हुडुः संफाल इत्यपि ।। १८२ ।।

मेषी जालकिनी चैव रुजा च कुररी समा ।

कुर्कुरः सारमेयोऽस्थिभुक्कौलेयः पुनः शुनः ।। १८३ ।।

श्वानः शालावृको रात्रिजागरो भषणस्तथा ।

मृगंदशशुनी वक्रवालधिः श्र्व स रोगवान् ।। १८४ ।।

अलर्को रोगवान् श्र्वानो मृगव्ये कुशलो मतः।

विश्र्वकद्रुः पुना रोगी शुनी तु सरमा मता ।। १८५ ।।

लुलायुर्महिषो वाहरिपुः सैरिभ एव च ।

धीरस्कन्धो महः कृष्णशृङ्‌गश्र्च यमवाहनः ।। १८६ ।।

रजस्वलजरन्तौ च रक्ताक्षो दंसभीरुकः ।

महीषेऽरण्यजे चास्मन्गावलोऽ पि विभाव्यते ।। १८७ ।।

सिंहः पञ्चाननः श्र्वेतपिङ्‌गः कण्ठीरवो हरिः ।

महानादस्तथेभारिः पारीन्द्रो नखरायुधः ।। १८८ ।।

मृगरिः केसरी चापि मृगात्पतिरपीक्ष्यते ।

हर्यक्षो व्याघ्र इत्येवं द्वीपिशार्दूलचित्रकाः ।। १८९ ।।

चित्रदेहः पुण्डरीकः —————— ।

मृगादनस्तरक्षुः स्याद्विशेषश्र्चित्रकस्य सः ।। १९० ।।

——————अष्टपाच्छरभो मतः .

उत्पादकः कुञ्जरारिर्गोसदृग्गवयः स्मृतः ।। १९१ ।।

स्मृतो वनगवश्र्चश्र्ववारणोऽप्यथ गण्डकः ।

वाध्रीणसः खड्‌गिखड्‌गौ भूदारः कोलसूकरौ ।। १९२ ।।

क्रोडः किरः किरिः पोत्री घृष्टिर्दष्ट्री बहुप्रजः ।

स्तब्धरोमा तथा घोणी स्थूलनासो वराहकः ।। १९३ ।।

शूकरो विड्वरो ग्राम्यो गर्ताशूकर इत्यपि ।

भालूकर्क्षाच्छभल्लूकभल्लभाल्लूकभल्लुकाः ।। १९४ ।।

शृगालो घोरवासी च गोमायुः शिवफेरवौ ।

फेरण्डो हूरवः क्रोष्टा जम्बुको मृगधूर्तकः ।। १९५ ।।

भरुजः फेरुरप्येवं भूरिमायोऽपि कथ्यते ।

ईहामृगो वृकः कोको वानरः प्लवगःपनः ।। १९६ ।।

शाखामृगो वनौकाश्चारण्यश्वा हरिकीशकौ ।

प्लवङ्गः श्यामवक्त्रोऽसौ गोलाङ्गूलो विभाव्यते ।। १९७ ।।

कुरङ्गमृगसारङ्गा वातायुहरिणावपि ।

तद्भेदा रङ्कुगोकर्णन्यङ्कुचीनादयो मताः ।।१९८ ।।

वाताप्रमीरोहितौ च कन्दली सार इत्यपि ।

इत्यादयोऽपरे भेदाः स्वयं ज्ञेया मनीषीभिः ।। १९९ ।।

शशको लोमकर्णोऽपि मृदुलोमकशूलिकौ ।

पल्ली तु भित्तिका माणिक्या स्मृता गृहगोलिका ।। २०० ।।

गृहोलिका कुड्यमीनो हालिन्यथाञ्जनाधिका ।

ब्राह्मणी रक्तपुच्छा सा सरटे कुकलासकः ।। २०१ ।।

उन्दरः खनको वज्रदशनो मूषिकस्तथा ।

आखून्दुरू समौ प्रोक्तौ मूषको वृषलोचनः ।। २०२ ।।

गन्धमूष्या दिवान्धा च वज्रतुण्डा छुछुन्दरी ।

गिरिका बालम्घ्या स्याद्विशेषोऽयं निरीक्ष्यताम् ।। २०३ ।।

बिडालोतू तथा ह्नीकुर्मार्जारो वृषदंशकः ।

मण्डली जाहको गात्रसंकोची नकुलः पुनः।। २०४ ।।

सर्पहा पिङ्गलो बभ्रुः सर्पो भोगी भुजंगमः ।

द्विजिह्वो दीर्घजीह्वोऽहिः पृदाकुः पवनाशनः ।। २०५ ।।

दन्दशूकोरगौ व्यालः पन्नगः फणिना सह ।

सरीसृपो विषधरः कुण्डली च बिलेशयः ।। २०६ ।।

दर्वीकरो गूढपदो लेलिहानोऽपि कथ्यते ।

भुजंगो भुजगो दीर्घपृष्टोऽपि कञ्चुकी ।। २०७ ।।

राजसर्पो भुजंगाशी शयुः परीम्द्रवाहसौ ।

मण्डल्यजगरौ तुल्यौ अलगर्दो जलोद्भवः ।। २०८ ।।

राजिलो दुन्दुभस्तुच्छसर्पो गोनासगोनसौ ।

तिलित्सो घोणसोऽप्यत्र भेदाः सर्पस्य भूरयः ।। २०९ ।।

कुर्कटाहिः कुर्कुटाभो रुतवर्णसमो हि यः ।

सामान्येन समे नागाः काद्रवेया उदीरिताः ।। २१० ।।

भोगावती पुरी तेषां शेषोऽनन्तस्त्वथालुकः ।

द्विसहस्त्राक्ष इत्येवं तथा नागाधिपश्र्च सः ।। २११ ।।

स च श्र्वेतस्तथा शुभ्रकजाङ्कतः।

सर्पगाजो वासुकिस्तु शुब्रो नीलाब्जलक्ष्मवान् ।।२१२ ।।

लोहिताङ्गस्तक्षकः स्यान्मस्तके स्वस्तिकाङ्कवान् ।

इत्यदयोऽपरे भेदा गौडपण्डितभाषिताः ।। २१३ ।।

भोगोऽहिदेहो दंष्ट्राशीर्भोगो दर्वी फटः स्फटः ।

फणास्त्रीपंसलिङ्के स्यात्फटाशब्दः स्त्रियामपि ।। २१४ ।।

निर्मोककञ्चुकौ सर्पकोशे निर्ल्वयनीत्यपि ।

मुक्तनिर्मोकनिर्मुक्तौ सविषा निर्विषास्तथा ।। २१५ ।।

केचित्सर्पा दृष्टिविषा भेदा ज्ञेया धिया स्वयम् ।

इति श्रीपरमान्दः सर्पवर्गमभाषत ।। २१६ ।।

कृत्रिमं च विषं चारं गरक्श्चोपविषं च तत् ।

विहंगो विहगः पक्षी पतगो विहायाः खगः ।।२१७ ।।

शकुन्तिः शकुनिः पत्त्ररथो द्विजविहंगमौ ।

विष्किरो विर्वयः पित्सन्निडजश्चाण्डजःस्मृतः ।।२१८ ।।

शकुन्तशकुनौ तुल्यौ चञ्चूस्त्रोटिः सृपाटिका ।

पक्षः पत्रं पतत्रं च वाजः पिच्छं तनूरुहम् ।। २१९ ।।

गरुच्छदस्तस्य मूले पक्षतिः स्मर्यते स्त्रियाम् ।

प्रडीनोड्डीनसंडीनडयनानि नभोगतौ ।। २२० ।।

कुलायो नीडमस्त्री स्यात्पेशीकोशोऽण्डके पुनः ।

मयूरः सर्पभुक्केकी स्मृतो मेघसुह्यच्च सः ।। २२१ ।।

नीलकण्ठः शिखी बर्ही शुक्लापाङ्गोऽस्य वाक्पुनः .

केका बर्गं तु पिच्छे स्यात्प्रचलाककलापकौ ।। २२२ ।।

मेचकश्चन्द्रकस्तुल्यौ कोकिलो वनवल्लभः ।

काकपुष्टः पिककः कालकण्ठस्ताम्राक्ष इत्यपि ।। २२३ ।।

चिरजीवी द्विकः काक आत्मघोषः सकृत्प्रजः ।

अरिष्टः करटो घूकारातिर्ध्वङ्क्षोऽन्यभृत्पुनः ।। २२४ ।।

वायसो मौकुलिश्चैकदृग्वृद्धो द्रोण उच्यते ।

जलकाकस्तथा मद्गुर्घूकः कौशिकपेचकौ ।। २२५ ।।

निशाटश्च दिवान्धोऽसावुलूकः काकशात्रवः ।

ताम्रचूडो निशावेदी कुर्कुटश्चरणायुधः ।। २२६ ।।

विवृताक्षः कुकवाकुर्हंसा मानससंश्रयाः ।

सितपक्षाश्च चक्राङ्गा विशेषास्तत्र केचन ।। २२७ ।।

राजहंसास्तु ते चञ्चुपादैः स्युर्लोहितैश्च ये ।

मलिनैर्मल्लिकाक्षास्ते कादम्बा कलहंसकाः ।। २२८ ।।

धार्तराष्ट्रास्तु ते चञ्चुचरणैः स्यामवर्णकैः ।

वरला वारला हंसी वारटा वरटा पुनः ।। २२९ ।।

सारसः पुष्कराख्यः स्यात्कुरंकरकलक्ष्मणौ ।

क्रौञ्चे क्रुङ् चातको बाष्पीहः स्तोकः स्यान्नभोऽम्बुपः ।। २३० ।।

सारङ्गश्चक्रवाकस्त् रथाङ्गः कोक इत्यपि ।

कटुनादष्टिट्टिभः स्यादुर्ध्वपादशयश्च सः ।। २३१ ।।

धूम्याटस्तु तथा भृङ्गः कलिङ्गोऽपि निगद्यते ।

कुलिङ्ककः कलविङ्कश्चटकस्त्वस्य वल्लभा ।। २३२ ।।

चटका चाटकैरस्तु पुमपत्ये विभाव्यताम् ।

बकबकोटौ कह्वोऽप्यथ (बलाको) बलाहकः ।। २३३ ।।

बलाका तु बलाकस्त्री प्रोच्यते विसकण्ठिका ।

दीर्घपादो लोहपृष्टः कङ्कःस्यात्कमनच्छदः ।। २३४ ।।

शशादनः श्येनचिल्लावातापी शकुनिश्च सः ।

दुरढृग्गृध्रदाक्षाय्या रक्ततुण्डशुकौ समौ ।। २३५ ।।

पीतपादा शारिका च गोराटी गोकिराट्यपि ।

जतुका चर्मचेटी तु परोष्णी वागुली समे ।। २३६ ।।

मुखविष्टापि सा प्रोक्ता पारापतकपोतकौ ।

रक्तनेत्रो मञ्जुशब्दश्चकोरो विषबोधकः ।। २३७ ।।

ज्योत्स्नाप्रियोऽथ गुन्द्रले जीवंजीवोऽपि कथ्यते ।

करेटुः कर्करेटुश्च क्रकरः कृकणोऽपि च ।। २३८ ।।

विषदर्शनमृत्युश्च खरकोणस्तु तित्तिरः ।

व्याघ्राटकभरद्वाजौ चञ्चुसूचकसुगृहौ ।। २३९ ।।

कुर्कटः कुम्भकारः स्यात्कुकुभः कुहकध्वानिः ।

दीपकच्छेकमुख्यास्तु गृहासक्ता मृगाण्डजाः ।। २४० ।।

संघचारी झषो मस्त्यो मीनो वैसारिणोऽप्यसौ ।

अण्डजः स्थिरजिह्वोऽपि विसारः स्वकुलक्षयः ।। २४१ ।।

शकली च नरे शल्की शम्बोऽनिमिषस्तिमिः ।

मत्स्यजातेरथो भेदान्कियतोऽपि वदाम्यहम् ।। २४२ ।।

चित्रवल्लकपाठीनौ कलकः शकुलस्तु ना ।

उलूपी शिशुके प्रोष्टी शफरः श्वेतकोलके ।। २४३ ।।

सहस्त्रदंष्ट्रवादालौ राजशृङ्गस्तु मद्गुरे ।

शिशुमारो जले कूर्मो महावक्त्रस्तु कुम्भिनि ।। २४४ ।।

मत्स्यराजो लोहितः स्याज्जलौतुस्तूद्र उच्यते ।

यादंसि जलजीवाः स्युः सामान्येनाप्यनेकशः ।। २४५ ।।

महावसस्तूष्णवीर्यो जलशूकरगोमुखौ ।

तन्तुर्ग्रहे तथा तन्तुनागः कुत्रापि तन्तुणः ।। २४६ ।।

आलास्यनक्रकुम्भीरा जलजो नकुलो वसी ।

चतुर्गतिः क्रोडपदः कमठे कू र्मकच्छपौ ।।२४७ ।।

पञ्चाङ्गगुप्तदौलेयौ दुली स्यात्कमठी समे ।

दर्दुरे भेकमण्डूकौ वर्षाभूः प्लवगः पुनः ।। २४८ ।।

प्लवगामहरी शालूरो व्यङ्गः कुत्रचित्स्मृतः ।

इत्यादयोऽपरे भेदा ज्ञेया ग्रन्थान्तरे स्वयम् ।। २४९ ।।

स्थले नरादयो ये तु ते जले जलपूर्वकाः ।

देशभाषाविभागेन स्वयं ज्ञेया अनेकशः ।। २५० ।।

दुगतिर्नरकश्चैव निरये नारकः पुनः ।

तत्रोत्पत्राः पापजीवा नारकाः कथिताः स्मृतौ ।। २५१ ।।

विष्टिराजूर्यातना तु कारणा तीव्रवेदना ।

पुंसलिङ्गस्तथा नागलोकः पातालमुच्यते ।। २५२ ।।

रसातलं बलेर्वेश्माधोजगद्बडवामुखम् ।

रोपं छिद्रं तथा रन्ध्रं विवरं शुषिरं शुषिः ।। २५३ ।।

रोकं बिलं निर्व्यथनं तथा निम्नं वपान्तरे ।

श्वे भ्रागाधावटा गर्तः पातालाक्येऽयमुच्यते ।। २५४ ।।

विष्टपं भुवनं विश्वं जगल्लोको जगत्यपि ।

जीवः स्यात्पुरुषः क्षेत्रज्ञात्मानावसुमानथ ।। २५५ ।।

जन्तुः पुनर्भवी जन्युः सत्त्वं देहभृदप्यसौ ।

उत्पत्तिरुद्भवो जन्म जननं जनिरुच्यते ।। २५६ ।।

क्लीबलिङ्गे जनुः षान्तं जीवातुर्जीवनागदे ।

श्वसितं श्वास इत्येवमुच्छ्वासोऽन्तर्मुखे मतः ।। २५७ ।।

आहरानावथो बाह्यः श्वासो निःश्वास एतनः ।

आयुर्जीवितकालः स्यान्मानसं ह्यदयं मनः ।। २५८ ।।

ह्यदन्तःकरणं चेतश्चित्तं स्वान्तं तथोच्चलम् ।

संकल्पः स्यान्मनःकर्म सुखं निर्वृतिशर्मणी ।। २५९ ।।

सौख्यं सातं तथा दुःखं पीडा स्यादर्तिवेदने ।

कष्टं कृच्छ्रं व्यथा बाधा स्यादाभीलं तथाशुभम् ।। २६० ।।

आधिर्मनोभवा पीडा आमनस्यं प्रगाढतः ।

अत्यन्तपीडने चैव सपत्राकृतिरुच्यते ।। २६१ ।।

निष्पत्राकृतिरप्येवं क्षुत्पीडा जाठराग्निजा ।

निर्णयो निश्चयस्तु ल्यो अविद्याहंमतिः स्त्रियाम्।।२६२।।

अज्ञानं तु भ्रमे भ्रमन्तिर्मिथ्यामतिविपर्ययौ ।

अतत्वे तत्वबुद्धिश्च संदेहः संशयः समौ ।।२६३।।

आरेकद्वापरे तुल्ये संख्योहा चर्चया सह ।

आद्यज्ञानमुपज्ञा स्यात्संस्कारो वासना मता ।। २६४ ।।

स्वरूपं सहजो रूपतत्तवं सर्गो निसर्गवत् ।

प्रीतौ प्रेम स्नेहहार्दे समाधाववधानता ।।२६५।।

कैवल्यममृतं सिद्धिर्महान्दोऽपुनर्भवः ।

मुक्तिर्ब्रह्म शिवं मोक्षो निर्वृतिः श्रेयसा सह ।। २६६ ।

महोदयापवर्गो च निर्वाणं सर्वदुःखह्यत् ।

निःश्रेयसं च निर्याणं मोक्षनामान्यमूनि हि ।। २६७ ।।

प्राणिधानसमाधानावधानान्यपि तत्र च ।

अनुकूलता दाक्षिण्ये परवाक्यसहिष्णुता ।। २६८ ।।

मङ्गः पुण्यं वृषो धर्मः सुकृतं श्रेयसा सह ।

अशुभं कल्मषं पापं वृजिनं किण्वपातके ।। २६९ ।।

अंहो दुष्कृतमेनश्चाघं कल्कं तमसा सह ।

दुरितं किल्बषं चापि पङ्कः कलुषमेव च ।। २७० ।।

भावुकं भविकं भव्यं भद्रमदे समे उभे ।

मङ्गलं कुशलं श्रेयः क्षेमोऽस्त्री श्वोवसीयसम् ।। २७१ ।।

श्वःश्रेयसं शिवं शस्तं शुभं कल्याणनाम च ।

शुभावहो विधिर्ना यः प्रधानं प्रकृतिः स्त्रियाम् ।। २७२ ।।

भागधेयविधी भाग्यं दैवं च नियतिस्तथा ।

अयो दिष्टमथालक्ष्मीर्निर्ऋतिः कालकर्णिका ।। २७३ ।।

चतुर्वर्गो धर्मकाममोक्षवित्ताख्यभेदतः ।

अभिप्रायाशयौ तुल्यौ मताकूतेऽपि संमते ।। २७४ ।।

इन्द्रियं करणं खं तु ह्यषीकं श्रोतसा सह ।

अक्षं विषयिसंज्ञं च रूपाद्यर्थनिबन्धनम् ।। २७५।।

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ।

गोचरा इन्द्रियार्थाश्च विभाव्यताम् ।। २७६ ।।

क्रियेन्द्रियं पाणिमुख्यं स्पर्शनादि मतीन्द्रियम् ।

————सुशीमः शिशिरो जडः ।। २७७ ।।

तुषारः शीतलः शीतो हिमोऽपि कथितो बुधैः ।

उष्णस्तीव्रः खरस्तीक्ष्णः पटुतिग्मौ मनागथ ।। २७८ ।।

मन्दोष्णश्च कवोष्णश्च कदुष्णः कोष्ण इत्यपि ।

कर्कशः पुरुषः क्रूरः कक्खटो निष्ठुरः पुनः ।। २७९ ।।

कठोरकठिनौ तुल्यौ दृढे ननु खरः समः ।

कोमलं मृदुलं तुल्यं सोमालासुकुमारके ।। २८० ।।

गुल्यस्वादू च मधुरो रसज्येष्ठो मधूलकः ।

अम्लोदन्तशठः प्रोक्तः पाचनोपि तथोच्यते ।।२८१।।

ओषणो वक्त्रभेदी च कटुतिक्तौ समावुभौ ।

सरः सर्वरसश्वैव लवणोपि तथोच्यते ।।२८२।।

कटुः स्यादोषणो वक्त्रशोधनश्च समो मतः ।

वक्त्रभेदी तु तिक्तः स्याद्विशेषोऽयं निरीक्ष्यताम् ।।२८३।।

कषायतुबरौ तुल्यौ निर्हारी घ्राणतर्पणः।

इष्ठदन्धिः समाकर्षी सगन्धिः सुरभिस्तथा।।२८४।।

विमर्दोत्थः परिमलः आमोदः स विदू (र) गः ।

मुखवासान आमोदी विशषो गन्धगोचरः ।। २८५ ।।

दुर्गन्धिः पूतगन्धिस्तु विस्त्रं स्यादामगन्धि यत् ।

शुक्लः श्वेतः सितः शुभ्रो गौरः स्याद्धवलोऽर्जुनः ।। २८६ ।।

वलक्षहरिणौ पाण्डुपाण्डरौ पाण्डरोऽपि च ।

शुचिः श्येतावदौ तु धूसरस्त्वल्पपाण्डुरे ।। २८७ ।।

कापोतस्तु कपोताभः कालः कृष्णोऽसितः शितिः ।

श्याममेचकरामास्तु नीलः श्यामलकः समौ ।। २८८ ।।

हरिद्रः पीतलः पीतो गौरः स्यात्सितरञ्जनः ।

हरितस्तालकाभश्च पालाशोऽप्यथ लोहिते ।। २८९ ।।

अरुणो रोहितो रक्तशोणौ रक्तसिते अथ ।

पाटलोऽप्यरुणो बालसन्ध्याभः पीतरक्तके ।। २९० ।।

पिञ्जरः कपिलः पिङ्गपिशङ्गौ कपिशो हरिः ।

कडारः श्यावबभ्रू च कद्रुरेतस्तु कर्बुरे ।। २९१ ।।

कल्माषशबलौ चित्रकिर्मीरौ चित्रलश्च सः ।

ध्वनिः स्वानो रवो नादः शब्दो निर्घोषनिः स्वनौ ।। २९२ ।।

स्वरो ह्रादारवौ क्काणः स्वनः क्कणरणावपि ।

संगीते तु स्वराः सप्त षड्जगान्धारनामकौ ।।२९३ ।।

ऋषभो मध्यमः पञ्चमो निषादोऽथ धैवतः ।

तद्भेदा मन्द्रमध्याख्यताराः स्थानादिभेदतः ।। २९४ ।।

क्रन्दितं रुदितं कुष्टं प्रणादः सीत्कृते नृणाम् ।

पर्दनं गुदजः शब्दः कर्दनं तूदरोद्भवः ।। २९५ ।।

क्ष्वेडा सिंहध्वनिः शब्दस्तुमुलो व्याकुलः स्वनः ।

भटानां तु कलकलः कोलाहल इतीरितः ।। २९६ ।।

मर्मरो वस्त्रपत्राणां शिञ्जितं भूषमोद्भवे ।

वाजिनं हेषया हेषा करिणां गर्जबृहिते ।।२९७ ।।

शब्दे धनुर्भवेऽथ स्याद्विस्फारोऽथाब्दनिस्वने ।

गर्जिस्तु गर्जितं चैव स्वनितं स्तनितं समम् ।। २९८ ।।

पक्षिणां कूजितं नादस्तिरश्चां वासितं रुतम् ।

भषणं बुक्कनं श्वानध्वामे रेषा वृकोद्भवे ।। २९९ ।।

कणितं पीडितध्वामने सुरते मणितं रवः ।

गुन्दलो मर्दलोद्भूते प्रक्वणस्तन्त्रिकारवः ।। ३०० ।।

क्षीजनं वंशजे शब्दे टुट्टुरो भेरिसंभवे ।

तारोऽत्युच्चैर्ध्वनिर्मन्द्रो गम्भरो मधुरः कलः ।। ३०१ ।।

शब्दविकृतिकाकू तु प्रतिशब्दप्रतिध्वनी ।

इत्थं शब्दोद्भवो वर्गो विशेषेण विवेचितः ।। ३०२ ।।

समूहः प्रकरः संघो निकरौघव्रजा अपि ।

संघातो मण्डलं चक्रवालं वृन्दकदम्बके ।। ३०३ ।।

कलापः पटलं कूटं स्तोमो व्रातगणावपि ।

संहतिः संचयो जातं चयो निवहजालके ।। ३०४ ।।

राशिर्विस पुञ्जौ च संदोहो व्यूहपेटके ।

उत्करः समवायोऽपि यूथं तिर्यग्गणे मतम् ।। ३०५ ।।

प्राणिनां संघसार्थौ तु निकायस्तुल्यधर्मिणाम् ।

सजातीनां कुलं चैव वर्गः स्यात्सदशां पुनः ।। ३०६ ।।

पशूनां समजः संघः समाजो देहिनां स तु ।

शुकानां शौकमित्यादिप्रत्ययैः स्यात्तदर्थकैः ।। ३०७ ।।

मायुरतैत्तरादीनि नामानि स्युस्तदर्थतः ।

कथ्यन्ते तेऽपि संघार्थः प्रत्ययाः कतिचिन्मया ।। ३०८ ।।

यौवतं गर्भिणं क्लीबे युवतीगर्भिणीचये ।

तथौपगवम प्युक्तमौक्षकं वात्सकं पुनः ।। ३०९ ।।

औरभ्रहास्तिके कावचिकमाजकमित्यपि ।

मानुष्यकधैनुके तु गाणिक्यं कैश्यकैशिके ।। ३१० ।।

आश्वमश्वीयमश्वानां स्मृतं वाडव्यमित्यपि ।

कैदारिकं तु कैदार्यं पार्श्वं पर्शुगणे स्मृतम् ।। ३११ ।।

वातूलं वात्यया साकं गोत्रं गव्या गवां चयः ।

खल्या च खलिनी पाश्या बन्धुता जनता मता ।। ३१२ ।।

ग्रामता गजतेल्यादिः स्वयं ज्ञेया धिया बुधैः ।

श्रेणी रेखा तती राजी पङ्क्तिर्मलाबलिः पुनः ।। ३१३ ।।

धोरणी श्रेमिवीथ्यौ च द्वितयं युगलं समम् ।

यामलं यमलं द्वन्द्वं युग्मं द्वैतं यमं द्वयम् ।। ३१४ ।।

प्रभूतं प्रचुरं भूरि पुरुहं बहुलं बहु ।

अदभ्रपुष्कले भूयः स्फिरं भूयिष्टमित्यपि ।। ३१५ ।।

क्षुल्लस्तेके तुच्छमल्पं दभ्राणुतलिनं तनु ।

कृशं सूक्ष्मं तथा क्षुद्रं पेशले श्लक्ष्णमित्यपि ।। ३१६ ।।

कणे लेशलवौ तुल्यौ हस्वे चापि लघु स्मृतम् ।

अतिस्तोके तथाल्पिष्टमल्पीयोऽणीय इत्यपि ।। ३१७ ।।

अथोच्छ्रायोत्सेधा ——नगाद्यारोह एव हि ।

उद्धरं चोन्नते तुङ्गमुच्चं प्रांशूच्छ्रिते समे ।। ३१८ ।।

उदग्रमथ नीचैव मन्थरं कुब्जवामने ।

खर्वं ह्रस्वं पृथौ व्यूढं विशालं पृथुलं पुनः ।। ३१९ ।।

स्फारं विशङ्कटं चोरु विस्तीर्णविपुले महतू ।

बृहत्ततं तथानाहो दैर्ध्यमायामसंज्ञकम् ।। ३२० ।।

आरोह उदयोच्छ्रायौ समासः संग्रहः समः ।

संक्षेपश्च समाहारो व्यासाभोगौ तु विस्तरे ।। ३२१ ।।

समग्रं सकलं विश्वं सर्वाशेषाखिलानि च ।

अनूनाखण्डकृत्स्नानि समस्तान्यून एव च ।। ३२२ ।।

भित्तं नेमं दलं शल्कं खण्डार्धशकलनि तु ।

भागो वण्टस्तथांशोऽपि तुर्यांशः पादसंज्ञकः ।। ३२३ ।।

कश्मलं मलिनं म्लानं कच्चरं च मलीमसम् ।

पवित्रं मेध्यपूते च पावनं पुण्यनाम च ।। ३२४ ।।

निर्मलं विमलं वी ध्रमुज्ज्वलं विशदं शुभम् ।

चोक्षं शुचि विशुद्धं चावदातं चाप्यनाविलम् ।। ३२५ ।।

निर्णिक्तं क्षालितं धौतं मृष्टसंशोधिते समे ।

पराङ्मुखपराचीनेऽभिमुखे संमुखं मतम् ।। ३२६ ।।

वर्य्यं मुख्यं प्रकृष्टं च वरेण्यप्रवरे वरम् ।

प्रवेकानुत्तरऽग्रयं चाग्रेसरं प्रमुखं तथा ।। ३२७ ।।

परप्रष्टपराध्यानि ग्रामण्यग्रण्यनुत्तमम् ।

श्रेष्ठसत्तमतुल्याश्च शब्दा योज्जा धिया स्वयम् ।। ३२८ ।।

स्यात्पूर्वपदतो योगश्चैषां मुख्यार्थवाचिनाम् ।

शार्दूलसिंहनागोद्धमचर्चिकामतल्लिकाः ।। ३२९ ।।

प्रकाण्डतल्लजेत्यादिशब्दा ज्ञेया यथायथम् ।

अप्रधानाधमे गर्ह्यमणकं कुत्सितं पुनः ।। ३३० ।।

अवद्यमपकृष्टं च निकृष्टम ब्रुवरेफसी ।

याप्यं काण्डावमे चेललं कुपूयं खेटमेव च ।। ३३१ ।।

मनोहरमनोज्ञे तु रुचिरं मञ्जुमञ्जुले ।

कान्तं वल्गु प्रयं रुच्यं शोभनं चारुपेशले ।। ३३२ ।।

बन्धुरं चाभिरामं स्यात्सुषमं साधुसुन्दरे ।

मनोहारि काम्यकम्रे कमनीयमनोरमे ।। ३३३ ।।

व्युष्टिः फलमरामं सायात्सषमं तु फल्गु शून्यार्थवाचकम् ।

वशिकं रिक्ततुच्छे च शुन्येऽथ निबिडे पुनः ।। ३३४ ।।

निरन्तरघने सान्द्रं बहुले दृढमुच्यते ।

नीरन्ध्रं गाढमित्येवं पेलवं विरलं तनु ।। ३३५ ।।

सद्यस्कं नूतने नत्नं नवीनं नव्यनामकम् ।

प्रत्यग्राभिनवे जीर्णं पुरातनचिरंतने ।।३३६।।

प्रत्नं जरत्प्रतनं च मूर्ते स्यान्मूर्तिमत्तथा ।

उच्चावचं नैकभेदमतिरिक्ताधिके समे ।।३३७।।

समीपसंनिधानोपकण्ठाभ्यग्राणि संनिधिः ।

उपान्त्यसविधे पार्श्वमुपान्तनिकटे अपि ।।३३८।।

संनिकर्षोऽन्तिकाभ्याशे ससीमं चोपकण्ठके ।

सनीडं संनिकृष्ठं च समर्यादमनन्तरे।।३३९।।

अत्यन्तनिकटे नेदिष्ठं दूरे दवीयो मतम् ।

दविष्टं त्वतिदूरे स्याच्छाश्वतं ध्रुवमित्यपि ।। ३४० ।।

नित्यं त्वनश्वर स्थेयः स्थिरे स्थेष्टमतिस्थिरम् ।

स्थास्नु कूटस्थामित्येवं सर्वकालैकरूपगम् ।। ३४१ ।।

स्थावरं त्वगति प्रोक्तं जङ्गमे तु चराचरम् ।

चरं त्रसं जगच्चैवं चरिष्णाविङ्गमित्यपि ।। ३४२ ।।

चपलं चञ्चलं लोलं कम्पनं तरलं चलम् ।

पारप्लवं कम्प्रमुक्तं चटुलं चास्थिरे समम् ।। ३४३ ।।

अवक्रसरलौ तुल्यावृजुः प्रगुणसंगतः ।

कुटिलं वेल्लितं वक्रं भङ्गुरवृजिने समे ।। ३४४ ।।

जिह्मभृग्ने अरालं चादिमादी प्रथमः पुनः ।

पौरस्त्यमग्यपूर्वे च जघन्यान्तेऽन्तिमं मतम् ।। ३४५ ।।

पश्चिमं चरमं चापि पाश्चात्यान्तालपि स्मृतौ ।

मध्यमं मध्यमीयं तु विचालाभ्यन्तरे समे ।। ३४६ ।।

अन्तरं चान्तरालं च मध्यं माध्यन्दिनं समम् ।

सधर्मा सदृशश्च समानः संलिभः सदृक् ।। ३४७ ।।

सरूपस्तु सवर्णोऽपि प्रतिबिम्बं प्रतिच्छन्दः ।

अपष्ठुरं विलोमं च प्रतिकूलमष्ठ च ।। ३४८ ।।

अपसव्यप्रतीपेऽपि प्रसव्यं तद्विशेषतः ।

वपुरङ्गं तथा सव्यमपसव्यं च दक्षिणे ।। ३४९ ।।

अयन्त्रितमबन्धं चानर्गलोच्छृङ्खले समे ।

उद्दामं प्रकटं व्यक्तं स्फटं स्पष्टोल्बणो समे ।। ३५० ।।

निस्तलं वर्तुलं वृत्तं परिमण्डलमित्यपि ।

करम्बकबरौ मिश्रे संपृक्तखचितौ समौ ।। ३५१ ।।

शीघ्रं क्षिप्रं द्रुतं तूर्णं त्वरितं सत्वरं लघु ।

अनारताशे नित्याजस्त्रे त्वविरतं पुनः ।। ३५२ ।।

अश्रान्तानवरते सततं संततं समम् ।

आकीर्णं संकुलं कीर्णं संकीर्णेऽथाकुलं मतम् ।। ३५३ ।।

पूरितं भरितं व्याप्तं निचितं छन्नसंज्ञके ।

प्रतिक्षिप्तनिरस्ते तु प्रत्याख्यातनिराकृते ।। ३५४ ।।

प्रत्यादिष्टापविद्धे च परीतं परिवेष्टितम् ।

परिक्षिप्तनिवृत्ते च प्रत्यक्तं तज्झितं धुतम् ।।३५५ ।।

उत्सृष्टविधुते हीनं विन्नावित्ते विचारितम् ।

संरुद्धसंवृते छन्नं संवीते रुद्धमित्यपि ।। ३५६ ।।

स्थगितं तिरोहितं च पिधानस्थगने समे ।

छदनं च तिरोधानं ०यवधा दर्शिऽतेप्यथ ।। ३५७ ।।

दर्शिताविष्कृते तुल्ये बोधितं तु प्रकाशितम् ।

अनादृतेऽप्यवमतं तथावगणितं समम् ।।३५८

अवहेलाप्यवज्ञा स्याद्व्रीढाथोन्मूलिते पुनः ।

आवार्हितोद्धृतोपाटितानि त्रिषु मतान्यथ ।।३५९

कम्पितं चलितं ? धूतं लुलितं वेल्लितं समम् ।

प्रोङ्खितान्दोलिते चापि देश्ये हिञ्चितमीक्ष्यते ।।३६०

दोला प्रेङ्गखा तथा प्रेङ्खोलनं फाण्टमयत्नजः ।

न्यञ्चितं स्यादधःक्षिप्ते (ऊर्ध्व?) मुक्तमुदञ्चितम् ।।३६१

अस्तनुत्ते तथा नुन्नं तेजितं निशितं शितम् ।

क्ष्णुतं शातनिशाते चोतस्यूतोतानि सीविते ।।३६२।।

जातलक्षे मतौ हीतहीणावथ तनूकृते ।

त्वष्टं तष्टं समं पक्वं स्मृतं परिमतं त्रिषु ।।३६३

प्लुष्टदग्धोषिताश्चैव निष्पक्वक्वथिते समे ।

निष्पन्नसिद्धनिर्वृत्ता विलीनविद्रुतद्रुताः ।।३६४

दारितं पाटितं भिन्नं प्रतिज्ञातोरुरीकृते ।

संश्रुताङ्गीकृते चाप्यूरीकृतं तूररीकृतम् ।।३६५।।

प्रतिश्रुताश्रुते तुल्ये संगीर्णसपि दृश्यते ।

लूनं दितंछितं छिन्ने खण्डिते छेदितं पुनः ।। ३६६।।

प्राप्तमासादितं लब्धं गलितं पतितं च्युतम् ।

स्कन्नं पन्नं तथा स्रस्तं भ्रष्टं चान्वेषिते मतम् ।। ३६७ ।।

गवेषितं मार्गितं चान्विष्टं मृगितमित्यपि ।

क्लिन्नं स्तिमितमार्द्रं च समुन्नोन्नावपि स्मृतौ ।। ३६८ ।।

तिमितोद्रौ प्रहिते च —————— ।

प्रेषितं स्थापितं प्रेतः —————— ।। ३६९ ।।

प्रथिते विश्रुतः ख्यातः प्रज्ञाते वित्त इत्यपि ।

तप्तधूपायितौ दूनो धूपितस्तापितः स मः ।। ३७० ।।

शीने स्त्यानं तथा प्रोक्तं निर्वातो गतमारुते ।

निर्वाणः शीतवह्नौ च प्रौढवृद्धैधितान्यथ ।। ३७१ ।।

हन्ने गूनं तथा प्रोक्तं मूत्रिते मीढमित्यपि ।

ज्ञातं बुद्धं मतं चैवावगतावसिते अपि ।। ३७२ ।।

विदितं बुधितं तुल्ये मनितं ज्ञातनामनि ।

गुप्तं गोपायितं त्रातं रक्षितं कार्मणं त्वथ।।३७३।।

मूलकर्म वशीकर्म तथा संवननं स्मृतम् ।

आटोपाडम्बरे चैव संरम्भोऽपि विभाव्यते ।। ३७४ ।।

रचनायां निवेशोऽथ गतवीर्या तु विह्यतिः ।

व्रज्या चर्या विहारोऽपि वीङ्खा पर्यटनं पुनः ।। ३७५ ।।

अटाट्या परिसर्पोऽपि तथा प्रोक्तः परिक्रमः ।

व्यत्यासे च विपर्यासो व्यत्यये तु विपर्ययः ।। ३७६ ।।

वैपरीत्यमथ स्फातिः वृद्धिः प्रीणनसंज्ञिका ।

प्रणतिस्तु प्रणामोऽपि प्रणिपातस्तथोच्यते ।। ३७७ ।।

पर्याप्तं प्रकामं च निकामं काममित्यपि ।

यथेप्सितं तथेष्टं च अत्यर्थे गाढमुच्यते ।। ३७८ ।।

भृशं बाडं तथा तीव्रं दृढोद्गढे तथा समे ।

नितान्तनिर्भरोत्कर्षातिमर्यादा भरे स्मृताः ।। ३७९ ।।

जृम्भणं जृन्भया साकं परिष्वङ्गो ऽङ्कपाल्यपि ।

आलिङ्गनं च संश्लेषः परिरमभोपगूहने ।। ३८० ।।

उत्सवः क्षण उद्धर्षो महश्चोक्तस्तथोद्धवः ।

मेलके संगमः सङ्गो निरोधो निग्रहो मतः ।। ३८१।।

विघ्नो व्यवायसंज्ञोऽसौ प्रत्यूहश्चान्तरायवत् ।

प्रस्तावोऽवसरो वेला वारो प्रक्रमनाम च ।। ३८२ ।।

क्षणः समय इत्येवमुपोद्धातोऽप्युपक्रमः ।

अभ्यादानमथारम्भः प्रयोगः प्रक्रमः समः ।। ३८३ ।।

अभिक्रमस्तथारोह उत्क्रमो व्युत्क्रमः पुनः ।

विरहो विप्रयोगोऽथ विप्रलम्भो वियोगकः ।। ३८४ ।।

कान्तिर्लक्ष्मीरभिख्या श्रीर्विभूषाभा च वि भ्रमः ।

राढा शोभा तथा छाया सुषमातिशयोद्भवा ।। ३८५ ।।

आकारस्त्विङ्गितं हेतुर्निमित्तं कारणं समम् ।

निबन्धनं निदाने तु बीजं कार्यं तु तद्भवम् ।। ३८६ ।।

प्रयोजनं कृत्यमर्थः सामान्यं जातिरुच्यते ।

व्यक्तिर्विशेषसंज्ञा स्यात्सा पृथक्त्वनिबन्धनम् ।। ३८७ ।।

गुणाः स्त्वं रजश्चैव तमः सांख्यमतानुगाः ।

स्पर्धा द्रोहस्तथा बन्ध्यं निष्फलं मोघमित्यपि ।। ३८८ ।।

निरर्थकं मुधा चान्तर्गडु चाथ व्ययः क्षयः ।

अर्थव्यपगमः प्रोक्तो भ्रेषो भ्रंशस्तथोचितात् ।। ३८९ ।।

नाशोऽभावस्तथा संनिवेशः संस्थानमीक्ष्यते ।

विस्रम्भोऽप्यथ विश्वासो विकारः परिणामतः ।। ३९० ।।

भ्रमो भ्रान्तिर्भ्रमिश्चक्रावर्तो घूर्णौ तु घूर्णनम् ।

ष्टेवनं ष्टीवनं ष्ट्यूतं थूत्कृतं श्लेष्ममोचने ।। ३९१ ।।

निवृत्तिर्विरतिश्चेपरमो विधुवनं पुनः ।

विधूननं समं प्रोक्तं स्खलनं रिङ्खणं समे ।। ३९२ ।।

समुच्चयोपहारौ तु समाहारोऽपि कथ्यते ।

उपादानं तथा ग्राहो निष्क्रमो बुद्धिशक्तिजः ।। ३९३ ।।

अथ चतुर्थोऽध्यायः

पर स्थित्युपादविनाशात्मजगतो हेतवे सते ।

कूटस्थाय नमस्तस्मै कस्मैचित्परमात्मने ।। १ ।।

मनुष्यो मानवो मर्त्यो मनुजः पुरुषो नरः ।

भूस्पृक्पूरुषो विट् स्यात्पुमानन्पञ्चजनो नरि ।। २ ।।

बालस्तनंधयौ पोतः पाको डिम्भः कुमारकः ।

शिशुः शावोऽर्भकः क्षीरकण्ठोत्तानशयावपि ।। ३ ।।

शैशवं शिशुता बाल्यं युवा स्यात्तरुणः समः ।

वयःस्थोऽप्यथ वृद्धे तु स्थविरः प्रवया जरन् ।। ४ ।।

जी नो जीर्णो जरि यातयामो वृद्धत्ववार्द्धके ।

विस्रसा स्थाविरं ज्यायान्वर्षीयान्दशमी पुनः ।। ५ ।।

पण्डितः कोविदो विद्वान्कृष्टिर्व्यक्तः कृती कविः ।

मेधावी सूरिदोषज्ञा ज्ञः प्राज्ञो निपुणः पटुः ।। ६ ।।

विचक्षणः सुधीर्धीरो विपश्चिच्चतुरोऽपि च ।

दक्षोऽभिज्ञो बुधो लब्धवर्णो वैज्ञानिकस्तथा ।। ७ ।।

मनीषी प्राप्तरूपोऽपि निष्णातोऽप्यभिरूपकः ।

दक्षः कृतमुखश्चैव कृतहस्तोऽपि दृश्यते ।। ८ ।।

संख्यावान्कृतकर्मापि प्रवीणोऽपि विशारदः ।

प्रगल्भः प्रतिभायुक्तो विदग्धः छेक इत्.पि ।। ९ ।।

छइल्लो दृश्यते देश्ये प्रौढो बुद्धिगुणान्विते ।

सूक्ष्मदर्शी कुशाग्रीयबुद्धिस्तत्कालबुद्धिदः ।। १० ।।

दूरदर्शी दीर्घदर्शी प्रत्युत्पन्नमतिः पुनः ।

चिद्रूपो ह्यदयालुस्तु ह्यष्टः सह्यदयस्तथा ।। ११ ।।

क्षुण्णे प्रहत इत्येवमन्तर्वाणिस्तु वेत्तरि ।

वाग्मिवाक्पतिवागीशा वावदूकः प्रवाक्तु सः ।। १२ ।।

वदावदो वदो वक्ता वाचाटः कद्वदश्च सः ।

समौ जल्पाकवाचालौ यद्वदोऽनुत्तरस्तु सः ।। १३ ।।

एडमूकानेडमूकौ हीमवादिनि विश्रुतौ ।

शब्दनो रवणस्तुल्यौ कुवादे कुचरो मतः ।। १४ ।।

लोहलोऽव्यक्तवाचि स्यान्मूकोऽवागस्वरः समः ।

विदुरो वेदिता विन्दुर्वन्दारुः स्तुतिकर्तरि ।। १५ ।।

आशंसितरि चाशंसुर्दुर्मुखे मुखरः स्मृतः ।

तथाबद्धमुखश्चापि शक्तः प्रियंवदे मतः ।। १६ ।।

वन्यो दानशीले स्याद्वदान्योऽपि च दृश्यते ।

मूर्खो बालो जडोऽमेधो विवर्णो मातृशासितः ।। १७ ।।

वैधेयो मूढमन्दौ च यथाडातोऽपि बालिशः ।

देवानां वल्लभो जाल्मः क्रियाकुण्ठेऽथ कथ्यते ।। १८ ।।

मन्दश्चिरक्रिये तु स्याद्दीर्घसूत्रोऽन्यलिङ्गवत् ।

कर्मोद्यतः क्रियावान्स्यात्कर्मठः कर्मतत्परः ।। १९ ।।

कर्मक्षमः कर्मशीलोऽलंकर्मीणोऽपि कथ्यते ।

तीक्ष्णकर्मकरः प्रोक्तः शूलिकः स्वरुचौ पुनः ।। २० ।।

स्वैर्यपावृतस्वच्छन्दौ यथाकामी निरर्गलः ।

निरवग्रहः स्वतन्त्रोऽपि स्वेच्छा स्वैरिता च सा ।। २१ ।।

यदृच्छा नाथवान्निघ्नगृह्यकौ श्लीललक्ष्मणौ ।

लक्ष्मीवानीश्वरश्चेभ्यो धमाढ्योऽपि विभाव्यते ।। २२ ।।

छन्दाधीनवशायत्ततन्त्राद्यास्तत्र भूरिशः ।

संपत्तिः श्रीर्वीभूतिस्तु लक्ष्मीः संपत्समा स्त्रियाम् ।। २३ ।।

दरिद्रोऽकिंचनो निःस्वो निर्धनः कीकटश्च सः ।

दुर्गतो दुर्विधो दुःस्थो नायकोऽथाधिभूः प्रभुः ।। २४ ।।

विभुः स्वामी पतिर्नाथो नेता भर्तेश्वरः पिनः ।

इन्द्रेनावीशितेशश्च आर्यः परिवृढः समः ।। २५।।

भृत्यो गोप्यो नियोग्यश्च दासे डिङ्गरकिंकरौ ।

चेटः प्रेष्यभुजंगौ च परिस्कन्दपरैधितौ ।। २६ ।।

परिचारपरान्नौ च परपिण्डाद एव च ।

भृतिभुग्निर्भृतिः कर्मकरो वैतनिकः पुनः ।। २७ ।।

भृतकः कर्मकारोऽपि खलपूर्बहुकर्मकृत्।

भृतिः पणस्तथा मूल्ये भरणावेतने मते ।। २८ ।।

विधानिर्वेशबर्माणि भोगो वेश्याभृतिर्मतः ।

भारिको भारवाहः स्यादथ वैवधिकः स्मृतः ।। २९ ।।

वार्तावहेऽथ भारे स्याद्वीवधो विवधः पुनः ।

शिख्यं काचस्तदाधारयष्टिरुक्ता विहङ्गिका ।। ३० ।।

विक्रान्तसुभटौ वीरः सूरचारभटौ स्मृतौ ।

कातरो भीरुको भीतश्चकितो भीरुभीलुकौ ।। ३१ ।।

दरितः कान्दिशीकस्तु भयद्रुत उदीरितः ।

उत्पिञ्जलौ तु समुत्पिञ्जल आकुले ।। ३२ ।।

व्यग्रे विहस्त इत्युक्त उदीर्णोदारसत्तमाः ।

महाशयोद्भटोदात्ता महात्मा च महामनाः ।। ३३ ।।

कृपणः किंपचनोऽपि कदर्यस्तद्धनः पुनः ।

बद्धमुष्टिस्तथा क्षुद्रः कीनाशे च मितंपचः ।। ३४ ।।

दयालुः करुणासक्तः कृपालुः सूरतोऽपि सः ।

कृपा दया घृणा शूकोऽनुकम्पा करुणापि च ।। ३५ ।।

अनुक्रोशोऽथ हिंस्रे स्याच्छरारुर्घातकोऽपि सः ।

व्यापादनं विशसनं हिंसा निर्वासनं वधः ।। ३६ ।।

निर्ग्रन्थनप्रमथने निस्तर्हमपरासने ।

वधोद्यतस्त्वाततायी षड्भेदास्तद्नता मताः ।। ३७ ।।

नामशेषो यशःशेषः परासुः संस्थितश्च सः ।

व्यापन्नालेख्यशेषौ चोपगतो मृत इत्यपि ।। ३८ ।।

तदर्थं तदहे दानमौर्ध्वदेहिकमुच्यते ।

अपस्नानं मृतस्नानं महामलनिवारणम् ।। ३९ ।।

पितृतर्पणनिवापौ चिता चित्याचितस्तथा ।

प्राञ्जलः सरलोदारावञ्जसौ दक्षिणे पुनः ।। ४० ।।

ऋजूदारावपि प्रोक्तौ निकृतानृजुशठाः समाः ।

क्रूरे नृशंसनिस्त्रिशपापा धूर्तस्तु वञ्जके ।। ४१ ।।

कुहको व्यंसको मायिदाण्डाजिनिकजालिकाः ।

मायायां निकृतिः शाठ्यं शठता कपटे तथा ।। ४२ ।।

दम्भः कूटं मिषं व्याजो लक्षं छद्मछले अपि ।

कैतवं चोपधिश्चैवं व्यपदेशमनिभौ समौ ।। ४३ ।।

कुर्कुटिर्दमभचर्या च कुहना वञ्जने पुनः ।

प्रतारणाभिसंधाने व्यलीकं परवञ्जने ।। ४४ ।।

सभ्यसज्जनसाध्वार्या दुर्जनः पिशुनः समः ।

खले नीचो द्विजिह्वोऽपि मत्सरी सूचकस्तथा ।। ४५ ।।

नीचकर्णेजपौ दोषैकदृक् चौरस्तु तस्करः ।

पाटच्चरस्तेनदस्युपरिमोषिमलम्लुचाः ।। ४६ ।।

ऐकागारिकनामानि परिपन्थिक इत्यपि ।

परास्कन्दी हरेत्साक्षात्स प्रोक्तः पश्यतोहारः ।। ४७ ।।

स्तेयं चौर्यं चौरिकं तु लोप्त्रं चौर्याहृतं धनम् ।

आलसः शीतकालस्यौ मन्दोऽनुष्णोदरस्पृशौ ।। ४८ ।।

यद्भविष्यस्तथा दैवपरो दैवमतिर्मतः ।

चतुरः पेशलो दक्षः पटूष्णावृष्णकोऽपि च ।। ४९ ।।

आसक्तः प्रसितश्चेव तत्परः प्रवणः समः ।

प्रह्वः परायणस्तुल्यौ स्थूललक्षस्तु दातरि ।। ५० ।।

उदारे दानशोण्डस्तु बहुदः परिकीर्तितः ।

स्पर्शनं वित रणं चैव प्रतिपादन मित्यपि ।। ५१ ।।

दानं विसर्जनं त्याग उत्सर्जनविहायिते ।

मार्गणो याचकोऽर्थी च तर्कुकोऽपि वनीपकः ।। ५२ ।।

याचना प्रार्थना याच्ञा प्रणयोऽध्येषणैषणे ।

अर्दनासनिनाम्नी च मण्डनेऽलंकरिष्णुकः ।। ५३ ।।

प्रसारी तु विसारी स्यात्सृमरः सायाद्विपूर्वकः ।

विसृत्वरोऽपि तत्रैव लज्जाशीलस्त्रपिष्णुके ।। ५४ ।।

क्षमी क्षन्ता सहिष्णुश्च तितिक्षुः सहनः पुनः ।

क्षमायां सहनं चैव तितिक्षा च निगद्यते ।। ५५ ।।

ईर्षालुकुहनौ तुल्यौ क्रोधनामर्षणौ समौ ।

रोषणः क्रोधवाञ्चैव चण्डः स्याद्बहुकोपनः ।। ५६ ।।

ईर्षाक्षान्ती क्षुधायां तु बुभुक्षाप्यशनायया ।

जिघत्सा क्षुधिते चाथ जिघत्सुः स्याद्बुभुक्षितः ।।५७ ।।

तृष्णक् पिपासितश्चैव पिपासुस्मृषितः समौ ।

तृट् पिपासा तृषोदन्या रसादाने च शोषमम् ।। ५८ ।।

भक्षको घस्मरश्चैवाद्मरश्चाशित इत्यपि ।

अन्धः सान्तं कूरमन्नं भक्तभिस्से च दीदिविः ।। ५९ ।।

अशनं चोदनं जीवनकं वाजः प्रसादने ।

मण्डं तु दग्धिका सर्वरसाग्रं भिस्सचापि सा ।। ६० ।।

दधिमण्डं मस्तुसंज्ञं भक्तोद्भूतं यथा हि तत् ।

निस्रावमासराचामा यवागूस्तरला स्त्रियाम् ।। ६१ ।।

श्राणा विलेपिनी सा चोष्णिका मुद्गादिसंभवा ।

प्रहितं सूपसूदौ च व्यठ्जनं तु घृतादिकम् ।। ६२ ।।

कृसरस्तृसरस्तुल्यौ तिलान्नेऽपूपपिष्टकौ ।

पूपोऽथ पोलिकार्थाः स्युः पूलिकापोलिपूपिकाः ।। ६३ ।।

पूपली चाथ पौलिस्तु मनाक्पक्वे स्मृतावुभौ ।

अभ्योषश्च तथाभ्यूषो निष्टानं तेमने मतम् ।। ६४ ।।

करमबश्च करमभोऽपि दधिसक्तुसमुद्भवः ।

घार्तिको घृतपूरोऽपि पिष्टपूरो पि कत्यते ।। ६५ ।।

वटकेऽवसेकिमोऽप्युक्तो धाना भ्रष्टयवाः स्मृताः ।

धानाचूर्णं सक्तवस्तु लाजाः स्युः पुनरक्षताः ।। ६६ ।।

चिपिटः पृथुकश्चैव यवचूर्णे तु चिक्कसः ।

गोधूमस्य मतं चूर्णं समिता संमता स्त्रियाम् ।। ६७ ।।

समितां सह दुग्धेन मर्दयित्वा सुशोभनम् ।

पचेद्धृतोत्तरे खण्डो व्यसेत्पक्वं नवे गटे ।। ६८ ।।

ततो मरिचचूर्णौलाखण्डचूर्णितम् ।

कुर्यात्कर्पूसंयुक्तं संयावममृतोपमम् ।। ६९ ।।

गुडक्वाथौ समावीक्षुरसः स्याच्छर्करा पुनः ।

सितोपला सिता तुल्ये मधुधूलिस्तु खण्डकः ।। ७० ।।

मधुधूलिविकारे च मत्स्यम्डी फाणितं तथा ।

मार्जिता तु रसालायां शिखरिण्यपि निगद्यते ।। ७१ ।।

यूर्यूषरससंज्ञा हि रससब्दाः प्रकीर्तिताः ।

क्षीरदुग्धे पयः पुंसवने सोमजमित्यपि ।। ७२ ।।

ऊधस्यं गोरसः स्तन्यं पेयूषं तन्नवं मतम् ।

पयस्यं घृतदध्यादि विकारौ पयसौ यथा ।। ७३ ।।

कूर्चिका च किलाटी च परमान्नं तु पायसम् ।

क्षैरेयी घृतनामानि तुल्ये द्वे घृतसर्पिषी ।। ७४ ।।

हविष्यं हविराघारमाज्यं क्षीरोद्भवं दधि ।

गोरसोऽथाघने तत्र क्लीवे द्वे द्रप्सपत्रले ।। ७५ ।।

नवनीते तक्रसारं दधिसारनवोद्धते ।

घोलारिष्टे कालसेयं दण्डाहतमपि स्मृतम् ।। ७६ ।।

रसायनं गोरसश्चोदश्वित्तक्रे समोदकम् ।

श्वेतं पादजलं चैवार्धनीरं तद्भिदा यथा ।। ७७ ।।

मथितं जलहीनं तु सार्पिष्कं दाधिकं मतम् ।

घृतेन तु तथा दध्ना संस्कृतं वटकादिकम् ।। ७८ ।।

उखासिद्धे पैठरोख्ये राद्धसिद्धे समे उभे ।

जलं विना तु यत्पक्वं भृष्टं धानादिकं विदुः ।। ७९ ।।

भृष्टमांसे भटित्रं तु भूतिर्भरुटकं हि तत् ।

शूलाकृते सूल्यमुक्तं निष्क्वाथरसकौ समौ ।। ८० ।।

प्रणीतं तपसन्नं स्या च्चिक्कणे स्निग्धमसृणे ।

पिच्छलं विजलं चैव स्मृतं विजिविलं तथा ।। ८१ ।।

संमृष्टसोधिते तुल्ये वासितं भावितं समम् ।

काञ्जिके त्वारनालं स्याद्धान्याम्लं काञ्जिकं तथा ।। ८२ ।।

धातुघ्नं चुक्रसौवीरे कुण्डगोलकमित्यपि ।

सुवीराम्लं तथोन्नाहं रक्षोघ्नं च महारसम् ।। ८३ ।।

स्नेहे तैलाभ्यञ्जने तु वेषवार उपस्करे ।

भोजनं निघसो न्यादः खादनं स्वादनाशने ।। ८४ ।।

आहारो जक्षणं जग्धिर्भक्षणं घसिजेमने ।

वल्भनं निघासश्चापि चूर्णनं चर्वणं समम् ।। ८५ ।।

प्रातराशः कल्यवर्तः सग्धिः स्यात्सहभोजने ।

गुडो गुडेरको ग्रासण्डौ कवक इत्यपि ।। ८६ ।।

गडोलकवलौ चापि गण्डोलः सुहितेऽप्यथ ।

तृप्ताध्राताशिताश्चैव सौहित्यं तृप्तिरीक्ष्यते ।। ८७ ।।

फेला पिण्डोलिफेली च भुक्तोत्सृष्टे निगद्यते ।

आत्मंभरिस्तथा कुक्षिंभरिः स्वोदरपूरकः ।।८८।।

आद्यूनः पेट्टिकश्चापि विजिगीषाविवर्जितः

सर्वान्नीनः सर्वभक्षी शाष्कुलः पिशितादनः ।। ८९।।

उन्मादिष्णून्मादयुक्तौ गृध्नुगर्धननलोभनाः ।

लुब्धोऽभिलाषुकश्चैव लोलुभो लोलुपोऽपि च ।।९०।।

लोभः स्पृहा वशो लिप्सा तृष्णा काङ्क्षेच्छया सह ।

आशंसा गर्धवाञ्छे चाशेहा तृट् तु मनोरथः ।। ९१ ।।

अभिलाषस्तथा कामोऽभिध्या स्यात्परवस्तुनः ।

अविनीतोद्धतौ तुल्यौ विनीते प्रश्रितो मतः ।। ९२ ।।

निभृतोऽपि विधेयः स्याद्विनयस्थोऽपि दृश्यते ।

समौ प्रणेयवश्यौ तु वचनस्थ अथाश्रवः ।। ९३ ।।

वियातो धृष्णजो धृष्णुधृष्टौ धृष्टिस्तथा क्वचित् ।

वीक्ष्यापन्नविलक्षौ तु शुभंयुः शुभवत्यपि ।। ९४ ।।

शालीनः शारदोऽधृष्टेऽप्यहंयुः स्यादहंकृते ।

कामनः कामुकः कामी कमरोऽभीक एव च ।। ९५ ।।

कम्रोऽभिकः कामयिता कमितानुक इत्यपि ।

व्यसनी विप्लुतः पञ्चभद्रो ह्यष्टमना अथ ।। ९६ ।।

विकुर्वाणो हर्षणः स्यात्प्रमना हर्षसंयुतः ।

विमना दुर्मनाश्चापि मतश्चान्तर्मनास्तथा ।। ९७ ।।

मत्तोत्कटौ क्षीरितो वाच्यो लक्षणो गुणयुक्स्मृतः ।

निर्लक्षणः पाण्डुपृष्टः कथितो विवशोऽप्यथ ।। ९८ ।।

दुष्टानिष्टमतिः सङ्कसुकस्त्वस्थिर उच्यते ।

मौनशीले तु तूष्णीकस्तूष्णींशीलोऽपि कथ्यते ।। १०० ।।

कीलितो यन्त्रितो बद्धो नद्धः संदानितः सितः ।

संयतो बन्धनं तु स्यादुद्दानं परिकीर्तितम् ।। १०१ ।।

हतः प्रतिहतो बद्धः प्रतिपूर्वोऽपि दृश्यते ।

मनोहतः प्रतिक्षिप्तो पि तथोच्यते ।। १०२ ।।

निष्कासितोऽवकृष्टः स्यादात्तगन्धोऽभिभूतकः ।

निराकृतोऽप्यपध्वस्तो न्यक्कृतो धिक्कतः समः ।। १०३ ।।

तिरस्क्रिया विप्रकारो न्यक्कारः परितो भवः ।

पराभवः परिभावोऽभिभावोऽपि निवेदितः ।। १०४ ।।

अत्याकारनिराकारौ वञ्चितो विप्रलब्धकः ।

निद्रालुः स्याच्छयालुस्तु प्रचलायितघूर्णितौ ।। १०५ ।।

सुप्तः शयितनिद्राणौ जागरी जागरूककः ।

जागर्या जागरा चैव तथा जागरणं हि तत् ।। १०६ ।।

संशयितृसंशयालू गृहीता गृहयालुकः ।

पातुके पतायालुस्तु रोचिष्णौ रोचनो मतः ।। १०७ ।।

दक्षिणीयो दक्षिणार्हो दक्षिण्योऽपि तथोच्यते ।

साधितो दण्डितस्तुल्यौ दापितोऽर्च्ये प्रतीक्ष्यकः ।। १०८ ।।

अर्हितः प्रमहितस्तुल्यावर्चितापचितावपि ।

नमस्यतोऽञ्चितश्चैवाचित र्चार्हणापि च ।। १०९ ।।

उपहारः सपर्या च बलिः पूजापि कथ्यते ।

पीवरः पीनपीवानौ स्थूलविह्वलविक्लवाः ।। ११० ।।

चक्षुष्योऽक्षिगतो ——— सुभगो वलिमांसलौ ।

निर्दिग्धोपचितावंसलः क्षामः कृशदुर्बलौ ।। १११ ।।

तनुश्छातस्तथा क्षीणस्तुन्दिको वृद्धकुक्षिकः ।

पिचिण्डिलस्तुन्दिलोऽपि उदर्युर्दारलौ समौ ।। ११२ ।।

अनासिके विग्रविख्रौ तथा विखुरपीक्ष्यते ।

नतनासोऽवटीटोऽप्यवनाटोऽवभ्रटस्तथा ।। ११३ ।।

क्षुद्रनासिकनः क्षुद्रौ खरणः खरणसः समौ ।

खुरणः खुरणसौ चैवाथोन्नसश्चोग्रनासिकः ।। ११४ ।।

पङ्गौ खलतिकश्रोणावेकदृक्कननः समः ।

काणोऽथ सिपिविष्टश्च ऐन्द्रलुप्तिकः इत्यपि ।। ११५ ।।

बभ्रुः खल्वाटसंज्ञः स्यात्कुब्जोऽल्पतनुरुच्यते ।

कुणिः कुकरनामा स्याद्वामनः खर्वखट्टनौ ।। ११६ ।।

खर्वशाखनिखर्वौ तु बधिरैडावकर्णकः ।

दुश्चर्मा शिपिविष्टः स्याण्ड्वडस्तत्र द्विनग्रकः ।। ११७ ।।

खञ्जे खोडः खोर उक्तः पोगण्डो विकलाङ्गकः ।

ऊर्ध्वजानुरथोर्ध्वज्ञु स्तु तथैव हि ।। ११८ ।।

युतजानु संज्ञुसंज्ञौ प्रज्ञुर्विरलजानुकः ।

वलिनो वलिभ इत्युक्तमुग्रदन्दन्तुरः स्मृतः ११९ ।।

प्रलम्बाण्डो मुष्करः स्यादन्धोत्पश्यगताक्षकाः ।

अधोमुखोन्मुखौ चैवोत्पश्यो मुण्डितकेशिनौ ।। १२० ।।

केशिकः केशवो मुण्डः केकरो वलिरः समौ ।

वृद्धनाभौ तुण्डिलः स्यात्तुण्डिभोऽपि निरीक्षतः ।। १२१ ।।

आतुरो विकृतो ग्लास्नग्लानौ व्याधित आमयी ।

दर्द्रुणो दर्द्ररोगी स्यात्कच्छुरः पामनः समौ ।। १२२ ।।

वातरोगी वातकी सातिसारोऽप्यतिसारिणि ।

चुल्लचिल्लौ क्लिन्ननेत्रपिल्लौ मिलितलोचने ।। १२३ ।।

कफिनि श्लेष्मलः प्रोक्तः श्लेष्मणः क फरोगिणि ।

अर्शोयुगर्शसश्चापि मूर्च्छलो मूर्च्छितः समः ।। १२४ ।।

किलासी सिध्मलः पित्ते स्नेहभूः कफसंज्ञकः ।

खटः श्लेष्मा बलाशोऽपि रोगातङ्कावपाटवम् ।। १२५ ।।

रुग्रुजा व्याधिमान्द्ये चोपतापो गद आमयः ।

आम आकल्यमप्युक्तं राजयक्ष्मा क्षयस्तथा ।। १२६ ।।

यक्ष्मशोषावथ प्रोक्तं क्षुतं क्षुत्क्षव इत्यपि ।

पामा विचर्चिका कण्डूः कच्छूः खर्जूः समे उभे ।। १२७ ।।

खसः कण्डूयनं चापि कण्डूयपि निगद्यते ।

कासः क्षवथुरप्युक्तो व्रणे क्षतमितीरितम् ।। १२८ ।।

विपादिका पदस्फोटो पिटकः स्फोटको गडुः ।

पृष्टग्रन्थिर्मतो गण्डो रूढं व्रणपदं किणः ।। १२९ ।।

श्वेतकृष्टे श्वित्रमुक्तं केशघ्नं चेन्द्रलुप्तकम् ।

त्वक्पुप्पकिलासे च सिध्मकोठौ तु मण्डले ।। १३० ।।

गलगण्डो रोहिणी तु गण्डमाला गलाङ्कुरः ।

हिक्का ह्यल्लासहेक्के तु दुर्नामा तु गुदाङ्कुरः ।। १३१ ।।

अर्शः शोफस्तथा शोथः श्वयथुः परिकीर्तितः ।

पीनसे तु प्रतिश्यायः कुरण्डस्त्वण्डर्धने ।। १३२ ।।

वमथुः प्रच्छर्दिका छर्दिर्वमनं च वमिस्तथा ।

गुदग्रह उदावर्ते मूत्रकृच्छ्रेऽशमरी स्मृता ।। १३३ ।।

बहुमूत्रप्रमेहौ तु भेदा रोगस्य भूरयः ।

आनाहस्तु विबन्धः स्याद् ग्रहणीरुक्प्रवाहिका ।। १३४ ।।

मान्द्यभेदाश्च विद्रधिभगंदरज्वरादयः ।

रोगहरी भिषग्वैद्योऽगंदकारचिकित्सकौ ।। १३५ ।।

दोषज्ञश्च तथा चायुर्वेदी भेषजमौषधम् ।

भैषज्यमगदस्तन्त्रं जायुरप्युच्यते बुधैः ।। १३६ ।।

उपचारश्चिकित्सा चोपचर्या रुक्प्रतिक्रिया ।

क्वाथचूर्णादिभेदेन लङ्घनं त्वपतर्पणम् ।। १३७ ।।

जाङ्गुलिकविषवैद्यौ तु —————— ।

आरोग्यं सह्यवार्त्ते चानामयं स्वास्थ्यमेव च ।। १३८ ।।

पटूल्लाघौ समौ वार्त्तकल्यौ नीरुजि संमतौ ।

माय या विभवेच्छुस्तु संधिजीवकपार्श्वकौ ।। १३९ ।।

अलंकृतां कर्नी दत्ते यः स कूकुदसंज्ञकः ।

स्थिरप्रीतौ नरे नीलीरागश्चिकुर इत्यपि ।। १४० ।।

चपलोऽथ तदन्यस्तु हरिद्रारागको मतः ।

मेदुरे स्निग्धसान्द्रौ च अस्तिमान्धनिको धनी ।। १४१ ।।

पिण्डीशूरो गृहेशूरो गेहेनर्दी तथोच्यते ।

स्वस्थानस्थस्तु गोष्टः स्यात्परद्वेषी तथापरः ।। १४२ ।।

आपन्नापत्स्थितौ तुल्यौ विपत्तिस्तु विपत्तथा ।

कुटुम्बव्यापृतोपाधी अभ्यागारिकसंज्ञकः ।। १४३ ।।

शङ्कुरस्त्रासदायी स्यात्कारमिकपरीक्षकौ ।

जैवातृको दीर्घजीवी वरदे तु समर्धुकः ।। १४४ ।।

सदस्यास्तु सभास्ताराः सभ्याः पार्षद्यनामकाः ।

सामाजिकास्तथा प्रोक्ताः परिषत्सदसी समे ।। १४५ ।।

सभा संसत्समाजश्चास्था गोष्टी पर्षदा सह ।

समितिः स्त्री तथास्थानं दैवज्ञगणकौ समौ ।। १४६ ।।

निमित्तविज्ज्यौतिषिकावादेशिज्ञानिनौ समौ ।

लेखकेऽक्षरजीवी त्वक्षरचञ्च्वक्षराच्चणौ ।। १४७ ।।

लिपिकारवार्णिकौ च लिपिः स्याल्लिविरित्यपि ।

मषीकूपी मषीधानं मष्याविलजलं मसी ।।१४८।।

द्यूतकर्ताक्षधूर्तश्चाक्षदेवी सभिकश्च सः ।

द्यूतं दुरोदरं चाक्षवती कैतवमित्यपि ।।१४९।।

पणोऽथ पाशकः प्रोक्तः प्रासकः परिभावितः ।

अष्टापदः शारिफलं खेलनी शारिरुच्यते ।।२५०।।

शारीणां नयनं सम्यक्परिणायो निगद्यते ।

समाह्वयः प्राणिद्यूतं सर्पग्राह्याहितुण्डिकौ ।। १५१ ।।

ताततुल्यो देशकस्तु शास्ता तत्वोपदेशकः ।

पुण्यवान्सुकृती धन्यो रिष्टतातिः शिवंकरः ।।१५२।।

क्षेमंकरः शिवताति र्मित्रवत्सलमित्रयू।

आस्तिके श्राद्धआख्यातः श्रद्धालुर्नास्तिके पुनः।।१५३।।

नास्तीतिमतिकश्चैष परलोकनिषेधकः ।

विरागी तु विरागार्होऽकल्कनो गतवञ्चने ।। १५४ ।।

क्षमः सहः समर्थोऽसौ प्रभूष्णुः शक्तनामकः ।

भूतगृहीतभूतात्ताविष्टा भूतनिपीडिते ।। १५५ ।।

श्लथे तु शिथिलः प्रोक्तो नष्टबीजस्तु निष्कलः ।

अङ्गमर्दे तु संवाह आसीने तूपविष्टकः ।। १५६ ।।

ऊर्ध्वंदमः स्थितोर्ध्वौ च प्रवासी देशिकोऽध्वगः ।

अध्वन्यश्चाध्वनीनश्च पान्थो हारिस्तु तद्नणे ।। १५७ ।।

शम्बलं च समं प्रोक्तं पाथेयेन नपुंसकम् ।

जाङ्घिकोऽतिजवो वेगगामी जङ्घाल इत्यपि ।। १५८ ।।

जङ्घाकरिकनामासौ त्वरितो जवनो जवी ।

वेगो जवो रयो वाजस्तरो रंहः स्.दः पुनः ।। १५९ ।।

प्रसरोऽतिजवश्चाव मन्थरो मन्दगामिनि ।

कामंगामिनि कामीनोऽनुपूर्वोऽत्यन्तगामिनि ।। १६० ।।

अत्यन्तीनोऽपि तत्रैव सहायः सेवकः समौ ।

अनुप्लवोऽभिगामी चानुगाम्यभिचरस्तथा ।। १६१ ।।

सेवा प्रसादना भक्तिः सेवनं परिचर्यया ।

परीष्ट्याराधनोपास्तिः शुश्रूषा वरिवस्यया ।। १६२ ।।

भक्तिवाच्युपचारोऽपि पद्गपत्तिपदातिकाः ।

पदातिः पादचारी च पादातिकपदाजिनौ ।। १६३ ।।

पुरोगोऽग्रसरश्चापि पुरोगाम्यग्रतःसरः ।

प्रष्टः पुरोगमश्चैवाभ्यागतोऽपि विभाव्यते ।। १६४ ।।

प्राघूर्णाभ्यासिकागन्त्वतिथिप्राघुणकाः समाः ।

आवेशिकमातिथेय्यातिथ्यं तत्र निगद्यते ।। १६५ ।।

अस्तंगते रवौ प्राप्तं सूर्योढः प्राघुणो मतः ।

अभ्युत्थानं गौरवं च व्यथकः स्यादरुंतुदः ।। १६६ ।।

मर्मस्पृगथ लोकस्तु प्रजा जन अपीक्षितः ।

ग्रामेयकस्तथा ग्राम्यग्रामीणावथ सत्कुले ।। १६७ ।।

प्रख्यातवप्तृकः कुल्योऽभिजातमहाकुले ।

कौलेयकः कुलीनोऽपि जात्योऽऽमुष्यायणः पुनः ।। १६८ ।।

अन्ववायः कुलं गोत्रं संतानो जननं तथा ।

अन्वयोऽभिजनश्चापि वंशो नार्यां वधूर्वशा ।। १६९ ।।

वनिता वर्णिनी योषा वामा सीमन्तिनी च सा ।

महीलाबला तथा योषिद्विशेषास्तत्र केचन ।। १७० ।।

प्रमदा सुन्दरी रामा भीरुः कान्ता नितम्बिनी ।

तद्विशेषा गुणैश्चान्ये यथा तरललोचना ।। १७१ ।।

मत्तेभगमना मानवती लीलावती पुनः ।

वामाक्षी तु मृगाक्षी सा तथा स्यादलसेक्षणा ।। १७२ ।।

सुस्मितास्या धनं लीलामानादिः स्यादनेकधा ।

विच्छित्तिश्च विलासोऽपि विव्वोको लीलया सह ।। १७३ ।।

किलिकिञ्चितसंज्ञं च ललितं कुट्टिमं समे ।

मोट्टायितं तु विह्यतं विभ्रमोऽपि निगद्यते ।। १७४ ।।

भेदा दश समख्याताः स्त्रीणां शुभ्रा अलंकृतेः ।

भामिनि कोपना वामा मत्ता छेका च वाणिनी ।। १७५ ।।

कनी कन्या कुमारी च नग्निका अरजाः स्मृता ।

दृष्टेन रजसा कन्या मध्यमा परिकीर्तिता ।। १७६ ।।

तरुणी चरी तुल्ये युवतौ तलुनी मता ।

वराहा दिक्करी वर्या स्वयंवरापतिंवरे ।। १७७ ।।

वधूटी च चिरण्टी स्यात्सुवासिन्यापि कथ्यते ।

पत्नी पाणिग्रहीत्री तु गृहा दाराश्च बूमनि ।। १७८ ।।

भार्या सहचरि जाया वधूः क्ष्त्रं परिग्रहः ।

सधर्मिणी जनी जानिः गृहिणी च तथोच्यते ।। १७९ ।।

द्वितीयोढा कल६ं स्यात्कुटुम्बिन्यां पुरन्ध्यपि ।

भ्रातृजाया प्रजावत्यां पुत्रभार्या जनी स्नुषा ।।१८० ।।

परस्परं भ्रातृवर्गकलत्राणि तु यातरः ।

वीरभार्या वीरकान्ता कुलबाला कुलस्त्र्यपि ।। १८१ ।।

प्रेयसी ह्यदयेशा च दयिता प्राणवल्लभा ।

कान्ता प्राणसमा चैव प्रेष्टा प्रणयिनी पुनः ।। १८२ ।।

प्रेयस्याद्या अमी शब्दाः पुंसि स्यर्वरवाचकाः ।

पतिर्भर्ता वरः सेक्ता रमणो वरयिता तथा ।। १८३ ।।

वि वोढा च धवो भोक्ता रुच्यप्राणप्रियौ समौ ।

उद्वाहोऽथ विवाहश्चोपयामः पाणिपीडनम् ।। १८४ ।।

दारकर्म तथा पाणिग्रहणं परिणयोऽपि च .

पुत्रिकायाः पतिः प्रोक्तो जामाता पुंसलिङ्गकः ।। १८५ ।।

जारे तूपपतिः पुंसि भुजंगो गणिकापतिः ।

सुदायो यौतकं तत्तु हरणं च विभाव्यताम् ।। १८६ ।।

भार्यापति दम्पती तु तथा जायापती समे ।

महीषी पट्टराज्ञी स्याद्भोगिन्यो नृपाङ्गना ।। १८७ ।।

स्वतन्त्रा त्वन्यवेश्मस्था सैरन्ध्री शिल्पजीविनी ।

संचारिका दूतिका त्वसिक्न्यन्तःपुरचारिणी ।। १८८ ।।

आभीरी तु महाशूद्री जातिपुंयोगयोः समा ।

आचार्यी मातुलानी च पुंयोगे प्रोच्यते बुधैः ।। १८९ ।।

आचार्यानी मातुली चोपाध्यायी क्षत्रियी समः ।

स्वतः शूद्रा तथाचार्या क्षत्रिया क्षत्रियाण्यपि ।। १९० ।।

कामुक्यां तु वृषस्यन्तीच्छायुक्ताकामुके समे ।

पतिव्रता चैकपत्नी सुचरित्रा सती च सा ।। १९१ ।।

असती धर्षिणी पांसुलाविनीतेत्वरी समाः ।

पुंश्चली बन्धकी चापि कुलटा खैरिणी मता ।। १९२ ।।

वयस्या तु सखी सध्नीच्याली जीवत्पतिः पुनः ।

पतिवत्नी तथा रण्डा विश्वस्ता विधवा समाः ।। १९३ ।।

निर्वीरा रमणी सा तु पतिपुत्रविवर्जिता ।

शिशुहीना तथाशिश्वी जीवत्तोका तु जीवसूः ।। १९४ ।।

नश्यद्बाला च सा निन्दुः श्मश्रुयुग्नरमालिनी ।

अर्धवृद्धाधवा कात्यायिनी साप्यधवा स्मृता ।। १९५ ।।

भिक्षुकी श्रवणा मुण्डा पोटा स्त्री तु नृलक्षणा ।

वेश्या पणाङ्गना वारवधूः पण्याङ्गना पुनः ।। १९६ ।।

साधारणस्त्री भुजिष्या रूपाजीवा च लञ्जिका ।

गणिकास्वामिनी चुन्दी शमभली कुट्टिनी समे ।। १९७ ।।

पोटी वोटी तथा दासी चेटी स्यात्कुटहारिणी ।

कोटवी नग्निका तुल्या पलिक्नी वृद्धया सह ।। १९८ ।।

रजस्वलाधिरात्रेयी मलिनी पुष्पवत्यवी ।

निष्कसा पुष्पहीना स्याद्राका कन्या रजोवती ।। १९९ ।।

रजः पुष्पः स्त्रियो धर्म आर्तवं मोहनं रतम् ।

सुरतं संप्रयोगश्च संवेशनं रहोरती ।। २०० ।।

संभोगो ग्राम्यधर्मश्च मैथुनं कामकेल्यपि ।

पशुक्रियानिधुवने व्यवायो मिधुन च तत् ।। २०१ ।।

अन्तर्वत्न्यां गर्भिणी चोदरिणी गर्भवत्यपि ।

आपन्नसत्त्वा श्रद्धालुगुर्वी स्याद्दोहदान्विता ।। २०२ ।।

प्रसूतिका प्रजाता च जातापत्या विजातिका ।

गर्भे तु गरभस्तुल्यौ भ्रूणो दोहदलक्षणन् ।। २०३ ।।

गर्भशयो जरायूल्बे प्रसवे विजललं स्मृतम् ।

उलबं च कललं प्रोक्तं दोहदं लालसा पुनः ।। २०४ ।।

श्रद्धया दौह्यदं तुल्यं दारको नन्दनंः सुतः ।

तनयाङ्गजात्मजाः सूनुरुद्वहः पुत्र इत्यपि ।। २०५ ।।

सुतायां दुहिता पुत्री तुक्प्रजा तद्द्वयं मतम् ।

पुत्रिकायां तथा स्द्ीत्वे तोकापत्यप्रसूतयः ।। २०६ ।।

भ्रातृव्यो भ्रातृपुत्रे तु भ्रात्रीयोऽथ स्वसुः सुते ।

जामेयभागिनेयौ तु स्वस्त्रीयकुतपौ समौ ।। २०७ ।।

पुत्रपुत्रे नप्तृपौत्रौ दौहित्रः पुत्रिकासुतः ।

प्रपौत्रः प्रतिनप्ता स्यात्तत्पुत्रपरंपरौ ।। २०८ ।।

पैतृष्वस्त्रीयमातृष्वसेयौ मातृष्वसुः सुते ।। २०९ ।।

द्वैमातुरे विमात्रेयो द्विमातृजविमातृजौ ।

सतीपुत्रे समाख्यातो भाद्रमातुर इत्यपि ।। २१० ।।

सांमातुरस्तथा प्रोक्तः कानीनः कन्यकासुतः ।

सौभागिनेय आख्यातः सुभगायाः सुतो बुधैः ।। २११ ।।

परस्त्रीसंभवे तस्मिन्पारस्त्रैणेय उच्यते ।

दासीपुत्रे तु दासेरो दासेयोऽपि निगद्यते ।। २१२ ।।

नटीसुतेऽथ नाटेरः कौलटेरोऽसतीसुतः ।

औरस्येऽथौरसश्चैव क्षेत्रजो देवराङ्गजे ।। २१३ ।।

गोलकश्च मृते पत्यावमृते कुण्ड एव सः ।

एते शब्दाः पुंसलिङ्गाः सगर्भः सोदरः समौ ।। २१४ ।।

भ्राता सहोदरश्चैव समानोदर्यसंज्ञकः ।

सोदर्यसहजौ पित्र्यपूर्वजौ वृद्धसोदरे ।। २१५ ।।

कनिष्टऽवरजश्चैव यविष्टोऽप्यनुजः स्मृतः ।

जघन्यजः कनीयांश्च यवीयानपि कथ्यते ।। २१६ ।।

पितृव्यस्तु पितुर्भ्राता मातुलो मातृसोदरे ।

पत्नीभ्राता मतः श्यालो देवरः पतिबान्धवे ।। २१७ ।।

देवा देवानन्तरं तौ समानार्थप्रकाशकौ ।

भगिन्या तु स्वसा जामिर्ननान्दा नन्दिनी पुनः ।। २१८ ।।

पत्नीज्येष्टस्वसा ज्येष्टश्वश्रूः सा च कुली मता ।

श्यालिका यन्त्रिणी लध्वी हालिका केलिकुञ्चिका ।। २१९ ।।

क्रीडा खेला नर्मकेली परिहासद्रवावपि ।

कर्करो ललनं नर्म देवनं कूर्दनं समे ।। २२० ।।

पिता जनकतातौ तु वप्ता जनयिता समौ ।

रेतोधोबीजिनौ चापि पितृतातपितामहौ ।। २२१ ।।

प्रतितामहतत्तातौ स्त्रीत्वे मातामहादयः ।

जनन्यम्बा प्रसूर्माता सवित्री जनयित्र्यपि ।। २१२ ।।

उपमाता तु धात्री स्यात्कृमिला तु बहुप्रसूः ।

पतिपत्नीजनन्यां तु श्वश्रूरपि विभाव्यते ।। २२३ ।।

श्वशुरश्च तयोस्तातः पितरः पितृपूर्वजाः ।

मातामहा मातृवंश्या विशेषोऽयं निरीक्ष्यताम ।। २२४ ।।

भ्राता च भगिनी चापि भ्रातरावेकशेषतः ।

पुत्रश्च पुत्रिका चापि पुत्रौ वा पुत्रिकासुतौ ।। २२५ ।।

समौ पिता च माता च पितरावेकशेषतः ।

बान्धवः स्वजनो ज्ञातिः सगोत्रः स्वनिजावपि ।। २२६ ।।

बान्धवः स्वकीय आत्मीयः सपिण्डास्तु सनाभयः ।

नपुंसकं क्लीबषण्ढौ पण्डो देहे पुरं वपुः ।। २२७ ।।

विग्रहः संचरो वेरं मूर्तिः कायघनावपि ।

क्षेत्रगात्रशरीराणि वर्ष्मसंहानने समे ।। २२८ ।।

इन्द्रियायतनं बन्धोघनः पुद्गलसंज्ञकाः ।

तनुः करणमाख्यातं मृतवर्ष्म कलेवरम् ।। २२९ ।।

शवः कुणपनामाथ कबन्धो रुण्डमित्यपि ।

अपशीर्षं क्रियायुक्तं मृतकं तु विभाव्यताम् ।। २३० ।।

देहलक्षणसामुद्रे प्रतीकोऽवयवः समौ ।

अङ्गेऽपघनश्चैकदेशस्तत्र निगद्यते ।। २३१ ।।

वराङ्गं मस्तकं मूर्धोत्तमाङ्गं शिर इत्यपि ।

करणत्राणशीर्षे च मस्तिकं कं नपुंसके ।। २३२ ।।

मुण्डं मौलिः कचाः केशास्तीर्थवाकाश्च कुन्तलाः ।

वालाः स्युश्चिकुरास्तुल्या रचना भार उच्चयः ।। २३३ ।।

हस्तः पाशः कलापश्च पक्षः केशचयोऽपि च ।

कर्करालालकौ तुल्यौ चूर्णकुन्तलखङ्खरौ ।। २३४ ।।

कुरुलो भ्रमरकस्तुल्यौ भाले स्याद्भ्रमरालकः ।

बद्धकेसेषु धम्मिल्लः केशवेषे कबर्यपि ।। २३५ ।।

प्रवेणी वेणिका तुल्ये सीमन्तो वर्त्मके समम् ।

पलितं तु धवलः केशः केशपाशी शिखा समे ।। २३६ ।।

काकपक्षस्तु बालानां शिखण्डकशिखाण्डकौ ।

मुखं तु लपनं वक्त्रं तुण्डमास्यानने समे ।। २३७ ।।

ललाटेऽमिकभाले तु गोध्यलीके समे उभे ।

श्रोत्रं कर्णः श्रुतिः शब्दाधिष्टानं श्रवसा सह।। २३८।।

ध्वनिग्रहो महानादपैञ्जूषौ श्रवणं तथा ।

भालश्रवोऽन्तरे शङ्खो वेष्टनं कर्णशष्कुली ।। २३९।।

नयनं लोचनं नेत्रमम्बकं दृष्टिचक्षुषी ।

अक्षीक्षणे तथा दृक्च तारायां स्यात्कनीनिका ।।२४०।।

चान्द्रं तु नयनं वामं दक्षिणं भानुदैवतम्।

ईक्षणं दर्शनं तुल्ये निशामननिभालने।।२४१।।

अवलोकननिध्याने कटाक्षश्चार्धवीक्षणम्।

अपाङ्गदर्शनं चापि काक्षश्चक्षिविकूणितम्।।२४२।।

उन्मीलनं तथोन्मेषो निमेषः स्यात्रिमीलने।

क्रोधाद् भ्रुवो विकारस्तु भ्रकुटिर्भ्रूकुटिः समे।।।२४३।।

भ्रुकुटिर्भृकुटिश्चापि भ्रूमध्ये कूर्चकूर्पके ।

पक्ष्म चक्षुर्गतं रोम भ्रूरूर्ध्वं रोमपद्धतिः ।। २४४ ।।

शिङ्घिनी नासिका नासा नत्र घोणा विकूणिका ।

गन्धज्ञा घ्राणमारत्यातं तद्वन्नर्कुटकं स्मृतम् ।। २४५ ।।

रदच्छदो दन्तवस्त्रमधरोष्टावपीरितौ ।

तदन्तौ सृक्कणी चैवाधोऽसिकं चिबुकं पुनः ।।२४६ ।।

असिकाधस्तथा प्रोक्तं कपोलः सृक्कणः समौ ।

गण्डो गल्लौ हनुश्राथ श्मश्रु कूर्चमपीश्रितम् ।। २४७ ।।

मासुरी मुखरोम स्याद्दंष्ट्रा दाढा च दाढिका ।

रदा दन्ता व्दिजा दंशा रदना दशना अपि ।। २४८ ।।

मध्यस्थौ राजदन्तौ तौ लोला जिह्वा रसज्ञया ।

रसनाथ काकुदं तालु घण्टिका तु सुधास्त्रवा ।। २४९

शिरोधरा शशिरौधिस्तु कन्धरा ग्रीवया सह ।

कम्बुग्रीवा त्रिरेखा स्याध्दाटिका तु कुकाटिका ।। २५० ।।

वीतनौ कृकपार्श्वौ तु कृकः स्यात्कन्धरान्तरमू ।

स्कन्धो भुजशिरोऽथ दोः प्रवेष्टो भुजोऽपि च ।। २५१ ।।

बाहुर्बाहाथ दोर्मूलं भुजकोटर एव सः ।

कक्षा स्यात्खण्डिका चाथ पार्श्वं स्यादंसयोरधः ।। २५२ ।।

भुजामध्ये कफोणिस्तु कूर्परः कफणिः समौ ।

मणिबन्धादधोभागे प्रकोष्टः स्यात्कलाचिका ।। २५३ ।।

करः पाणिः शयो हस्तपञ्चशाखावपीरितौ ।

मणिबन्धो मणिः प्रोत्कः करभस्तवाकनिष्टकमू ।।२५४।।

अङ्गुली करशाखाङ्गुरी चाङ्गुष्टाङ्गुलौ समौ ।

प्रदेशिनी तु तर्जन्यां मध्या ज्येष्टा तु मध्यमा २५५ ।।

अनामिका तु सवित्री कनिष्टा तु कनीनीका ।

पुनर्भवो महाराजो भुजाकण्टनखावपि ।।२५६ ।।

नखरः करशूकोऽपि कामाङ्कुश इीतीरितः ।

प्रसारिताङ्गुलौ हस्ते चपेटप्रतलौ समौ ।। २५७ ।।

तालस्तलः प्रहस्तोऽपि तालिका च तथा स्मृता ।

संयुतौ तु करौ सिंहतलः स्याद्गीतमेलकः ।। २५८ ।।

मीलिताङ्गुलिहस्ते तु मुस्तुः स्यान्मुचुटी स्त्रियाम् ।

प्रसृतौ प्रसृत आख्यातोऽथाञ्जलिर्द्वौ करौ युतौ ।। २५९ ।।

चालुकः चलुराख्यातो गण्डूषो द्रवपूरितः ।

बद्धमुष्टिकरो रत्निर्निष्कनिष्टोऽप्यरत्निकः ।। २६० ।।

उत्सङ्गाङ्कावपि क्रोड उरो वक्षो भुजान्तरम् ।

ह्यदयं ह्यत्तथा क्रोडो वक्षोजान्तरमेव तत् ।। २६१ ।।

स्तनौ कुचौ समौ प्रोक्तावुरोजौ तु पयोधरौ ।

चूचुकं स्तनवक्त्रं तु स्तलवृन्तं स्तनाच्छिखा ।। २६२ ।।

जठरं पिट्टकुक्षी चोदरं तुन्दं समं मतम् ।

पिचण्डो गर्भतुन्दी तु कालखञ्जं तु कालकम् ।। २६३ ।।

कालेयं कालखण्डं च युकृत्तत्र निरीक्षितम् ।

दक्षिणे तिलकं पार्श्वे वामे स्याद्रक्तफेनजः ।। २६४ ।।

गुल्मप्लीहावथान्त्राणि तद्वत्तत्र पुरीतति ।

स्मृता रोमलता रोमवली स्यात्तुन्दकूपिका ।। २६५ ।।

नाभिर्नाभेरधोभागे बस्तिर्मूत्रपुटं पुनः ।

मूत्राशयोऽवलग्नं तु विलग्नं मध्यमध्यमौ ।। २६६ ।।

कटिः श्रोणिः कलत्रं च कटीरं कट इत्यपि ।

काञ्चीपदककुद्मत्यावारोहस्तु नितम्बकः ।। २६७ ।।

बुलिश्च्युतिर्भगो योनिः स्त्रीचिह्नं स्मरमन्दिरम् ।

स्मृतोऽपत्यपथश्चैव वरङ्गं स्मरकूपिका ।। २६८ ।।

मेढ्रं कामलता शेफो मेहनं शेफसा सह ।

पुंश्चिह्नं शिश्नमाख्यातमण्डकोशाण्डकौ समौ ।। २६९ ।।

पेलाण्डे वृषणो मुष्को गुदं पायुश्चुतिः स्त्रियाम् ।

शकृद्द्वारमपानं चाधोमर्म बुलिनाम तु ।। २७० ।।

वङ्क्षणस्तूरुसन्धिः स्यात्सक्थ्यूरुस्तस्य पर्वणि ।

नलकीलस्तथा जानु पश्चाद्भागोऽस्य मन्दिरः ।। २७१ ।।

प्रसृता चाग्निमो जङ्घा कपोली नलकिन्यपि ।

पादग्रन्थौ तु गुल्फः स्याद्घुयो घुटिकघुण्टकौ ।। २७२ ।।

———— पिण्डिकायां पिचण्डिका ।

चरणांह्री क्रमः पादश्चलनः क्रमणः समौ ।। २७३ ।।

गोहिरं पादमूले च घुण्टाधः पार्ष्णिरुच्यते ।

प्रपदं क्षिप्रमंह्यग्ने तलं पादतले स्मृतम् ।। २७४ ।।

तिलकः कालकः पिप्लुर्जडुलस्तिलकालकः ।

अस्थिशुक्रे रसो मज्जा मेदासृग्मांसनामकाः ।। २७५ ।।

स्नायुत्वग्रोमभिः सार्धं धातवो दशधा स्मृताः ।

रस आहारतेजोऽग्निसंभवः षड्रसासवः ।। २७६ ।।

आत्रेयोऽसृक्करो धातुर्धनमूलमहापरः ।

शोणितं रुधिरं रक्तं रसतेजो रसोद्भवम् ।। २७७ ।।

आग्नेयं लोहितं विस्त्रं वाशिष्टं प्राणदं समम् ।

आसुरं क्षतजं चास्त्रमसृग्मांसकरं हि तत् ।। २७८ ।।

पललं जङ्गलं क्रव्यं मांसं स्याद्रक्तसंभवम् ।

काश्यपं रक्ततेजोऽपि मेदस्कृत्तरसं तथा ।। २७९ ।।

पिशितं पलकीने च पेशी मांसस्य वल्लरी ।

अग्रिमे सुरसं वृक्का बुक्का स्याद्धृदयं ह्यदा ।। २८० ।।

शुष्कमांसे तु वल्लूरमुत्तप्तं च विभाव्यताम् ।

दूष्यपूये समे चैव वपा त्वस्थिकरी मता ।। २८१ ।।

मेदो मांसस्य तेजो हि मांसजं गोतमं बसा ।

कर्परं तु कपाले स्यात्पृष्ठास्थि स्यात्कशेरुका ।। २८२ ।।

करङ्कः स्याच्छरीरास्थि मज्जा शुक्रकरोऽपि च ।

शुक्रं वीर्यं बलं रेतः पौरुषं किट्टवार्जितम् ।। २८३ ।।

पुंस्त्वं मज्जसमुद्भतमिन्द्रियानन्दसंभवे ।

तनूरुहं लोम रोम चर्म कृत्तिस्तथाजिनम् ।। २८४ ।।

छादिनी त्वक् छविश्चापि वस्नसा स्नसया सह ।

स्नायुर्धमनयो नाड्यः कण्डरा महती वसा ।। २८५ ।।

किट्टं मलं नेत्रजे तु दूषीका दूषिका समे ।

जिह्वायाः कुलुकं किट्टं पिप्पिका दन्तसंभवे ।। २८६ ।।

शिङ्घाणो घ्राणजे तस्मिन्पञ्जूषः कर्णयोर्मलम् ।

पुष्पिका लिङ्गजे तस्मिन्वशिष्यैवं विभाव्यताम् ।। २८७ ।।

सृणीकास्यासवो लाला स्यन्दिनी कफकूर्चिका ।

मूत्रं मेहं स्रवो बस्तिमलं प्रस्राव एव च ।। २८८ ।।

विष्टा ग़ुथपुरीषे च वर्चस्कं वर्चसा सह ।

विट् शकृच्छमलोच्चारौ परिकर्म त्वलंकृतिः ।।२८९।।

आकल्पो वेषनेपथ्ये संस्कियोद्वतर्नं पुनः ।

पटवासकपिष्टातौ चूर्णं स्याद्वासयोगतः ।।२९०।।

अधिवासनसंस्कारौ गन्धमाल्यादिना कृतम् ।

उपभोगोऽपि निर्वेशो विशेषोऽयं निरीक्ष्यताम् ।।२९१।।

आप्लवः सवनस्नाने कस्तूरीचन्दनादिभिः ।

कर्पूरागरूकक्कोलैः स्मर्यते यक्षकर्दमः ।।२९२।।

चतुःसमं तु तत्प्रोक्तं कुङ्कुमादिचतुश्वये ।

अगर्वगुरूलोहे तु राजार्हं कृमिजं च तत् ।।२९३।।

काकतुण्डोऽसितः प्रोक्तः श्रीखण्डं रोहणद्रुमः ।

रक्तचन्दनपत्राङ्गे क्लीबलिङ्गे समे उभे ।।२९४।।

रञ्जनं ताम्रसारं च कुचन्दनमपि स्मृतम् ।

जातीफलं जातिकोशः कर्पूरो हिमवालुका ।। २९५ ।।

चन्द्रः सिताभ्र आख्यातो घनसारसमाख्यकः ।

कस्तूरी मृगनाभिः स्याद्गन्धधूली मृगान्मदः ।। २९६ ।।

काश्मीरजन्मवर्णे तु घुसृणं रक्तचन्दनम् ।

कालेयजागुडे वह्निशिखं वाह्लीकमप्यदः ।। २९७ ।।

श्रीसंज्ञं देवकुसुमं लवङ्गं कोलकं समम् ।

कक्कोलकं कोशफले यक्षधूपोऽग्निवल्लभः ।। २९८ ।।

रालः सर्जरसः सर्जमणिः सर्वरसोऽपि च ।

तुरुष्कः पिण्डकः सिल्हो वृक्षधूपे तु पायसः ।। २९९ ।।

भूषणाभरणे तुल्ये परिष्कारमलंकृतिः ।

स्थासको हस्तबिम्बं च चूडारत्ने शिरोमणिः ।। ३०० ।।

हारमध्यस्थिते तस्मिन्नायकस्तरलः समौ ।

कोटीरमुकुटे मौलिः किरीटोष्णीष इत्यपि ।। ३०१ ।।

स्रग्माला पुष्पदामपि माल्यं स्यान्मूर्धगं हि तत् ।

ललामकं पुरोन्यस्तं शिखालम्बि तथा मतम् ।। ३०२ ।।

प्रालम्बं डुम्बणं तुल्यमृजुलम्बि तथा मतम् ।

ग्रन्थनं रचना गुम्फः संदर्भो रचनं पुनः ।। ३०३ ।।

चित्रं तमालपत्रं च तिलकः पुण्ड्र एव सः ।

उत्तंसशेखरापीडावतंसाः शिरसः स्रजि ।। ३०४ ।।

पत्राङ्गुली पत्रपाश्या पत्रभङ्गी समा मताः ।

ललाटिका पत्रलेखा तथा पत्रलता समाः ।। ३०५ ।।

पारितथ्या बालपाश्या कर्णिका कर्णभूषणम् ।

ताडपत्रे तु ताडङ्कः कर्णवेष्टककुण्डले ।। ३०६ ।।

हारो मुक्तालता मुक्तावली मुक्ताकलापकः ।

तद्विशोषा यथा देवच्छन्दः साष्टं षतं स्मृतम् ।। ३०७ ।।

इन्द्रच्छन्दः सहस्त्रं स्याच्छन्दो विजयपूर्वकः ।

अर्धहारे चतुः षष्टिर्गुच्छमाणवमन्दराः ।। ३०८ ।।

गैवेयकं लम्बमाना कण्ठभूषा ललन्तिका ।

अङ्गदं बाहुभूषा च केयूरं करभूषणे ।। ३०९ ।।

कङ्कणं कटकः पारिहार्यो वलयमेव च ।

अवापो हस्तसूत्रं चोर्मिका स्यादङ्गुलीयकम् ।। ३१० ।।

मेखला कटिसूत्रं स्यात्काञ्ची सारसनं तथा ।

कलापो रसना चैव शृङ्खला पुंस्कटीस्थिता ।। ३११ ।।

किङ्किणी लघुघण्टिः स्यात्तुलाकोटिस्तु नूपुरे ।

पादाङ्गदं च मञ्जीरं पादात्कटकमित्यपि ।। ३१२ ।।

चीराम्बरे वस्त्रचेले वासः सिक् सिचयोऽशुंकम् ।

पटाच्छादावथ प्रान्ते वस्तिवर्ती दशाः समाः ।। ३१३ ।।

धौतकौशेयपत्रोर्णे उष्णीषं मूर्धवेष्टनम् ।

धौतवस्त्रयुगं तूद्गमनीयं च निगद्यते ।। ३१४ ।।

तदुत्पत्तिश्चतुर्धास्ति त्वक्फलादिविभेदतः ।

पट्टकूलदुगूले तु दुकूलं क्षौममप्यदः ।। ३१५ ।।

कार्पासबादरे चापि कौशेयं कृमिकोशजम् ।

राङ्कवं मृगरोमोत्थमौरभ्रः कम्बलः समौ ।। ३१६ ।।

आविको रल्लकश्चापि नवं वस्त्रमनाहतम् ।

स्थूलशाटवराशी च परिधानमथोऽम्बरम् ।। ३१७ ।।

अन्तरीयोपसंव्याने तथा निवसनं पुनः ।

नीव्यच्चयौ चलनं तु तद्वच्चम्डातकं मतम् ।। ३१८ ।।

कूर्पासः कञ्चुकश्चोलोऽङ्गिका कञ्चुलिका च सा ।

शाटी चोटी समे प्रोक्ते नक्तकः कर्पटः समै ।। ३१९ ।।

कक्षापटश्च कौपीनं कुथः स्याच्चित्रकम्बलः ।

जवनी प्रतिसीरा चापटी काण्डपटः पुमान् ।। ३२० ।।

चन्द्रोदयोवितानं चोल्लोचः कदक इत्यपि ।

केणिका पटकुट्यां स्यात्स्थुलदूष्ये समे उभे ।। ३२१ ।।

स्त्रस्तरः संस्तरश्चैव शय्या शयनमुच्यते ।

शयनीयतलिमे तुल्ये तल्पं पर्यङ्कमञ्चकौ ।। ३२२ ।।

——————उच्छीर्षकमपि स्मृतम् ।

उपधानं समं बर्हे प्रतिग्राहपतदग्रहौ ।। ३२३ ।।

दर्पणो मकुरादर्शावात्मदर्शोऽप्यथासनम् ।

विष्टरः पीठमासन्दी वेत्रासनमपीरितम् ।। ३२४ ।।

एकोक्या कशिपुः प्रोक्तो भोजनाच्छादनद्वये ।

शय्यासने तथौशीरं लाक्षा राक्षा पलंकषी ।। ३२५ ।।

द्रुमामयो रङ्गमाता क्षतघ्ना कृमिजा जतु ।

अलक्तो याव आख्यातः कज्जलं त्वञ्जनं समम् ।। ३२६ ।।

दशेन्धनः प्रदीपोऽपि दशाकर्षाञ्जनध्वजौ ।

स्नेहप्रियो वेश्मरत्नं व्यजनं तालवृन्तके ।। ३२७ ।।

मृगत्वचो धवित्रं तु आलावर्तं तु वासकः ।

प्रसाधानस्तथा प्रोक्तः केशमार्जनकङ्कतौ ।। ३२८ ।।

गेन्दुकः कन्दुको बालक्रीडने तु गुडो गिरिः ।

गिरियकौ गिरिगुडो राजा भूभृन्महीपतिः ।। ३२९ ।।

पार्थिवो राड् नृपो मूर्धाभिषिक्तो भूप इत्यपि ।

सार्वभौमश्चक्रवर्ती सर्वमण्डलनायकः ।। ३३० ।।

आदिराजः पृथुः प्रोक्तो हरिश्चन्द्रस्त्रिशङ्कुजः ।

कुवलाश्वो धुन्धुमार ऐलबौधौ पुरूरवाः ।। ३३१ ।।

शकुन्तलात्मजः सर्वंदमो भरतनामकः ।

हैहेयः कार्तवीर्योऽप्यर्जुनः स्याद्दोःसहस्त्रभृत् ।। ३३२।।

कौशल्यानन्दनो रामस्तथा दाषरथिः स्मृतः ।

मैथिली जान की सीता वैदेही धरणीसुता ।। ३३३ ।।

रामपुत्रौ तु कुशलवावेकोक्त्या च कुशीलवौ ।

सौमित्रिर्लक्ष्मणः प्रोक्तो मारुतिर्वज्रकङ्कटः ।। ३३४ ।।

हनूमानाञ्जनेयोऽपि वालिर्वालीन्द्रनन्दनः ।

रक्षःपतिस्तु पौलस्त्यो रावणो दशमस्तकः ।। ३३५ ।।

आदित्यपुत्रसुग्रीवौ शक्रजिद्रावणिश्च सः ।

मन्दोदरीसुतो मेघनादोऽथ स्याद्युधिष्टिरः ।। ३३६ ।।

धर्मपुत्रोऽजमीढोऽथ भीमः स्यात्पवनात्मजः ।

वृकोदरो हिडिम्बघ्नो बककीचकघातकः ।। ३३७ ।।

अर्जुनो नरपार्थौ तु गुडाकेशधनंजयौ ।

फाल्गुनः सव्यसाची च राधावेधी बृहन्नटः ।। ३३८ ।।

किरीट्यैन्द्रिः सुभद्रेशश्चपे गाण्डीवगाण्डिवे ।

पाञ्चाली याज्ञसेनी च द्रौपदी वित्ययौवना ।। ३३९ ।।

सैरन्ध्री वेदिजा कृष्णा कर्णः सूर्यसुतोऽङ्गराट् ।

चम्पाधिपः सूतफुत्रः कालपृष्टं तु तद्धनुः ।। ३४० ।।

परिग्रहः परिवारः परिस्यन्दपरिच्छदौ ।

पुल्लिङ्गे परिकरस्तन्त्रोपकरणे समे ।। ३४१ ।।

राजशय्या महाशय्या हैमं सिंहासनं स्मृतम् ।

भद्रासनं राजयोग्यं छत्रमातपघातकम् ।। ३४२ ।।

प्रकीर्णकं रोमगुच्छो बालव्यजनचामरे ।

स्थगी ताम्बूलकरङ्को भृङ्गारः कनकालुकः ।। ३४३ ।।

पादासनं पादपीठं भद्रकुम्भः शुभो घटः ।

मन्त्री तु धीसखोऽमात्यः सचिवः सामवायिकः ।। ३४४ ।।

नियोगी व्यापृतः कर्मसचिवायुक्तावपि स्मृतौ ।

प्रधानानि महामात्राः सौवस्तिकपुरोहितौ ।। ३४५ ।।

पुरोधाश्च प्रतीहारः क्षत्ता दौवारिकस्तथा ।

उत्सारको वेत्रिदण्डिद्वाःस्था अन्तःपुरे त्वथ ।। ३४६ ।।

शुद्धान्तश्चावरोधश्चावरोधनमपीरितम् ।

सौविदाः सौविदल्लाश्च ते च कञ्चुकिनः स्मृताः ।। ३४७ ।।

तुल्या वंतःपुराध्यक्षेऽन्तर्वंशिकावरोधिकौ ।

सूपकारो भक्तकारो बल्लवः सूद इत्यपि ।।३४८ ।।

घट्टशुल्कावुभौ तुल्यौ अरिशत्रू द्विषन्रिपुः ।

विपक्षोऽसहनो दस्युर्द्विड् द्वेषी शाद्वोऽपि च ।।३४९ ।।

प्रत्यर्थी च परारातौ प्रत्यनीको जिघांसुकः ।

अनित्रः प्रत्यवस्थाताभियातिरहितोऽपि च ।। ३५० ।।

विद्वेषे तु विरोधः स्याद्वैरं तत्र निगद्यते ।

सखा मित्रं सुहृत्स्निग्धः सवयाः सहचरस्तथा ।। ३५१ ।।

वयस्यस्तु समानोऽसौ सौहृदं सख्यमुच्यते ।

मैत्री साप्तपदीनं तु सौहार्देऽजर्यमित्यपि ।। ३५२ ।।

चरो यथार्हवर्णः स्याद्गूढपुरुषहेरिकौ ।

अनुरोधानुवृत्ती त्ववसर्पः प्रणिधिः समौ ।। ३५३ ।।

वार्तायनो मन्त्रवित्तु स्पशश्चारस्तथोच्यते ।

आप्तो यथार्थवादी च पुमान्प्रत्ययितोऽपि सः ।। ३५४ ।।

संदेशहारको दूतो गृहस्वामी तु सत्रिणि।

षड्गुणा विग्रहसन्धियानद्वैधाश्रयासनम्।। ३५५।।

अन्यत्वं शक्तयस्तिस्त्रो मन्त्रोत्साहप्रभुत्वजाः ।

चत्वारः स्युस्तथोपायाः सामदानदयो यथा ।। ३५६ ।।

सान्त्वनं साम भेदस्तूपजापो दण्डनं दमः ।

प्राभृतं ढौकनं तुल्ये उत्कोचो लञ्चया सह ।। ३५७ ।।

द्यूतं मांसं परस्त्री च सुराचौर्यपमाङ्गनाः ।

पापर्धिरथ वा राज्ञां मृगयाश्चाः स्त्रियः पुनः ।। ३५८ ।।

वचःपारुष्यपाने च पारुष्यं चार्थदण्डयोः ।

पराक्रमोऽपि शौण्डीर्यं शौर्यविक्रमपौरुषम् ।।३५९ ।।

कोसदण्डोद्भवं तेजः प्रतापश्च प्रभाववत् ।

परीक्षा सोपधा प्रोक्ता धर्मकामार्थसाध्वसैः ।। ३६० ।।

स मन्त्रस्त्वषडक्षीणो यत्तृतीयाद्यगोचरः ।

एकन्तालोचनं मन्त्रो रहस्यं गुह्यमुच्यते ।। ३६१ ।।

छन्नं रहो विविक्तं चैकान्तं विजनं च तत्

न्याय्यं समञ्जसं देश रूपाभ्रेषौ नयः पुनः ।। ३६२ ।।

साम्प्रतं तूचितं युक्तं योग्ये द्वे वाच्यलिङ्गगे ।

मर्यादा स्थितिसंस्थे तु धारणापि निगद्यते ।। ३६३ ।।

अपराधो व्यलीकं च मन्तुः स्याद्विप्रियागसी ।

भागधेयो बलिश्चैव करे सेना पताकिनी ।। ३६४ ।।

ध्वजिनी वाहिनी तन्त्रं चमूर्दण्डो वरूथिनी ।

अनीकं चक्रसैन्ये च कटकं पृतना पुनः ।। ३६५ ।।

तत्स्थितिः स्कन्धवारः स्याद्रचना शिबिरे मता ।

अक्षौहिण्यादयो भेदा ज्ञेया ग्रन्थान्तरत्स्वयम् ।। ३६६ ।।

पताका वैयन्ती च केतनं ध्वज उच्यते ।

पत्ती रथो गजो वाजी सेनाङ्गं तु चतुर्विधम् ।। ३६७ ।।

युद्धार्थं चक्रवद्यानं विशेषोऽयं विभाव्यताम् ।

स्यन्दनस्तु शताङ्गः स्यात्कर्णीरथरथावपि ।। ३६८ ।।

डयनं रथगर्भः स्यात्कूवरी रथनाम च ।

शकटोऽनोऽथ गन्त्री स्यात्तथा कम्बलिवाह्यकम् ।। ३६९ ।।

पाण्डुकम्बलसंवीते पाण्डुकम्बलिसंज्ञकः ।

रथाङ्गं रथपादोऽरि चक्रं धारास्य तु प्रधिः ।। ३७० ।।

नेमिरक्षाग्रकीले स्यात्कूबरं तु युगंधरम् ।

शम्या स्याद्युगकीले तु सारथिः प्राजिताथ वा ।। ३७१ ।।

अश्वारोहोऽश्ववारोऽपि तुरगी सादिनि स्मृतः ।

हस्त्यारोहे महामात्रो निषादी सादिना सह ।। ३७२ ।।

आधोरणो गजाजीवो यन्तृहस्तिपकावपि ।

योधा भटाश्च योद्धारः सैनिकाः सैन्यरक्षकाः ।। ३७३ ।।

योद्धारस्तु सहस्रेण साहस्राश्च सहस्रिणः ।

छायाकरश्छत्रधारी पताकी ध्वजधारकः ।। ३७४ ।।

सन्नाहो जगरो दंशः कङ्कटश्च निचोलकः ।

कञ्चुकः कवचो वर्म वारबाण उरश्छदः ।। ३७५ ।।

अधिकाङ्गं तथा सारसनं ह्यदयकञ्चुकः ।

शिरस्कं शीर्षकं तुल्यं शीर्षण्यं मस्तकावनम् ।। ३७६ ।।

नागोदजठरत्राणे मत्कुणं जङ्घयोर्विदुः ।

बाहुलं च भुजत्राणं जालप्राया तु जालिका ।। ३७७ ।।

शस्त्रजीव्यायुधीयोऽपि काण्डपृष्टोऽपि कथ्यते ।

कौन्तिकः प्रासिकश्चापि —————— ।। ३७८ ।।

परश्वधायुधः पारश्वधः स्यात्पर्शुधारकः ।

तथा याष्टीकशाक्तीकनौस्त्रिशिकमखा नराः ।। ३७९ ।।

धनुर्धरस्तु धानपष्कतूणिनावथ काण्डवान् ।

काण्डीरः कृतहस्तस्तु सुप्रयुक्तशरो हि यः ।। ३८० ।।

लघुहस्तः शीघ्रवेधी शास्त्रं हेतिस्ततायुधम् ।

अस्त्रं प्रहरणं तुल्यमथ बेदान्बुवे गुरुन् ।। ३८१ ।।

कोदण्डं कार्मकं चाप इष्वासोऽस्त्रं धनुस्तथा ।

जीवा मौर्वी गुणो गव्या ज्या शिञ्जा शिञ्जिनी द्रुणा ।। ३८२ ।।

लक्ष्यं शरव्यकं वेध्यं बाणनाम शराशुगौ ।

काण्डः पत्रीषुनामाथ पत्रवाहश्च सायकः ।। ३८३ ।।

कलम्बमार्गणौ रोपः कङ्कपत्र्ाशलीमुखौ ।

अजिह्मगश्चित्रपुङ्ख एषणः सर्वलौहकः ।। ३८४ ।।

प्रक्ष्वेडनश्च नाराचो विषाक्ते विषलिप्तकः ।

पत्रणा पक्षवाजौ तु पुङ्खन्यासावुभौ समौ ।। ३८५ ।।

कलापे तु निषङ्गः स्यात्तूणीरशरधी समौ ।

शराश्रय उपासङ्गतूणौ खड्गे कृपाणकः ।। ३८६ ।।

निस्त्रिंशमण्डलाग्रौ चासिः कौक्षेयकसंज्ञकः ।

करवालश्चन्द्रहास ऋष्टिरिष्टी त्सरुः पुनः ।। ३८७ ।।

प्रत्याकारपरीवारौ कोशः स्यादसिसंवृतौ ।

खोटकः फलकं चर्माड्डनं चावरणं तथा ।। ३८८ ।।

संग्राहस्त्वस्य मुष्टिः स्याद्भिन्दिपा लः सृगोऽपि सः ।

प्रासकुन्तावथो दण्डो यष्टिः स्याल्लगुडोऽपि च ।। ३८९ ।।

कृपाणिका छुरी शस्त्र्यसिपुत्री च क्षुरी समा ।

मुद्गरे तु घनः प्रोक्तो द्रुघणः परशुर्यथा ।। ३९० ।।

परश्वधः कुठारोऽपि पर्शुः स्वधितिपर्श्वधौ ।

शूले त्रिशीर्षिकं प्रोक्तं तोमरे सर्वला मता ।। ३९१ ।।

खुरली तु श्रमः प्रोक्तस्तद्भूमिः स्यात्खलूरिका ।

जित्वरो जेतृजिष्णू तु सांयुगीनो रणे क्षमः ।। ३९२।।

बलं द्युम्नं तरः स्थाम शौर्यं शुष्मं पराक्रमः ।

ओजः प्राणः सहः शक्तिरूर्जः शुष्म च कथ्यते ।। ३९३ ।।

संग्रामसमरे युद्धं द्वन्द्वसङ्ख्ये कलिः समित् ।

अजन्यायोधने संयद्रणो विग्रह इत्यपि ।। ३९४ ।।

आहवः संप्रहारोऽपि संस्फोटकलहौ समौ ।

अनीकं प्रधानाजी वाक्रन्दः संयुगमित्यपि ।। ३९५ ।।

संगरः समिति राटिः समुदायो विदारणम् ।

अभ्यामर्दः समीकं च सम्परायो मृधं च युत् ।। ३९६ ।।

अग्रयाने तु नासीरं जयो विजय इत्यपि ।

पराजयस्तु भङ्गः स्याड्डमरे डिम्बविप्लवौ ।। ३९७ ।।

वैरप्रतिक्रिया वैरनिर्यातनमपि स्मृतम् ।

प्रसभं हठबलात्कारौ छलं स्यात्स्खलितं च तत् ।। ३९८ ।।

जितः पराजितो भग्नः पराभूतोऽपि कथ्यते ।

नष्टः पलायितोऽप्यात्तदिक्तिरोहित इत्यपि ।। ३९९ ।।

प्रस्कन्नपतितौ तुल्यौ जितकाशी जिताहवः ।

कारा बन्दी तथा चारगुप्ती प्रग्रहनाम च ।। ४०० ।।

वैश्यशूद्रद्विजक्षत्राश्चातुर्वर्ण्यं नृणां मतम् ।

ब्रह्मचारी गृही तस्माद्वानप्रस्थोऽथ भिक्षुकः ।। ४०१ ।।

आश्रमाः स्युश्चतुःसंख्या ब्रह्मचारी तु वर्णिनि ।

गृहस्थो गृहमेधी तु गृही स्नातक इत्यपि ।। ४०२ ।।

वानप्रस्थे तु वैखानसो यतिर्भिक्षुनामकः ।

सांन्यासिको रक्तवस्त्रः कर्मन्दी तापसोऽपि सः ।। ४०३ ।।

पारिकाङ्क्षी परिव्राट् च पाराशरिणि मस्करी ।

जितेन्द्रियः शान्तदान्तौ तपःक्लेशसहोऽपि सः ।। ४०४ ।।

ब्राह्मणो वाडवो विप्रः सूत्रकण्ठस्त्रयीमुखः ।

भूदेवो वर्णज्येष्टश्च द्विजातिश्चाग्रजस्तथा ।। ४०५ ।।

षट्कर्मा च द्विजन्मा स्याद्विजः स्यान्मुखसंभवः ।

सावित्रो वेदगर्भश्चैतसमैत्रावपि स्मृतौ ।। ४०६ ।।

बटुर्माणवकस्तुल्यौ पुल्लिङ्गौ हीनवाडवौ ।

वहनं यानपात्रं च वोहित्थं स्याद्वहित्रकम् ।। ४०७ ।।

पोतः पोतवणिक्पोतवाहः सांयात्रिकोऽपि सः ।

नाविकः कर्णधारोऽपि निर्यामः स्यान्नियामकः ।। ४०८ ।।

काष्टाम्बुवाहिनी द्रोणी तरी बेडा तरिण्यपि ।

क्षेपणी तु रीदण्डः कूपको गुणवृक्षकः ।। ४०९ ।।

पोलिन्दास्त्वन्तरादण्डा मङ्गः स्यात्तरिणीशिरः ।

सेचनं सेकपात्रे स्यादरित्रे केनिपातकः ।। ४१० ।।

गुञ्जा स्यात्पञ्चभिर्माषैः कर्षः षोडशमाषकैः ।

पलं कर्षचतुष्केन तुला पलशतं मतम् ।। ४११ ।।

तुलानां विंशततिर्भार आचितः शारटोऽपि च।

कुडवानां चतुष्केन प्रस्थः स्यात्पुंसलिङ्गकः।।४१२

आढकस्तु चतुर्मिः स्यात्प्रस्थैरथ तथाढकैः ।

चतुर्मिर्द्रेणनामाथ खारी षोडशमिश्र्व तैः ।। ४१३

अङ्गुलानां चतुर्विशत्या हस्तोऽथ चतुष्करः ।

दण्डस्तत्सहस्त्रौ तु गव्यूतं क्रोश उच्यते ।। ४१४ ।।

क्रोशौ द्वौ गोरुतं गव्या गव्यूतिः स्त्री निशम्यते ।

योजनं तु चतुष्क्रोशं गोमान्गोमी गवीश्वरे ।। ४१५ ।।

आभीरो वल्लवो गोपो गोपालोऽपि निवेदितः ।

कृषीवलोहली क्षेत्री कार्षकः कर्षकः कर्षकोऽपि च ।। ४१६ ।।

सीरस्तु लाङ्गलं प्रोक्तं हलं गोदारणं समे ।

दात्रं लवीत्रमप्युक्तं खनित्रं त्ववदारणम् ।। ४१७ ।।

आबन्धो योक्त्रयोत्रे च प्रतोदः प्राजने मतः ।

तोदनं च प्रवयणं लोष्टभेदनकोटिशौ ।। ४१८ ।।

वृषलोऽन्त्यवर्णशूद्रौ च कारुः प्रकृतिकारिणौ ।

शिल्पी शिल्पं कला ज्ञानं विपूर्वं लिखनादि ततू ।। ४१९ ।।

मालिकारामिकौ मालाकारः स्यात्पुष्पजीविनि ।

तस्य स्त्री पुष्पलावी स्यात्पुष्पाणामवचायिनी ।। ४२० ।।

कलादो मुष्टिकः स्वर्णकारो नाडिंधमोऽपि सः ।

कर्मप्रसेविका मूषा तैजसावर्तनी च सा ।। ४२१ ।।

चर्मप्रसेविका भस्त्रा विशिष्यैव विभाव्यताम् ।

वेधिन्यास्फोटिनी तुल्ये शाणे तु निकषः कषः ।। ४२२ ।।

स्यात्कङ्कमुखः संदंशे भ्रमः कुन्दं च यन्त्रकम् ।

ममिकारे वैकाटिकस्ताम्रकुट्टकशौल्विकौ ।। ४२३ ।।

सौचिकस्तुन्नवायः स्यात्कर्तरी कल्पनी समे ।

सूची तु सेवनी प्रोक्ता तर्कुः कर्तनकारणम् ।। ४२४ ।।

कुविन्दस्तन्तुवायः स्यास्त्रसरः सूत्रवेष्टने ।

व्यूतिर्वाणिर्वानदण्डो वेमा सूत्राणि तन्तवः ।। ४२५ ।।

निर्णेजकः स्याद्रजकः कुलालो दण्डभृत्पुनः ।

कुम्भकारश्चक्रजीवी शस्द्मार्जोऽसिधावकः ।। ४२६ ।।

चर्मकृत्पादुकाकृच्चारा स्याच्चर्प्रभेदिका ।

पन्नद्धा पादुकोपानत्पादूः पादावनं स्मृतम् ।। ४२७ ।।

धूसरस्तौलिकः प्रोक्तः खलः पिण्याक इत्यपि ।

काष्टतड्वर्धकिस्त्वष्टा रथकृत्स्थपतिः पुमान् ।। ४२८ ।।

वासी तु तक्षणी तुल्ये क्रकचं करपत्रकम् ।

पाषाणदारणष्टङ्को व्योकारो लोहकारिणि ।। ४२९ ।।

कान्दविकभक्ष्यकारौ रङ्गाजीवस्तु तौलिकः ।

चित्रकृत्कूचिका तूलिका चित्रालेख्य इत्यपि ।। ४३० ।।

लेप्यकृत्पलगण्डोऽसौ पुस्तं लेप्यादिकं मतम् ।

दिवाकीर्तिः क्षुरी मुण्डकश्च नापितचण्डिलौ ।। ४३१ ।।

क्षुरमर्द्यन्तावसायी भद्राकरणमुण्डने ।

कुसृतिःकुहकजाले त्विन्द्रजालं तथोच्यते ।। ४३२ ।।

कौतूहलं च कु तुकं कौतुकं तु कुतूहले ।

पुलिन्दा वरुटा भिल्ला नाहलाः शबरा अपि ।। ४३३ ।।

जनङ्गमदिवाकीर्तिनिषादश्वपचादयः ।

इत्याद्यो म्लेच्छभेदास्तत्तद्देशेषु संमताः ।। ४३४ ।।

पापर्धिर्मृगयुर्व्याधो लुब्धको मृगघातकः ।

कैवर्तो धीवरो दाशो बडिशं मीनबन्धने ।। ४३५ ।।

शौण्डिकः कल्यपालः स्यात्सुराजीवी तु मण्डकः ।

ध्वजः पानवाणिग्वारिवासश्चाप्यासुतीबलः ।। ४३६ ।।

मद्यं कादम्बरी कश्यं मदिरा कापिशायनम् ।

मदिष्टा मधुकल्ये तु शुण्डा गन्धोत्तमापि च ।। ४३७ ।।

हाला हलि प्रिया हारहूरं माध्वीकमित्यपि ।

अब्धिजाः मदना सीधुः कापिशं वारुणी सुरा ।। ४३८ ।।

आसवश्च तथा स्वादुरसेरा च परिप्लुता ।

किण्वं तु नग्नहुर्मद्यबाजं स्यान्नग्नहूस्तथा ।। ४३९ ।।

गल्वर्कचषकौ तुल्यौ शुण्डा पानमदास्पदम् ।

सहपानं सपीतिस्त्वापानं पानस्य गोष्टिका ।। ४४० ।।

इत्थं शब्दास्त्रिधा रूढमिश्रयौगिकसंज्ञका ।

सामस्त्येनाभिधातुं तान्न शक्तेर्वाक्पतिर्यतः ।। ४४१ ।।

विश्वहेमामरानन्तनामपारायणेषु ये ।

दृष्टास्तान् शिसुबोधाय परमान्द उक्तवान् ।। ४४२ ।।

चतुर्थः परिच्छेदः समाप्तः ।।

।। ओम् ।।

नमः श्रीजगदीशाय नमो वाण्यै निरन्तरम् ।

नमो मे गुरवे भूयान्नमो विप्रकुलाय च ।। १ ।।

सुरविटपीव फली सन् श्रीमत्कायस्थमाथुरो वंशः ।

चिरवारीयकनामा भेदः ख्यातस्तदायोऽस्तित ।। २ ।।

गोपावले माननरेन्द्रपार्श्वादवापि येनाद्य च दुर्धरत्वम् ।

श्रीघाटमोऽभूत्स्पृहणीयकीर्तिः परोपकारप्रतिबद्धचेताः ।। ३ ।।

तदङ्गजः श्रीहरिदासनामा बभूव भाग्योदयचण्जभानुः ।

त्रयोऽभवन् तत्तनया गुणाढ्याः परोपकारप्रथिता जगत्याम् ।। ४ ।।

पर्शुरमस्तदाद्योऽभूद्द्वितीयश्चतुराभिधः ।

नरेन्द्रचन्द्र इत्याख्यस्तृतीयः सोदरोऽभवत् ।। ५।।

पर्शुरामेण संप्राप्तं श्रीमत्साहिसिकन्दरात् ।

साम्राज्यं यवनपुरे सदादानैकवृत्तिना ।। ६ ।।

स्वर्णयज्ञोपवीता दि ब्राह्मणेभ्यो ह्यनेकशः ।

पवित्रात्मा महादानं पर्शुरामो ददौ सुधीः ।। ७ ।।

नरेन्द्रचन्द्रेण जगद्धितेन भागीरथी लक्षकजैः पुपूजे ।

परोपकारव्रतिनानघेन श्रीकृष्णपादाम्बुजसेवकेन ।। ८ ।।

नरेन्द्रचन्द्रस्य च धर्मपत्नी महासती श्रीपहवाभिधाना ।

असूत पुत्रं गढमल्लसंज्ञं मणिं यथारोहणभूध्रभूमिः ।। ९ ।।

विपुलरुचिरकीर्तिः स्फारकन्दर्पमूर्तिं विंशदसुकृतपूर्तिः स्फूर्तियुक्तो बभूव ।

गढमलनरनाथो विष्णुपादाब्जहंसः प्रवरगुणसमुद्रः स्वीयवंशावतंसः ।। १० ।।

तद्धर्मपत्नी सुषुवे सुतान्वरान् श्रीप्पारमाख्या गुणरत्नखानिः ।

यस्याः सुशीलांशतुलां न चान्या कान्ता समाप्नोदखिलावनीतले ।। ११ ।।

नरहरिदासः प्रथमः परमानन्दो द्वितीयको विद्वान् ।

तृतीयो मनोहराद्यो दासाग्रो गुणिजनाभीष्टः ।। १२ ।।

जयति जगति जाग्रत्कल्पवृक्षावदातः पटुतरगुणपत्रो बैबुधाधारभूतः ।

सुकृतवशनिरीक्ष्यः सर्वदैकस्वरूपः परमपदसुपूर्वानन्दनामा नरेन्द्रः ।। १३ ।।

अरिकुमुदसमूहं मुद्रयन्हर्षयन्वै द्विजकुलजलजं संराजतां राजमान्यः ।

परमपदसुपूर्वो यत्र शब्दो बभूवाधिकतपरकान्त्यानन्दसूर्यः ससार्थः ।। १४ ।।

अन्येषामुपकाराय स्वीयबोधाय च स्फुटम् ।

नाममालाममूं चक्रे परमानन्दठक्कुरः ।। १५ ।।

परमानन्दस्य सुतो विजयी मकरन्ददासनामास्ति ।

इन्द्रस्येव जयन्तः सर्वजनानामभीष्टगुणः ।। १६ ।।

यावद्गोविन्दनामानि धामानि च दिवौकसाम् ।

तावच्छ्रीपरमानन्दी नाममाला प्रवर्तताम् ।। १७ ।।

वसुभुवनर्तुनिशामणिवर्षे हर्षेण फाल्गुने मासि ।

प्रतिपदि शुक्रे वारे पूर्णेयं पुण्यवेलायाम् ।। १८ ।।

इति परमान्दी नाममाला संपूर्णा ।।

अनेकार्थसंग्रहः ।

ओम् ।

अकारादिक्रमेणाथ द्व्यक्षरादिक्रमेण च ।

अनेकार्थानि नामानि कथ्यन्ते कतिचिन्मया ।। १ ।।

अथाकारादयो यथा

अजः कष्णो स्मरे रुद्रे मेषे ब्रह्मण्यकं पुनः ।

दुःखाघयोरघं पापे व्यसनाशर्ममोरपि ।। २ ।।

अर्घो मूल्येऽर्चनेऽथाब्जो विधौ धन्वन्तरौ तरौ ।

जम्बालशङ्खयोरब्जं संख्यायां कमलऽपि च ।। ३ ।।

अक्षो विभीतके तुत्थे रावणाङ्गजकर्षयोः ।

रथाङ्गे शकटे जीवे पाशके च वराटके ।। ४ ।।

अक्षमिन्द्रिय आकाशे तथा सौवर्चले स्मृतम् ।

अलिर्भृङ्गे सुरायां चाभ्रं घने गगने.भ्रके ।।५।।

अर्कः शक्रे रवौ वृक्षान्तरे स्फटिकताम्रयोः ।

अंशुर्दिवाकरे रश्मावङ्कश्चिह्नसमीपयोः ।। ६ ।।

भूषायां रूपकोत्सङ्गनाटकाद्यंशमन्तुषु ।

अन्त्योऽधमेऽन्त्यजाते चाध्वा मार्गे समये स्मृतः ।। ७ ।।

अगः सूर्ये द्रुमे सर्पे पर्वतेऽन्तः स्वरूपके ।

प्रान्तावयवोर्नाशे निश्चये निकटेऽपि च ।। ८ ।।

प्रतिमापूजयोरर्चाग्रं श्रेष्टे प्रथमेऽधिके ।

अस्तः क्षिप्ते गिरेर्भेदेऽऽशू रथाङ्गे च सत्वरे ।। ९ ।।

अस्रः कोणे तथा केशेऽथाश्रं रक्ताश्रुणोर्मतम् ।

अर्थः कार्ये धन् वस्त्वभिप्रायविषयेषु च ।। १० ।।

अंह्रि पादे तरोर्मूलेऽणः स्तेकव्रीहिभेदयोः ।

अब्दो मेघे गिरौ वर्षमुस्तयोर्वास्तवेऽपि च ।। ११ ।।

अहिः सर्पे रवौ वप्रवृत्रयोः केतुपान्थयोः ।

अद्रिः शौले रवावन्दूर्निगडे भूषणेऽपि च ।। १२।।

अविर्मेषे गिरावर्के कम्बलेऽट्टश्चतुष्पथे ।

हट्टे पाषाणभेदे चार्धः खण्डेऽर्धं समांशके ।। १३ ।।

अर्यो वैश्ये प्रभावण्डं मुष्के कोशेऽप्यनन्तरे ।

अर्चिः कीलोस्त्रयोरर्तिः पीडायामटनावपि ।। १४ ।।

अलं भूषणसामर्थ्यनिषेधेष्वथ मङ्गले ।

प्रारम्भकात्स्नर्ययोः प्रश्नेऽनन्तार्थेऽप्यथो तथा ।। १५ ।।

अधि प्रश्नेऽधिके स्वामिशङ्कागर्हास्वपि स्मृतम् ।

अति स्मृतौ जवेऽथान्नं भक्ते भुक्तेऽपि दृश्यते ।। १६ ।।

अङ्गा भूम्येव देशार्थेऽङ्गं प्रधानेऽन्तिके तनौ ।

शिक्षाद्याधारयोरङ्गामन्त्रणेऽव्ययमुच्यते ।। १७ ।।

अशोको वीतशोके स्यात्कङ्केलौ वञ्जुलेऽपि च ।

अशोका कटुरोहिण्यामभितः पार्श्वशीघ्रयोः ।। १८ ।।

अनूकमन्वयेऽनूको गतजन्मावटो बिले ।

महारण्येऽखिले कूपे दम्भजीविन्यपि श्मृतः ।। १९ ।।

हरीतक्याममोघा स्यादमोघः स्फले स्मृतः ।

अलीकमप्रिये मिथ्यावचने करणेऽलिके ।। २० ।।

अनन्तस्तु हरौ शोषबलयोरक्षरं शिवे ।

परब्रह्मणि धर्मे चाध्वरवर्णनभः स्वपि ।। २१ ।।

अनन्तं प्रचुरे व्योम्नि जलेऽनन्ता मही स्मृता ।

दूर्वामृताप्यथाङ्कुरं च नवोद्गते ।। २२ ।।

रक्ते जले तरौ रोम्यभया तु स्याद्धरीतकी ।

अबयो निर्भये वीरणीमूले मञ्जुलेऽपि च ।। २३ ।।

अजिरं दर्दुरे काये विषये प्राङ्गणे तथा ।

अत्ययोऽतिक्रमे दोषे कृच्छ्रे दण्डविनाशयोः ।। २४ ।।

अभीषुः किरणे दीप्तावरिष्टः काकनिम्बयोः ।

कङ्कते लशुने दैत्येऽथारिष्टं क्षेमतक्रयोः ।। २५ ।।

शुबेऽपि सूतिकागारेऽङ्गजः कामे तनूद्भवे ।

अञ्जनो दिग्गजे भूध्रेऽञ्जनं सौवीरयानयोः ।। २६ ।।

कज्जलेऽथाञ्जना माता मारुतेरमरः सुरे ।

स्नुहीवृक्षेऽस्थिसंहारकव्योरमम्बरे ।। २७ ।।

रसायने यज्ञशेषे तोये ह्यद्ये च गौरसे ।

मा७ीकवर्णयोरन्ने सुधाकैवल्ययोरथ ।। २८ ।।

अमृता मागधीपथ्यामलकीषु गुडूच्यपि ।

अनयः पामरे नाशे व्यसनेऽथावधिर्बीले ।। २९ ।।

सीमावधानयोश्चाथारुणो भास्कररक्तयोः ।

सूर्यसारथिनिःशब्दकपिलार्थेष्वथारुणा ।। ३० ।।

मञ्जिष्टातिविषा श्यामाछाम्बरं गगनेऽशुंके ।

द्रव्ये तूले सुगन्धेऽथार्जुनो धवलकेकिनोः ।। ३१ ।।

पाण्डोः पुत्रे तृणे नेत्ररोगे हैहयसालयोः ।

आतङ्को मुरजध्वानशङ्कयो रोगतापयोः ।। ३२ ।।

आशुगो बाणरव्योः स्याद्वायावपि निरीक्ष्यते ।

आप्लुतः स्नातके स्नानेऽथाकल्पो वेषकल्पयोः ।। ३३ ।।

आरोहोऽथ गजारोह उच्छ्रये दैर्घ्यमानयोः ।

स्त्रीकट्यामाकरो रत्ने खान्यां च निकरे तथा ।। ३४ ।।

आयतिर्भावसंहत्योरेष्यत्काले स्वतन्त्रके ।

आसत्तिः संगमे लाभेऽथात्मबूः कामरुद्रयोः ।। ३५ ।।

विरञ्चे वासुदेबेऽथाशयोऽभिप्राय आश्रये ।

आम्नाय आगमे वंशेऽप्यानर्तः समरे जने ।। ३६ ।।

दैत्ये नृत्यगृहेऽथानद्धं मृदङ्गदिबध्धयोः ।

आयस्तस्तेजिते क्षिप्ते कष्टिते कुपिते हते ।। ३७ ।।

आक्रन्दः क्रन्दनध्वाने भूपे रौद्ररणेऽपि छ ।

आषाढो मासभेदे स्याद्व्रतिदण्डे द्रुमान्तरे ।। ३८ ।।

आदित्यस्त्रिदशे सूर्येऽथानको जलदस्वने ।

मर्दले पटहे भेर्यामपवर्गः शिवे स्मृतः ।। ३९ ।।

साफल्यत्यागयोश्चाप्यवष्टम्भो हाटके मतः ।

संरम्भारम्योः स्तम्भेऽभिजातो ज्ञकुलीनयोः ।। ४० ।।

अभिमानोऽथ हिंसायां प्रेम्णि गर्वे च विश्रुतः ।

अवदातो विशुद्धे स्यात्स्वर्णवर्णे सिते तथा ।। ४१ ।।

पराभवेऽभिषङ्गस्तु शपथाक्रोशयोपि ।

अङ्गारको महीपुत्र उल्मकेऽपि कुरण्टके ।। ४२ ।।

अङ्गारिणी शकट्यां स्यात्सूर्यत्यक्तदिगन्तरे ।

अङ्कपाली परीरम्भधाञ्योः पालिगदद्रुहोः ।। ४३ ।।

अतिमुक्तस्तु वासन्त्यां कलाहीने रथद्रुमे ।

अपभ्रंशोऽपशब्देऽवपाते भाषान्तरे तथा ।। ४४ ।।

अपदेशो निमित्ते च दम्मे लक्ष्ये निगद्यते ।

अवध्वस्तं परित्यक्ते निन्दिते चूर्णितेऽपि ।। ४५ ।।

अष्टापदं सुवर्णेऽथाष्टापदंः शरभे गिरौ ।

अधिवासो गृहे वासेऽधिष्टालं पुरचक्रयोः ।। ४६ ।।

अनूचानो विवेकज्ञे वेदज्ञे ध्यानकारके ।

अम्बरीषो बुधे सूर्ये भूपाले बालघोटके ।। ४७ ।।

छर्दनेऽलम्बुषः प्रोक्तोऽलम्बुषा वारयोषिति ।

गण्डीर्यां पक्षिभेदेऽप्यभिस्यन्दो नयनामये ।। ४८ ।।

आवेशनं शिल्पिशालाच्छादनं वसने मतम् ।

अपवारणे पिधाने चाक्षेपको निन्दको मतः ।। ४९ ।।

मरुद्व्याधौ तथा व्याध आत्माधीनो विदूषके ।

प्राणाधारे सुते शाल आत्मयोनिः स्मरे हरे ।। ५० ।।

आडम्बरस्तु संरम्भे बृहितेऽपि च दृश्यते ।

आस्कन्दनं तिरस्कारे शोषेऽनीकेऽपि कथ्यते ।। ५१ ।।

आसुतीवल आख्यातः शुराजीवकयज्वनोः ।

आत्मा विष्णौ विरञ्चेऽर्के शरीरेऽनिलयत्नयोः ।। ५२ ।।

बुद्धौ चित्ते धृतावार्या दुर्गामात्रोस्तथैव च ।

आजिर्युद्धे समक्ष्मायामाधिर्मानसवेदना ।। ५३ ।।

पीडने बन्धनेऽथाज्ञा निर्देशे शापथेऽपि च ।

आशीः सर्पस्य दंष्ट्रायानिष्टवस्तुप्रशंसने ।। ५४ ।।

श्रीवासघृतयोराज्जमालिः श्रेणिः सखी पुनः ।

आप्तः सत्ये हिते सब्धेऽछार्यो बुद्धे च कोविद् ।। ५५ ।।

आशा ककुभि वाञ्छायामागो मन्तौ स्मृतं तथा ।

अथेकारादयो यथा ।

इन्द्रो राज्ञि रवौ देवनायकेऽप्यन्तरात्मनि ।। ५६ ।।

इला बुधस्य भार्यायां भूमिश्रीगोषु वाच्यपि ।

इरा मह्यां जले मद्ये भारत्यामशनेऽपि च ।। ५७ ।।

इनः सूर्ये प्रभाविष्टमीप्सिते पूज्जयज्ञयोः ।

ईहेच्छायां तृषायां चेतिः प्रवास उपद्रवे ।। ५८ ।।

इष्टिर्यागेच्छयोरीशो हरौ शम्भौ क्षमे मतः ।

ईक्ष्वाकुर्नृपभेदे स्यात्कटुतुम्ब्यामपीरितः ।। ५९ ।।

इष्वासो विशिखक्षेपेऽथेष्वासो धन्विचापयोः ।

इन्द्रियं करणे शुक्रेऽथेरिणं शून्य ऊषरे ।। ६० ।।

सुगन्धे चेष्टगन्धः स्यादिष्टगन्धं तु वालके ।

ईहामृगो वृके जन्तुभेदे रूपकभिद्यपि ।। ६१ ।।

अथोग्र ईश्वरे तीव्रे शूद्रायां क्षत्रियाङ्गजे ।

उरो वक्षे प्रधाने चोषः सायंकल्ययोः स्मृतम् ।। ६२ ।।

ऊर्ण भ्रुवोऽन्तरे लोमावर्ते मेषस्य लोमनि ।

उमा कीर्तिश्रियोर्गौर्यां कान्तिदुर्गाशचीष्वथ ।। ६३ ।।

ऊर्जो बले च मासस्य विशेषे त्र्यक्षरा यथा ।

उत्थानं पौरुषे सैन्य उद्गमोद्यमयोरपि ।। ६४ ।।

उदारो दक्षिणे दानशौण्डे तूच्छ्रितमुन्नते ।

उन्माथः कूटयन्त्रे स्याद्वधघातकयोरपि ।। ६५ ।।

उदानो वायुभेदे स्यात्सर्पभेदेऽपि कुत्रचित् ।

उदूढः पृथुले व्यूढे उत्थितं जातवृद्धयोः ।। ६६ ।।

उदर्चिः पावके वीरेऽनुजेतितरुणोद्भवोः ।

उल्लाघो गतरोगे च तरौ निपुणह्यष्टयोः ।। ६७ ।।

उद्भट उत्कटे क्षीवे उत्कटोऽपि तथैव च ।

उत्तंसः शेखरे कर्णपूरेऽथोद्यानमुच्यते ।। ६८ ।।

शरम्यारण्ययोश्चैवं प्रयोजनविशेषयोः ।

उन्मत्तः कितवे धूर्ते उष्णीषं शीर्षवेष्टने ।। ६९ ।।

शेखरेऽथोत्पलं शून्ये पङ्कजान्तरपत्रयोः ।

उच्छ्वासः प्राणने गद्यबन्धभिच्छ्वासयोरपि ।। ७० ।।

ऊर्णयुरूर्णनाभे स्यान्मेघकम्बलयोः सिते ।

उपह्वरं रहः स्थाने पार्श्वेऽथोपनिषद्वृषे ।। ७१ ।।

वेदान्ते सद्रहस्ये च शुश्रूषायामुपासनम् ।

आसने च शराभ्यासे प्रारम्भार्थ उपक्रमः ।।७२ ।।

विक्रमे च चिकित्सायामुपधारम्भयोरपि ।

उपलब्धिर्मनीषायां प्राप्तौ ज्ञानेऽपि कथ्यते ।। ७३ ।।

उदुम्बरं कुष्टभेदे ताम्रेऽथोदुम्बरो द्रुमे ।

उपतापं तु दुःखे स्याद्गदे तापेऽपि दृश्यते ।। ७४ ।।

उपसर्गस्तु रोगे स्यातप्राद्यपद्रवयोरपि ।

उपरागस्तमोग्रस्तचन्द्र भास्करमण्डले ।। ७५ ।।

उपचारस्तु लञ्चायामारोपव्यवहारयोः ।

अथ ऋकारादयो यथा ।

ऋतं सत्याम्भसोरुक्तं शिलोञ्छेऽपि निरीक्ष्यते ।। ७६ ।।

ऋतिः स्पर्धाघृणादेवमातृष्वपि गतावृतिः ।

ऋणं दुर्गे जले देये ऋक्षं नक्षत्रवाचकम् ।। ७७ ।।

ऋक्षो भल्लूकवाच्यार्थे स्यादृषिर्मुनिवेदयोः ।

ऋतुर्वसन्ते स्त्रीपुष्पयृषभो वृषभे मतः ।। ७८ ।।

कर्णरन्ध्रे स्वरे कोलपुच्छे जिनवरादिमे ।

ऋषभध्वजनामा तु जिनभेदमहेशयोः ।। ७९ ।।

(अथ) एकारादयो यथा ।

एकोऽथ केवले पूज्य एनः पापापराधयोः ।

एडमूकः शठे कर्णवाग्विवर्जित एव च ।। ८० ।।

एककुण्डल आख्याते रेवतीरमणे हरे ।

किन्नराणामधीसेऽप्यैरावतः शक्रवारणे ।। ८१ ।।

दिग्गजे नागरङ्गेऽप्यैरावतमृजुरोहिते ।

ऐरावती तडिद्भेदे ओघः संघोपदेशयोः ।। ८२ ।।

नृत्यभेदेऽप्यथौजस्तु दीप्तौ धातौ गुणे बले ।

अथ ककारादयो यथा ।

कर्को घटेऽनिले राशौ श्वेताश्वे दर्पणेऽपि च ।। ८३ ।।

कुणिर्वक्षे कुहस्तेऽथ पिप्पल्यां जीरके कणा ।

काकं काकसमूहे च योषितां करणान्तरे ।। ८४ ।।

काका तु काकजङ्घायां काकमाच्यामपि स्मृता ।

कुञ्जस्तु दन्तिनां दन्ते निकुञ्जे मन्दिरे हनौ ।। ८५ ।।

कोकस्तु चक्रवाके स्याद्वृके खर्जूरिकाद्रुमे ।

कचो वाक्पतिपुत्रे स्यात्केशे बन्धे व्रणान्तरे ।। ८६ ।।

काचो वृक्षे मणौ शिक्ये मृत्तिकानेत्ररोगयोः ।

कम्बः शङ्खे कपर्दे च कर्चूरे नलके गजे ।। ८७ ।।

कुजो वृक्षे महीपुत्रे कुटः कुम्भे गृहे मे ।

क्रमस्तु परिपाट्यां स्यात्पदशक्त्योः कठो मुनौ ।। ८८ ।।

ऋग्भेदे वेदवित्पाठे कण्ठः स्यान्मदनद्रुमे ।

घोषे गले समीपे च कार्यं हेतौ प्रयोजने ।। ८९ ।।

क्रोडः कोले शनावङ्के कृष्णो विष्णो पिकेऽर्जुने ।

काके वर्णे तथा व्यासे कृष्णं मरिचलोहयोः ।। ९०।।

कृष्णा तु द्रौपदीनील्योः पिप्पलीहारहूरयोः ।

कद्रूः सर्पजनन्यां स्यात्कद्रुः काञ्चनवर्णके ।। ९१ ।।

कल्यं मद्ये प्रभातेऽपि सावधाने निरामये ।

केशोऽब्जे वरुणे वाले काशः स्यात्तृणरोगयोः ।। ९२ ।।

कुशो रामाङ्गजे दर्भे पापिष्टेऽथ जले कुशम् ।

कश्यं मद्ये कशार्हे च सोमवल्लीरसे तथा ।। ९३ ।।

कोशः पेश्यां वने दिव्ये धनागारे च कुड्गले ।

क्रिया कर्मणि चेष्टायामारम्भोपाययोरपि ।। ९४ ।।

कन्तुः कामे कुसूलेऽथ कान्तिः शोभेच्छयोर्मता ।

कान्तः प्रिये मनोज्ञे च कालो वर्णे यमे मृतौ ।। ९५ ।।

समयेऽपि महाकाले काव्यो नक्षत्रशुक्रयोः ।

काव्याथ पूतनावुद्ध्योः काव्यं ग्रन्थेऽपि कथ्यते ।। ९६ ।।

प्लवे दिगम्बरे कीशः कीलः शङ्क्कग्नितेजसोः ।

कान्ता स्त्रियां प्रियङ्गौ च काली कीटे नवाम्बुदे ।। ९७ ।।

कालिकायां परीवादे कीर्णः छन्ने हतेऽपि च ।

कृतं फले युगे पर्याप्तेऽपि तद्विहिते त्रिषुः ।। ९८ ।।

कर्णोऽर्कजे श्रृतौ काञ्ची रक्तिका मेखला पुरी ।

काण्डो नालऽधमे बाणे स्तम्बे वर्गे जलेऽपि च ।। ९९ ।।

जाराज्जीवत्पतेः पुत्रे कुण्डः कुम्भ्यां जलाश्रये ।

कला शिल्पे विधोर्भग क्रीडानादरनर्मणोः ।। १०० ।।

कुम्भो घटे गजाङ्गेऽपि राक्षसे राशिभिद्यथ ।

कोलं तु बदरं प्रोक्तं कोलः शूकरखञ्जयोः ।। १०१ ।।

क्रौञ्चो द्वीपे खगे शौले कक्षः शुष्कवने स्मृतः ।

बाहुमूले तृणे पापे कटः स्यात्समये शवे ।। १०२ ।।

कल्पः शास्त्रे विधौ पापे संवर्ते ब्रह्मणो दिने ।

प्रकर्षे दिश काष्टा च कालमानदिशोरपि ।। १०३ ।।

करो मेघोपले रश्मौ शुण्डायां हस्तिनोऽपि च ।

हस्तेऽप्यथ कुलं देहे गेहे ज्ञातिचये चये ।। १०४ ।।

कारा बन्दिजनागारे कुष्ठम भेषजरोगयोः ।

कायो देहे स्वभावे च लक्ष्ये संघे कदैवते ।। १०५ ।।

कूर्चो भ्रुवोऽन्तरे दम्भे श्मश्रुण्यपि तथोच्यते ।

कृच्छ्रे च गहने कष्टं कृष्टिः कर्षणधीमतोः ।। १०६ ।।

कोष्ठं कुशूलके कुक्षौ कूलं सैन्ये तटेऽपि च ।

केतुर्दीप्तौ पताकायां कलङ्के च ग्रहान्तरे ।। १०७ ।।

कोटिः संख्याग्रयोः कन्दो मूले सूरणमेघयोः ।

कुन्दो वृक्षे निधौ यन्त्रे कन्था प्रावरणे पुरे ।। १०८ ।।

कुथो दर्भे तथा प्रातःस्नानासक्तद्विजे मतः ।

दम्भास्तरण्योर्हस्तिकम्बले कीटकान्तरे ।। १०९ ।।

कविर्मुनौ विधौ शुक्रे हयोपकारणेऽपि च ।

लोहपृष्टे यमे कङ्को द्विजलिङ्गपजीविनि ।। ११० ।।

कौतुकं कुतुके गीतादौ स्मये मङ्गलेऽपि च ।

कुण्डली कुण्डलोपेते वरुणे केकिनागयोः ।। १११ ।।

करणं साधने काये आसने योगिनापि ।

इन्द्रिये नाट्यभेदे च वालवादावपीरितम् ।। ११२ ।।

करटो दुर्मुखे काके वाद्ये गण्डे च हस्तिनः ।

मृतश्राद्धे कुसुम्भे च कीलालं जलरक्तयोः ।। ११३ ।।

कम्बलं जलजे नीरे काकिणी तु वराटिका ।

गुञ्जायामथ कल्याणं मङ्गले काञ्चनेऽपि च ।। ११४ ।।

कशिपुर्भोजने वस्त्रे करीरः स्याद्द्रुमान्तरे ।

कलशे वैणवाङ्कूरे कपिलो वासवे मुनौ ।। ११५ ।।

कुम्भिलः श्यालके चौरे श्लोकच्छायाहरेपिऽसः ।

कुलालः कुम्भकारे स्याद्धूके ककुभपादपे ।।११६।।

कन्दलं तु नवाङ्कूरे कपाले कलहे ध्वनौ ।

कलङ्कस्त्वपवादेऽङ्के कमलं जलताम्रयोः ।। ११७ ।।

भेषजे पङ्कजे शीर्षे कमला मेखलाश्रियोः ।

कुशलः सुजन आख्यातः कुशलं क्षेमपुण्ययोः ।। ११८ ।।

कर्कशः परुषे तिग्मे खड्गे साहसिके दृढे ।

कुमारो युवराजे च कार्तिकेयेऽपि बालके ।। ११९ ।।

काञ्चनं चम्पके नागकेसरे हाटके तथा ।

धत्तूरे किंशुके कालीये शरेऽपि तदेव च ।। १२० ।।

कण्टको नरके शाखिकण्टके दोषवैरिणोः ।

कुमुदो दिग्गजे दैत्ये भुजंगे कैरवे कपौ ।। १२१ ।।

कानीनः कन्यकासूनौ व्यासे चम्पाधिपे नृपे ।

करको दाडिमे मेघपाषाणेऽपि कमण्डलौ ।। १२२ ।।

ककुभो भूरुहे रोगभेदे वीणाप्रसेवके ।

कञ्चुको वृक्षनिर्मोकवारबाणेषु कञ्चुके ।। १२३ ।।

कदम्बो निकुरम्बो द्रुविशेषे शिखरे तथा ।

कीकसो वानर कीटे कश्मलं पङ्कपापयोः ।। १२४ ।।

कटकं कङ्कणे सैन्ये राजदानीनितम्बयोः ।

कुलिकस्तु तरौ नागे कुलश्रेष्टेऽपि कथ्यते ।। १२५ ।।

कालिङ्गस्तु गजे सर्पे क्रकचः करपत्रके ।

ग्रन्थिलद्रौ कठोरेऽथ कणीचिः शकटे स्मृतः ।। १२६ ।।

कृपीटं तूदरे नीरे करजो नखवृक्षयोः ।

करेणुर्हस्तिहस्तिन्योः कर्णिकारद्रुमेऽपि च ।। १२७ ।।

कायस्थो मारुते भेक जीवके परमात्मनि ।

हरितक्यामलक्योस्तु कायस्थैव निबध्यते ।। १२८ ।।

कपर्दोऽपि वराटे स्याज्जटाजूटे पिनाकिनः ।

कीनाशस्तु दरिद्रेऽपि कर्षके राक्षसे यमे ।। १२९ ।।

कुसुमं नेत्ररोगे स्त्रीरजःपुष्पफलेष्वथ ।

कङ्कणं मण्डने हस्तभूषणे कमठोऽप्यथ ।। १३० ।।

कच्छपे भाण्डभेदेऽथ कदली न्यङ्कुमोचयोः ।

कान्तारं विपिने विघ्ने दुर्गमार्गेक्षुभेदयोः ।। १३१ ।।

कुतपस्तु जले रूप्ये भागिनेये हुताशने ।

दौहित्रे समये दर्भेऽष्टमेऽशें वासरस्य च ।। १३२ ।।

कुटपस्तु मुनौ माने निष्कुटे काश्यपो मुनौ ।

मीनेऽथ काश्यपी नद्यां कबरं लवणाम्लयोः ।। १३३ ।।

कबरी वालविन्यासे कुलायः पक्षिनीडके ।

कुकुदं राजचिह्ने स्याद्वृषाङ्के प्रवरेऽपि च ।। १३४ ।।

कलधौतं कलध्वाने तारकाञ्चनयोस्तथा ।

कालस्कन्धो जीवकद्रौ तमाले पुनः ।।१३४ ।।

करहाटः प्रसूने स्यात्पद्मकन्दे तरावपि ।

कौलेयकः कुलोत्पन्ने सारमेये तथाम्बुजे ।। १३६ ।।

अथ कामगुणो भोगे सुरते रागविद्यपि ।

कशेरुकं जले पृष्टास्थि कन्दे चा कथ्यते ।। १३७ ।।

करवीरः कृपाणेऽपि हयमारस्मशानयोः ।

कटुकन्दो रसोने स्याच्छृङ्गबेरेऽपि कथ्यते ।। १३८ ।।

द्रुमोत्पले कर्णिकारः कृतमालेऽपि संमतः ।

मृगभेदे कृष्णसारः स्नुहीशिंशपयोस्तथा ।। १३९ ।।

कूष्माण्डकस्तु कूष्माण्डे विलाडे गणभिद्यपि ।

कलकण्ठः पिके हंसे पारापतमयूरयोः ।। १४० ।।

कालकण्ठः खञ्जरीटे मयूरे कोकिले तथा ।

कालपृष्टः स्मृतः कर्णचापे कङ्के मृगान्तरे ।। १४१ ।।

कादम्बरी सुरा वाणी कोकिला सारिकापि च ।

कलध्वनिः कलायुक्ते परपुष्टमयूरयोः ।। १४२ ।।

कुरुविन्दास्तु कुल्माषमुस्ताहिङ्गुलदर्पणाः ।

कुकवाकुस्ताम्रचूडे मयूरे कृकलासके ।। १४३ ।।

काकरूकोऽथ दम्भे स्याद्भीते घूके स्त्रिया जिते ।

कोशातकः कचे घोषे स्त्रीत्वे ज्योत्स्नी पटोल्यपि ।। १४४ ।।

अथ खादयो यथा ।

खरस्तिग्मे च दुःस्पर्शे गर्दभे राक्षसान्तरे ।

तुरंगमे हरे दन्ते खल्लो निम्नेऽशुंके खगे ।। १४५ ।।

खटः कफे तृणे कूपे खर्ज्जू रोगेक्षुभिद्यपि ।

खण्डोऽर्धे मणिदोषेऽप्यैक्षवे खर्वस्तु वामने ।। १४६ ।।

खर्जूरं तु फले रूप्ये खर्जूरी पादपान्तरे ।

खट्टिको महिषी क्षीरफेने चण्डाललोहयोः ।। १४७ ।।

खञ्जरीटः पक्षिभेदे कृपाणव्रतचारिणि ।

खण्डपर्शुर्महादेवे राहावौषधरामयोः ।। १४८ ।।

खर्वशाखः कपौ खर्वे क्षुपेऽपि परिकीर्तितः ।

अथ गकारादयो यथा ।

गजो मतङ्गजे माने गञ्जा स्यान्मदिरागृहे ।। १४९ ।।

गुञ्जा मञ्जुरवे वल्लीभेदे च पटहे पुनः ।

गोण्डस्तु पामरे वृद्धनाभिकेऽपि तथोच्यते ।। १५० ।।

गुडस्तु गोलके हस्तिसंलाहेक्षुविकारयोः ।

गोष्टं वने गवां स्थाने गोष्टी संलापपर्षदोः ।। १५१ ।।

कपोले गण्डके गण्डश्चिह्ने योगे खनावथ ।

गोपस्तु वल्लवे भूपे ग्रामयुक्ते मुनीश्वरे ।। १५२ ।।

गन्धो लेशे स्मये गन्धे गुरुः पित्रादिजीवयोः ।

गौरः सितेऽरुणे पीते चन्द्रकर्पूरयोः शुचौ ।। १५३ ।।

गौरं च सर्षपे श्वेते किञ्जल्केऽथ गुणो यथा ।

रूपादावपि शौर्यादौ संध्यादौ तन्तुसूदयोः ।। १५४ ।।

रज्जौ ज्याभीमयोरक्षेऽप्रधानेऽपि निरीक्ष्यते ।

वप्रे जीवान्तरे गोधा प्रत्यञ्चाघातवारणे ।। १५५ ।।

गोत्रो भूध्रेऽथ गोत्रं स्याच्छत्रेऽरण्ये च वर्त्मनि ।

नाम्नि क्षेत्रेऽन्वये गोत्रा भूमौ गोनिचये पुनः ।। १५६ ।।

गिरिः पूज्ये गिरौ गर्भे कन्दुके नेत्ररुज्यथ ।

गुच्छः स्तम्बे कलापेऽपि हारस्तबकयोः पुनः ।। १५७ ।।

गर्भः कुक्षौ बले संधौ ग्रामः संवसथे स्वरे ।

गणः सैन्यान्तरे पूगे संख्यायां प्रथमे तथा ।। १५८ ।।

गुल्मो वृक्षान्तरे घट्टिविशेषे कटके स च ।

ग्रहोऽर्कादावुपादाने गतिर्यात्रा दशापि च ।। १५९ ।।

गुप्तो दासीसुते गूढे गुहः स्कन्दे च गह्वरे ।

गन्धर्वः खेचरे त्वश्वे गायने हरिणान्तरे ।। १६० ।।

ग्रहणं स्वीकृते चोपरागे यत्ने गुणे ध्वनौ ।

ग्रन्धिकं पिप्पलीमूले ग्रन्थिको ग्रहचारवित् ।। १६१ ।।

विडङ्गे ग्रन्थिपर्णेऽपि गण्डको विघ्नखड्गिनोः ।

गण्डकी तु नदीभेदे गोरङ्कुः खगनग्नयोः ।। १६२ ।।

गोलको जारजे रण्डापुत्रे मणिकसंज्ञके ।

गोपतिर्वल्लवे रुद्रे सागरे वरुणेन्द्रियोः ।। १६३ ।।

सूर्ये षण्डऽथ गोदन्तो दंशिते हरितालके ।

गोस्तनी च लतावृत्तिर्हारहूरापि कथ्यते ।। १६४ ।।

गोपुरं नगरद्वारे मुस्तकद्वारयोः पुनः ।

ग्रामणीः स्वामिनि श्रेष्टे गर्जितो वारणान्तरे ।। १६५ ।।

गर्जितं मेघजे शब्दे गह्वरं दम्भरन्ध्रयोः ।

गौरिकं धातुभेदेऽपि स्वर्णे स्याद्गालवो मुनौ ।। १६६ ।।

गाङ्गेयं सुन्दरे स्वर्णे मुस्तकेऽपि कशेरुके ।

कृपणे गाढमुष्टिश्च कृपाणेऽपि नीबध्यते ।। १६७ ।।

गन्धवाहो मृगे वायौ गन्धवाहा च नासिका ।

गोमेदकं च काकोले पत्रके रत्नभिद्यपि ।। १६८ ।।

गन्धवत्यचलामद्यव्यासमातृषु पत्तने ।

गदयित्नुः स्मरे शस्त्रे सुरायां गन्धमादनी ।। १६९ ।।

गोजागरिकशब्दस्तु मङ्गले भक्ष्.कारके ।

ग्राममद्गुरिका युद्धे शृङ्ग्यामथ च गन्धके ।। १७० ।।

वानरे गन्धके शौले भ्रमरे गन्धमादनः ।

अथ घकारादय यथा ।

घनो जलधरे वृन्देबहुले वादिभिद्यपि ।। १७१ ।।

घर्मो ग्रीष्मोष्मतापे स्यात्तापे खेदजले तथा ।

घोषस्त्वाभीरपल्लौ स्यात्कांस्यघोषकयोरपि ।। १७२ ।।

घृतं दीप्तौ जलेऽथाज्ये घृणा निन्दा दया स्मृता ।

घटा गोष्टयां गजश्रेणो घृणिर्ज्वालांशुवीचिषु ।। १७३ ।।

घटो गजशिरःकूटे कलशे लसतोषयोः ।

कर्पूरे घनसारः स्यात्पानीये मोरटेऽपि च ।। १७४।।

घनाघने मत्तहस्तिमेघयोर्घातके पुनः ।

अथ चकारादयो यथा ।

चण्डः सुरान्तरे तिग्मे कोपने यमसेवके ।। १७५ ।।

चण्डी शिवस्त्रियां चण्डा शङ्खपुष्पा निगद्यते ।

चक्रं राष्ट्रे बले वृन्दे जलावर्तरथाङ्गयोः ।। १७६ ।।

शास्त्रे दम्भान्तरे दुष्टे चित्रा दन्तीसुभद्रयोः ।

दिव्यस्त्रियां च नक्षत्रभेदे चित्रमथाद्भुते ।।१७७।।

तिलके कर्बुरे ऽप्येवं चन्द्रः कर्पूरचन्द्रयोः ।

काम्पिल्ये मेचके स्वर्णे चीरं गोस्तनवस्त्रयोः ।।१७८ ।।

चर्चा देव्यां च निन्दायां चिन्तायां स्थासकेऽपि च ।

चक्री कोके कुलालेऽपि सार्वभौमे रथे हरौ ।। १७९ ।।

चमसो लड्डुके पिष्टभेदे पर्पटके तथा ।

चरणस्तु पदे मूले गोत्रचारित्रयोरपि ।। १८० ।।

चामरःकेतके? पुष्पे काशे माकन्दपादपे ।

चमरश्चामरे दैत्य चपलश्चञ्चलेऽनिले ।। १८१

चपलो मर्धजे मीने चपलं शीघ्रलोलयोः ।

पारदेचपला लक्ष्म्यां पिप्पलीविद्युतोरथ ।।१८२

चिरण्टी तु सुवासिन्यां यौवनाश्रितयोषित ।

चाम्पेयः काञ्चने नागकेसरे चम्पके तरौ ।।१८३

चक्रवाटः शिखावृक्षे क्रियारोहेऽपि संमतः ।

चक्रवाडश्चक्रवालः पर्वतान्तरपूरयोः ।। १८४

चूडामणिः शिरोरत्ने शास्त्रभेदे फलान्तरे ।

चन्द्रहासो दशग्रीवखड्गे मद्यान्तरेऽपि च ।। १८५

चन्द्रकान्तो मणौ चन्द्रकान्तं कैरववाचकम् ।

चीर्णपर्णः पिचुमन्दे खर्जूरेऽथ चतुष्पथम् ।। १८६

चत्वरेऽप्यग्रजे (पुंसि?) चक्रपादो रथे पुनः ।

चतुष्पदस्तुरंगादौ स्त्रीणां च करणान्तरे ।। १८७

चित्रभानू रवौ वह्नौ चिरंजीव्यजकाकयोः ।

चन्द्रोदयो विधूद्रेक उल्लोचौषधभेदयोः ।। १८८

स्मृतश्चक्रधरः सर्पे श्रीपतौ कुम्भकारके ।

अथ छकारादयो यथा ।

छदःपत्रे ग्रन्थिपर्णे पतत्रेऽपि तमालके ।। १८९

छिद्रं व्याजे बिले गर्ते छन्दोऽभिप्रायतन्त्रयोः ।

श्रुतौ पद्येच्छयोश्चापि छाया बिम्बार्कयोषयोः ।। १९०

उत्कोचे पालने कान्तौ शोभानातपयोरपि ।

छलं वेषे मषे पत्रे छल्ली वल्कलवीरुधोः ।। १९१

गृहासक्तेऽण्डजे छेको दक्षे च हरिणान्तरे ।

छेदनं कर्तने भेदे छर्दनो निम्बलुम्बयोः ।। १९२

छगलाख्या पुटे मेषे नीलिकारञ्चितांशुके ।

छगली चौषदीभेदे छित्वरो रिपुधूर्तयोः ।।१९३

अथ जकारादयो यथा ।

ज्येष्ठो मासेऽग्रजे पूज्ये ज्येष्ठा स्याद्गृहगोधिका ।

नक्षत्रेऽप्यौषधीभेदे जनो लोके पृथग्जने ।। १९४

जडस्त्वज्ञे हिमग्रस्ते जनी वध्वां जगच्चरे ।

जङ्गमेऽप्यथ जिष्णुः स्याज्जयशीले रवौ हरौ ।। १९५

अर्जुने वासवे देवपादपेऽथ जलं जडे ।

जले जिह्मोऽसमे मन्दे जिह्मं तगरपातपे ।। १९६

जम्भोंऽशेऽप्यशने दन्ते तरौ तूणेऽसूरान्तरे ।

जटा मांस्यां वृक्षमूले विकारे केशसंततेः ।। १८७

ज्योतिर्वह्नौ दिवानाथे नक्षत्रेऽक्षिप्रकाशयोः ।

जातिर्गोत्रामलक्योः स्याज्जन्मसामान्ययोरपि ।। १९८।।

मालत्यां छन्दसां भेदे ज्यायान् शस्ते गुरावपि ।

जालं तु क्षारकानायगणदर्भषु जालके ।। १९९ ।।

नटे नीपे स्मृतो जालः पटोल्यां जाल्यपि स्मृता ।

जिनो बुद्धे स्मरे कृष्णेऽर्हत्ययं स्याद्विशेषतः ।।२००।।

जृम्भितं जृम्भणोत्फुल्लचेष्टितेष्वपि वर्धिते ।

जिगीषा तु जयेच्छायां व्यवसाये तथोच्यते ।।२०१

संनाहे तुरगादीनां विज ये जयनं तथा ।

जर्जरस्तु जराव्याप्ते कोकिले वासवध्यजे ।। २०२

जीविका वर्तनेऽथोक्तो जीवकः सेवके तरौ ।

प्राणके चातके व्यालग्राहे वृद्ध्युपजीविनि ।।२०३

जरणो जीवके नीरे रुचके कृष्णजीरके ।

जम्भलो देवताभेदे जम्बीरेऽपि निशम्यते ।। २०४

जटायुर्गुग्गुले वृक्षे (पक्षि?) भेदेऽथ जङ्गलम् ।

निर्जले पिशिते गर्ते जम्बूलः क्रकचद्रुमे ।। २०५

जीवनं सलिले जन्मवृत्त्योरपि निरीक्ष्यते ।

जगती छन्दसां भेदे भूमौ लोकेऽथ जम्बुकः ।। २०६

फेरौ पाशिन्यथाख्यातो जीमूतो गिरिमेघयोः ।

जठरं तु कठोरे स्याच्चित्ते कुक्षौ द्रुमान्तरे ।। २०७

जूहूराणो हये वह्नौ जीवितेशः प्रिये स्मृतः ।

कालेऽथ जलसूचिस्तु शृङ्गाटे शिशुमारके ।। २०८

जलौकःकङ्कयोस्त्रौटौ लोके जनपदो मतः ।

पत्तने विषये मार्गे जर्जरीको जरत्तरे ।।२०९

जर्जरीकं बहुच्छिद्रे जवंजीवः खगान्तरे ।।

जघन्यजोऽनुजे शूद्रे जलरङ्कस्तडित्वति ।। २१०

नालिकेरीफलेऽथोक्तो जलरण्डो जलभ्रमे ।

किञ्जल्कसर्पयोश्चाथ जीवपुष्पं फणिज्जके ।। २११

झूणिः पूघीफले दण्डे दुष्टदेवश्रुतावकपि ।

अथ टकारादयो यथा ।

टङ्कस्तु टङ्कणक्षारेऽश्मदारणखनित्रयोः ।। २१२।।

क्रोधे मानान्तरे कोशे तगरे केसरद्रुमे ।

पाषाणदारणे क्रोधे टङ्कणोपि मतः सताम् ।। २१३ ।।

डिम्भो बाले जडेऽप्युक्तो डिम्बोऽथ डमरे भये ।

अथ तकारादयो यथा ।

तीर्थं तोये गुरौ यज्ञे शास्त्रे स्त्रीपुष्पपात्रयोः ।। २१४ ।।

देवतानिलये पुण्यक्षेत्रे योन्यवतारयोः ।

त्राणं वीर्ये वने त्रायमाणभेषजनाम च ।। २१५ ।।

तर्कः कर्मविशेषे स्याद्विचारेऽपि तथोच्यते ।

गीतकर्ममितौ तालस्तालो वृक्षे कराहतौ ।। २१६ ।।

हस्तमानेऽप्यथो तालं हरिताले निगद्यते ।

तलं सर्गे तवधोभागे तलस्तालचपेटयोः ।। २१७ ।।

तारा सुरगुरोः पत्नी बुद्धसुग्रीवपत्न्यपि ।

तारं रूप्ये प्रधानेऽपि तारा नेत्रकनीनिका ।। २१८ ।।

नक्षत्रेऽथ मतस्तारः स्वरभेदे च मौक्तिके ।

तन्त्रं शास्त्रे वशे वायसाधने सिद्धभेषजे ।। २१९ ।।

परिच्छदे प्रधानेऽथ त्रपु सीसकरङ्गयोः ।

तन्त्री नाड्यां तथा वीणागुणे त्यागो विसर्जने ।। २२० ।।

परित्यागे तुला तूक्ता राशौ सादृश्यभाण्डयोः ।

पलानां शतमानेऽथ तमः खेदतमिस्रयोः ।। २२१ ।।

राहौ गुणान्तरे चाथ तोकं संतानपुत्रयोः ।

तापः कष्टे च संतापे तेजो मोक्षप्रभावयोः ।। २२२ ।।

नवनीते बले वह्नौ तीक्ष्णं तिग्मे विषे रणे ।

तूणी नील्यां निषङ्गे च तल्पं शय्याकलत्रयोः ।। २२३ ।।

वस्त्रे देहे गृहे चाथ तनुः स्वल्पे कृशे त्वचि ।

विरले वामने देहे त्रुटिः संशयलेशयोः ।। २२४ ।।

कालमानेऽपि रज्जौ स्यत्ततं विपुलनाद्ययोः ।

तरो वेगे बले तार्क्ष्यः सूरसूते खगेश्वरे ।। २२५ ।।

स्यन्दने घोटके तन्द्रा प्रमादस्वापयोरपि ।

त्रेता युगान्तरे वह्निनित्रिके त्रय्यपि कथ्यते ।। २२६ ।।

तरलस्तुं बले हारान्तर्मणौ चपले तथा ।

आकाशे त्रिदिवं ख्यातं स्वर्गलोकेऽपि संमतम् ।। २२७ ।।

तिलकं च ललामे स्याद्रुचके तिलकालके ।

क्लोमचित्रकयोश्चाथ तुषारः शीतशीकरौ ।। २२८ ।।

तलिकं कुट्टिमे तल्पे विताने तलिमं तथा ।

तोदनं पीडने तोत्रे तरसं बलमांसयोः ।। २२९ ।।

तक्षको भुजगे तक्ष्णि तरणी रविबेडयोः ।

तरुणे नूतने यूनि तारकं नेत्रतारयोः ।। २३० ।।

नक्षत्रे.थासुरे नाविके च तारक उच्यते ।

त्रिशङ्कुर्नृपभेदे च बिडाले शलभे तथा ।। २३१ ।।

तूलतल्पे शिलाकायां तूलिका चित्रलेखिनी ।

तमालः खड्गतापिच्छपुण्ड्रेषु वरुणे पुनः ।। २३२ ।।

तुमुलं तु महायुद्धे तुमुलस्तु विभीतके ।

तन्डुरीणः स्मृतः केशे तन्डुलोदककीटयोः ।। २३३ ।।

पारगस्तर्तरीकः स्यात्तर्तरीकं वहित्रके ।

अथ दकारादयो यथा ।

दढः शक्ते भृशे मत्ते द्युतिः किरणशोभयोः ।। २३४ ।।

दंष्ट्राभिलाषयोर्दाढा दोग्धा बल्लववत्सयोः ।

द्रोणः काकान्तरे भूध्रकृपीपत्योर्द्रुणः शरे ।। २३५ ।।

भृङ्गे कीटे द्रुणं चापे कच्छपान्तरखड्गयोः ।

द्रोणी बेडान्तरे भूध्रसंधावथ दिवं जले ।। २३६ ।।

इन्द्रिये वासराकाशनाकेष्वथ दया कृपा ।

दायो दाने पितुर्वित्ते यौतकान्वययोरपि ।। २३७ ।।

दण्डो माने प्रकाण्डे चोपायभेदेऽर्कसेवके ।

सैन्ये दर्पेऽथ दण्डी स्याद् द्वाःस्थे भूपे यमेऽपि च ।। २३८ ।।

दानं हस्तिमदे शुद्धौ रक्षणे च विसर्जने ।

दरो गर्ते भये देवः सुरराजजिगीषुषु ।। २३९ ।।

मेघे मूर्खे द्विजो विप्रे दन्तनीडजयोरपि ।

द्रुमो रत्ने तरौ दिष्टिर्हर्षे मानेऽपि कथ्यते ।। २४० ।।

द्रविणं द्युम्नवद् द्रव्ये सङ्घौषधपराक्रमे ।

द्वितीया गेहिनीतिथ्योर्दारदः पारदे विषे ।। २४१ ।।

देवनं तु विहारे स्याज्जिगीषाव्यवहारयोः ।

द्वापरो युगभेदेऽथ संशये दीपितं त्वथ ।। २४२ ।।

दग्धभासितयोश्चाथ दायादो ज्ञातिपुत्रयोः ।

दुकूलं पट्टकूले स्याद्दले भूर्जस्य संमतम् ।। २४३ ।।

दिवौकाश्चातके देवे दीपकस्तु खगान्तरे ।

वृत्तालंकारभेदेऽपि दीप दीप्तिकरे पुनः ।। २४४ ।।

दुर्मुखे मुखरे हस्तिभेदे वानरवाजिनोः ।

दर्दुरः पर्वते भेके दुर्वर्णं स्वर्णरूप्ययोः ।। २४५ ।।

दासेरः करभे दासीपुत्रे वह्नौ च दहनः ।

भल्लाते चित्रके दुष्टचेष्टितेऽपि निबध्यते ।। २४६ ।।

दुरोदरः पणे द्यूते पाशके द्यूतकारके ।

दन्दशूको भुजंगे स्याद्राक्षसेऽपि मतः सताम् ।। २४७ ।।

देवसेनामरेशस्य पुत्री सेनापि कथ्यते ।

दिवाकीर्तिस्तु चण्डाले नापिते शिबरान्तरे ।। २४८ ।।

दिवाभीतश्च घूके स्यात्कुमुदाकरतौरयोः ।

भवेद्देवमणिर्वाजिगलावर्तेऽपि शंकरे ।। २४९ ।।

देवताडः कृतान्तेऽग्नौ राहुपर्वतयोरपि ।

दलाढकोऽरण्यतिले नागकेसरखातयोः ।। २५० ।।

(अथ) धकारादयो यथा ।

धाम गेहे प्रभावे च स्थाने तेजसि विश्रुतम् ।

धुनी नद्यां समुद्रेऽथ धेनो धेनुः करिस्त्रियाम् ।। २५१ ।।

गवि ध्वाङ्क्षस्तु काके स्याद्बकयाचकयोरपि ।

धातुः क्रियादिरूप्यादिमहाभूतेषु तद्गुणे ।। २५२ ।।

धारा जलादिपाते स्यात्खड्गाङ्गेऽर्वगतावपि ।

धरः कूर्मे गिरौ तूले धरा मेदभुवोर्मता ।। २५३ ।।

धिष्ण्यं रश्मौ गृहे स्थाने वह्वौ नक्षत्रशुक्रयोः ।

घात्री क्षोण्यामलक्योश्च धातक्यामुपमातीर ।। २५४ ।।

धृतिः सुखेऽध्वरे धैर्ये संतोषे धारणेऽपि च ।

कोदण्डस्थलयोर्धन्व धन्वा स्यान्मरुमण्डले ।। २५५ ।।

धन्वी धनुर्धरे छेके ध्रुवः कीलकशर्वयोः ।

धवः प्रिये तरौ भीरौ धीदा कन्यामनीषयोः ।। २५६ ।।

धैनुकं करणे स्त्रीणां धेनूनां निवहेऽपि च ।

धिषणस्तु सुराचार्ये धरणो रविशेषयोः ।। २५७ ।।

धूसरो धूमले वर्णे शकटाङ्गे च गर्दभे ।

धाराटे निर्दये त्वश्वे चातके निन्दके तथा ।। २५८ ।।

धव लो वाडवेये स्याचछुभ्रे कर्परचन्द्रयोः ।

अथ नकारादयो यथा ।

प्रापणे च मये नीतिर्निजो नित्यस्वकीययोः ।। २५९ ।।

नाडी दम्भस्य चर्यायां नाले स्नायौ गुणान्तरे ।

न्यङ्कुस्ताले मृगे साधौ नखो नखो नखरखण्डयोः ।। २६० ।।

नागः सर्पे गजे नागकेसरे मुस्तकान्तरे ।

शब्दोत्तरस्थितः श्रेष्टे शरीरपवनान्तरे ।। २६१ ।।

स्वर्गे व्योम्नि मतो नाको नीचः पामरर्वयोः ।

नाकुर्मुनीश्वरे रन्ध्रे पर्वते कृमिपर्वते ।। २६२ ।।

निष्को ह्यद्भूषणे स्वर्णे दीनारस्नानयोरपि ।

नभा घ्राणे बिसे मासभेदेऽथ स्यान्नभोऽम्बरम् ।। २६३ ।।

नाभिः क्षत्रियचक्राङ्गदेहाङ्गेष्वपि कथ्यते ।

नदो वाहे ह्रदे वार्धिरावयोर्नेत्रमंशुके ।। २६४ ।।

वृक्षमूले मृगे नेत्रे नन्दिर्द्यूते गणान्तरे ।

हर्षे नन्दि वटे गर्दभाण्डे शंकरवेत्रिणि ।। २६५ ।।

नन्दा तिथ्यन्तरे वाचि मणिकेऽथ नलं कजे ।

पितृदेवे कपौ वृक्षे नालं काण्डमृणालयोः ।। २६६ ।।

नेमः कालेऽवधौ गर्तदम्भयोर्वणेऽपि च ।

नेमिर्वृक्षे प्रधौ निन्दापवादे निन्दने स्मृता ।। २६७ ।।

निभो दम्भे समाने च नरः कर्पूररामयोः ।

अर्जुने केशवे मर्त्ये नूनं निश्चयतर्कयोः ।। २६८ ।।

नगो भूध्रे तरौ नाम कुत्साख्यामन्त्रणेष्वथ ।

निर्वेशो मूर्च्छने स्तूपभोगेऽथ निगमः पुरे ।। २६९ ।।

वणिङ्भार्गे श्रुतौ मार्गे निकायो गणलक्षयोः ।

निसर्गस्तु स्वरूपे स्याद्विश्वनिर्माण एव च ।। २७० ।।

निर्वातस्तु गते वाते गाढसंनाहसद्मनोः ।

निर्यूहः शेखरे नागदन्तनिर्यासयोरपि ।। २७१ ।।

निष्क्रमो निर्गमेऽकुल्ये निकृतोऽन्यत्कृतेऽधमे ।

नायको रत्नभेदे स्यातप्रधानस्वामिनोरपि ।। २७२ ।।

नियमोऽथावधौ ज्ञाने व्रते निश्चयबन्धयोः ।

नालिका चुल्हिकारन्ध्रे बिलकालविशेषयोः ।। २७३ ।।

निर्वाणं तु शिवे दन्तिमज्जने च विनाशने ।

नर्तको द्विरदे मत्स्ये नृत्यकर्तरि संतमः ।। २७४ ।।

निस्त्रिंशः परुषे खड्ङ्गे निषधः स्वरदेशयोः ।

निवेशो रचनानीकविवाहेषु पुरेऽप्यथ ।। २७५ ।।

नन्दकोऽसौ मुकुन्दस्य हर्षके कुलपालके ।

निर्ग्रन्थः कदलीसाले निर्धने श्रमणेऽपि च ।। २७६ ।।

निर्वृतिर्मोक्षमृत्योः स्यात्स्वास्थ्येऽपि परिकीर्तितम् ।

नागवारिक आख्यातो खगेशे चित्रमेखले ।। २७७ ।।

नारायणो हरौ तालभेदे नारायणी श्रियाम् ।

मदीकान्तोऽम्बुधौ वृक्षविशेषेऽपि निबध्यते ।। २७८ ।।

नदीकान्ता लताकाकजङ्घयोरथ निर्वृतौ ।

स्मृतं निःशरणं मृत्त्यावुपाये तालभिद्यपि ।। २७९ ।।

निशाचरस्तु जम्बूकरक्षसोश्चौरसर्पयोः ।

न्यावर्तं पुरे वृक्षे गेहभेदेऽपि दृस्यते ।। २८० ।।

निराकृतिर्द्विजे वेदहीने भर्त्सन एव च ।

नारकीटो दृषत्कीटे मित्रद्रोहकरे नरे ।। २८१ ।।

ईक्षणे श्रवणे वापि स्मृतं निशमनं बुधैः ।

नीलकण्ठो हरे केकिखञ्जरीटपिकेष्वपि ।। २८२ ।।

निषद्वरः स्मरे पङ्के विचारे तु निरूपणम् ।

(अथ) पकारादयो यथा ।

पदं त्राणे क्रमे स्थानेऽपवादव्यवसाययोः ।। २८३ ।।

विभक्त्यन्तेऽथ पादस्तु रश्मौ प्रत्यन्तपर्वते ।

तुर्यांसे तरुमूलेऽथ पद्मो व्यूहेऽहिसंख्ययोः ।। २८४ ।।

पद्मं तु पङ्कजे हस्तिविन्दुष्वपि च पल्लवे ।

पीथं जले रवौ पीथः पद्मा लक्ष्म्यां प्लवः कपौ ।। २८५ ।।

भेकचण्डालयोः प्लक्षे वारिवायश्बयोः ।

पुष्पं याने कुबेरस्य कुसुमे स्त्रीरजस्यपि ।। २८६ ।।

नेत्ररोगे विकाशे च पक्षः पिच्छे ग्रहे चये ।

विरोधे केशहस्ते च साध्ये मासार्धपार्श्वयोः ।। २८७ ।।

पणो ग्लहे भृतौ कार्षापणे मूल्ये वराटके ।

पाको दैत्ये शिशौ पाके पात्रं भाजनदेहयोः ।। २८८ ।।

पत्राणां निचये योग्ये पत्री बाणे खगे रथे ।

श्येने पालिः स्मृता सेतौ कर्णपाल्यां स्थितौ ततौ ।। २८९ ।।

पत्रं पक्षे दले भूर्जे वाहनेऽपि निगद्यते ।

पोत्रं शूकररक्त्राग्रे हलाग्राम्बरयोरपि ।। २९० ।।

पीलुः काण्डे तरौ पुष्पे परमाणौ मतङ्गजे ।

पृथुर्भूपे विशाले च पुरं मन्दिरदेहयोः ।। २९१ ।।

गुग्गुलेऽपि पुरः प्रोक्तः पुरुः स्याद्रागपूरयोः ।

स्वर्लोके प्रचुरे चाथ पारी पूरपरागयोः ।। २९२ ।।

पात्र्यां कर्करिकायां च हस्तिनां पादबन्धने ।

प्रस्थः सालौ तटे माने प्राणो गल्धरसे बले ।। २९३ ।।

वायौ ह्यदयवायौ च पुस्तं पुस्तकशिल्पयोः ।

पार्ष्णिरुन्मदयोषायामंह्निमूलेथ पूरिते ।। २९४ ।।

खातादावपि पूर्तं स्यात्पृषद्विन्दौ मृगान्तरे ।

प्लुतस्त्रिमात्रकेऽप्युक्तः प्लुतं वाजि गतावपि ।। २९५ ।।

पुण्ड्रः कीटे च वासन्यां चित्रके तिलकेऽपि च ।

इक्षुभेदे पुण्डरीके पशुर्मेषे मृगान्तरे ।। २९६ ।।

पौषं युद्धे क्षणे पौषो मासभेदेऽपि संमतः ।

पूगं वृन्दे फले पूग्याः पयो दुग्धे जलेऽपि च ।। २९७ ।।

पिण्ङ्गा गोरोचनागौर्योः पिङ्गं बालकपीतयोः ।

पिण्डः सिह्ले जपापुष्पे वोलेऽपि कवलाङ्गयोः ।। २९८ ।।

पण्डः क्लीबे जडे पण्डा तत्त्वबुद्धौ स्मृता बुधैः ।

पाण्डुर्गदान्तरे वर्णभेदे राजान्तरेऽपि च ।। २९९ ।।

पिच्छः पुच्छे कचे वाजे क्लीबलिङ्गमुदाहृतम् ।

पिञ्जा तूला हरिद्रा च पुष्टिर्वृद्धौ च पोषणे ।। ३०० ।।

पल्लिर्भिल्लादिवासे स्यात्प्रजा संतानलोकयोः ।

पत्तिस्तु गौरवे पाके पलं मांसे मितावपि ।। ३०१ ।।

प्लक्षो द्वीपे वटे स्वच्छे पटुर्नीरोगदक्षयोः ।

पर्व ग्रन्थौ पुराणाङ्गे दर्शप्रस्तावयोरपि ।। ३०२ ।।

पट्टः चतुष्पथे पीठे व्रणस्यापि निबन्धने ।

पतंगः शलभे सूर्ये पतंगं पारदे स्मृतम् ।। ३०३ ।।

प्रसवः साखिनां पुष्पे फले गर्भस्य मोचने ।

पुलाकः क्षुद्रधान्यांशे संक्षेपे भक्तसिक्थके ।। ३०४ ।।

पर्यङ्को मञ्चके तन्त्रेऽप्यर्भके पृथुकः पुनः ।

चिपिटेऽथ प्रमाणं स्यात्सत्ये माने च कारणे ।। ३०५ ।।

प्रकाशः प्रकटे रोगे प्रद्योते पुंगवो गवि ।

शब्दोत्तरस्थितःश्रेष्टे पर्जन्यो वासवेन्द्रयोः ।। ३०६ ।।

पर्याप्तं तु निषेधे स्याद्यथेच्छापूर्णशक्तिषु ।

प्रदरो रोगभीत्योः स्यात्पललं मासपङ्कयोः ।। ३०७ ।।

परुषं कर्कशे रूक्षे पुद्गलः कायवित्तयोः ।

प्रधानं प्रकृतौ पूज्ये महामात्रात्मनोरपि ।। ३०८ ।।

पल्लवो नवपत्रे स्याद्धूर्तशुङ्गारयोरपि ।

पुलकोऽथाश्रुसंताने रोमाञ्चे कृमिबिद्यपि ।। ३०९ ।।

प्रवालो विद्रुमे वीणादण्डे पादपपल्लवे ।

पलाशो राक्षसे वर्णभेदे वृक्षान्तरेऽपि च ।। ३१० ।।

प्रघणस्ताम्रकुम्भे यो मुद्गरेऽलिन्दके तथा ।

प्रणयः प्रार्थनाप्रेमविश्रम्भेषु निगद्यते ।। ३११ ।।

पिण्डारो महिषीपाले याचके द्रुमभिद्यथ ।

पिचुलो झाबुके नीरवायसे निचुलेऽपि च ।। ३१२ ।।

पाचलोऽग्नौ समीरे च पिङ्गला स्लायुवेश्ययोः ।

पेचको गजलाङ्गूलमूले घूके निशाचरे ।। ३१३ ।।

परञ्जस्तैलयन्त्रेऽसौ क्षुरिकाफलपेनयोः ।

पिच्चटं सीसके रङ्गे पूत्यण्डो गन्धकाटके ।। ३१४ ।।

गन्धैणे पक्षिणी पौर्णमासी शाकिन्यपि स्मृता ।

परिवापोऽसिकोशेऽम्बुस्थाने वपनतनत्रयोः ।। ३१५ ।।

परिबर्हः परीवारे राज्ययोग्ये च वस्तुनि ।

स्मृतः पुष्कलकः स्थाणौ पूतिकाष्टं सुरद्रुमे ।। ३१६ ।।

पुण्डरीकं कजे श्वेते श्वेतच्छत्रेऽपि कथ्यते ।

दिग्गजे राजिलाहौ च पुण्डरीकः कमण्डलौ ।। ३१७ ।।

पुरस्कृतोऽग्रगे शस्ते प्रतिक्षिप्तो निराकृते ।

पितामहः पितुस्ताते ब्रह्मण्यपि च कथ्यते ।। ३१८ ।।

परायणोऽप्यथासक्ते कात्सर्न्ये पारायणं स्मृतम् ।

पाञ्चजन्यो हरौ पोटगले शङ्खे हरेरपि ।। ३१९ ।।

परिधायो नितम्बे स्यात्परिवारे जलाशये ।

पात्रटीरो जरत्पात्रे हुताग्नौ लोहकांस्ययोः ।। ३२० ।।

प्रचलाको भुजंगेऽपि शराघातशिण्डयोः ।

चुचुके सेवने सूत्रे स्मृतं पिप्पलकं बुधैः ।। ३२१ ।।

परपुष्टा वारयोषा परपुष्टः पिके स्मृतः ।

प्रजापती रवौ सूर्यवेधसोः पाचके नृपे ।। ३२२ ।।

पारिजातस्तु मन्दारे पारिभद्रेऽपि कथ्यते ।

फलं हेतुकृते लाभे फणा सर्पफटे स्मृता ।। ३२३ ।।

जटामन्थानकुण्डल्योः फटा च फणदम्भयोः ।

फाल्गुनो मासभेदे स्यादर्जुनाख्ये तरावपि ।। ३२४ ।।

फेनिलं बदरे कामफले रिष्टेऽपि कथ्यते ।

पालकस्तु गतौ वीरभेदे दिव्येऽपि संमतः ।। ३२५ ।।

फेरवो राक्षसे फेरौ स्वर्गलोके फलोदयः ।

(अथ) भकारादयो यथा ।

भुजो मूल्ये करे बाहौ भानुः सूर्यदिनांशुषु ।। ३२६ ।।

भगो ज्ञाने रवौ रूपप्रभावश्रीषु दृश्यते ।

यत्ने पुण्ये यशोमुक्तिवीर्ययोनिषु शीतगौ ।। ३२७ ।।

भेको भीरौ प्लवे मेगे भङ्गः कल्लोलदम्भयोः ।

पराजये भृगुः सानौ शुक्रे मृत्युंजयेऽपि च ।। ३२८ ।।

भोगः सर्पफणे सर्पदेहे वेश्याबृतौ सुखे ।

राज्ये भाण्डं वमिग्मूलवित्ते मण्डनभूषयोः ।। ३२९ ।।

भ्रमो भ्रान्तौ जलावर्ते भृङ्गो भ्रमरषिङ्गयोः ।

भेदो विदारमे द्वैध उपजापविशेषयोः ।। ३३० ।।

भवो रुद्रे च सत्तायां संसारे प्राप्तिजन्मनोः ।

भावः सत्तास्वभावात्मकर्मचेष्टाशयेष्वथ ।। ३३१ ।।

भद्रो गजान्तरे श्रेयोवृषयोर्मुनिरुद्रयोः ।

भर्म भारे भृतौ स्वर्णे भोगी तालनृपाहिषु ।। ३३२ ।।

भूरिस्तु पुष्कले हेम्नि भरुर्भर्मणि भर्तरि ।

भीष्मो गंगासुते रुद्रे भीषणे सर्परक्षसोः ।। ३३३ ।।

भूभृद्वरे गिरौ शेषे भूतिर्लक्ष्म्यां च भस्मनि ।

भीमो रौद्रे हरे भूपे भावाटः कामुके मुनौ ।। ३३४ ।।

भूतीकं तु यवान्यां स्वाद्भूतृणे कटुलौषधे ।

भ्रामकः फेरवे दुष्टे दृषद्भेदे रवेर्भ्रमे ।। ३३५ ।।

भरतस्तु मुनौ भूपे भुवनं जललोकयोः ।

भास्करः सूर्यवह्न्योः स्याद् भ्रमरः कामुकेऽप्यलौ ।। ३३६ ।।

भारतं तु पुराणे स्याद् द्वीपभेदेऽपि संमतम् ।

भागधेयं करे भाग्ये भोगवत्यपि सर्पपूः ।। ३३७ ।।

भट्टारको मुनौ देवे भारद्वाजः खगान्तरे ।

भौमस्तु मङ्गले दैत्ये मुष्कः सङ्घेऽण्डचौरयोः ।। ३३८ ।।

मोघाथ पटलावृक्षे मोघं निष्फलदीनयोः ।

मृगो नक्षत्रभेदे स्यात्कुरङ्गेऽथ मृगी स्त्रियाम् ।। ३३९ ।।

(अथ) यकारादयो यथा ।

युगं रथाङ्गे युग्मे च कृतादौ विवसान्तरे ।

योगोऽलब्धस्य लाभे स्यात्कार्मणे संगतावपि ।। ३४० ।।

यज्ञो नारायणे यागे वह्नौ मेषात्मनोरथ ।

यमो ध्वाङ्क्षे कृतान्ते च यानं युग्ये गतावपि ।। ३४१ ।।

यन्ता हस्तिपके सूते यतिर्भिक्षुविरामयोः ।

(अथ) रकारादयो यथा ।

राका दृष्टरजःकन्यापूर्णमासीभिदोरपि ।। ३४२ ।।

रङ्को मल्ले दरिद्रे च रागः संगीतरागयोः ।

रोकं जले बिले रोको रश्मौ रोचिः स्पृहारुचोः ।। ३४३ ।।

राधा गोप्यां भभेदे च राधो मासान्तरे मतः ।

रमः कान्ते स्मरे रक्ताशोके रीढा विमानने ।। ३४४ ।।

रुमा लवणखानौ स्यात्सुग्रीवस्य प्रियापि सा ।

रामो हलायुधे जामदग्ये दाशरथावपि ।। ३४५ ।।

रसस्तु पारदे वीर्ये घृते शृङ्गारिके तथा ।

रथ्या प्रतोल्यां मार्गे च राशिर्मेषादिपूरयोः ।। ३४६ ।।

(अथ) लकारादायो यथा ।

लेखोऽमरे लिपौ लक्ष्मीः शोभासंपत्प्रियङ्गुषु ।

लक्ष्यं वेध्ये च संरव्यायां लिङ्गं रुद्राङ्गचिह्नयोः।। ३४७।।

वर्णः कीर्तौ द्युतौ गीतक्रमे शुक्लद्विजादिके ।

बाणो दैत्ये शरे वृक्षे वाणिर्मेघः सरस्वती ।। ३४८ ।।

वीर्यं बले प्रभावे च वेला काले जलोन्नतौ ।

वरो जामातरि श्रेष्टे विधुः श्रीपतिचन्द्रयोः ।। ३४९ ।।

वज्रं हीरे पवौ वेरं शरीरे चन्दने जले ।

वामी तु रासभी प्रोक्ता शृगाली करभी तथा ।। ३५० ।।

वामो महेश्वरे कामे प्रतिकूले पयोधरे ।

वाहस्तुरंगमे मेघे व्यूहः सङ्घवितर्कयोः ।। ३५१।।

वर्तिर्दीपदशायां स्याद्विधिः कर्तव्यवेधसोः ।

वधूः पत्न्यां स्नुषायां च विदा ज्ञानधियोरपि ।।३५२ ।।

(अथ) शकारादयो यथा ।

शुको व्यासात्मजे कीरे शौकं स्याच्छुकसंचये ।

शको भूपेऽन्त्यजे देशे शङ्कुः कीलकरुद्रयोः ।। ३५३ ।।

शङ्खोऽसुरे निधौ कम्बौ शुचिर्ग्रीष्मेऽनले सिते ।

शृङ्गारे मासभेदे च शोणी रक्ते हये नदे ।। ३५४ ।।

शिवं भद्रे सुखे नीरे शिवो जम्बुकरुद्रयोः ।

े

गुग्गुले कीलके योगे शिवा कात्यायिनी स्मृता ।। ३५५ ।।

हरीतक्यामलक्योश्च शेषोऽनन्ते बले क्षये ।

श्यामाथ सोमवल्ली स्यादप्रसूताङ्गना तथा ।। ३५६ ।।

शरुः कोपे शरे वज्रे शद्रिः कृष्णे तडित्वति ।

शम्भुर्ब्रह्मणि रुद्रे च शुभो योगे शुभं सुखे ।। ३५७ ।।

शृङ्गी गिरौ पशौ शूरे शोषो यक्ष्मणि शोषणे ।

शाखा बाहौ द्रुमाङ्गे च वेदाङ्गे तालभिद्यपि ।। ३५८ ।।

शिखा ज्वाला शिफा केकिचूडा लाङ्गलिकापि च ।

शम्बस्तु मुशलाग्रस्थलोहे धूमलवज्रयोः ।। ३५९ ।।

शक्तिः श्रियामुमायां च बले शास्त्रेऽपि कथ्यते ।

अथ षकारादयो यथा

षण्डस्तु कानने भेदे षष्टी गौर्यां तिथावपि ।। ३६० ।।

स्तोमो मखे चये स्तोकः चातकस्वल्पयोरपि ।

स्थाणुः कीले हरे सूनमङ्कुरे कुसुमे मतम् ।। ३६१ ।।

सूनुर्द्रुमेऽनुजे पुत्रे सौम्यो धिष्ण्ये बुधेऽपि च ।

सूतस्तु पारदे तक्ष्णि मागधे सारथावपि ।। ३६२ ।।

सीता तु जानकी देवसिन्धुर्लाङ्गलपद्धतिः ।

सालिर्भुजंगमे कीले मूर्खे रोगे युगान्तरे ।। ३६३ ।।

सर्गो वर्गे स्वभावे च निर्माणोत्साहयोरपि ।

सत्त्वं गुणान्तरे जीवे क्रियाकारस्वभावयोः ।। ३६४ ।।

स्थूलः पीने जडे सालो दुर्गे वृक्षान्तरे स्मृतः ।

सिन्धर्दन्तिमदे नद्यां नदसागरयोरपि ।। ३६५ ।।

सह्यो राज्ञि गिरौ सह्यं सोढव्ये रोगवर्जिते ।

साधुर्मुनौ तथार्ये च सोमः कर्पूरचन्द्रयोः ।। ३६६ ।।

दिव्यौषध्यां कपौ विष्णौ शक्रसूर्यशिवेषु च ।

सिद्धिर्मोक्षे च योगस्य निष्पत्तावपि कथ्यते ।। ३६७ ।।

सुधा गङ्गेष्टिका पृथ्वी भोजने तु दिवौकसाम् ।

सिंहो हर्यक्षराश्योश्च श्रेष्टार्थे चोत्तरस्थितः ।। ३६८ ।।

सव्यं तु दक्षिणे वामे सूदः स्यात्सूपकारके ।

स्वामी गुहेऽधिपे स्वस्ति पुण्यकल्याणयोर्मतः ।। ३६९ ।।

सारङ्गः कुञ्जरे शौले हरिणे चातके खगे ।

चञ्चरीके गजे भेके संभोगो रतभोगयोः ।। ३७० ।।

संगरोऽङ्गीकृतौ युद्धे विनाशे गरलेऽपि च ।

संबाधः संकटे योनौ सावित्रः पार्वतीपतौ ।। ३७१ ।।

हरिः कृष्णेऽनिले भेके यमे सिंहे खगेश्वरे ।

इन्द्रे चन्द्रे कपौ कीरे किरणे वरुणेऽरुणे ।। ३७२ ।।

लोकान्तरे द्विपे वह्नौ हारो मुक्तागणे स्मृतः ।

संग्रामेऽथ मतो हीरो रुद्रे वज्रेऽपि कथ्यते ।। ३७३ ।।

ही लक्ष्म्यामथो रुद्रे वासरेऽसौ हरो मतः ।

होमिर्वह्नौ घृते क्षीरे होरा राश्यर्धलग्नयोः ।। ३७४ ।।

हंसो धर्मे रवौ राज्ञि विष्णुजीवसितेषु च ।

खगान्तरेऽथ हस्तस्तु भुजे माने कचोच्चये ।। ३७५ ।।

हिंसा प्राणापहारे स्यान्नाशे चौर्यादिके तथा ।

हेतिरुस्त्रास्त्रयोः प्रोक्तो हेलिः सूर्येऽप्यथो हनुः ।। ३७६ ।।

कपोलावयवे हारी शुके हारान्वितेऽपि च ।

हरित्तृणान्तरे वर्णभेदे दिश्यपि कथ्यते ।। ३७७ ।।

(अथ) क्षकारादयो यथा ।

क्षत्ता द्वाःस्थे नियुक्ते च दासजे सारथावपि ।

क्षीवो मत्ते नृशंसे च क्षणः कालान्तरे मतः ।। ३७८ ।।

उत्सवेऽथ मतः क्ष्वेडो वक्रे च गरले तथा ।

क्ष्वेडा सिंहध्वनौ देसे काले क्ष्वेडं दुरासदे ।। ३७९ ।।

रोहितायाः फले पुष्पे क्षमा क्षानतिर्धरित्र्यपि ।

क्षमः क्षमायुते शक्ते क्षेमो लब्धस्य रक्षणे ।। ३८० ।।

मोक्षे च मङ्गले क्षारो रसे काचे गुडादिके ।

क्षुद्रा वेश्या नटी व्यङ्गी क्षरो मेघे क्षरं जले।। ३८१ ।।

क्षुद्रस्तु निर्धने क्रूरे निकृष्टे स्वल्पतुच्छयोः ।

क्षेत्रं पत्न्यां भगे देहे केदारे भरतादिके ।। ३८२ ।।

दुग्धेऽमृते जले क्षीरं क्षितिर्भूम्यां गृहेऽपि च ।

कुशाग्रबुद्धयो धीरा भवन्तः प्रणमाम्यहम् ।

वाणीयमरिथहीनापि कृपयैव विलोक्यताम् ।। ३८३ ।।

शुभमस्तु

।। (इत्यनेकार्थसंग्रहः समाप्तः) ।।

लिङ्गानुशासनम् ।

ओं स्वस्ति क्षीगोस्वामिने नमः ।

नामानुशासनमिदं सम्यग् लिङ्गानुशासनाधीनम् ।

तस्मात्तद्बोधार्थं कुर्वे किंचित्प्रयत्नमहम् ।। १ ।।

उत्सर्गेण विधिं वक्ष्येऽपवादेनापि कुत्रचित् ।

आद्यः सामान्यसंज्ञोऽत्यो विशेषः स्तोकगोचरः ।। २ ।।

उत्सर्गेण यथा विष्णोः पुंलिङ्गे नामसंचयः ।

परब्रह्मादिकं चास्यापवादेनात्यथापि च ।। ३ ।।

एवं रुद्राब्जभूकामनामानि स्युर्नरे परम् ।

विशेषो वर्तते तद्वद्यथायोगं निरीक्ष्यताम् ।। ४ ।।

वक्ष्यमाणविधिः प्राय उत्सर्गेणौव कथ्यते ।

विशेषो वक्ष्यते त्वग्रे पुंनपुंसकसंग्रहे ।। ५ ।।

(अथ पुंलिङ्गसंग्रहः ।)

हस्तदन्तनरवौष्टान्धुगुच्छगुल्फपतङ्ग्रहाः ।

स्तननाककपोलारिरसवोलरथाः समाः ।। ६ ।।

हैमाशनी कुठारोऽपि दिनसर्तुविशाकवः ।

निर्यासकण्ठकोष्टाब्दा एते नरि सनामकाः ।। ७ ।।

वर्षश्वेतप्लवाः शोणः पङ्कमन्थजलाशयाः ।

मुरजात्मासिमासाद्रिबाणध्वानाध्वराग्नयः ।। ८ ।।

निधिरश्मिकफा वायुद्रुममानार्थवाचकाः ।

देहभृद्विषयाद्याः स्युः सभेदा नरलिङ्गगा ।।९ ।।

बर्हध्वनिः पर्णपिच्छभिन्नार्थे नरलिङ्गगः ।

वप्रेऽहिः पुंसि तद्भिन्नवाच्ये भेदोऽपि वक्ष्यते ।। १० ।।

हायनो व्रीहिगः पुंसि वह्नौ बर्हिस्तथा नरे ।

मस्तुर्धानाविकारे त्वच्छो नरे स्फटिकार्थगः ।। ११ ।।

इने मित्रो नरे नीलो मणौ भेकेश्वरे पुमान् ।

अस्त्रः कोणे पुमान् कोशश्चषकार्थे नरो मतः ।। १२ ।।

दारासुबल्वजा भूम्नि तलस्तालचपेटयोः ।

सूर्यचन्द्रायसामग्रे कान्तशब्दः पुमान् स्मृतः ।।१३ ।।

यानार्थवाचकादग्रे युगशब्दो नृलिङ्गगः ।

पुमान् स्यादसमाहारे द्वन्द्वोऽश्ववडवाविति ।। १४ ।।

वाकोत्तरपदाः शब्दाः सूक्तवाकादयो नरे ।

नक्तको रल्लकाङ्कौ च तरङ्गो रङ्ग इत्यपि ।। १५ ।।

पराग उत्तरासङ्गल्युङ्खपूगसृगा नरे ।

मस्तुलुङ्गकुडङ्गौ च मङ्गकालिङ्गमञ्चकाः ।। १६ ।।

तमङ्गापाङ्गवर्गौघखगार्घाः पुच्छगच्छकौ ।

मुञ्जपुञ्जावटाः पट्टकोष्टौ पिच्छौजवाजकाः ।। १७ ।।

कलिञ्जगण्डौ लगुडः पिचण्डो वरण्डकूष्माण्डकरण्डरुण्डाः ।

नाडीव्रणाङ्गुष्टहठा गुणश्च घटो नरे भ्रूणशिखण्डचण्डाः ।। १८ ।।

अलक्तकुन्तौ पृषताः कपर्दो गदाददौ बुद्बूदपोतगन्धाः ।

अगाधपिष्टातसुदर्सनाश्च शम्बतिष्याः सिचयोल्लपुण्ड्राः ।। १९ ।।

अर्धःखण्डे पुमान् स्कन्धोत्पातव्रातार्थदेवनाः ।

मकरन्दकलापारकटप्रामित्रपुद्गला ः ।। २० ।।

वर्षारात्रादयः पुंस्यपवादोऽपि च वक्ष्यते ।

पूर्वाह्लाद्यास्तु पुंलिङ्गेऽपराह्लः पुंनपुंसके ।। २१ ।।

जनाभिजनफेनाश्च वृत्रमन्त्रौ च देवलः ।

खल्लतल्लौ तु कल्लोलपूपापूपकहिङ्गुलाः ।। २२ ।।

पुष्यो जनपदो रेफशोफौ सूपनितम्बकौ ।

स्तम्बो निकाय्यः कण्डोलजगलौ गोलतम्डुलौ ।। २३ ।।

कालः पोटगलावेलबालाः फालगालौ तथा ।

वातूलबहुलौ पत्रपालौ भूमलकामलौ ।। २४ ।।

निचोलतालकुद्दालयावस्वस्त्रुवरौरवा ः ।

दावध्रुवकहावांशपणवादीनवस्पशाः ।। २५ ।।

शिवावयवकोटीशवंशोड्डीशवृषाः कुशः ।

पुरेडाशवरासी च निर्यूहर्षी घृणिध्वनी ।। २६ ।।

कुल्माषमाधवौ प७राशिदुन्दुभिरालयः ।

निष्कुहः कलहो ज्ञातिपाणिवृष्ण्यविकुक्ष्यः ।। २७ ।।

वहयग्निदीदिविग्रन्थिकृमयो वमतिस्तथा ।

गिरिजायू दृतिः शिश्रुरर्दनिः कलिरञ्जलिः ।। २८ ।।

हाहाहूहूर्नग्नहूर्गर्मुदंही पादश्मानौ —— यक्ष्मतुल्याः ।

पञ्चाहाद्या ये समाहारगम्याः पुंलिङ्गे स्यात्स्थेमशब्दे ऽपि नन्तः ।। २९ ।।

कान्ताष्टान्ता णान्पान्ता भमान्ता घान्ता रान्ता यान्तवान्ताश्च सान्ताः ।

स्त्वन्ता भूम्ना पुंसि शब्दाः सुधीभिः प्रोक्तास्तेषां वक्ष्यते चापवादः ।। ३० ।।

इति पुंलिङ्गं समाप्तम् ।

(अथ स्त्रीलिङ्गसंग्रहः ।)

स्त्रीलिङ्गे योनिमन्नाम वल्लीसेनातडिद्दिशाम् ।

वम्नीतन्द्रानिशां ग्रीवादयाह्वाधियामपि ।। ३१ ।।

शस्त्री वीणावटुर्वीचिचीरीहिङ्गुतिथीनसः ।

ज्योत्स्नापत्री सुरा कङ्गुवीणाकलशिनिम्नगाः ।। ३२ ।।

आकृत्या शिंशिपाद्याश्च लाला रास्नाङ्गुली वचा ।

शिम्बाकृष्णोष्णिकास्पृक्काशिलापण्यातसीभुवः ।। ३३ ।।

रोचनासरघालक्ष्मीधाय्यादूर्वागिरः स्त्रियाम् ।

हरिद्राकृष्णलामांसिबलाकालूमुखा अपि ।। ३४ ।।

प्राण्यङ्गवाचकं नामेदन्तं प्रायः स्त्रियां मतम् ।

पालिगोध्यादिकं तद्धि विशिष्यैव विभाव्यताम् ।। ३५ ।।

पात्रादिवार्जितादन्तः समाहारद्विगुः स्त्रियाम् ।

ईदूदेकस्वरं प्रायः कृतस्तच्च तथा मतम् ।। ३६ ।।

अन्नाबन्तोत्तरादन्यो द्विगुः सर्वो नपुंसकः ।

लिदन्ता ग्रामतागोत्रारथकट्यादयः स्त्रियाम् ।। ३७ ।।

मिन्यनिण्यणयस्त्रयुक्ता विंशत्याद्याः स्त्रियां पुनः ।

नरादन्यत्र विट्शब्दो लतागीतिभिदि ध्रुवा ।। ३८ ।।

शाखापुरे स्त्रियां गृहह्य दुन्दुभिरक्षबिन्धुषु ।

गञ्जा सुराग्रहे रज्जौ रश्मिः कीला रताहतौ ।। ३९ ।।

शल्यवाद्यभिदोः क्ष्वेडा वारिः स्त्री गजबन्धभूः ।

अश्मन्ते त्वन्तिकारण्यानी यवानी हिमान्यपि ।। ४० ।।

भूम्नि वर्षा मघा आपः कृत्तिकाद्याः स्त्रियां स्मृताः ।

विकल्पेन जलौकोऽप्सरःसमा सुमनोमुखाः ।। ४१ ।।

अहोपुरुषिका स्त्री स्यादहंपूर्विकया सह ।

गायत्र्याद्यास्तथा सर्जिकादूषीकेष्टकाकलाः ।। ४२ ।।

संवर्तिका कञ्चुलिका विपादिका शूका पताका झिरुका त्रिकारुला (रुका ?) ।

केका च यूका चविका गवेधुका पर्यस्तिका पूपलिकापि दीर्घिका ।। ४३ ।।

पञ्चिका पिण्डिका नीका क्षिपका ध्रुवकाष्टका ।

अल्लका मिहिकोल्का च मक्षिकाकमिकोर्मिकाः ।। ४४ ।। पं.सं ३४८४

पादुका शिबिका धुका कालिका प्राचिकोष्टिका ।

मिहिका कोशिका टीका कूर्चिका कूपि वा (का?) (न्धिका?) ।।४५।।

जलौका केणिका वालुकेषीका च विहङ्गिका ।

इषिका तु शलाका च परिखा विशिखा शिखा ।।४६।।

शाखोखा भिस्सटा जङ्घा भङ्गा चञ्चा खजा प्रजा ।

पिच्छा कच्छा सुरङ्गा च गुञ्जा पिञ्जा क्रटा (जटा?) गुडा ।। ४७ ।।

पोटा घोण्टा जडा बेडा काष्टा विष्टा वितण्डया ।

मञ्जिष्टा तु छटा घण्टा शुण्डा पाठावलीढया ।। ४८ ।।

रीढा राढा तथा दाढा त्रिवृता तृणता सिता ।

वर्वणोर्णा घृणा स्थूणा दक्षिणा लिखिता चिता ।। ४९ ।।

सीता गीता त्रेता लूतानन्तामृता मता ।

प्रसृता मार्जिता मुक्ता वार्ता कन्था प्रथा ।। ५० ।।

मर्यादा च गदा गोधेक्षुगन्धापि स्वधा सुधा ।

सास्नाथ वस्नसा सूना धाना झम्पा शिफा प्रपा ।। ५१ ।।

रम्पा पम्पा सभा हम्भा भम्भा कम्बा रुमापि च ।

सीमा पामा तथा चिल्या पद्याछाये ज्यया सह ।। ५२ ।।

चिल्या योग्या माया (पेया?) पर्या कक्ष्या संध्या रथ्या ।

शम्या नश्या दूष्या कुल्या होरा योग्या ज्या मङ्गल्या ।। ५३ ।।

उपकार्या कण्डरेरासृग्धरा वागुरा शिरा ।

जलाद्रा शर्करा गुन्द्रा मुद्रा क्षुद्रा परंपरा ।। ५४ ।।

प्रतिसीरा दशा भद्रा भस्त्रा छत्रा कशा कुशा ।

यात्रा मात्रा बला माला दंष्ट्रा लीला च शङ्कुला ।। ५५ ।।

उपला मेखला शाला खट्वा दिशा शिवा ।

रसाला सिध्मला शेषा स्नसा मूषा सुवर्चला ।। ५६ ।।

गोला दोला वेला मेला हेला फेला नासा बाहा ।

स्वाहा कक्षा रिक्षामिक्षा राक्षा भिस्सा मूर्वा त्रोटिः ।। ५७ ।।

विस्रसेशावली भङ्ग्यायतिः शाला (शिला?) च सर्वला ।

साचिः सूची रुचिः खानिः खनिः खरी क्लमिः कृषिः ।। ५८ ।।

भल्लिः पल्लिर्वसतिविपणी पेशिनाभ्यालिनाली स्थालीशुक्ती भ्रकुटिशकटीचच्चरीपालयश्च ।

वासिः खाटिर्व्रततिवलभी नीविराज्याजयोऽपि भाटिः शाटि र्लिविवमिशढीश्रेणिरीतीतयश्च ।। ५९ ।।

खलिः कीलिशुण्ठ्यौ छविः काकलिश्च किकिः काकिः कुक्कुर्वापिधूल्यौ तुटिस्तु ।

तटिः कोटिकम्बी किखिस्ताडिजाती वटिः पिणिडवीथ्यो ।। ६० ।।

तूलिर्विष्टिवुष्टि शरारि भैरिः पुञ्जरिर्वल्लरिश्च ।

आतिः शारिः फालिगालि मुषुण्टि र्मांढिश्चारिः काकनिः कानिहानि ।। ६१ ।।

प्रधिः कम्पिराटिर्दरिः सानिशाणि तरिश्चुण्टी जनिर्मारिमेनी ।

तुरी राटिगन्त्र्यौ सनिः पारिकीर्तो शिरोधिर्मरिर्झल्लरिः स्वेदनिल्यौ ।। ६२ ।।

अंहतिः परिपाटिश्चाटविराश्र्यौषधी कविः ।

कबरी ह्ननदिनी वालि पातली केवलि छटी ।। ६३।

कूपाणी विद्रधिश्चाभ्रिः कर्तनी कदली खटी ।

अश्मरी गूध्रसी काण्डी पलाली घर्घरी वूसी ।। ६४ ।।

प्रतोलि तिलपर्णी चाढक्यपट्यौ कुमार्यपि ।

सिञ्जनी दामनीन्द्राणी द्रु णी गोणी जुहूस्तनुः ।। ६५ ।।

खल्ली मदी च खण्डाल्यजाजी नध्न्येषणी पुनः ।

मत्सयण्डी शष्कुली गोष्टी देहलीस्नायुचञ्चवः ।। ६६ ।।

अ(५) क्षवत्येकपद्यौ च करीरी रसवत्यध ।

द्योदिवौ द्वार्धुरौ मौर्वी कस्तुरी श्रुग्ङ्यपि हषदु ।। ६७ ।।

गन्धोली हसनी रज्जुकू चाति भ्यासन्दी हशा सह ।

श्रीरेयी नन्तपामादि दरच्छर्दी शराच्वचौ ।। ६८ ।।

दद्र्नपर्शू ऋचा? नौश्च वार्हशौ गीः पूरा सह ।

सपर्यायाः सभेदाञ्चेत्यादयः स्युः स्त्रियां घनाः? ।। ६९ ।।

इति स्त्रीलिङ्गं समात्पम् ।

(अथ नपुंसकलिङ्गसंग्रहः)

भूम्ना नान्तं तथा लान्तं त्वान्तं तान्तं नपुंसके ।

स्त्वन्तं नामाथ संयुक्तररुयान्तं तथैव हि ।। ७० ।।

वेधआदीन् विहायाथ शब्दान्कतिपयान्ब्रुवे ।। ७१ ।।

रत्नाङ्गणनभोगुथशुक्तान्नतमसामपि ।

ह्यषोकशुभपिच्छादिधनदारुमनोह्यदाम् ।। ७२ ।।

दलतालुबिलाम्भोरुह् मरिचव्यञ्जनाम्भसाम् ।

घुसृणागुरुसौवीरक्लोमसिध्मयकृद्युधाम् ।। ७३ ।।

शिलाभवस्थानाकभेषजास्थ रुचत्वचद्वारहलासुजां च ।

फलप्रसूनद्रवतां सुखादि धनुर्हशां हिङ्गुकुसुम्भकादेः ।। ७४ ।।

वल्कलान्तिकदुःखानां वाससो लवणस्य च ।

रत्नादीनां सभेदानां नामानि स्युर्नपुंसके ।। ७५ ।।

आतपत्रे पुण्डरीकं कं शीर्षेऽथ द्रवे मधु ।

सद्माङ्गयोः पुरं क्लीबे घटार्थे खपुरं पुनः ।। ७६ ।।

दैवे दिष्टमकार्यादौ कट्वयूपे युगं स्मुतम् ।

असमासे मतं द्वन्द्व नन्तं धन्व स्थलेऽपि च ।। ७७ ।।

अर्धं क्लीबे समांशर्थे धंर्म दानादिके पुनः ।

सारं न्याय्ये खलं भुम्यां कामं चानुमतावपि ।। ७८ ।।

इभबिन्दौ पद्ममुक्तं वेध्यर्थे लक्षमेव हि ।

पुण्याहं सुदिनांह च पथः संख्याव्ययोत्तरः ।। ७९ ।।

भूमोऽसंख्यात एकार्थे द्वन्द्वैकत्कवेऽपि षण्टता ।

अव्ययीभाव आख्यातः समासः क्लीबलिङ्गः ।। ८०।।

कियाविशेषणं सर्वं क्लिबेऽव्ययविशेषणम् ।

क्तानाः कूत्याः खल्त्रिनौ च भावार्थे प्रत्यया इमे ।। ८१।।

गायत्र्यादीनि नामानि वुत्तानामण्युतान्यथ ।

अव्यक्तवाचकाः क्विबे यथा किंयत्तदादयः ।। ८२।।

तत्पुरुषे बहूनां चेच्छाया शालां विना सभा ।

वर्जयित्वैव राजादिसभामिनसभं तथा ।। ८३ ।।

वास्तुकं मौक्तकं जाल (६) कं जापकं

कारकं गौरिकं तोटकं खेटकम् ।

वेणुकं रूपकं सौप्तिकं माक्षिकं क्लीतकं नाटकं नाणकं चाह्निकम् ।। ८४ ।।

मार्द्वीकधान्याकशलाकतोका लीकोल्मुकान्यल्कबुकालिकानि ।

एडूकशल्के कुहकं त्रिकं च हल्लीसकं पुश्पककौतुके च ।। ८५ ।।

रूचकं किबुकशालूके चिबुकं कवकं तथा ।

शीर्षकं मधुपर्कं च प्रकीर्णककदम्बके ।। ८६ ।।

अनूकं कुतुकं तिन्तिडीकं कुलकचित्रके ।

छत्राकं खं स्फिगं लिङ्गं प्रगमङ्गं नपुंसके ।। ८७ ।।

बीजं पिञ्जं चोचफाण्टे ललाटं व्यष्टं रिष्टं चीनपिष्टं कृपीटम् ।

इष्टं गोष्टं पृष्टपिङ्गाणके च त्राणं तीक्ष्णं कार्मणं कारणं च ।। ८८ ।।

करोटं मोरटं भाण्डं तुण्डाण्डे शरणेरणे ।

लवणं द्रविणशृङ्गाटपिटपारायणानि च ।। ८९ ।।

पुराणं हिरणं क्षूणं धोरणोष्णोर्णमित्यपि ।

श्रीपर्णघ्राणपर्यणप्रादेशान्तान्यृणं शणम् ।। ९० ।।

वृन्तं शीताश्मन्तभूतानि वार्त्तं तूस्तं तुन्दं गोदमुक्थं कुशीदम् ।

वृन्दाच्छोदे शिल्पतल्पास्फदानि वाहित्थं स्यात्कूर्परूपे पदं च ।। ९१ ।।

निशान्तं कुसिदं निम्नमन्तरीपं त्रिविष्टपम् ।

परीपपुष्पशुल्बानि कुटुम्बनिकुरम्बके ।। ९२ ।।

प्रसभं तलभं शुष्मं धामाध्यात्मेर्मपुष्पकरम् ।

किलिभं तोक्मशूक्ष्मे च तिग्मयुग्माजिराणि च ।। ९३ ।।

शयनीयं त्रिसन्ध्यं च सायखेयेन्द्रियाण्यपि ।

भयं किशलयं सत्रकलत्रद्वापराणि च ।। ९४ ।।

द्रुवयं द्वापरक्षेत्रे शृङ्गबेराभ्रनागरम् ।

अगारमुत्तरं तीरं कलेवरकुकुन्दरे ।। ९५ ।।

प्रान्तरं शृङ्गबेरं च मण्डूराररचामरम् ।

कटीरक्रूरदूराणि स्फारवैरे च चत्वरम् ।। ९६ ।।

उशीरमक्षरं चैव सिन्दूरशिबिरोदरम् ।

यवसं तरसं मत्सं विसमर्पिशाकिल्बिषे ।। ९७ ।।

किण्वं दिवं सान्त्वमुलूखलं च पातालसत्त्वे वृशाविश्वशीर्षम् ।

मन्दाक्षपीयूषमहानसानि कासीसंसयज्जगदर्पिषाणि ।। ९८ ।।

आर्तवं पौतवं साध्वसं साहसकशेरुणि ।

शयातुवीक्षपर्वाणि ककुन्महदहानि च ।। ९९ ।।

शालाल्वालुभसद्रोमललामानि पृषत्तथा ।

पुरीतत्सक्थिनि यातु स्वादुतुम्बरुणी अ पि ।। १०० ।।

ऋचीषं च मिषं क्लीबमृजीषं त्वाशुना सह ।

इत्थमन्यानि नामानि ज्ञातव्यानि बुधैः स्वयमू ।। १०१ ।।

इति नपुंसकलिङ्गं समाप्तम् ।

(अथ पुंस्त्रीलिङ्ग उदीरितः १)

शङ्कुश्चतुर्दशाङ्कार्थे पुंस्त्रीलिङ्ग उदीरितः ।

दुर्गतिर्निरये कक्षो दोर्मूलेऽथ कुटो गृहे ।। १०२ ।।

नेमौ प्रधिस्तथा नाभिः प्राण्यङ्गेऽथ क्वचिद्बलिः ।

श्रोण्योषध्योः कटो मोहे भ्रमः पुंसि स्त्रियामपि ।। १०३ ।।

आकरार्थे तथा गञ्जो भूरुहे बाणपिप्पलौ ।

वृन्दे गोले च पिण्डोऽपि वराटो रज्जुशस्त्रयोः ।। १०४ ।।

नक्षत्रार्थेऽश्लेषहस्तश्रवणाः स्युस्तथैव च ।

कणो लेशे स्फुलिङ्गेऽपि कुम्भः स्यात्कलशे तथा ।। १०५ ।।

कनीनिकाभयोस्तारो मेरुजम्ब्वां सुदर्शना ।

तरणिस्तु समुद्रार्कयष्ट्यशुषु तथैव च ।। १०६ ।।

लाजा वस्त्रदशार्थे च भूम्नि पुंसि स्त्रियामपि ।

राजदेये भागधेय ईहाद्याः प्रत्ययान्तरात् ।। १०७ ।।

करेणुर्हस्तिहस्तिन्योर्भृङ्गाख्यालिमुखास्तथा ।

आपत्ये तद्धितोऽप्येवमुत्सर्गेण निरीक्ष्यताम् ।। १०८ ।।

पिपीलिकः शल्यकशुण्डिका च तुरुष्कशुङ्गौ घुटिकः सृपाटः ।

चोटः किलाटो वरटः स्फटश्च कीटः सटः शाटफटौ घटोऽपि ।। १०९ ।।

हुडुक्कः चुलुकश्चर्मप्रसेवकफणावपि ।

मल्लकः सल्लको लञ्चभुजतिन्दुककूपका ः ।। ११० ।।

किटश्चपेटो गुडशुण्डशाणा गर्ताजमोदौ रथवारिपर्णौ ।

कुठारहारौ शफरो मसूरो वर्ध्रो विधो मुद्गरनालिकेरौ ।। १११ ।।

कृसरो बहुकरो जित्यरालकीलवितस्तयः ।

पटोलः कम्बलः शारो रभसो वेतसोऽपि च ।। ११२ ।।

वर्तिः कुटिस्त्रुटिर्भल्लदंशगण्डूषलालसाः ।

रत्न्यरत्नी अणिः श्रेणिरूर्मिशम्यौ मषी मसी ।। ११३ ।।

लव्यवीची शलिर्यष्टिमुष्टी शाल्मलिपाटली ।

जाटलिर्मेथिमेधी च श्रोण्यरण्यौ सृणिर्मणिः ।। ११४ ।।

केलिर्मौलिर्मरीचिश्च पृश्निस्तिथ्यशनी हलिः ।

गव्यूतिः स्वातिबस्तीषुधयोऽहिः पार्ष्णिरप्यथ ।। ११५ ।।

आणिर्योनिर्मुनिः सिन्धुर्हनुर्मृत्युर्मनुः पुनः ।

ऋष्टिः कर्कन्धुराखुस्त्ववटुः कन्दुरूरुस्तथा ।। ११६ ।।

एर्वारुः काकुकिष्कू च गवेधुर्बाहुना सह ।

राभागौरेवमाद्याः स्युः शब्दाः पुंसि स्त्रिया मपि ।। ११७ ।।

इति पुंस्त्रीलिङ्गसंग्रहः समाप्तः ।

(अथ पुंनपुंसकलिङ्गसंग्रहः ।)

पुंनपुंसकलिङ्गानां क्रियते संग्रहो मया ।

दृष्टानां विश्वहेमादिनामकोषेषु सांप्रतम् ।। ११८ ।।

नरादन्यत्र वाच्येऽर्थे कंसः स्यात्पुंनपुंसकः ।

अब्जः शङ्खे तथा पद्मः संख्यायां कमलेऽपि च ।। ११९ ।।

ह्नीबेरकेशयोर्बालस्तरोरन्यत्र विष्टरः ।

द्वापरः संशये बर्हिः कुशः छेदे तु पिप्पलः ।। १२० ।।

तुषानले कुकूलोऽथ वर्षेऽब्दः पुंनपुंसकः ।

दरस्त्रासे परीवादे जन्यो राहौ तमस्तथा ।। १२१ ।।

तपो माघे तथा घर्म उष्णे वत्सो ह्यदि स्मृतः ।

तुल्यतागोलभक्ष्येषु वर्णः श्वेतस्वरादिके ।। १२३ ।।

सैन्धवो लवणे शुक्रो वह्नौ मासे च संमतः ।

स्वर्णे चन्द्रश्च कर्पूरे पाताले वाडवोऽपि च ।। १२४ ।।

छदे दलः स्वभावेऽथ धर्मो वध्नस्तु सीसके ।

रुचको मातुलिङ्गे स्याद्भूषाभेदेऽपि विश्रुतः ।। १२५ ।।

दायस्वौ स्वापतेयार्थे व्रते कृच्छ्रोऽपि दृश्यते ।

पिटकायां पिटो मांसे जङ्गलः पुंनपुंसकः ।। १२६ ।।

जीवे सत्त्वो मधुर्मद्ये फलेऽप्यामलकस्तथा ।

एकाद्रात्रः समाहारे तनौ पिण्डोऽपि कथ्यते ।। १२७ ।।

मध्यशौवलयोर्नाम सूतकः कूलकोऽपि च ।

कोरकः करकः पङ्कः पातकस्तिलकान्दुकौ ।। १२८ ।।

व्यलीककिञ्जल्कवलीकतङ्का वितङ्कवल्मीकतटाकनिष्काः।

तडाकवर्चस्कविशेषकाश्च विटङ्कवल्कौ पुलकालकौ च ।। १२९ ।।

चषकफलककल्का मूलको मञ्चकोऽपि मरकमणकटङ्का शाटकः पुस्तकश्च ।

चरकसरकशूकानीकशुल्काश्च मुष्कः कटकफरकनाका मस्तको मस्तकश्च ।। १३० ।।

मोदको मूषिकश्चैव रोचकातङ्ककञ्चुकाः ।

चण्डातकभ्रमरकौ वैनीतककरण्डकौ ।। १३१ ।।

मेचकः कण्टकश्चैव बालको वर्णकः पुनः ।

पिनाकमालकौ शाकस्तम्बकौ यावकोऽपि च ।। १३२ ।।

पिण्याकझर्झरकहंसकतण्डकानि मस्तिष्कशङ्कमुखपुङ्कनखाधिकाङ्गाः ।

उद्योगटङ्गयुग (संयुग?) पद्मरागाः शृङ्गं भगः क्रकचकूर्चनिदाघकुञ्जाः ।। १३३ ।।

अर्धर्चः कवचः कच्छपुच्छोञ्छास्तु व्रजोटजौ ।

कुञ्जो मलयजो भूर्जध्वजाम्बुजसमास्तथा ।। १३४ ।।

नटः किरीटः कुटकर्पटौ च कूटारकूटौ विटकोट्टकुष्टाः ।

खेटाट्टपिष्टानि कटश्च लोष्टः प्रोक्तौ तथा त्र्यङ्गटकालकूटौ ।। १३५ ।।

जकुटः कुर्कुटश्चैव कवटः कमठोऽप्यथ ।

तरण्डमुण्डकोदण्डप्रकाण्डानि नडो दृढः ।। १३६ ।।

खण्डवारुण्डकाण्डानि मण्डषम्डाण्डदण्डकाः ।

आक्रीडवारबाणौ च बाणकार्षापणव्रणाः ।। १३७ ।।

पक्कणश्रवणद्रोणकङ्कणाः स्वर्णभूषणे ।

दूषणश्चरणो भारणोऽपराह्लस्तुणतोरणौ ।। १३८ ।।

वृषणं प्रवणं चूर्णं रणः किणघृते अपि ।

पारतं प्रयुतं पूर्तनिकेतान्तयुतान्यपि ।। १३९ ।।

निवातप्रयुते वृत्तं लोहितं क्ष्वेडितं शतम् ।

शुद्धान्तपलितौ प्रस्थं द्वियूथं प्रोथमेव च ।। १४० ।।

ऐरावतं दैवतमक्षतं च हस्तोपवीतव्रतपुस्तवुस्तम् ।

द्यूतायुतध्वान्तवसन्तयूथ वरुथगूथानि मुहूर्ततीर्थे ।। १४१ ।।

अलिन्दः कुकुदः कन्दाष्टापदौ गुददोहदौ ।

छदः ककुदकुन्दौ च सौधोत्सेधायुधा अपि ।। १४२ ।।

श्राद्धौषधकबन्धानि गन्धमादन चन्दनौ ।

प्स्फोटनपिधाने च लग्नराजादनाशनाः ।। १४३ ।।

वितानं यौवनं शिश्नं केतनं नलिनं दिनम् ।

आपीनपुलिने मौनमुदपानौदने धनम् ।। १४४ ।।

समानो वर्धमानश्च विमाननिधने अपि ।

हायनस्थानयानानि वस्नोद्यानासनानि च ।। १४५ ।।

वातायनाभिधानानुमानानि खलिनं तथा ।

खलीनं भवनं चैव रसोनभुवने समे ।। १४६ ।।

निपानं शयनं द्वीपिगृञ्जनौ कुणपो निपः ।

विष्टपद्वीपशष्पानि मण्डपो विटपोऽपि च ।। १४७ ।।

आवापचापसूर्पाणि दीपस्तूपोडुपाः शफः ।

कुतपोऽथ डिम्बबिम्बकलभाः ककुभो निभः ।। १४८ ।।

जम्भः कुसुम्भसंक्रामसंक्रमार्महिमान्यथ ।

ललामहेमगुल्माश्चोद्यामकामोद्यमाश्रमाः ।। १४९ ।।

कुट्टिमः कुसुमः क्षेमक्षौमौ संगम इत्यपि ।

कषायां प्रमयो वाजपेयतूर्यौ च गोमयम् ।। १५० ।।

मैरेयराजसूयौ च शल्कुल्याव्ययान्यपि ।

हिरण्यारण्यसंख्यानि मलयो वलयोऽपि च ।। १५१ ।।

समयकविये पारि हार्यः कम्बलवाह्यकः ।

संसारसीरशृङ्गानेत्रवक्त्राणि गह्वरम् ।। १५२ ।।

हिञ्जीरस्तुबरः सूत्रकूरालिञ्जरकूबराः ।

वस्त्रोपवस्त्रनीहाराः क्षत्रपद्रान्तराण्यपि ।। १५३ ।।

पवित्रातिखरावारपारबेराणि कोटरम् ।

पत्रमेढ्रसहस्त्राणि क्षीरोशीरयुगंधराः ।। १५४ ।।

अन्धकारान्तरे कर्णपूरा? वरदुरोदराः ।

पञ्जरः कुञ्जरश्चक्रचुक्रे केसरशेखरे ।। १५५ ।।

तिमिराङ्गारराष्ट्राणि जीरमञ्जीरवासराः ।

विहारवारकान्तारकासाराणि च नूपुरम् ।। १५६ ।।

कर्पूरजठरौ तक्रशरीरे शातोमरे ।

आलवालं पलं भालं प्रवालकवले मलम् ।। १५७ ।।

पलालपल्वलौ शौलबलशम्बलकुड्भलाः ।

शूलमूलाञ्चलाः शीलकुण्डलाङ्गुलमङ्गलाः ।। १५८ ।।

निगलनीलनलाः कमलं हलं मुशलसालतमालहलाहलम् ।

गरलधूमलखण्डलवल्कलं फलतले मुकुलः शकलः खलः ।। १५९ ।।

काकोलकोलाहलतैलतूलं जम्बाललाङ्गलकपालमुल्वः ।

कङ्कालगाण्डीवशरावभावा निष्टेवरावौ शवदैवपूर्वाः ।। १६० ।।

त्रिदिवताण्जवपारशवं पुनः कुलिशकर्कशकोशविषा अपि ।

कणिशमङ्कुशपाशाकरीषका दिवसरोहिषमेषविशेषकाः ।। १६१ ।।

माषाम्बरीषयूषाः प्रत्यूषोष्णीषकोषनिर्यासाः ।

आमिषवर्षमांसा मासः पनसावतंसौ च ।। १६२ ।।

वीतंसमासं चमसांसकांसाः कर्पासमाकाशमथोपवासः ।

बुसेत्थुसेचिक्कसगेहचाटु तनूरुहं देहगृहेऽथ बर्हः ।। १६३ ।।

कुस्तुम्बरुः सानुजानू जीवातुः कशिपुः चटुः ।

स्थाणुः कमण्डलुर्लक्षपटहावणुसीधुनी ।। १६४ ।।

सत्तवोऽप्यररिः कम्बुर्दोर्दार्वगुरुहिङ्गवः ।

पलाण्डुस्तितउर्वास्तुवेमप्रेमाणि लोम च ।। १६५ ।।

ब्रह्म कर्म धनुर्नामाष्टीवत्पक्ष्मविहायसी ।

शिग्नुर्भूममहिम्नी चेत्यादयः पुंनपुंसकाः ।। १६६ ।।

इति पुंनपुंसकलिङ्गसंग्रहः समाप्तः ।

(अथ स्त्रीनपुंसकलिङ्गसंग्रहः ।)

स्त्रीनपुंसकयोः शुक्तौ नखं पुष्पे च पाटलम् ।

ओषधे मधुकं विश्वं यवाग्वां तरलापि च ।। १६७ ।।

लक्षं माने मधौ कल्पं चये तु पटलं तथा ।

वसन्ततिलकं काव्ये तिन्दुकं फलवाचकम् ।। १६८ ।।

कपालं भिक्षुपात्रे स्यादङ्के क्रोडस्तथैव हि ।

अट्समासान्तनौशब्दः पूर्वार्धपदपूर्वकः ।। १६९ ।।

अनडन्तं ट्यणन्तं च कर्तृवर्जितकारके ।

अमनोज्ञाद्यचौराद्यकनन्तः स्त्रीनपुंसकः ।। १७० ।।

वक्रोष्टिकं वंशिककन्यकुब्जे कथानकं नक्तमहोदये च ।

मृगव्यचव्ये रसनं तमिस्रं पीठावहित्थे नगरं वणिज्यम् ।। १७१ ।।

शुम्बं तुम्बं कांस्यजालस्थलानि स्थाली गोला छर्द्यलाबूडवोऽथ ।

शास्त्रं गात्रं काहलं मन्दिरं च वीर्यं नासीरापरे पित्तलापि ।। १७२ ।।

कादम्बरमसूरौ तु त्वक्षीरं दम्बुना सह ।

रोदः सदः सरो दामोषस्तयट्प्रमुखा इति ।। १७३ ।।

इति स्त्रीनपुंसकलिङ्गसंग्रहः समाप्तः ।

(अथ स्वतस्त्रिलिङ्गसंग्रहः ।)

स्वतस्त्रिलिङ्गः करकोऽब्दवाचकः प्राणेषु जीवः शललः शले तु ।

केदारवाची वलजोऽनुतर्षे स्वतस्त्रिलिङ्गः सरकोऽपि दृष्टः ।। १७४ ।।

कोशः खड्गपिधाने स्याच्छिम्बायां च निरीक्ष्यते ।

कटाहकलशौ पूलकन्दलार्गलशृङ्खलाः ।। १७५ ।।

तटपुटवटवाटाः कुण्डपेटौ कपाटः कटशकटविडङ्गास्तारकस्तूणनीडौ ।

पटपिटकविषाणा आढको मण्डलस्तु कुवलपिठरछत्राः कङ्कतः कन्दलोऽपि ।। १७६ ।।

स्फुलिङ्गो मुस्तकः कुन्थ इङ्गुदो दाडिमः पुरः ।

इत्यादयस्त्रिलिङ्गाः स्युः स्वत एव विशेषणात् ।। १७७ ।।

विश्वप्रकाशाभिधनामकोषात् सारं गृहीत्वा विहितः प्रकाशः ।

जातो नु दीपान्तरतोऽत्र दीपः प्रकाशकः किं न भवेज्जनानाम् ।। १७८ ।।

(इति स्वतास्त्रिलिङ्गसंग्रहः समाप्तः ।)

इति श्रीमत्कायस्थकुलचिरवारीयमाथुरवंशभूषणश्रीगढमलसुतश्रीपरमानन्दन्दनविरचितायां परमान्दीयनाममालायां

लिङ्गानुशासनं समाप्तम् ।

(इति लिङ्गानुशासनं समाप्तम् ।)

इति परमानन्दीयनाममाला समाप्ता ।

SrP1(3)शब्दरत्नप्रदीपः

शिवं(शर-१-४) - भद्रं (शर-१-४)

शिवः(शर-१-४) - शम्भुः(शर-१-४), खिलः (शर-१-४)

शिवा(शर-१-४) - गौरी(शर-१-४) , अभया(शर-१-४) , क्रोष्ट्री(शर-१-४) , आमलकी(शर-१-४) खिलः (शर-१-४)

गौरी (शर-१-५) - शिवप्रिया (शर-१-५) , गोरोचना (शर-१-५) ,

अप्रस्रूता (शर-१-५), शुद्धोभयान्वया (शर-१-५)

हरिः(शर-१-६) - इन्द्रः(शर-१-६),भानुः(शर-१-६),विष्णुः(शर-१-६),मरुत् (शर-१-६ , सिंहः(शर-१-६),भेकः(शर-१-६),वाजी(शर-१-६) , कपिः (शर-१-६)

अंशु (शर-१-७) - भीरुः (शर-१-७), सोमः (शर-१-७) , यमः (शर-१-७) ,

शुकः (शर-१-७), सर्पः (शर-१-७), स्वर्णवर्णौ (शर-१-७)

मधुः(शर-१-८) - मद्यं(शर-१-८) , क्षौद्रं (शर-१-८), पुष्परसं (शर-१-८),

मृदुः (शर-१-८), दैत्यः (शर-१-८), चैत्रः(शर-१-८) , मधूकः (शर-१-८)

क्षुद्रा (शर-१-९) - वेश्या (शर-१-९) , नदी (शर-१-९) , मधुमक्षिका (शर-१-९) , कण्टकारिका (शर-१-९)

क्षुद्रः (शर-१-९) - असहिष्णुः (शर-१-९)

वाहः (शर-१-१०) - युग्यं (शर-१-१०) , धनः (शर-१-१०) , प्रवाहः (शर-१-१०) , मानविशेषः (शर-१-१०) , बाहुः (शर-१-१०)

हारः(शर-१-११) - इष्टकादिचयः(शर-१-११) , मुक्तागणः(शर-१-११) , मापविशेषः(शर-१-११) क्षेत्रम् (शर-१-११)

भावः(शर-१-१२) - आत्मा(शर-१-१२) , मनः(शर-१-१२) , सत्ता (शर-१-१२) , भवः(शर-१-१२), पूज्यतमः लोके(शर-१-१२),पदार्थः (शर-१-१२)

कुथा (शर-१-१३) - कन्था (शर-१-१३)

कुथः (शर-१-१३) - करिकम्बलः (शर-१-१३) , कुशः (शर-१-१३),

कीटः (शर-१-१३) , प्रातःस्नायी द्विजः (शर-१-१३)

कुतपा (शर-१-१४) - कुशः (शर-१-१४) , कालः (शर-१-१४), तिलः (शर-१-१४) , च्छागः (शर-१-१४), कम्बलः (शर-१-१४) ,सलिलं

गोः(शर-१-१५) - बाणः(शर-१-१५) , वाक्(शर-१-१५) , पशुः(शर-१-१५) , भूमिः(शर-१-१५) , दिक्(शर-१-१५) , रश्मिः(शर-१-१५) ,

जलं (शर-१-१५), अक्षि(शर-१-१५) ,स्वर्गः(शर-१-१५) ,

मातृ(शर-१-१५) , वज्रः(शर-१-१५) , अग्निः(शर-१-१५) , मुखं(शर-१-१५) , सत्यं (शर-१-१५)

भगः(शर-१-१६) - श्रीः (शर-१-१६), यशः(शर-१-१६) , सौभाग्यं(शर-१-१६) , योनिः(शर-१-१६) , कान्तिः(शर-१-१६) , महिमा(शर-१-१६)

सूर्यः(शर-१-१६) , संज्ञाविशेषः(शर-१-१६) , मृगाङ्गः (शर-१-१६)

देवः (शर-१-१७) - पर्जन्यः (शर-१-१७), राजा (शर-१-१७), गीर्व्वाणः (शर-१-१७) , व्यवहर्ता (शर-१-१७), भर्ता (शर-१-१७) , मूर्खः (शर-१-१७) ,

बालः (शर-१-१७) , जिगीषुः (शर-१-१७) ,नरः (शर-१-१७) ,

कुष्टी (शर-१-१७)

पुष्करं(शर-१-१८) - तूर्यास्यं(शर-१-१८) , असिफलं(शर-१-१८) , पद्मं(शर-१-१८) , कुञ्जराग्रकरः (शर-१-१८) , द्यौः (शर-१-१८) ,द्वीपः(शर-१-१८) ,

तीर्थः(शर-१-१८) , निमित्तं(शर-१-१८) , विशिष्टः (शर-१-१८)

कः(शर-१-१९) - मूर्धा(शर-१-१९) , चित्तं(शर-१-१९) , जलं(शर-१-१९) ,

कायः(शर-१-१९) , मुखं (शर-१-१९), ब्रह्मा(शर-१-१९) ,

मारुतः (शर-१-१९) , कामः(शर-१-१९) , कालः(शर-१-१९) ,

सुवर्णं(शर-१-१९) , द्रविणं (शर-१-१९), ध्वनिः (शर-१-१९)

हंसः(शर-१-२०) - जीवः(शर-१-२०) , राजा(शर-१-२०) , रविः(शर-१-२०) ,

धर्मः(शर-१-२०) , तपस्वी(शर-१-२०) , तुरंगमः (शर-१-२०)

सितपक्षः (शर-१-२०) , हरः(शर-१-२०)

रसः(शर-१-२१) - जलं(शर-१-२१), हर्षः(शर-१-२१), श्रृङ्गाररसः(शर-१-२१) , पुष्पादिनिर्यासः(शर-१-२१), पारदः(शर-१-२१) , विषम् (शर-१-२१)

कीलालं (शर-१-२२) - क्षीरे (शर-१-२२) , पुष्परसे (शर-१-२२), तोये

ललामः(शर-१-२४) - हये(शर-१-२४) , पुच्छे (शर-१-२४), ध्वजे (शर-१-२४),

पुण्डे(शर-१-२४) , शैले (शर-१-२४), गुणाधिके (शर-१-२४)

ललामा(शर-१-२४) - वित्ते(शर-१-२४) , धमनि(शर-१-२४) , भूषायां

(शर-१-२४)

वसुः(शर-१-२५) - सूर्यः(शर-१-२५) , वह्निः(शर-१-२५) , स्वर्च्चिः(शर-१-२५)

वसवः (शर-१-२५) - असवः(शर-१-२५) , अष्टौ धरादयः (शर-१-२५)

वसु (शर-१-२५) - रत्नं(शर-१-२५) , द्रव्यं (शर-१-२५)

वर्णाः (शर-१-२६) - अक्षराणि (शर-१-२६),श्वेतादयो गुणाः (शर-१-२६),

नाट्यामुखे गाथाः (शर-१-२६), द्विजादयः (शर-१-२६)

अर्जुनः(शर-१-२७) -शुक्लोवर्णः(शर-१-२७),पाण्डवः(शर-१-२७),स्तृणजातिः(शर-१-२७), ककुभो द्रुमः (शर-१-२७)

पट्टः (शर-१-२८) - व्रणस्यावरणं(शर-१-२८) , भूर्जाहिताक्षरः(शर-१-२८), वीरदीक्षापटः(शर-१-२८),अधिवासनम् (शर-१-२८)

बलिः(शर-१-२९) - पूजोपहारः(शर-१-२९), दानवपुङ्गवः(शर-१-२९) ,

स्त्रीमध्यभागोर्मिः(शर-१-२९) , जराकृतम् चर्म (शर-१-२९)

अन्तरम् (शर-१-३०) - रन्ध्रे (शर-१-३०) , वस्त्रे (शर-१-३०), मध्ये (शर-१-३०) , व्यवधाने (शर-१-३०), अन्तरात्मनि (शर-१-३०) , बहिर्योगे (शर-१-३०) , अवकाशे (शर-१-३०), विशेषे (शर-१-३०) , व्यसने (शर-१-३०)

अरिष्टं (शर-१-३१) - क्षेमं (शर-१-३१) , गृहं (शर-१-३१)

अरिष्टः (शर-१-३१) -वृषभासुरः (शर-१-३१) , काकः (शर-१-३१) , निम्बः(शर-१-३१)

कम्बलं(शर-१-३२) - इन्द्रियं (शर-१-३२) , कमलं (शर-१-३२)

कम्बलः(शर-१-३२) - रोमजः पटः(शर-१-३२) , गवां सास्ना (शर-१-३२)

मण्डलं(शर-१-३३) - वर्तुलं(शर-१-३३),सङ्घातः(शर-१-३३) , भूमिभागः(शर-१-३३) , सरमासुतः (शर-१-३३)

